Digitized by Sarayu Foundation Trust, Delhi and eGangotri

॥श्री काशी जीमे महल्ला घुघुरानासामा की गल्ली आदिविश्वेश्वर के पास श्रीयुत बाबू हरखचंदजी के बा[illegible] दुर्गाप्रसा॥
दकटारेकेगललेशयंत्रालयमे रघुवंशटीका संयुक्त छापागया लिखा महेस पांडे छापने वा[illegible] पूर्णवासी जिसे
लेना होय सो चांदनी चौकमे कुञ्जगली के पश्चिम फाटक के पास दुर्गाप्रसाद कटारे के दुकानमे मिलैगा॰॥
॥ सम्वत ॥ १९ २५ ॥ मी॰ कार्तिकमासिसितेपक्षे पूर्णिमा १५ भौमवासरे॰ ॥ ॥

र॰टी॰ ॥ॐ श्रीगणेशायनमः॥ मातापितृभ्यांजगतोनमोवामार्द्धजानये सद्योदक्षिणदृक्पातसंकुचद्वामदृष्टये १ अंतरायतिमिरोपशांतयेशांतपावनमचि
स॰१ न्त्यवैभवम् तन्नरंवपुषिकुञ्जरंमुखेमन्महेकिमपितुन्दिलंमहः २ शरणंकरवाणिशर्मदंतेचरणंवाणिचराचरोपजीव्यम् करुणामसृणैःकटाक्षपातैःकु
१ रुमामम्बकृतार्थसार्थवाहम् ३ वाणींकाणभुजीमजीगणदवाशासीच्चवैयासकीमन्तस्तन्त्रमरंस्तपन्नगगवीगुम्फेषुचाजागरीत् वाचामाकलयद्रहस्य
मखिलंयश्चाक्षपादस्फुरांलोकेभूद्यदुपज्ञमेवविदुषांसौजन्यजन्यंयशः ४ मल्लिनाथःकविःसोयंमन्दात्मानुजिघृक्षया व्याचष्टेकालिदासीयंकाव्यं
त्रयमनाकुलम् ५ कालिदासगिरांसारंकालिदासःसरस्वती चतुर्मुखोथवासाक्षाद्विदुर्नान्येतुमादृशाः ६ तथापिदक्षिणावर्तनाथाद्यैःक्षुण्ण
वर्त्मसु वयंचकालिदासोक्तिष्ववकाशंलभेमहि ७ भारतीकालिदासस्यदुर्व्याख्याविषमूर्च्छिता एषासञ्जीविनीटीकातामद्योज्जीवयिष्यति ८
इहान्वयमुखेनैवसर्वंव्याख्यायतेमया नामूलंलिख्यतेकिंचिन्नानपेक्षितमुच्यते ९ इहखलुसकलकविशिरोमणिःकालिदासःकाव्यंयशसेऽर्थ
कृतेव्यवहारविदेशिवेतरक्षतयेसद्यः परनिर्वृतयेकान्तासम्मिततयोपदेशयुजइत्याद्यालङ्कारिकवचनप्रामाण्यात्काव्यस्यानेकश्रेयस्साधनतांका
व्यालापांश्चवर्जयेदितिनिषेधशास्त्रस्यासत्काव्यविषयतांचपश्यन् रघुवंशाख्यंमहाकाव्यंचिकीर्षुश्चिकीर्षितार्थाविघ्नपरिसमाप्तिसम्प्रदायाविच्छे
दलक्षणफलसाधनभूतविशिष्टदेवतानमस्कारस्यशिष्टाचारपरिप्राप्तत्वादाशीर्नमस्क्रियावस्तुनिर्देशोवापितन्मुखमित्याशीर्वादाद्यन्यतमस्यप्रब
न्धमुखलक्षणत्वात्काव्यनिर्माणस्यविशिष्टशब्दार्थप्रतिपत्तिमूलत्वेनविशिष्टशब्दार्थयोश्च शब्दजालमशेषंतुधत्तेसर्वस्यवल्लभा अर्थस्वरूपमखि रामः
लंधत्तेमुग्धेन्दुशेखरइतिवायुपुराणसंहितावचनबलेनपार्वतीपरमेश्वरायत्तत्वदर्शनात्तत्प्रतिपत्त्यर्थातावेवाभिवादयते॥ ॥ ॥ १

वागर्थाविति वागर्थाविवेत्येकं पदम् इवेन समासो विभक्त्यलोपश्च पूर्वपदप्रकृतिस्वरत्वं चेति वक्तव्यम् एवमन्यत्रापि द्रष्टव्यम् वागर्थाविव शब्दार्था
विव सम्पृक्तौ नित्यसम्बन्धावित्यर्थः नित्यसम्बन्धयोरुपमानत्वेनोपादानान्नित्यः शब्दार्थसम्बन्ध इति मीमांसकाः जगतो लोकस्य पितरौ माता च पिता
च पितरौ पितामात्रेति द्वन्द्वैकशेषः मातापितरौ पितरौ मातरपितरौ प्रसूर्जनयितारावित्यमरः एतेन शर्वशिवयोः सर्वजगज्जनकतया वैशिष्ट्यमिष्टार्थ
सम्प्रदानशक्तिः परमकारुणिकत्वं च सूच्यते पर्वतस्यापत्यं स्त्री पार्वती तस्यापत्यमित्यण् टिड्ढाणञित्यनेन ङीप् पार्वती च परमेश्वरश्च पार्वतीपरमेश्वरौ
परमशब्दः सर्वोत्तमत्वद्योतनार्थः मातुरभ्यर्हितत्वादल्पाच्तरत्वाच्च पार्वतीशब्दस्य पूर्वनिपातः वागर्थप्रतिपत्तये शब्दार्थयोः सम्यक् ज्ञानार्थम् वन्दे अभि
वादये अत्रोपमालङ्कारः स्फुट एव तथोक्तम् स्वतः सिद्धेन च्छिन्नेन सम्मतेन च धर्मतः साम्यमन्येन वर्ण्यस्य वाच्यं चेदेकदोपमेति प्रायिकश्चायमलङ्का

॥श्रीगणेशाय नमः॥ वागर्थाविव सम्पृक्तौ वागर्थप्रतिपत्तये जगतःऽपितरौ वन्दे पार्वतीपरमेश्वरौ १ क्व सूर्य्यप्रभवो वंशः
क्व चाऽल्पविषया मतिः तितीर्षुर्दुस्तरं मोहादुडुपेनाऽस्मि सागरम् २॥

११ रः कालिदासोक्तकाव्यादौ भूदेवताकस्य सर्वगुरोर्मगणस्य प्र
योगाच्छुभलाभः सूच्यते तदुक्तम् शुभदो मो भूमिमयः इति वकारस्यामृतबीजत्वात्प्रचयागमनादिसिद्धिः १ सम्प्रति कविः स्वाहङ्कारं परिहरति क्व सूर्य्ये
त्यादिश्लोकद्वयेन प्रभवत्यस्मादिति प्रभवः कारणम् ऋदोरप् कर्तरि च कारके सञ्ज्ञायामिति साधुः सूर्य्यः प्रभवो यस्य सः सूर्यप्रभवः वंशः क्व अल्पो
विषयो ज्ञेयोऽर्थो यस्याः सा मे मतिः प्रज्ञा क्व द्वौ क्वशब्दौ महदन्तरालत्वं सूचयतः सूर्यवंशमाकलयितुं न शक्नोमीत्यर्थः तथा च तद्विषयप्रबन्धनिरूपणं दु
रापास्तम् इति भावः तथा हि दुस्तरं तरितुमशक्यम् ईषद्दुःसुष्वित्यादिना खल्प्रत्ययः सागरं मोहादज्ञानादुडुपेन प्लवेन उडुपं तु प्लवः कोल इत्यमरः अथ
वा चर्मावनद्धेन पानपात्रेण चर्मावनद्धमुडुपं प्लवः काष्ठं करण्डवदिति सज्जनः तितीर्षुः तरितुमिच्छुः तरतेः सन्नन्तादुप्रत्ययः अल्पसाधनैरधिका

Digitized by Sarayu Foundation Trust, Delhi and eGangotri

रम्भोनसुकर इतिभावः इदंचवंशोत्कर्षकथनंस्वप्रबन्धप्रयत्नार्थमेव तदुक्तंप्रतिपाद्यमहिम्नाचप्रतिबन्धोमहोत्तर इतिलक्षणात् २॥ मन्द इति कि ञ्चमन्दोमूढः मूढाल्पापटुनिर्भाग्यामन्दा इत्यमरः तथापिकवियशः प्रार्थीकवीनांयशः काव्यनिर्माणेनतत्प्रार्थनाशीलोऽहम् प्रांशुनाउन्नतपुरु षेणलभ्येप्राप्ये फले फलविषये लाभार्थे उद्बाहुः फलग्रहणायोच्छ्रितहस्तोवामनोह्रस्वइव खर्वोह्रस्वश्चवामन इत्यमरः उपहास्यताम् उप हासविषयताम् अर्हतीत्यर्थ्यदितिण्यत्प्रत्ययः गमिष्यामि प्राप्स्यामि ३ मन्दश्चेत्तर्हिनिवर्त्यतामयमुद्योग इत्यतआह अथवेति अथवा पक्षा न्तरे पूर्वैः सूरिभिः कविभिः वाल्मीकादिसूरिभिः कृतवाग्द्वारे कृतारामायणादिप्रबन्धरूपायावाकसेवद्वारं प्रवेशोयस्य तस्मिन् अस्मिन्सू र्यप्रभवेवंशेकुले जन्मनैकलक्षणः सन्तानोवंशः वज्रेणमणिवेधकसूचिविशेषेण वज्रंत्वस्त्रीकुलिशशस्त्रयोः मणिवेधकेरत्नभेदे इतिके

मन्दः कवियशः प्रार्थीगमिष्याम्युपहास्यताम् प्रांशुलभ्येफलेमोहादुद्बाहुरिववामनः ३ अथवाकृतवाग्द्वारेवंशेस्मि न्पूर्वसूरिभिः मणौवज्रसमुत्कीर्णेसूत्रस्येवास्तिमेगतिः ४ सोऽहमाऽऽजन्मशुद्धानामाफलोद[illegible]कर्मणां आसमुद्रक्षितीनां

शवः समुत्कीर्णेविद्धेमणौरत्नेसूत्रस्येवमेगतिः सञ्चारोऽस्तिवर्णनीयेरघुवंशेममवाक्प्रसारोस्तीत्य॥ [illegible]माऽऽनाकरथवर्त्मनां ५ र्थः ४ एवंरघुवंशेलब्धप्रवेशस्तद्वर्णतांप्रतिजानीतेसोहमित्यादिपंचभिः श्लोकैः कुलकेनाह· सोहंरघूणामन्वयंवक्ष्ये इत्युत्तरेणसम्बन्धः किंविधानांरघूणामित्यत्रउक्तानिविशेषणानियोज्यानि आजन्मनः जन्मआरभ्येत्यर्थः आङ्मर्यादाभिविध्योरित्यव्ययीभावः शुद्धानां सहसुप्सुपे तिसमासः एवमुत्तरत्रापिद्रष्टव्यम् आजन्मशुद्धानां निषेकादिसर्वसंस्कारसम्पन्नानामित्यर्थः आफलोदयम् आफलसिद्धेः कर्मयेषांतेतथोक्ता तेषां· प्रारब्धान्तगामिनामित्यर्थः आसमुद्रक्षितेरीशानां· सार्वभौमानामित्यर्थः आनाकंरथवर्त्मयेषांतेषामिन्द्रसहचारिणामित्यर्थः अत्रसर्वत्रआङे

यथाविधीति विधिमनतिक्रम्य यथाविधि यथासादृश्य इत्यव्ययीभावः तथाहुतशब्देनसुप्सुपेतिसमासः एवंयथाकामार्चितेत्यादीनामपिद्रष्टव्यम्
यथाविधिहुताअग्नयोयैस्तेषां· यथाकाममभिलाषमनतिक्रम्य अर्चितार्थिनाम् यथापराधमपराधमनतिक्रम्य दंडोयेषांते· यथाकालंकालमनतिक्रम्य
प्रबोधनशीलानां चतुर्भिर्विशेषणैर्देवतायजनातिथिसत्कारदंडधरत्वप्रजापालनसमयजागरूकत्वानिविवक्षितानि ६ त्यागायेतित्यागायसत्पा
त्रविनियोगस्त्यागस्तस्मैत्यागाय त्यागोविहापितंदानमित्यमरः सम्भृतार्थानांसंचितधनानां· ननुदुर्व्यापाराय सत्यायमितभाषिणाम् मित
भाषणशीलानां· ननुपराभवाय· यशसेकीर्त्यैयशः कीर्तिः समज्ञाचेत्यमरः विजिगीषूणांविजेतुमिच्छूनां नत्वर्थसंग्रहाय प्रजायैसन्ताना
यगृहमेधिनाम् दारपरिग्रहाणाम· ननुकामोपभोगाय अत्रत्यागायेत्यादिषुचतुर्थीतदर्थेत्यादिना तादर्थ्येचतुर्थीसमासविधानज्ञापका

यथाविधिहुताग्नीनांयथाकामार्चितार्थिनां यथापराधदंडानांयथाकालप्रबोधिनां ६ त्यागायसंभृतार्थानांसत्यायमितभा
षिणां यशसेविजिगीषूणांप्रजायैगृहमेधिनां ७ शैशवेभ्यस्तविद्यानांयौवनेविषयैषिणां वार्द्धकेमुनिवृत्तीनांयोगेनांतेतनु

च्चतुर्थी गृहेदारैर्मेधन्तेसङ्गच्छन्तेइतिगृहमेधिनः दारेष्वपिगृहाइत्यमरः जायाचगृहिणीगृहइतिहलायुधः मेधृसङ्गमेइतिधातोर्णिनिः (८ त्यजां ८॥)
एभिर्विशेषणैः परोपकारित्वंसत्यवचनत्वंयशःपरत्वंपितॄणांमातॄणांचऋणत्वंविवक्षितानि ७ शैशवइति शिशोर्भावः शैशवं तस्मिन्वयसिअभ्यस्तविद्या
नाम् एतेनब्रह्मचर्याश्रमोविवक्षितः यूनोभावोयौवनंतारुण्यम् तारुण्यंयौवनंसमइत्यमरः युवादित्वादण्प्रत्ययः तस्मिन्वयसिविषयैषिणां भोगाभिलाषिणा
म् एतेनगृहस्थाश्रमोविवक्षितः वृद्धस्यभावोवार्द्धकंवृद्धत्वम् द्वन्द्वमनोज्ञादिभ्यश्चेतिवुञ् वार्द्धकंवृद्धसंघातेवृद्धत्वेवृद्धकर्मणीतिविश्वः संघातार्थेऽत्रतुवृद्धत्वइ
इतिवक्तव्यात्साम्हिकोवुञ· तस्मिन्वार्द्धकेवयसिमुनीनांवृत्तिरिववृत्तिर्येषांतेषाम् एतेनवानप्रस्थाश्रमोविवक्षितः अन्तेशरीरत्यागकालेयोगेनपरमात्मध्या

र॰टी॰ योगः संहननोपायध्यानसंगतियुक्तिषु इत्यमरः तनुं त्यजन्तीति तनुत्यजः गात्रं वपुः संहननं शरीरं वर्ष्म विग्रहः कायो देहः क्लीबपुंसोः स्त्रियां मूर्तिस्तनुस्तनूरित्य
स॰१ मरः अन्येभ्योपि दृश्यते इति क्विप् तेषां देहत्यागिनाम् एतेन मोक्षभावो विवक्षितः ८ ॥ रघूणामिति सोहं लब्धप्रवेशः तनुवाग्विभवोपि अल्पवाणीप्रसारो
३ पि सन् तेषां गुणैस्तद्गुणैः आजन्मशुद्धादिभिः कर्णाभिः कर्णं मम श्रोत्रमागत्य चापलाय युवादित्वात्कर्मण्यण् चापलं चपलकर्म अविमृश्यकरणरूपं
कर्तुं क्रियार्थोपपदे [illegible]दिना चतुर्थी प्रचोदितः प्रेरितः सन् रघूणामन्वयं अन्वयविषयं प्रबंधं वक्ष्ये ८ कुलकम् सम्प्रति स्वप्रबंधपरीक्षार्थं सतः प्रार्थयते त
मिति तं रघुवंशाख्यं प्रबन्धं सदसतोर्गुणदोषयोर्व्यक्तिर्हेतवः कर्णाः सन्तः श्रोतुमर्हन्ति तथा हि हेम्नो विशुद्धिर्निर्दोषस्वरूपं श्यामिका लोहान्तरसंसर्गात्मको दो

रघूणामन्वयं वक्ष्ये तनुवाग्विभवोऽपि सन् तद्गुणैः कर्णमागत्य चापलाय प्रचोदितः ८ तं सन्तः श्रोतुमर्हन्ति सदसद्व्यक्तिहे
तवः हेम्नः संलक्ष्यते ह्यग्नौ विशुद्धिः श्यामिकाऽपि वा १० वैवस्वतो मनुर्नाम माननीयो मनीषिणां आसीन्महीक्षितामाद्यः प्रण
वश्छन्दसामिव ११ तदन्वये शुद्धिमति प्रसूतः शुद्धिमत्तरः दिलीप इति राजेन्दुरिन्दुः क्षीरनिधाविव १२॥

९ षो वा अग्नौ संलक्ष्यते नान्यत्र तद्वत्त्रापि सन्त एव गुणदोषविवेकाधिकारिणो नान्य इति भावः १० वर्ण्यर्थवस्तूपक्षिपति वैवस्वत इति मनस ईषिणो मनीषिणो धीरा इति विद्वांस इ
तियावत् एषो इत्यादित्वात्साधुः तेषां माननीयः पूज्यः छंदसां वेदानां छन्दः पद्ये च वेदे चेति विश्वः प्रणव ओंकार इव महीं क्षपन्ति ईशत इति महीक्षितः क्षि
तीश्वराः क्षिधातोरैश्वर्यार्थत्वात्क्विप् तुगागमश्च तेषामाद्यः आदिभूतः विवस्वतः सूर्यस्यापत्यं पुमान् वैवस्वतो नाम इति प्रसिद्धो मनुरासीत् ११ तदन्वय इति राम॰
शुद्धिरस्यास्तीति शुद्धिमान् तस्मिन् तदन्वये तस्य मनोरन्वये अन्वयो वंशो गोत्रं चाभिजनं कुलमिति हलायुधः अतिशयेन शुद्धिमान् शुद्धिमत्तरः द्विवचनवि ३
भज्येत्यादिना तरप् दिलीप इति प्रसिद्धः राजा इन्दुरिव राजेन्दुः राजश्रेष्ठः उपमितं व्याघ्रादिना समासः क्षीरनिधाविन्दुरिव प्रसूतः जातः १२ ॥ ॥

व्यूढेति व्यूढेत्यादित्रिभिः श्लोकैर्दिलीपं विशिनष्टि व्यूढं विपुलमुरो यस्य सः व्यूढोरस्कः उरः प्रभृतिभ्यः कप् व्यूढं विपुलं भद्रं स्फारं समं वरिष्ठं चेति यादवः
वृषस्य स्कन्ध इव स्कन्धौ यस्य स तथा सप्तम्युपमाने त्यादिना उत्तरपदलोपी बहुव्रीहिः उक्षा भद्रो बलीवर्द ऋषभो वृषभो वृष इत्यमरः स्कन्धो भुजशिरोंऽसोऽस्त्री
त्यमरः शालो वृक्ष इव प्रांशुरुन्नतः शालप्रांशुः उच्चप्रांशून्नतोदग्रोच्छ्रितास्तुङ्ग इत्यमरः प्राकारवृक्षयोः शालः शालः सर्जतरुः स्मृत इति यादवः महाभुजो म
हाबाहुः भुजबाहू प्रवेष्टो दोरित्यमरः आत्मकर्मक्षमं स्वव्यापारानुरूपं देहमाश्रितः प्राप्तः क्षात्त्रः क्षत्त्रसम्बन्धी धर्म इव स्थितः मूर्तिमान् पराक्रम इव स्थि
त इत्युत्प्रेक्षा १३ सर्वातिरिक्तेति सर्वातिरिक्तसारेण सर्वेभ्यो भूतेभ्योऽधिकबलेन सारो बले स्थिरांशे चेत्यमरः सर्वाणि भूतानि तेजसा अभिभवतीति सर्वा

व्यूढोरस्को वृषस्कंधः शालप्रांशुर्महाभुजः आत्मकर्मक्षमं देहं क्षात्त्रो धर्म इवाश्रितः १३ सर्वातिरिक्तसारेण सर्वतेजोभिभाविना
स्थितः सर्वोन्नतेनोर्वीं क्रांत्वा मेरुरिवाऽऽत्मना १४ आकारसदृशप्रज्ञः प्रज्ञया सदृशागमः आगमैः सदृशारंभः प्रारंभसदृशोदयः १५॥
भीमकांतैर्नृपगुणैः स बभूवोपजीविनां अधृष्यश्चाऽभिगम्यश्च यादोरत्नैरिवाऽर्णवः १६॥ ०(तेजोभिभावी तेन सर्वेभ्य उन्नतेनात्मनाश

रीरेण आत्मा देहे धृतौ जीवे स्वभावे परमात्मनीति विश्वः मेरुरिव उर्वीं क्रान्त्वा आक्रम्य स्थितः मेरुः सुमेरुर्हेमाद्री रत्नसानुः सुरालय इत्यमरः मेरावपि विशे
षणानि तुल्यानि अष्टाभिश्च सुरेन्द्राणां मात्राभिर्निर्मितो नृपः तस्मादभिभवत्येष सर्वभूतानि तेजसेति मनुवचनाद्राज्ञः सर्वतेजोभिभावित्वं ज्ञेयम् १४।
आकारेति आकारेण मूर्त्या सदृशी प्रज्ञा यस्य सः प्रज्ञया सदृशागमः प्रज्ञानुरूपशास्त्रपरिश्रमः आगमैः सदृशः आरम्भः कर्म यस्य स तथोक्तः आरभ्यत
इति आरम्भः कर्म तत्सदृश उदयः फलसिद्धिर्यस्य स तथोक्तः इति १५ भीमेति भीमैः कान्तैश्च नृपगुणैः राजगुणैः तेजः प्रतापादिभिः कुलशील दाक्षिण्यादि
भिश्च स दिलीप उपजीविनामाश्रितानां यादोभिर्जलग्राहैः यादांसि जलजन्तव इत्यमरः रत्नैश्चार्णव इवाधृष्य अनभिभवनीयश्चाभिगम्यश्चाश्रयणीयश्च बभू १०

रेखामात्रमिति नियन्तुः शिक्षकस्य सारथेश्च तस्य दिलीपस्य सम्बन्धिन्यः नेमीनां चक्रधाराणां वृत्तिरिव वृत्तिर्व्यापारो यासां ताः चक्रधारा प्रधिर्नेमिरित्यमरः च क्रं रथाङ्गं तस्यान्ते नेमिः स्त्री स्यात् प्रधिः पुमानित्यमरः प्रजाः आमनोः मनुमारभ्येत्यभिविधिः पदद्वयं चैतत्समासस्य विभाषितत्वात् क्षुण्णदभ्यस्तात्प्रहताच्च वर्त्मनः आचारपद्धतेः रेखनश्च· परमधिकमितस्ततः इत्यर्थः रेखाप्रमाणमस्येति रेखामात्रम् रेखाप्रमाणमीषदपीत्यर्थः प्रमाणे द्वयसज्दघ्नञ्मात्रच प्रत्ययः परशब्दविशेषणं चैतत् न व्यतीयुः नातिक्रान्तवत्यः कुशलसारथिप्रेरितरथनेमय इव तस्य प्रजाः पूर्वक्षुण्णमार्गं न जहुरिति भावः १७ प्रजाना मिति स राजा प्रजानां भूत्यै भूत्यर्थं वृद्ध्यर्थमेव संपदर्थम् भूतिर्भस्मनि सम्पदीत्यमरः अर्थेन सह नित्यसमासः सर्वलिङ्गता च वक्तव्या· ग्रहणक्रियाया विशेष

रेखामात्रमपि क्षुण्णादामनोर्वर्त्मनः परं न व्यतीयुः प्रजास्तस्य नियन्तुर्नेमिवृत्तयः १७ प्रजानामेव भूत्यर्थं स ताभ्यो बलिमग्रही त् सहस्रगुणमुत्स्रष्टुमादत्ते हि रसं रविः १८ सेना परिच्छदस्तस्य द्वयमेवार्थसाधनं शास्त्रेष्वकुण्ठिता बुद्धिर्मौर्वी धनुषि चा ऽऽतता १९ तस्य संवृतमन्त्रस्य गूढाकारेङ्गितस्य च॥ ११ णं चैतत् ताभ्यः प्रजाभ्यो बलिं षष्ठांशरूपं करमग्रहीत् भागधेयः करो बलिरित्यमरः।

तथाहि· रविः सहस्रगुणं यस्मिन्कर्मणि· तद्यथा· सहस्रगुणं सहस्रधा उत्स्रष्टुं दातुं उत्सर्जनक्रियाविशेषणं चैतत् रसमम्बु आदत्ते गृह्णाति रसो गन्ध रसे स्वादे तिक्तादौ विषरागयोः शृङ्गारादौ द्रवे वीर्ये देहधात्वम्बुपारदे इति विश्वः १८ सम्प्रति बुद्धिशौर्यसम्पन्नस्य तस्यार्थसाधनेषु परानपेक्षत्वमाह सेने ति तस्य राज्ञः सेना चतुरङ्गबलं परिच्छाद्यते ऽनेनेति परिच्छदः उपकरणं वभूव छत्रचामरादितुल्यमभूदित्यर्थः पुंसि संज्ञायां घः प्रायेणेति घः प्रत्य यः छादेर्घेऽद्व्युपसर्गस्येति उपधाह्रस्वः अर्थस्य प्रयोजनस्य तु साधनं द्वयमेव शास्त्रेष्वकुण्ठिता ऽव्याहता बुद्धिः व्यावृत्तेत्यपि पाठः धनुषि आतता आरोपि ता मौर्वी च मौर्वी ज्या शिञ्जिनी गुण इत्यमरः नीतिपुरःसरमेव तस्य शौर्यमभूदित्यर्थः १९ राज्यमूलं मन्त्रसंरक्षणं तस्यासीत्याह तस्येति· संवृतमन्त्रस्य· गुप्त

शोकहर्षादिसूचको भ्रुकुटीमुखरागादिराकारः इङ्गितं चेष्टितं हृदयगतविचारो वा। इङ्गितं हृद्गतो भावो बहिराकार आकृतिरिति सज्जनः। गूढे आकारइङ्गिते यस्य स्वभावचापलादीश्च मपरं परया मुखरागादिलिङ्गैर्वा चान्ये तृतीयगामिमंत्रस्य तस्य प्रारम्भा इति प्रारम्भाः सामाद्युपायप्रयोगाः प्रागित्यव्ययेन पूर्वजन्मोच्यते तत्रभवाः प्राक्तनाः सायंचिरेत्यादिना ट्युल्प्रत्ययः संस्काराः पूर्वकर्मवासना इव फलेन कार्येणानुमातुं योग्या आसन्। अत्र याज्ञवल्क्यः मंत्रमूलं यतो राज्यमतो मंत्रं सुरक्षितम्। कुर्याद्यथा तन्न विदुः कर्मणामाफलोदयादिति २०। संप्रति सामाद्युपायान्वितेरात्मरक्षादिकं कृतवानित्याह जुगोपेति। अत्रस्तः अभीतः सन् त्रस्तो भीरुभीरुकभीलुका इत्यमरः। त्रासोपाधिमन्तरेणैव त्रिवर्गसिद्धेः प्रथमसाधनत्वादेवात्मानं शरीरं जुगोप रक्षितवान्। अनातुरः अरुग्ण एव सुकृतं धर्ममुतं भेजे अर्जितवानित्यर्थः। अगृध्नुरगर्द्धनशील एव अर्थान् द्रव्यमाददे स्वीकृतवान्। गृध्नुस्तु गर्धनः लुब्धोऽभिलाषुक

फलानुमेयाः प्रारंभाः संस्काराः प्राक्तना इव २०॥ जुगोपाऽऽत्मानऽमत्रस्तो भेजे धर्मऽमनातुरः। अगृध्नुराऽऽददे सोऽर्थानऽसक्तः सुखमऽन्वऽभूत् २१॥ ज्ञाने मौनं क्षमा शक्तौ त्यागे श्लाघाविपर्ययः। गुणा गुणानुबंधित्वात्तस्य सप्रसवा इव २२॥ ॥

स्तृष्णक्समौ लोलुपलोलुभावित्यमरः। त्रसिगृधिधृषिक्षिपेः क्नुरिति क्नुप्रत्ययः। असक्तः आसक्तिरहित एव सुखमन्वभूत् २१। परस्परविरुद्धानामपि गुणानां तत्र साहचर्यमासीदित्याह ज्ञान इति। परवृत्तान्तज्ञाने सत्यपि मौनं वाङ्नियमनं तथा च यथाह कामन्दकः न्यायोपेतापि वचनं मौनं व्रतचरिष्णुतेति अथ मौनमभाषणमित्यमरः। शक्तौ प्रतीकारसामर्थ्येऽपि क्षमा अपकारसहनम्। अत्र चाणक्यः शक्तानां भूषणं क्षमेति। त्यागे वितरणे त्यागो विहापितं दानमुत्सर्जनविसर्जने। विश्राणनं वितरणं स्पर्शनं प्रतिपादनमित्यमरः। श्लाघाया विकत्थनस्य विपर्ययोऽभावः। अत्राह मनुः न दत्त्वा परिकीर्तयेदिति इत्थं तस्य गुणा ज्ञानादयः गुणैर्विरुद्धैर्मौनादिभिरनुबन्धित्वात्सहचारित्वात्सह प्रसवो जन्म येषां ते सप्रसवाः सोदरा इव अभूवन्विरुद्धा अपि गु

द्विविधं वृद्धत्वं ज्ञानतो वयसा च तत्र तस्य ज्ञानेन वृद्धत्वमाह अनाकृष्टस्येति विषयैः शब्दादिभिः रूपं शब्दो गन्धरसस्पर्शाश्च विषया अमी इत्यमरः
अनाकृष्टस्यावशीकृतस्य विद्यानां वेदवेदांगानां पारदृश्वनः पारमन्तं दृष्टवतः दृशेः क्वनिप् धर्मे रतिर्यस्य तस्य राज्ञः जरसा जरया विना विस्रसा
जरेत्यमरः षिद्भिदादिभ्योऽङिति अङ् प्रत्ययः जराया जरसन्यतरस्यामिति जरसादेशः वृद्धत्वं वार्द्धकमासीत् तस्य यूनोऽपि विषयवैराग्यादिज्ञानगुण
संपन्नस्य ज्ञानतो वृद्धमासीदित्यर्थः नायस्तु चतुर्विधवृद्धत्वमित्युक्त्वा अनाकृष्टस्येत्यादिना विशेषणत्रयेण वैराग्यज्ञानशीलवृद्धत्वान्युक्तानीत्यवोचत् २३ प्रजाना
मिति प्रजायन्त इति प्रजाः जनाः उपसर्गे च संज्ञायामित्यड् प्रत्ययः प्रजास्यात्सन्ततौ जन इत्यमरः तासां विनयाधानात् शिक्षाया आधानात्करणात्सन्मार्गप्रवर्त
नादितियावत् रक्षणाद्भयहेतुभ्यस्त्राणात् आपत्तिनिवारणादितियावत् भरणादन्नपानादिभिः पोषणात् अपि समुच्चये स राजा पिता अभूत् तासां पितरस्तु जन्म

अनाकृष्टस्य विषयैर्विद्यानां पारदृश्वनः। तस्य धर्मरतेरासीद्वृद्धत्वं जरसा विना ॥ २३ ॥ प्रजानां विनयाधानाद्रक्षणाद्भरणादपि। स पिता
पितरस्तासां केवलं जन्महेतवः ॥ २४ ॥ स्थित्यै दण्डयतो दण्ड्यान्परिणेतुः प्रसूतये। अप्यर्थकामौ तस्यास्तां धर्म एव मनीषिणः ॥ २५ ॥

मात्रकर्तारः केवलमुत्पादका एवाभूवन् जननमात्रं पितॄणां व्यापारः सदा शिक्षारक्षणादिकं तु स एव करोतीति तस्मिन् पितृत्वव्यपदेशः आह च गौत
मः स पिता यस्तु पोषक इति २४ स्थित्या इति दण्डमर्हन्तीति दण्ड्याः दण्डादिभ्यो यदिति यत्प्रत्ययः अदण्ड्यान्दण्डयन्राजा दण्ड्यांश्चैवाप्यदण्डयन् अयशो
महदाप्नोति नरकं चैव गच्छतीति शास्त्रवचनम् तान् दण्ड्यानेव स्थित्यै लोकप्रतिष्ठायै दण्डयतः शिक्षयतः प्रसूतये सन्तानायैव परिणेतुः दारान्परिगृह्ण
तो मनीषिणो विदुषो दोषज्ञस्येतियावत् विद्वान्विपश्चिद्दोषज्ञः सन्सुधीः कोविदो बुधः धीरो मनीषी इत्यमरः तस्य अर्थकामावपि धर्म एवास्तां जातौ अत्र दं
ड अर्थकामसाधनयोर्दण्डविवाहयोर्लोकस्थापनप्रजोत्पादनरूपधर्मार्थत्वेन अनुष्ठानादर्थकामावपि धर्मशेषतामापादयन् स राजा धर्मोत्तरोऽभू
दित्यर्थः आह गौतमः यथाशक्ति धर्मार्थकामेष्वसक्ते
षु धर्मोत्तरः स्यादिति २५

दुदोहेति सराजायज्ञाययज्ञंकर्तुंगांभुवंदुदोह करग्रहणेनैवरिक्तीचकारेत्यर्थः मघवादेवेन्द्रःसस्यायसस्यंवर्द्धयितुंस्वर्गंदुदोह द्युलोकान्महीतललोकेवृष्टि मुत्पादयामासइत्यर्थः क्रियार्थोपपदेत्यादनायज्ञसस्याभ्यांचतुर्थी एवमुभौसम्पदोर्विनिमयेनपरस्परमादानप्रतिदाना भ्यांभुवनद्वयंदधतुःपुपुषतुः राजायज्ञैरिन्द्रलोकमिन्द्रश्चोदकेनभूर्लोकंपुपोषेत्यर्थः उक्तञ्चदण्डनीतौराजात्वर्थान्समाहृत्यकुर्यादिन्द्रमहोत्सवम् प्रीणितोमघवायस्तुमहतींवृष्टिमा वहेदिति २६ नकिलेति राजानोऽन्यनृपाःरक्षितुर्भयेभ्यस्त्रातुस्तस्यराज्ञोयशोनानुययुः किलनानुचक्रुःखलुकुतःयद्यस्मात्कारणात्तस्करताचौर्य्यंपरस्वे भ्यःपरधनेभ्यःस्वविषयभूतेभ्योव्यावृत्तासतीश्रुतौवाचकशब्देस्थितापवृत्ता अपाहार्यान्तराभावात्तस्करशब्दएवापहतइत्यर्थः अथवाअतपन्नाप्यर्थेज्ञानेश

दुदोहगांसयज्ञायसस्यायमघवादिवं संपद्विनिमयेनोभौदधतुर्भुवनद्वयं २६ नकिलाऽनुययुस्तस्यराजानोरक्षितुर्यशः व्यावृत्ता यत्परस्वेभ्यः श्रुतौतस्करतास्थिता २७ द्वेष्योऽपिसंमतःशिष्टस्तस्याऽऽर्तस्ययथौषधं त्याज्योदुष्टःप्रियोप्यासीदङ्गुलीवोरगक्षता २८ तंवेधाविदधेनूनंमहाभूतसमाधिना तथाहिसर्वेतस्याऽऽसन्परार्थैकफलागुणाः २९॥ ((ब्दःकरोतीतिन्यायेनशब्देस्थितास्फु रितानस्वरूपतोऽस्तीत्यर्थः २७ द्वेष्यइतिशिष्टोजनोद्वेष्यःशत्रुरप्यार्तस्यरोगिणःओषधंयथाओषधमिवतस्यसंमतोऽनुमतः आसीत्दुष्टोजनःप्रियोपि प्रेमास्पदीभूतोपिउरगक्षतासर्पदष्टाअङ्गुलीव छिद्यादाहुमपिदुष्टात्मनइतिन्यायात्त्याज्यआसीत् तस्यशिष्टएवबन्धुर्दुष्टएवशत्रुरित्यर्थः २८ तस्यपरो पकारित्वमाहतमिति वेधाःस्रष्टाप्रजापतिर्वेधाइत्यमरः तंदिलीपंसमाधीयतइतिसमाधिःकारणसामग्रीमहाभूतानांयःसमाधिस्तेनविदधेससर्ज नूनं ध्रुवमित्युत्प्रेक्षा तथाहि तस्यराज्ञःसर्वेगुणारूपरसादिमहाभूतगुणवदेवपरार्थैपरप्रयोजनमेवैकंमुख्यंफलंयेषांतेतथोक्ताः आसन्महाभूतगु णोपमानेनकारणगुणाःकार्येसंक्रामंतीतिन्यायस्सूचितः २९॥

र॰टी॰ सवेलेतिवेलाः समुद्रकूलानि वेलाकूलेपिवारिधेरितिविश्वः ता एव वप्रवलयाः प्राकारवेष्टनानि यस्याः तां स्याच्चयो वप्रमस्त्रियाम् प्राकारो वरणः शालः प्रा
स॰१ चीनं प्रान्ततो वृतिरित्यमरः परितः खाताः परिखा दुर्गवेष्टनखातं खेयं तु परिखेत्यमरः अन्येष्वपि दृश्यत इति अपिशब्दात्खनेर्डप्रत्ययः अपरिखाः परिखाः
६ सम्पद्यमानाः कृताः सागराः यस्यास्ताम् अभूततद्भावे च्विः अविद्यमानमन्यस्य राज्ञः शासनं यस्यास्तां अनन्यशासनामुर्वीमेकपुरीमिव शशास अना
यासेन शासितवानित्यर्थः ३० तस्येति तस्य राज्ञः मगधवंशे जाता मगधवंशजा सप्तम्यां जनेर्डः इति डप्रत्ययः एतेनापि जात्यमुक्तं दाक्षिण्यं परच्छन्दानु
वर्तनं दक्षिणः सरलोदारपरच्छन्दानुवर्तिष्विति शाश्वतः तेन रूढं प्रसिद्धं तेन नाम्ना अध्वरस्य यज्ञस्य दक्षिणाख्या पत्नी वसु दक्षिणा इति प्रसिद्धा पत्नी

सवेलावप्रवलयां परिखीकृतसागरां अनन्यशासनामुर्वीं शशासैकपुरीमिव ३० तस्य दाक्षिण्यरूढेन नाम्ना मगधवंशजा प
त्नी सुदक्षिणेत्यासीदध्वरस्येव दक्षिणा ३१ कलत्रवन्तमात्मानमवरोधे महत्यपि तया मेने मनस्विन्या लक्ष्म्या च वसु
धाधिपः ३२ तस्यामात्मानुरूपायामात्मजन्मसमुत्सुकः विलंबितफलैः कालं स निनाय मनोरथैः ३३ सन्तानार्थाय विधये स्वभुजा

आसीत् अत्र श्रुतिः यज्ञो गन्धर्वस्तस्य दक्षिणा अप्सरस इति दक्षिणाया दाक्षिण्यं नाम कौशल्यं विजोदक्षिणात्वं प्रापकत्वं ते दक्षन्तं दक्षिणां प्रतिष्ठेति श्रुतेः ३१ कलत्रवन्तमिति वसुधा
धिपो विरोधे अन्तःपुरवर्गे महति सत्यपि मनस्विन्याः दृढचित्तया पतिचित्तानुवृत्त्या निर्बन्धं समये स्यर्थः तया सुदक्षिणया लक्ष्म्या च आत्मानं कलत्रवन्तं
भार्यावन्तं मेने कलत्रं श्रोणिभार्ययोरित्यमरः वसुधाधिप इत्यनेन वसुधया चेति गम्यते ३२ तस्यामिति स राजा आत्मानुरूपायां तस्याम् आत्मनो ज राम॰
न्म यस्यासौ आत्मजन्मा पुत्रस्तस्मिन्समुत्सुकः यद्वा आत्मनो जन्मनि पुत्ररूपेणोत्पत्तौ समुत्सुकः सन् आत्मा वै पुत्रनामासीदिति श्रुतेः विलम्बितं फलं ६
पुत्रप्राप्तिरूपं येषां तैर्मनोरथैः कदा मे पुत्रो भवेदित्याशाभिः कालं निनाय यापयामास ३३ सन्तानेति तेन दिलीपेन सन्तानम् अर्थः प्रयोजनं यस्य स त

अपत्याय सन्तानोऽपत्यगोत्रयोस्सन्ततो देवद्विक्षेचेति हैमः विधये अनुष्ठानाय स्वभुजादवतारिता अवरोपिता जगतो लोकस्यं जगल्लोके द्रू वायुक्षिति
हैमः गुर्वी धूर्भारः सचिवेषु निचिक्षिपे निहिता ३४ अथेति अथ धुरोऽवतारणानन्तरं पुत्रकाम्यया आत्मनः पुत्रेच्छया काम्याच्चेति पुत्रशब्दात्काम्य
च्प्रत्ययः अप्रत्ययादिति पुत्रकाम्यधातोरकारप्रत्ययः जनस्थापतो दम्पती जायापती राजदन्तादिषु जायाशब्दस्य दमिति निपातनात्साधुः प्रयतौ वि
धातारं ब्रह्माणमभ्यर्च्य स खलु पुत्रार्थिभिरुपास्यत इति मान्त्रिकाः गुरोः कुलगुरोर्वशिष्ठस्याश्रमं जग्मतुः पुत्रप्राप्त्युपायोपदेशापेक्षयेति शेषः
॥३५॥ स्निग्धेति स्निग्धो मधुरो गम्भीरो निर्घोषो यस्य तम् एकस्यन्दनं रथं प्रावृषि भवः प्रावृषेण्यः प्रावृषएण्य इति एण्यप्रत्ययः तं प्रावृषेण्यं

तेन धूर्जगतो गुर्वी सचिवेषु निचिक्षिपे ३४ अथाऽभ्यर्च्य विधातारं प्रयतौ पुत्रकाम्यया तौ दंपती वशिष्ठस्य गुरोर्जग्मतुराऽश्र
मम् ३५ स्निग्धगंभीरनिर्घोषमेकस्यंदनमाऽऽस्थितौ प्रावृषेण्यं पयोवाहं विद्युदैरावताविव ३६ माभूदाऽऽश्रमपीडेति प-
रिमेयपुरःसरौ अनुभावविशेषात्तु सेनापरिवृताविव ३७ ॥ ९ पयोवाहं मेघं विद्युदैरावताविव आस्थितौ आरूढौ जग्मतुरिति

पूर्वेण सम्बन्धः इरा आपः इराभूवाक्सुरास्वप्स्वित्यमरः इरावान् समुद्रस्तत्र भव ऐरावतोऽभ्रमातंगः ऐरावतोऽभ्रमातङ्गैरावणाभ्रमुवल्लभा इत्यमरः अभ्रमा
तंगत्वाच्चाभ्रस्थत्वादभ्ररूपत्वादिति क्षीरस्वामी अत एव मेघारोहणं विद्युत्साहचर्यं घटते किञ्च विद्युत् ऐरावतसाहचर्यादैरावती संज्ञा ऐरावतस्य स्त्री
ऐरावतीति क्षीरस्वामी तस्मात्सुष्ठूक्तं विद्युदैरावताविवेति एकरथारोहणोक्त्या कार्यसिद्धिबीजं दम्पत्योरत्यन्तसौमनस्यं सूचयति ३६ माभूदिति पुनः कथं
भूतौ दम्पती आश्रमपीडा माभून्मास्त्विति हेतोः माङि लुङि स्याशीरर्थे लुङ् नमाङ्योग इत्यडागमनिषेधः परिमेयपुरःसरौ परिमितपरिचारौ अनुभा
॥ ॥ ॥ वविशेषात्तु तेजोविशेषात्सेनापरिवृताविव स्थितौ ३७ ॥ ३२ ॥ ७ ॥

Digitized by Sarayu Foundation Trust, Delhi and eGangotri

सेव्यमानाविति पुनः कथम्भूतौ सुखः शीतलत्वात्प्रियः स्पर्शो येषां तैः शालनिर्यासगन्धिभिः सर्जतरुनिस्यंदगन्धवद्भिः शालः सर्जतरुः स्मृत इति शाश्वतः उत्कि
रन्ति विक्षिपन्तीति उत्किराः इगुपधेत्यादिना किरतेः कः प्रत्ययः पुष्परेणूनामुत्किरास्तैः आधूता मान्द्यादीषत्कम्पिताः वनराजयो यैस्तैर्वातैः सेव्यमानौ अने
न शैत्यं सौरभ्यं मांद्यं च विवक्षितम् ३८ मन इति रथनेमिस्वनोन्मुखैर्मेघध्वनिशंकया उन्नमितमुखैरित्यर्थः शिखण्डिभिर्मयूरैः द्विधाभिन्नाः शुद्धविकृतभे
देन आविष्कृतावस्थायां च्युताच्युतभेदेन वा षड्जो द्विविधः तस्मात् षड्जात्केका अपि द्विधाभिन्ना इत्युच्यते अत एवाह षड्जसंवादिनीरिति षट्स्थानेभ्यो जातः ष
ड्जः तदुक्तम् नासां कण्ठमुरस्तालु जिह्वां दन्तांश्च संस्पृशन् षड्भ्यः संजायते यस्मात्तस्मात्षड्ज इति स्मृतः स च तन्त्रीकण्ठजन्मस्वरविशेषः निषादर्षभगान्धा

सेव्यमानौ सुखस्पर्शैः शालनिर्यासगंधिभिः पुष्परेणूत्किरैर्वातैराधूतवनराजिभिः ३८ मनोभिरामाः शृण्वन्तौ रथनेमिस्वनो
न्मुखैः षड्जसंवादिनीः केका द्विधाभिन्नाः शिखंडिभिः ३९ परस्पराक्षिसादृश्यमदूरोज्झितवर्त्मसु मृगद्वंद्वेषु पश्यंतौ स्यंदनाबद्धदृ
ष्टिषु ४० श्रेणिबंधाद्वितन्वद्भिरस्तंभां तोरणस्रजं सारसैः कलनिर्ह्रादैः क्वचिदुन्नमिताननौ ४१ ।। रषड्जमध्यमधैवताः पञ्चमश्चेत्यमी सप्त

त्रीकण्ठोत्थिताः स्वरा इत्यमरः षड्जेन संवादिनीः सदृशीः तदुक्तं मातङ्गेन षड्जं मयूरो वदतीति मनोभिरामाः मनसः प्रियाः के मूर्ध्नि कायन्ति ध्वनन्तीति के
काः मयूरवाण्यः केका वाणी मयूरस्येत्यमरः ताः केकाः शृण्वन्ताविति श्लोकार्थः ३९ परस्परेति विश्रम्भाददूरं समीपं यथा भवति तथा उज्झितं वर्त्म यैस्ते
षु स्यन्दनाबद्धदृष्टिषु कौतुकवशाद्रथासक्तदृष्टिषु मृगी च मृगश्च मृगौ पुमान् स्त्रियेत्येकशेषः तेषां द्वन्द्वेषु मिथुनेषु स्त्रीपुंसौ मिथुनं द्वन्द्वमित्यमरः परस्परा राम
क्षिसादृश्यं पश्यंतौ द्वन्द्वशब्दसामर्थ्यान्मृगीषु सुदक्षिणाक्षिसादृश्यं दिलीपाक्षिसादृश्यं मृगेष्वित्येवं विवेक्तव्यम् ४० श्रेणीति श्रेणिबन्धात्पङ्क्तिबन्धाद्धे ७
तोः अस्तम्भाम् आधारस्तम्भरहितां तोरणं बहिर्द्वारम् तोरणोऽस्त्री बहिर्द्वारमित्यमरः तत्र या स्रग्विरच्यते तां तोरणस्रजं वितन्वद्भिः कुर्वद्भिरिवेत्यर्थः ।।

Digitized by Sarayu Foundation Trust, Delhi and eGangotri

उपेक्षणीयं जनकेवशब्दप्रयोगाभावेपि गम्योक्षेपोयम् कलनिर्ह्रादैः अव्यक्तध्वनिभिः सारसैः पक्षिविशेषैः करणैः क्वचित् उन्नमिताननौ सारसोमैथुनीकामी
गोनर्दः पुष्कराह्वयइतियादवः ४१॥ पवनस्येति प्रार्थनासिद्धिशंसिनः अनुकूलत्वादेवमनोरथसिद्धिसूचकस्यपवनस्यानुकूलत्वाद्दक्षिणत्वादभिमुखत्वात् तुरगोत्किरणैः रजोभिः अस्पृष्टान्यलकादिन्याः वेष्टनान्युष्णीषश्वराज्ञोययोस्तौ तयोक्तौ शिरसावेष्टनप्रोभिनासुतइतिवक्ष्यतिच ४२ सरसी
ष्विति सरसीषुवीचिविक्षोभशीतलम् ऊर्मिसंघट्टनेनशीतलम् स्वनिःश्वासमनुकर्तुंशीलमस्येतिस्वनिःश्वासानुकारिणम् एतेनतयोरुत्तमपद्मिनीपुंस
जातीयत्वमुक्तम् अरविन्दानामामोदमुपजिघ्रन्तौ घ्राणेनगृह्णन्तौ ४३ ग्रामेष्विति आत्मविसृष्टेषुस्वदत्तेषुयूपोनामसंस्कृतपशुवन्धायदारुविशेषः यूप
पवनस्यानुकूलत्वात्प्रार्थनासिद्धिसंशिनः रजोभिस्तुरगोत्कीर्णैरस्पृष्टालकवेष्टनौ ४२ सरसीष्वरविंदानांवीचिविक्षोभशीतलं आमो
दमुपजिघ्रंतौस्वनिश्वासानुकारिणं ४३ ग्रामेष्वात्मविसृष्टेषुयूपचिन्हेषुयज्वनाम् अमोघाः प्रतिगृह्णंतावर्घ्यानुपदमाशिषः ४४
हैयंगवीनमादायघोषवृद्धानुपस्थितान् नामधेयानिपृच्छंतौवन्यानांमार्गशाखिनां ४५॥ ९ एवंचिन्हानियेषांतेषुग्रामेषु अमोघाः सफ
लाः यज्वनांविधिनेष्टवतां यज्वातुविधिनेष्टवानित्यमरः सुयजोड्वनिपप्रत्ययः आशिषः आशीर्वादान् अर्घःपूजाविधिस्तदर्थंद्रव्यम् अर्घ्यम् पादार्घा
भ्यांचेतियत् प्रत्ययः षट्तुत्रिष्वर्घ्यमर्घार्थेपाद्यंपादार्थंवारिणीत्यमरः अर्घ्यस्यानुपदम् अर्घ्यस्वीकारानन्तरमित्यर्थः गृह्णन्तौस्वीकुर्वन्तौ पदस्य
पश्चादनुपदम् पश्चादर्थेऽव्ययीभावः अन्वगन्वक्षमनुगेऽनुपदंक्लीवमव्ययमित्यमरः ४४ हैयंगवीनमिति ह्यस्तनंगोदोहोद्भवं घृतंहैयंगवीनम् ह्यःपूर्वे
द्युः तत्तुहैयंगवीनंस्यात् ह्योगोदोहोद्भवंघृतमित्यमरः हैयंगवीनंसंज्ञायामितिनिपातः तत्सद्योघृतमादाय उपस्थितान् घोषवृद्धान् घोषआभीरपल्लीस्या
दित्यमरः वन्यानांमार्गशाखिनांनामधेयानिपृच्छन्तौ दुह्याचित्यादिनापृच्छेर्द्विकर्मकत्वम् ४५॥ ॥ ७ ॥ ॥

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

काप्यभीति व्रजतोर्गच्छतोः शुद्धवेषयोरुज्ज्वलवेषयोरुज्ज्वलनेपथ्ययोस्तयोः सुदक्षिणादिलीपयोः हिमनिर्मुक्तयोश्चित्राचन्द्रमसोरिव योगे सति कापि अनिर्वाच्या अभिख्या शोभा आसीत् अभिख्या नामशोभयोरित्यमरः आतश्चोपसर्गे इत्यङ् प्रत्ययः चित्रा नक्षत्रविशेषः शिशिरापगमे चैत्र्यां चित्रापूर्णचन्द्रमसोरिवेत्यर्थः ४६॥ तत्तदिति प्रियं दर्शनं स्वकर्मकं यस्य सो प्रियदर्शनः दर्शनीय इत्यर्थः भूपतिः पत्न्यै तत्तदद्भुतं वस्तु दर्शयन् लङ्घितमपि वाहितमप्यध्वानं न बुबुधे न ज्ञातवान् बुधः सौम्यः उपमानं यस्येति विग्रहः इदं विशेषणं तत्तद्दर्शयन्निति सुपमायोगितयैतस्य ज्ञानत्वसूचनार्थः ४७ स इति दुःखापयः प्राप्यः दुःखापमन्यैर्दुर्लभं यशो यस्य स तथोक्तः श्रान्तवाहनः दूरोपगमनात्क्लान्तयुग्यः महिष्याः सखा महिषीसखः राजाहः सखिभ्यष्टजिति टच् प्रत्ययः साहाय्यान्तरनिरपेक्ष इति भावः स राजा सायं सायंका

कुलकम्॥ काप्यभिख्या तयोरासीद्व्रजतोः शुद्धवेषयोः हिमनिर्मुक्तयोर्योगे चित्राचंद्रमसोरिव ४६ तत्तद्भूमिपतिः पत्न्यै दर्शयन्
प्रियदर्शनः अपि लंघितमध्वानं बुबुधे न बुधोपमः ४७ स दुष्प्रापयशाः प्रापदाश्रमं श्रांतवाहनः सायं संयमिनस्तस्य महर्षेर्महिषी
सखः ४८ वनांतरादुपावृत्तैः स्कंधासक्तसमित्कुशैः पूर्यमाणमदृश्याग्निप्रत्युद्यातैस्तपस्विभिः ४९ आकीर्णमृषिपत्नीनामुटजद्वाररोधिभिः

ले संयमिनो नियमवतस्तस्य महर्षेर्वशिष्ठस्याश्रमं प्रापत् प्रापपुषादीत्यादिनाङ् ४८ वनेति वनान्तरादिति वनान्तरादन्यस्माद्वनान्तरादुपावृत्तैः समिधश्च कुशाश्च फलानि च आहर्तुं शीलं येषामिति समित्कुशफलहरास्तैः आङि ताच्छील्ये इति हरतेराङ् पूर्वादच् प्रत्ययः अदृश्यैर्दर्शनायोग्यैरग्निभिर्वैतानिकैः प्रत्युद्याताः प्रत्युद्गतास्तैस्तपस्विभिः पूर्यमाणं प्रोष्यगच्छतामाहिताग्नीनामग्नयः प्रत्युद्यान्तीति श्रुतेः यथाह वामं पितरं प्रोषितवान् हवा एतमग्नयः प्रत्याधावन्ति सशकलानुदाराणि वा हरन्तीति यथैव तत्पुत्रेभ्य आहरन्तीति तिताद्गिति विज्ञायते ४९ आकीर्णमिति नीवाराणां भाग एव भागधेयः अंशः रूपनामभागेभ्यो धेय प्रत्ययो वक्तव्य इति स्वार्थे धेयप्रत्ययः भागधेयः करो बलिरित्यमरः तस्योचितैः अत एव उटजानां पर्णशालानां

द्वाररोधिभिः द्वाररोधकैर्मृगैः आविपन्नीनाम् अपत्यैरिवाकीर्णम् व्याप्तम् ५० सेकान्त इति सेकान्ते वृक्षमूलसेचनाऽवसाने मुनिकन्याभिः सेक्त्रीभिः आलवालेषु जलाधारप्रदेशेषु यदम्बु तत्पायिनाम् स्यादालवालमावालमावाप इत्यमरः। विहङ्गानां पक्षिणां विश्वासाय विस्रम्भाय समौ विश्वासविस्रम्भावित्यमरः तत्क्षणे सेकक्षणे उज्झिता वालवृक्षकाः यस्मिन् तम् अल्पार्थे कप्रत्ययः ५१ आतप इति आतपस्यात्यये अपगमे सति संक्षिप्ता राशीकृताः नीवारास्तृणधान्यानि यासु तासु नीवारास्तृणधान्यानीत्यमरः उटजानां पर्णशालानाम् अङ्गणभूमिषु चत्वरभागेषु पर्णशालोटजोऽस्त्रियामित्यमरः अङ्गणं चत्वराऽजिर इत्यमरः निषादिभिरुपविष्टैर्मृगैर्वर्तितो निष्पादितो रोमन्थश्चर्वितचर्वणं यस्मिन् आश्रमे तम् ५२ अभ्युत्थितेति अभ्युत्थिताः प्रज्वलिताः हो

अपत्यैरिव नीवारभागधेयोचितैर्मृगैः ५० सेकान्ते मुनिकन्याभिस्तत्क्षणोज्झितवृक्षकं विश्वासाय विहंगानामालवालाम्बुपायिनां ५१ आतपात्ययसंक्षिप्तनीवारासु निषादिभिः मृगैर्वर्तितरोमंथमुटजांगणभूमिषु ५२ अभ्युत्थिताग्निपिशुनैरतिथीनाऽश्रमोन्मुखान् पुनानं पवनोद्धूतैर्धूमैराऽऽहुतिगंधिभिः ५३ अथ यंतारमाऽऽदिश्य धुर्यान्विश्रामयेति सः तामवाऽरोहयत्पत्नीं रथादवरुरोह च ५४ तस्मै सभ्याः सभार्याय गोप्त्रे गुप्ततमेंद्रियाः॥

९९ मयोग्या इत्यर्थः समिद्धोऽग्नावाहुतीर्जुहोमीति वचनात् तेषामग्नीनां पिशुनैः सूचकैः पवनोद्धूतैराहुतिगन्धो येषामस्तीत्याहुतिगंधिनः तैर्धूमैराश्रमोन्मुखान् अतिथीन् पुनानं पवित्रीकुर्वाणम् ५३ कुलकम् अथेति अपाश्रमप्राप्त्यनन्तरं स राजा यन्तारं सारथिं धुरं वहन्ति धुर्याः धुर्याः धुरोयड्ढकाविति यत्प्रत्ययः हयः हयाः धुर्याः धूर्ये धौरेयधुरीणाश्च धुरन्धराः इत्यमरः धुर्यान् रथ्याश्वान् विश्रामय विनीतश्रमान् कुर्वित्यादिश्याज्ञाप्य तां पत्नीं रथादवारोहयत् अवतारितवान् स्वयं चावततार ५४ तस्मै इति सभायां साधनः सभायां यः तियप्रत्ययः गुप्ततमेन्द्रियाः अत्यन्तनियमितेन्द्रियाः मुनयः सभार्याय गोप्त्रे रक्षकाय नयः शास्त्रमेव चक्षुस्तत्त्वावबोधकं प्रमाणं यस्य तस्मै नयचक्षुषे अत एवा

र्हते प्रशंसायपूज्यायेत्यर्थः अर्हः प्रशंसायामिति शतृप्रत्ययः तस्मै राज्ञे अर्हणां पूजां चक्रुः पूजा नमस्याऽपचितिः सपर्याऽर्चार्हणाः समा इत्यमरः ५५ विधेरि ति सायंतनस्य सायंभवस्य सायंचिरमित्यादिना ट्युल्प्रत्ययः विधेर्जपहोमाद्यनुष्ठानस्यान्तेऽवसाने अरुन्धत्या अन्वासितम् पश्चादुपवेशनेनोपासितम् कर्मणि क्तः उपसर्गवशात्सकर्मकत्वम् अन्वास्यैतामित्यादिवदुपपद्यते तपोनिधिं वशिष्ठं स्वाहया देव्या अथाग्नायी स्वाहा च हुतभुक्प्रियेत्यमरः अन्वासितं हवि र्भुजमिव ददर्श समित्पुष्पकुशाम्ब्वश्ममृदन्नाक्षतपाणिकः जपं होमं च कुर्वाणो नाभिवाद्यो द्विजो भवेदिति अनुष्ठानस्य मध्ये अभिवादननिषेधाद्विधेरन्ते दर्शनमुक्तम् अन्वासितं चात्र पतिव्रताधर्मत्वेनोक्तम् नतु कर्माङ्गत्वविधेरत इति कर्मणः समाप्त्यभिधानात् ५६ तयोरिति मागधी मगधराजपुत्री राज्ञी सु

अर्हणामर्हते चक्रुर्मुनयो नयचक्षुषे ५५ विधेः सायंतनस्यान्ते स ददर्श तपोनिधिं अन्वासितमरुन्धत्या स्वाहयेव हविर्भुजं ५६॥
तयोर्जगृहतुः पादान् राजा राज्ञी च मागधी तौ गुरुर्गुरुपत्नी च प्रीत्या प्रतिननंदतुः ५७ तमातिथ्यक्रियाशान्तरथक्षोभपरिश्रमं प
प्रच्छ कुशलं राज्ये राज्याश्रममुनिं मुनिः ५८॥

(९ दक्षिणा राजा च तयोररुन्धतीवशिष्ठयोः पादान् जगृहतुः पादग्रहणमभिवादनम् समेतु पादग्रहणमभिवादनमिति यादवः पदङ्घ्रिश्चरणोऽस्त्रियामित्यमरः गुरुपत्नी च गुरुश्च कर्तारौ सा च स च तौ सुदक्षिणादिलीपौ कर्मभूतौ प्रीत्या हर्षेण प्रतिन नन्दतुः आशीर्वादादिभिः सम्भावयाञ्चक्रतुरित्यर्थः ५७ तमिति मुनिरतिथ्यर्थमातिथ्यम् अतिथेर्ञ्य इति ञ्यप्रत्ययः आतिथ्यस्य क्रियया शान्तो र थक्षोभेण यः परिश्रमो यस्य स तं तथोक्तम् राज्यमेवाश्रमस्तत्र मुनिं मुनितुल्यमित्यर्थः तं दिलीपं राज्ये कुशलं पप्रच्छ पृच्छतेर्द्विकर्मकत्वमित्युक्तम् यद्यपि राज्यशब्दः पुरोहितादिष्वंगत्वाद्राज्यकर्मवचनः तथाप्यत्र सप्ताङ्गवचनः उपपन्नं ननु शिवं शश्वत्स्वंगेषु इति उत्तरविरोधात् तथाह मनुः स्वाम्यमात्य पुरं राष्ट्रं कोशदण्डौ तथा सुहृत् सप्तैतानि समस्तानि लोकेऽस्मिन् राज्यमुच्यत इति तत्र ब्राह्मणं कुशलं पृच्छेत् क्षत्रबन्धुमनामयम् वैश्यं क्षेमं समागम्य शूद्र

मारोग्यमेवचेतिमनुवचनेसत्यपितस्यराज्ञोमहानुभावाद्ब्राह्मणोचितःकुशलप्रश्न एवकृत इत्यनुसन्धेयम् अतएवोक्तं राज्याश्रममुनिमिति ५८ अथेति अथप्रश्नानन्तरं विजितारिपुरःविजितशत्रुनगरः वदतांवक्तॄणांवरः यतश्चनिर्द्धारणमितिषष्ठी अर्थपतिःराजा अथर्वणो अथर्ववेदस्यनिधेस्तस्यमुनेःपुरोऽग्रेअर्थ्याम् अर्थादनपेताम् धर्मपथ्यर्थन्यायादनपेतइतियत्प्रत्ययः तांवाचमाददेवक्तुमुपक्रान्तवानित्यर्थः अथर्वनिधेरित्यनेनपुरोहितकृत्याभिसंत्वाततत्कार्यनिर्वाहकत्वंमुनेरस्तीतिसूच्यते यथाहकामन्दकः त्रय्यांचदण्डनीत्यांचकुशलःस्यात्पुरोहितः अथर्वविहितंकुर्यान्नित्यंशान्तिकपौष्टिकम् ५९ उपपन्नमिति हेगुरोसप्तस्वङ्गेषुस्वाम्यमात्यादिषु स्वाम्यमात्यसुहृत्कोशराष्ट्रदुर्गबलानिचसप्ताङ्गानीत्यमरः शिवंकुशलम् उपपन्नंननुयुक्तमेव नन्ववधा

अथाऽथर्वनिधेस्तस्यविजितारिपुरःपुरः अर्थ्यामर्थपतिर्वाचमाऽऽददेवदतांवरः ५९ उपपन्नंननुशिवंसप्तस्वङ्गेषुयस्यमे दैवीनांमानुषीणांचप्रतिहर्त्तात्वमाऽऽपदाम् ६० तवमंत्रकृतोमंत्रैर्दूरात्संशमितारिभिः प्रत्यादिश्यन्तइवमेदृष्टलक्ष्यभिदःशराः ६१॥ हविराऽऽवर्जितंहोतस्त्वयाविधिवदग्निषु॥

रणे प्रश्नावधारणानुज्ञानुनयामंत्रणेनन्वित्यमरः कथमित्यत्राह यस्यमेदैवीनांदेवेभ्यआगतानांदुर्भिक्षादीनांमानुषीणांमनुष्येभ्यआगतानांचौरभयादीनाम् उभयत्रापिततआगतइत्यण् टिड्ढाणञित्यादिनाङीप् आपदांव्यसनानांत्वंप्रतिहर्त्तावारयितासि अत्राहकामन्दकः हुताशनोजलंव्याधिर्दुर्भिक्षंमरणंतथा इतिपञ्चविधंदैवंमानुषंव्यसनंततः आयुक्तकेभ्यश्चौरेभ्यःपरेभ्योराजवल्लभात् पृथिवीपतिलोभाच्चनराणांपंचधास्मृतम् ६० तत्रमानुषीप्रतीकारमाहतवेति मंत्रान्कृतवान्मंत्रकृत् सुकर्मपापमंत्रपुण्येषुकृञः इतिक्विप् दूरात्परोक्षएवसंशमितारिभिःमंत्रकृतोमंत्राणांद्रष्टुःप्रयोक्तुर्वातवमंत्रैः कर्तृभिर्दृष्टंप्रत्यक्षंयल्लक्ष्यंतन्मात्रंभिन्दन्तीतिदृष्टलक्ष्यभिदोमेशराः प्रत्यादिश्यन्तइव वयमेवसमर्थाःकिमेभिःपिष्टपेषकैरितिनिराक्रियन्तइत्युत्प्रेक्षा प्रत्यादेशोनिराकृतिरित्यमरः त्वन्मंत्रसामर्थ्यादेवनःपौरुषंफलतीतिभावः ६१ संप्रतिदैविकापत्प्रतीकारमाहहविरि ६

हे होतस्त्वया विधिवदग्निषु आवर्जितं प्रक्षिप्तं हविराज्यादिकं कर्तृ अवग्रहो वर्षप्रतिबंध इति अमरः तेन विशोषिणां विशुष्यन्तानां सस्यानां वृष्टिर्भवति वृष्टि रूपेण सस्यानुपजीवयतीति भावः अत्र मनुः अग्नौ दत्ताहुतिः सम्यगादित्यमुपतिष्ठते आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजा इति ६२ पुरुषेति आयुर्जीवित कालः पुरुषायुषं वर्षशतमित्यर्थः शतायुर्वै पुरुष इति श्रुतेः अचतुरादिसूत्रेण अप्रत्ययान्तो निपातः मदीयाः प्रजाः पुरुषायुषं जीवन्तीति पुरुषायुषजीविन्यः निरातंका निर्भयाः आतंको भयमाशंकेति हलायुधः निरीतयः अतिवृष्ट्यादिरहिता इति यावत् तस्य सर्वस्य त्वद्ब्रह्मवर्चसं त्वदध्ययनसंपत्तिरेव हेतुः वृत्ता॥ ध्ययनसम्पत्तिरित्येतद्ब्रह्मवर्चसमिति हलायुधः ब्रह्मणः वर्चो ब्रह्मवर्चसं ब्रह्महस्तिभ्यां वर्चस इत्यच् अमरः अतिवृष्टिरनावृष्टिर्मूषकाः शलभाः शुकाः

वृष्टिर्भवति सस्यानामवग्रहविशोषिणां ६२ पुरुषायुषजीविन्यो निरातंका निरीतयः यन्मदीयाः प्रजास्तस्य हेतुस्त्वद्ब्रह्मवर्चसं
६३ त्वयैवं चिंत्यमानस्य गुरुणा ब्रह्मयोनिना सानुबंधाः कथं न स्युः संपदो मे निरापदः ६४ किंतु वध्वां तवैतस्यामदृष्टसदृशप्रजं॥
न मामवति सद्वीपा रत्नसूरपि मेदिनी ६५ नूनं मत्तः परं वंश्याः पिण्डविच्छेददर्शिनः॥

९९ अत्यासन्नाश्च राजानः षडेता ईतयः स्मृता इति कामन्दकः ६३ त्वयेति ब्रह्मयोनिः कारणं यस्य तेन ब्रह्मपुत्रेण गुरुणा त्वयैवम् उक्तप्रकारेण चिन्त्यमानस्य अनुध्यायमानस्य अत एव निरापदो व्यसनहीनस्य मे सम्पदः सानुबन्धाः सानुस्यूता अविच्छिन्ना इति यावत् कथं न स्युः स्युरेवेत्यर्थः ६४ संप्रति आगमनप्रयोजनमाह किन्त्विति किन्तु तव एतस्यां वध्वां स्नुषायाम् वधूर्जाया स्नुषा स्त्री चेत्यमरः अदृष्टासदृशी अनुरूपा प्रजा येन तं मां सद्वीपा रत्नानि सूयत इति रत्नसूरपि सत्सु द्विषेत्यादिना क्विप् मेदिनी नावति न प्रीणाति अवधातोः रक्षणगतिप्रीत्याद्यर्थेषु उपदेशादवनं प्रीणनं रत्नसूरित्यनेन सर्वरत्नेभ्यः पुत्ररत्नमेव श्लाघ्यमिति सूचितम् तदेव प्रतिपादयति ६५ नूनमिति मत्तः परं मदनन्तरं पंचम्यास्तसिल् पिंडविच्छेददर्शिनः पिंडदानविच्छेदमुत्प्रेक्षमाणाः वंशे भवाः वंश्याः पितरः स्वधेत्यव्ययं पि

तृभोज्येवर्त्तते· तस्याः संग्रहे तत्पराः आसक्ताः सन्तः श्राद्धं पितृकर्म्मणि पितृदाननिवापः स्याच्छ्राद्धं तत्कर्मशास्त्रतइत्यमरः प्रकामभुजः पर्य्याप्तभोजिनो न भवं
तिनूनं सत्यंकामं प्रकामं पर्य्याप्तमित्यमरः निर्द्धनास्थापद्धनं कियदपि संगृह्णन्तीतिभावः ६६ मत्परमितिमत्तः परं अन्यं मदनन्तरम् अन्याराद्रितार्थपंचमी दुर्ल
भं दुर्लभ्यं मत्वामया आवर्जितं दत्तं पयः पूर्वैः पितृभिः स्वनिः श्वासैः दुःखजैः कवोष्णमीषदुष्णं यथा तथा उपभुज्यते नूनमिति वितर्के कवोष्णमितिकुशब्दस्य क
वादेशः कोष्णं कवोष्णं मंदोष्णं कदुष्णं त्रिषु तद्वतीत्यमरः ६७ सोहमिति इज्यायागः अजयजोर्भावेक्यविनिक्यप् इज्यया विशुद्धात्मा विशुद्धचे तः प्रजालोपेनस
न्तत्यभावेन निमीलितः सोहं लोकात इतिलोकः नलोकइतिअलोकः लोकश्चासावलोकश्चेति लोकालोकश्चक्रवालः अचल इवा लोकालोकश्चक्रवालइत्यम

न प्रकामभुजः श्राद्धे स्वधासंग्रहतत्पराः ६६ मत्परं दुर्लभं मत्वा नूनमाऽऽवर्जितं मया पयः पूर्वैः स्वनिः श्वासैः कवोष्णमुपभुज्यते ६७ सोऽ
हमिज्याविशुद्धात्मा प्रजालोपनिमीलितः प्रकाशः श्चाऽप्रकाशश्च लोकालोक इवाऽचलः ६८ लोकांतरसुखं पुण्यं तपोदानसमुद्भवं सं
ततिः शुद्धवंश्या हि परत्रेह च शर्मणे ६९ तया हीनं विधातर्मां कथं पश्यन्न दूयसे सिक्तं स्वयमिव स्नेहाद्वंध्यमाश्रमवृक्षकं ७० ॥

रः प्रकाशत इति प्रकाशः श्चदेवऋणाद्धिमोचनात् न प्रकाशत इत्यप्रकाशश्च पितृऋणे विमोचनात् अस्मीतिशेषः लोकालोकोऽप्यंतः सूर्यसम्पर्काद्बहिस्तमो
व्याप्त्या च प्रकाशश्चाप्रकाशश्चेति मन्तव्यम् ६८ ननु तपोदानादिसम्पन्नस्य किमपत्यैरित्यत्राह लोकान्तरेपि समुद्भवत्यस्मादिति समुद्भवः कारणं तपोदाने
समुद्भवो यस्य तत्तपोदानसमुद्भवं यत्पुण्यं तल्लोकान्तरे परलोके एवसुखं सुखकरम् शुद्धवंशे भवा शुद्धवंश्या सन्ततिश्च परत्र परलोके इह च लोके शर्म
णे सुखाय शर्मशातसुखानि चेत्यमरः भवतीति शेषः ६९ तयेति हे विधातः स्रष्टः तया सन्तत्या हीनम् अनपत्यं मां स्नेहात्प्रेम्णाः स्वयमेव सिक्तं ज
लसेकेन वर्द्धितं वंध्यमफलं वंध्योऽफलोवकेशी चेत्यमरः आश्रमे वृक्षकमाश्रमवृक्षकं तमिव पश्यन्कथं न दूयसे परितप्यसे विधातरित्यनेन समर्थोप्यु

१०

असह्यमिति हे भगवन् अन्त्यं ऋणं पैतृकमृणम् अनिर्वाणस्य मज्जनरहितस्य निर्वाणं निर्वृतौ मोक्षे विनाशे गजमज्जने इति यादवः दन्तिनो गजस्य अरुर्मर्म
तुदतीत्यरुन्तुदं मर्मस्पृक् व्रणोऽस्त्रियामीर्ममरु इत्यमरः अरुन्तुदस्तु मर्मस्पृगिति चेत्यमरः विध्वरुषोस्तुद इति खश् प्रत्ययः अरुर्द्विषदित्यादिना मुमागमः आ
लानं गजबन्धनस्तम्भमिव असह्या सोढुमशक्या पीडा दुःखं यस्मिन् तत् अवेहि दुःसहं दुःखजनकं विद्धीत्यर्थः निर्वाणोत्थानशयनानि त्रीणि गजकर्मा
णीति पालकाव्ये ७१ तस्मादिति हे तात तस्मात्पैतृकादृणात् यथा मुच्ये मुक्तो भवामि कर्मणि लट् तथा संविधातुं कर्तुमर्हसि हि यस्मात्कारणात् इक्ष्वा
कूणाम् इक्ष्वाकुवंश्यानां तद्राजत्वाद्बहुषु अणो लुक् तेषां दुरापे दुःप्रापेऽर्थे सिद्धयस्त्वदधीनास्त्वदायत्ताः इक्ष्वाकूणामिति शेषे षष्ठी न लोकेत्यादिना कृद्योगे

असह्यपीडं भगवन्नृणमन्त्यमवेहि मे अरुन्तुदमिवाऽऽलानमनिर्वाणस्य दन्तिनः ७१ तस्माद्यथा विमुच्येऽहं तथा त्वं कर्तुमर्ह
सि इक्ष्वाकूणां दुरापेऽर्थे त्वदधीना हि सिद्धयः ७२ इति विज्ञापितो राज्ञा ध्यानस्तिमितलोचनः क्षणमात्रमृषिस्तस्थौ सुप्तमीन इव ह्रदः
७३ सोऽपश्यत्प्रणिधानेन संततेः स्तम्भकारणं भावितात्मा भुवो भर्तुरथैनं प्रत्यबोधयत् ७४ पुरा शक्रमुपस्थाय तवोर्वीं प्रति यास्यतः
आसीत्कल्पतरुच्छायामाऽऽश्रिता सुरभिः पथि ७५ धर्मलोपभयाद्राज्ञीमृतुस्नातां तु संस्मरन्॥ ९ षष्ठीनिषेधात् ७२ इतीति इति

राज्ञा विज्ञापितः ऋषिः ध्यानेन स्तिमितलोचनो निश्चलाक्षः सन् क्षणमात्रं सुप्तमीनो ह्रद इव तस्थौ ७३ स इति स मुनिः प्रणिधानेन चित्तैकाग्र्येण भावितात्मा
शुद्धान्तःकरणः भुवो भर्तुर्नृपस्य सन्ततेः स्तम्भकारणं सन्तानप्रतिबन्धकारणम् अपश्यत् अथानन्तरमेनं नृपं प्रत्यबोधयत् स्वदृष्टं ज्ञापितवानित्यर्थः एनमि राम ११
तिगतिबुद्धीत्यादिना णिकर्तुः कर्मत्वम् ७४ पुरेति पुरा पूर्वं शक्रमिन्द्रमुपस्थाय संसेव्य उर्वीं प्रति भुवमुद्दिश्य यास्यतो गमिष्यतस्तव पथि कल्पतरुच्छायामा
श्रिता सुरभिः कामधेनुरासीत् तत्रास्थितेत्यर्थः ७५ ततः किमित्यत आह धर्मलोपेति ऋतुः पुष्परज इति यादवः ऋतुः स्त्रीकुसुमेऽपि चेत्यमरः ऋतुनाति

मितेनस्नातांराज्ञींसुदक्षिणांधर्मस्यऋत्वभिगमनलक्षणस्यलोपात् भ्रंशाद्धुद्वयंतस्मात्संस्मरन् ध्यायन् मृदंगांदैवतंविप्रंघृतंमधुचतुष्पथंप्रदक्षिणानिकुर्वीतविज्ञा
तांश्चवनस्पतीन्निति शास्त्रात् प्रदक्षिणक्रियार्हायांप्रदक्षिणाकरणयोग्यायांतस्यांधेन्वांत्वंसाधुप्रदक्षिणादिसत्कारंनाचरः नाचरितवानसि व्यासक्ताहि
विस्मरन्तीतिभावः ऋतुकालाभिगमनेमनुः ऋतुकालाभिगामीस्यात्स्वदारनिरतः सदेति अकरणेदोषमाहपराशरः ऋतुस्नातांतुयोभार्यांस्वस्थःसन्नोप
गच्छति वालगोघ्नापराधेनविध्यतेनात्रसंशयइति ७६ अवजानासीति यस्मात्कारणात्मांत्वम् अवजानासितिरस्करोषिअतः कारणात्मत्प्रसूतिंमम
सन्ततिमनाराध्यअसेवयित्वातेतवप्रजानभविष्यतीतिसासुरभिस्त्वांशशाप शापआक्रोशः ७७ कथंतदस्माभिर्नश्रुतमित्याह सशापइति हेराजन्स

प्रदक्षिणक्रियातीतस्तस्याःकोपमऽजीजनः ७६ अवजानासिमांयस्मादतस्तेनभविष्यति मत्प्रसूतिमनाराध्यप्रजेतित्वांशशा
पसा ७७ सशापोनत्वयाराजन्नचसारथिनाश्रुतः नदत्याऽऽकाशगंगायाःस्रोतस्युद्दामदिग्गजे ७८ ईप्सितंतदवज्ञानाद्विद्धिसार्ग
लमाऽऽत्मनः प्रतिबध्नातिहिश्रेयःपूज्यपूजाव्यतिक्रमः ७९ हविषेदीर्घसत्रस्यसाचेदानींप्रचेतसः भुजंगपिहितद्वारंपातालमऽधि।

शापः त्वयानश्रुतःसारथिनाचनश्रुतःअश्रवणेहेतुमाह क्रीडार्थमागतोउद्दामानःदाम्नउद्गतादिग्गजायस्मिन् तस्मिन्तथोक्ते आकाश॥ तिष्ठति ८०
गंगायाःमन्दाकिन्याःस्रोतसिप्रवाहेनदतिध्वनतिसति ७८ अस्तुप्रस्तुतेकिमायातमित्यत्राह ईप्सितमिति तदवज्ञानात् तस्याःधेन्वाःअवज्ञानादपमानात्
आत्मनःस्वस्यआप्तुमिष्टम्ईप्सितंमनोरथम् आप्नोतेःसन्नन्तात्क्तः ईकारश्चसार्गलंसप्रतिबन्धंविद्धिजानीहि तथाहि पूज्यपूजाव्यतिक्रमोऽतिक्रमणं
श्रेयःप्रतिबध्नातिहि ७९ नहिगत्वातामाराधयामिसाचाकथंचिरागमिष्यतीत्याशङ्क्यानकर्त्तव्येत्याह हविषइति सासुरभिरिदानींदीर्घसत्रंचिरकालसा
ध्योयागविशेषोयस्यतस्यप्रचेतसोहविषेदध्याज्याहिहविरर्थंभुजङ्गपिहितद्वारंभुजङ्गरुद्धद्वारं ततोदुःप्रवेशंपातालमधितिष्ठतिपातालेतिष्ठतीत्यर्थः

Digitized by Sarayu Foundation Trust, Delhi and eGangotri

तर्हि कामतिरित्याह सुतामिति तस्याः सुरभेरियं तदीया तां सुतां सुरभेः प्रतिनिधिं कृत्वा शुचिः सहपत्न्या वर्तत इति सपत्नीकः सन् नद्यृतश्चेति कप्प्रत्ययः आराध
यहि यस्मात्कारणात्सा प्रीता तुष्टा सती कामान्दोग्धीति कामदुघा भवति दुहः कप्घश्चेति कप्प्रत्ययः ८१ इतीति इतिवादिनो वदत एव होतुर्हवनशीलस्यात
न्निति तृन्प्रत्ययः अस्य मुनेराहुतीनां साधनं कारणं नन्दयतीति व्युत्पत्त्या नन्दिनी नाम अनिन्द्या अगर्ह्या प्रशस्ता धेनुर्वनादाववृते प्रत्यागता अव्याक्षेपो भवि
ष्यन्त्याः कार्यसिद्धेर्हि लिङ्गमिति भावः ८२ सम्प्रति धेनुं विशिनष्टि ललाटेति पल्लववत्स्निग्धा चासौ पाटला च सन्ध्यायामेतद्धि प्रोषणं योज्यं ललाटे उद
यो यस्य स ललाटोदयस्तम् आभुग्नम् ईषद्वक्रम् आविद्धं कुटिलं भुग्नं वेल्लितं वक्रमित्यपीत्यमरः ऊद्नि श्वेतेति निपातं तस्य तनुत्वम् श्वेतरोमाण्येव अङ्कस्तं

सुतां तदीयां सुरभेः कृत्वा प्रतिनिधिं शुचिः आराधय सपत्नीकः प्रीता कामदुघा हि सा ८१ इति वादिन एवास्य होतुराहुतिसाधनं
अनिन्द्या नन्दिनी नाम धेनुराववृते वनात् ८२ ललाटोदयमाभुग्नं पल्लवस्निग्धपाटला बिभ्रती श्वेतरोमाङ्कं सन्ध्येव शशिनं नवम् ८३
भुवं कोष्णेन कुण्डोध्नी मेध्येनावभृथादपि प्रस्रवेणाभिवर्षन्ती वत्सालोकप्रवर्तिना ८४ रजःकणैः खुरोद्धूतैः स्पृशद्भिर्गात्रमन्तिकात्॥
तीर्थाभिषेकजां शुद्धिमादधाना महीपतेः ८५ ॥

१ बिभ्रती नवं शशिनं बिभ्रती सन्ध्येव स्थिता ८३ भुवमिति कोष्णेन किञ्चिदुष्णेन
कवं चोष्णमिति चकारात्कादेशः अवभृथादपि अवभृथस्नानादपि मेध्येन शुद्धेन वत्सालोकेन प्रदर्शनेन वर्तिना प्रवहता प्रस्रवेण क्षीराभिस्यन्देनेन
भुवमभिवर्षन्ती कुण्डमिव ऊधः आपीनं यस्याः सा कुण्डोध्नी ऊधस्तु क्लीबमापीनमित्यमरः ऊधसोनङ् इत्यनङादेशः बहुव्रीहे रूधसो ङीषिति ङीष् ८४ रजइ
ति खुरोद्धूतैरन्तिकात्समीपे गात्रं स्पृशद्भिः दूरान्तिकार्थेभ्यो द्वितीया चेति कारात्पञ्चमी रजसः कणैः महीं क्षयतरिष्ट इति महीक्षित् तस्य तीर्थाभिषेकेण जा
तां तीर्थाभिषेकजां शुद्धिमादधाना कुर्वाणा एतेन वायव्यस्नानमुक्तम्॥ उक्तं मनुना आग्नेयं भस्मना स्नानमवगाह्य तु वारुणम् आपोहिष्ठेति च ब्राह्मं वायव्यं

तामिति निमित्तज्ञः शकुनज्ञः तपोनिधिर्वशिष्ठः पुण्यं दर्शनं यस्यास्तां धेनुं दृष्ट्वा आशंसितमनोरथः नपुंसके भावे क्तः तत्रावंध्यं सफलम् आशंसिता वन्ध्यं प्रार्थनं यस्य तम् अवंध्यमनोरथमित्यर्थः याजयितुं योग्यं याज्यं पार्थिवं पुनरब्रवीत् ८६ अदूरेति हे राजन् आत्मनः कार्यस्य सिद्धिम् अदूरवर्तिनीं शीघ्रभाविनीं विगणय विद्धि यद्यस्मात्कारणात्कल्याणी मङ्गलमूर्त्तिः बह्वादिभ्यश्चेति ङीप् इयं धेनुः नाम्नि कीर्त्तिते कथिते सत्येव उपस्थिता ८७ वन्येति वने भवं वन्यं कन्दमूलफलादिकं वृत्तिराहारो यस्य तथाभूतस्सन् इमां गां शश्वत्सदा आप्रसादादविच्छेदेनेत्यर्थः आत्मनस्तव कर्तुरनुगमनेनानुसरणेन अभ्यसनेन अनुष्ठानुरभ्यासेन विद्यामिव प्रसादयितुं सुप्रसन्नां कर्तुमर्हसि योग्यो भवसि ८८ अनुसरणप्रकारमाह प्रस्थितेति अस्याम् प्रस्थितायां प्रतिष्ठेथाः प्रयाहि समवप्रविभ्यः स्थ इत्यात्मने

तां पुण्यदर्शनां दृष्ट्वा निमित्तज्ञस्तपोनिधिः याज्यमाऽऽशंसितावंध्यप्रार्थनं पुनरब्रवीत् ८६ अदूरवर्त्तिनीं सिद्धिं राजन्विगणयात्मनः
उपस्थितेयं कल्याणी नाम्नि कीर्तित एव यत् ८७ वन्यवृत्तिरिमां शश्वदात्मानुगमनेन गां विद्यामभ्यसनेनेव प्रसादयितुमर्हसि ८८॥
प्रस्थितायां प्रतिष्ठेथाः स्थितायां स्थितिमाऽऽचरेः निषण्णायां निषीदाऽस्यां पीताम्भसि पिबेरपः ८९ वधूर्भक्तिमती चैनामर्चिता
माऽऽतपोवनात् प्रयाता प्रातरन्वेतु सायं प्रत्युद्व्रजेदपि ९० इत्याऽऽप्रसादादस्यास्त्वं परिचर्यापरो भव॥ ११ पदम् स्थितायां निवृत्तिगतिका

यां स्थितिमाचरेः स्थितिं कुरु तिष्ठेत्यर्थः निषण्णायाम् उपविष्टायां निषीद उपविश विध्यर्थे लोट् पीतम् अम्भो यया तस्यां पीताम्भसि सत्यामपः पिबेः पिब ८९ वधूरिति वधूर्जाया भक्तिमती प्रयता सती गन्धादिभिरर्चितामेनां गां प्रातः आ तपोवनात् अन्वेतु अनुगच्छतु आङ् मर्यादायाम् परद्वयं चैतत् सायमपि प्रत्युद्व्रजेत् प्रत्युद्गच्छेत् विध्यर्थे लिङ् ९० इतीति इत्यनेन प्रकारेण त्वमाप्रसादात् प्रसादपर्यन्तम् आङ् मर्यादाभिविध्योरित्यस्य वैभाषिकत्वादसमासत्वे अस्याः धेन्वाः परिचर्यापरः शुश्रूषापरो भव तव अविघ्नमस्तु विघ्नस्याभावोऽस्तु अव्ययं विभक्तीत्यादिना अर्थाभावेऽव्ययीभावः पितेव पुत्रिणां सत्पुत्रवतां प्रसंशायामिनिप्रत्य

र॰टी॰ यः धुर्यग्निस्थयाक्लिष्टत्याशीरर्थेलिङ् एर्लिङीत्याकारस्यैकारादेशः त्वत्सदृशोभवतु पुत्रोऽस्त्विति भावः ९१ तथेतिदेशकालज्ञोदेशोऽग्निसन्निधिः कालोऽ
स॰१ ग्निहोत्रावसानसमयः वशिष्ठस्यदेशकालोत्पन्नमार्षज्ञानमव्याहतंइतिजानन् अतएवप्रीतिमान् शिष्योऽन्तेवासीराजाछात्रान्तेवासिनौशिष्यइत्यमरः
२३ सपरिग्रहः सपत्नीकः पत्नीपरिजनादानमूलशापाः परिग्रहाइत्यमरः आनतोविनयनम्रः सन् शासितुः गुरोरादेशम् आज्ञांतथेतिप्रतिजग्राहस्वीचका
र ९२ अथेति अथप्रदोषेरात्रौदोषज्ञोविद्वान् विद्वान्विपश्चिद्दोषज्ञइत्यमरः सुनृतवाक् सत्यप्रियवाक् प्रियंसत्यंचसूनृतमितिहलायुधः स्रष्टुःसूनुः
ब्रह्मपुत्रोमुनिः अनेनप्रकृतकार्यनिर्वाहकत्वंसूचयति उदितश्रियंविशांपतिंमनुजेश्वरम् द्वौविशौवैश्यमनुजावित्यमरः संवेशायनिद्रायैस्वापायविस

अविघ्नमस्तुतेस्थेयाःपितेवधुरिपुत्रिणां ९१ तथेतिप्रतिजग्राहप्रीतिमान्सपरिग्रहः आदेशंदेशकालज्ञःशिष्यःशासितुरानतः ९२ अथप्रदोषेदोषज्ञःसंवेशायविशांपतिं सूनुःसूनृतवाक्स्रष्टुर्विससर्जोदितश्रियम् ९३ सत्यामपितपःसिद्धौनियमापेक्षयामुनिः कल्पवित्कल्पयामासवन्यामेवास्यसंविधां ९४ निर्दिष्टांकुलपतिनासपर्णशालामध्यास्यप्रयतपरिग्रहद्वितीयः तच्छिष्याध्ययननिवेदितावसानांसंविष्टःकुशशयनेनिशांनिनाय ९५॥ ९१ सर्ज्जस्यान्निद्राशयनंस्वापःस्वप्नःसंवेशइत्यपीत्यमरः ९३

सत्यामिति कल्पवित् व्रतप्रयोगाभिज्ञोमुनिः तपःसिद्धौसत्यामपितपसैवराजयोग्याहारसंपादनसामर्थ्येसत्यपीत्यर्थः नियमापेक्षयातदाप्रभृत्येवव्रत
चर्यापेक्षयाअस्यराज्ञोवन्यामेव संविधीयतेऽनयेतिसंविधांकुशादिशयनसामग्रीं आतश्चोपसर्गइतिकप्रत्ययः अकर्त्तरिचकारकेसञ्ज्ञायामिति
कर्माद्यर्थत्वंकल्पयामास सम्पादयामास ९४ निर्दिष्टामितिसराजाकुलपतिनामुनिकुलेश्वरेणवशिष्ठेननिर्दिष्टांपर्णशालामध्यास्याधिष्ठानंकृत्वे २३
त्यर्थः अधिशीङिन्त्यादिनाकर्मणिद्वितीयाप्रयतोनियतः परिग्रहः पत्नीद्वितीयोस्येतिसतथोक्तः कुशानांशयनेसंविष्टःसुप्तः सन्तस्यवशिष्ठस्यशि

व्याख्यानमध्ययनेनापररात्रौवेदपाठेननिवेदितमवसानंयस्यास्तांनिशांनिनायगमयामास अपररात्रावध्ययनेमनुः निशान्तेनपरिश्रान्तोब्रह्माधीत्यपु
नःस्वपेत् नचापररात्रमधीत्यपुनःस्वपेदितिगोतमश्च महर्षेर्गीतिवृत्तमेतत् म्नौज्रौगस्त्रिरदशयतिःप्रहर्षिणीयम् ९५ इतिश्रीमहामहोपाध्यायकोला
चलमल्लिनाथसूरिविरचितायांरघुवंशटीकायांसञ्जीविनीसमाख्यायांप्रथमःसर्गः १॥ श्रीगणेशायनमः आशासुराशीभवदंगलीलाभासेव
दासीकृतदुग्धसिंधुं मंदस्मितैर्निंदितशारदेंदुं वंदेऽरविंदाननसुंदरीत्वां १ अथनिशानयनानंतरं यशोधनः प्रजानामधिपतिः प्रजेश्वरः प्रभातेप्रा
तःकालेजाययासुदक्षिणयाप्रतिग्राहयित्वाप्रतिग्राहितेस्वीकारितेगंधमाल्येययासाप्रतिग्राहिताधेन्वासाप्रतिग्राहितगंधमाल्यांतथोक्तांपी
तंपानमस्यास्तीतिपीतः पीतवानित्यर्थः अर्शआदिभ्योऽजित्यच्प्रत्ययः पीतागावोभुक्ताब्राह्मणाइतिमहाभाष्येदर्शनात् पीतः प्रतिबद्धोवत्सोयस्यास्तांमृ

इतिश्रीरघुवंशेमहाकाव्येकालिदासकृतौप्रथमःसर्गः १॥ श्रीगणेशायनमः॥ अथप्रजानामधिपःप्रभातेजायाप्रतिग्रा
हितगंधमाल्यां वनायपीतप्रतिबद्धवत्सांयशोधनोधेनुमृषेर्मुमोच १ तस्याःखुरन्यासपवित्रपांसुमपांसुलानांधुरिकीर्तनी

षेर्धेनुंवनायवनंगंतुंमुमोचक्रियार्थोपपदेत्यादिनाचतुर्थी जायापदसामर्थ्यात्सुदक्षिणायाःपुत्रजननयोग्यत्वमनुसंधेयं तथाहिश्रुतिःपतिर्जायां
प्रविशतिगर्भोभूत्वासमातरं तस्यांपुनर्नवोभूत्वादशमेमासिजायते तज्जायाजायाभवतियदस्यांजायतेपुनरिति यशोधनइत्यनेनपुत्रवत्ताकीर्ति
लोभात् राजागर्हेगोरक्षणेप्रवृत्तइतिगम्यते अस्मिन्सर्गेवृत्तमुपजातिः अनंतरोदीरितलक्ष्मभाजौपादौयदीयावुपजातयस्ताइति १ तस्याइ
ति पांसवोदोषाआसांसंतीतिपांसुलाःस्वैरिण्यः स्वैरिणीपांसुलाचस्यादित्यमरः सिध्मादिभ्यश्चेतिलच्प्रत्ययः अपांसुलानांपतिव्रतानांधुरिअग्रेकी
र्तनीयापरिगणनीयामनुष्येश्वरधर्मपत्नीखुरन्यासैःपवित्रपांसुःपवित्राःपांसवोयस्यतंरेणुर्द्वयोःस्त्रियांधूलिःपांसुर्नानद्वयोरजइत्यमरःतस्याः

Digitized by Sarayu Foundation Trust, Delhi and eGangotri

धेनोर्मार्गंस्मृतिर्मन्वादिवाक्यंश्रुतेर्वेदस्यार्थमभिधेयमिवान्वगच्छदनुसृतवती चयथास्मृतिः श्रुतिलक्षणमेवार्थमनुसरतितथासापिगोखुर क्षुण्णमे
वमार्गमनुससारेत्यर्थः धर्मपत्नीत्यत्राश्वघासादिवत्तादर्थ्येषष्ठीसमासः प्रकृतिविकाराभावात्र्यांसुल्लपथनिदनावव्ययः यांसुलानामितिविरोधालंकारोध्वन्यते २
निवर्त्येतिदयालुः कारुणिकः स्याद्दयालुः कारुणिकइत्यमरः स्पृहीगृहीत्यादिनाऽऽलुच्प्रत्ययः यशोभिः सुरभिः मनोज्ञः सुरभिःस्यान्मनोज्ञेपीतिविश्वः सराजा
नांदयितांनिवर्त्यसौरभेयींकामधेनुसुतांनंदिनींधरंतीतिधराः पचाद्यच्पयसांधराःस्तनाःस्त्रीस्तनाब्दौपयोधरावित्यमरः अपयोधरापयोधराःसंपद्यमानाःपयो
धरीभूताः अभूततद्भावेच्विः कुगतिप्रादयइतिसमासःपयोधरीभूताःचत्वारः समुद्राः यस्याः तांअनेकमन्यपदार्थइत्यनेकपदग्रहणसामर्थ्यात्त्रिपदो

मार्गंमनुष्येश्वरधर्मपत्नीश्रुतेरिवाऽर्थंस्मृतिरन्वगच्छत् २ निवर्त्यराजादयितांदयालुस्तांसौरभेयींसुरभिर्यशोभिः
पयोधरीभूतचतुःसमुद्रांजुगोपगोरूपधरामिवोर्वीं ३ व्रताययतेनाऽनुचरेणधेनोर्न्यषेधिशेषोप्यऽनुयायिवर्गः नचाऽन्यत
स्तस्यशरीररक्षास्ववीर्यगुप्ताहिमनोःप्रसूतिः ४ आस्वादवद्भिःकवलैस्तृणानांकंडूयनैर्दंशनिवारणैश्च॥ ॥ ॥

बहुव्रीहिः गोरूपस्यधरामुर्वीमिवजुगोपररक्षभूतलरक्षणप्रबलेनैवररक्षेतिभावः ३ व्रतायेतिव्रतायधेनोरनुचरेणनतुजीवनीयेतिभावःते
नदिलीपेनशेषोऽवशिष्टोप्यनुयायिवर्गः अनुचरवर्गोन्यषेधिनिवर्तितः शेषत्वंसुदक्षिणापेक्षयाकथंतर्हि आत्मरक्षणमतआह नचेति तस्य
दिलीपस्यशरीररक्षाचान्यतःपुरुषांतरान्नकुतोहियस्मात्कारणान्मनोःप्रसूयतइतिप्रसूतिःसंततिःस्ववीर्यगुप्तास्ववीर्येणैवरक्षिता नहिस्वप
रनिर्वाहकस्यपरापेक्षेतिभावः ४ आस्वादवद्भिरिति सम्राड्मंडलेश्वरःयेनेष्टंराजसूयेनमंडलस्येश्वरश्चयः शास्तियश्चाज्ञयाराज्ञःससम्राड एमः
थराजकमित्यमरः सराजाआस्वादवद्भिःरसवद्भिःस्वादयुक्तैरित्यर्थः तृणानांकवलैर्ग्रासैः कंडूयनैःखर्जनैर्दंशानांवनमक्षिकाणांनिवारणैश्च॥ १४

दंशस्तु वनमक्षिकेत्यमरः अव्याहतैरप्रतिहतैः स्वैरगतैः स्वच्छंदगमनैः श्चतस्याः धेन्वाः समाराधनतत्परः शुश्रूषासक्तोऽभूत् तदेवपरंप्रधानंयस्येतितत्परः
तत्परेप्रसितासक्ताविप्यमरः ५ स्थितइति भूपतिस्तांगांस्थितांसतींस्थितः सन् स्थितिरूर्ध्वावस्थानंप्रयातांप्रस्थितांउच्चलितः प्रस्थितः निषेदुषींनिषस्तां
उपविष्टामित्यर्थः भाषायांसदवसश्रुवइतिक्वसुप्रत्ययः उगितश्चेतिङीप् आसनबंधेउपवेशनेधीरःस्थिरः उपविष्टः सन् जलमाददानांपिबंतींजला
भिलाषीसन्पिबन्नित्यर्थः इत्यंछायेवान्वगच्छत् अनुसृष्टवान् ६ सइति न्यस्तानिसमुज्झितानिपरित्यक्तानिचिन्हानिछत्रचामरादीनियस्याः सातथाभू
तामपितेजोविशेषेणप्रभावातिशयेनानुमितांसर्वथाराजाएवायंभवेदित्यूहितांराज्यलक्ष्मींदधानःसराजाअनाविष्कृतदानराजिः वहिरप्रकटितमदरेखः
अंतर्गतामदावस्थायस्यसतथाभूतोद्विपेंद्रइवासीत् ७ लतेति लतानांवल्लीनांप्रतानैःकुटिलतंतुभिः उन्नमय्यग्रथिताःयेकेशास्तैरुपलक्षितःइ

अव्याहतैःस्वैरगतैःसतस्याःसम्राट्समाराधनतत्परोऽभूत् ५ स्थितःस्थितामुच्चलितःप्रयातांनिषेदुषीमासनबंधधीरः
जलाभिलाषीजलमाददानांछायेवतांभूपतिरन्वगच्छत् ६ सन्यस्तचिन्हामपिराज्यलक्ष्मींतेजोविशेषानुमितांदधानः आ
सीदनाविष्कृतदानराजिरंतर्मदावस्थइवद्विपेंद्रः ७ लताप्रतानोद्ग्रथितैःसकेशैरधिज्यधन्वाविचचारदावं रक्षापदेशान्मुनि
होमधेनोर्वन्यान्विनेष्यन्निवदुष्टसत्वान् ८ विसृष्टपार्श्वानुचरस्यतस्यपार्श्वद्रुमाःपाशभृतासमस्य॥ ९ त्थंभूतलक्षणेतृतीया सराजा
अधिज्यमारोपितमौर्वीकंधनुर्यस्यासोऽधिज्यधन्वासन् धनुषश्चेत्यनङादेशः मुनिहोमधेनोः रक्षापदेशात् रक्षणव्याजात् वन्यान् वनेभवान् दुष्टसत्वान्
दुष्टजंतून् द्रव्येष्वव्यवसायेषुसत्वमस्त्रीतुजंतुष्वित्यमरः विनेष्यन् शिक्षयिष्यन्निवदावंवनंविचचार वनेचवनवन्हौचदवोदावइतिहैम्यनइतियादवः व
नेसंचचारेत्यर्थः देशकालाध्वगंतव्याः कर्मसंज्ञास्त्वकर्मणामितिदावस्यकर्मत्वं ८ विसृष्टेत्यादिषड्भिः श्लोकैस्तस्यमहामहिमतयाद्रुमादयोपिराजोपचारं
चक्रुरित्याह विसृष्टेति विसृष्टाःपार्श्वानुचराः पार्श्ववर्तिनोजनाःयेनतस्यपाशभृतावरुणेनसमस्यतुल्यस्य अनुभावोऽनेनसूचितःतस्यराज्ञः पार्श्वयो

Digitized by Sarayu Foundation Trust, Delhi and eGangotri

र॰टी॰ द्रुमाः उन्मदानां उत्कटमदानां वयसां खगानां खगबाल्यादिनोर्वय इत्यमरः विरावैरालोकशब्दं आलोकस्य शब्दं वाचकं आलोकयेति शब्दमित्यर्थः उदीरया
स॰२ मासुरिव अवदन्निवेत्युत्प्रेक्षा ९ मरुदिति मरुत्प्रयुक्ता वायुना प्रेरिता वाललताः आरात्समीपे अभिवर्त्तमानां आराद्दूरसमीपयोरित्यमरः मरुतः वायोः स
१५ खा मरुत्सखः अग्निः सखा भातीति मरुत्सखाभः आतश्चोपसर्गे इति कप्रत्ययः अर्च्यं पूज्यं तं दिलीपं प्रसूनैः पुष्पैः पौरकन्याः पौराश्च ताः कन्याः आचा
रार्थैर्लाजैरिवावाकिरन् तस्योपरि विक्षिप्तवंत्य इत्यर्थः सखा हि सखायमागतमुपचरतीति भावः १० धनुर्भृत इति धनुर्भृतोऽप्यस्य राज्ञः एतेन भयसंभा
वना दर्शिता तथापि विशंकैर्निर्भीकैरंतःकरणैः कर्तृभिः दयया अनुपरमेन आर्द्रभावो अभिप्रायो यस्य तत् दयार्द्रभावं तदाख्यातं दयार्द्रभावमेतदि

उदीरयामासुरिवोन्मदानामाऽऽलोकशब्दं वयसां विरावैः ९ मरुत्प्रयुक्ताश्च मरुत्सखाभं तमर्च्यमाऽऽरादभिवर्त्तमानं अ
वाकिरन्वाललताः प्रसूनैराऽऽचारलाजैरिव पौरकन्याः १० धनुर्भृतोऽप्यस्य दयार्द्रभावमाऽऽख्यातमंऽतःकरणैर्विशंकैः
विलोकयन्त्यो वपुराऽऽपुरक्ष्णां प्रकामविस्तारफलं हरिण्यः ११ स कीचकैर्मारुतपूर्णरंध्रैः कूजद्भिराऽऽपादितवंशकृत्यं शुश्रा
व कुंजेषु यशः स्वमुच्चैरुद्गीयमानं वनदेवताभिः १२॥ ११ त्याख्यातमित्यर्थः भावः सत्तास्वभावाभिप्रायचेष्टात्मजन्मस्वित्यमरः तथावि
धं वपुर्विलोकयंत्यो हरिण्यः अक्ष्णां प्रकामविस्तारस्यात्यंतविशालतायाः फलमापुः विमलं कलुषीभवच्चेतः कथयन्नेव हि नेत्रविलं मरिपुं चेति व्ययेन स्वां
तःकरणवृत्तिप्रामाण्यादेव विस्रब्धं ददृशुरित्यर्थः ११ स इति मारुतपूर्णरंध्रैः अत एव कूजद्भिः स्वनद्भिः कीचकैर्वेणुविशेषैः वेणवः कीचकास्ते स्युर्ये राम
स्वनंत्यनिलोद्धता इत्यमरः वंशः सुषिरवाद्यविशेषः वंशादिकं तु सुषिरमित्यमरः आपादितं वंशस्य कृत्यं कार्यं यस्मिन्कर्मणि तत्तथा कुंजेषु लतागृहेषु निकुज १५
कुंजौ वा क्लीबे लतादिपिहितोदरे इत्यमरः वनदेवताभिः उद्गीयमानं उच्चैर्गीयमानं स्वं यशः शुश्राव श्रुतवान् १२ ॥ ॥ ॥ ॥

पृक्त इति गिरिषु निर्झराणां प्रवाहाणां प्रवाहो निर्झरो झर इत्यमरः तुषारैः सीकरैः तुषारो हिमसीकर इति शाश्वतः पृक्तः संपृक्तः अनोकहानां वृक्षाणां
आकंपितानि ईषत्कंपितानि पुष्पाणि तेषां यो गंधः सोऽस्यास्तीति तथोक्तः एवं शीतो मंदः सुरभिः पवनो वायुः अनातपत्रं अनातपार्थं परित्यक्तछत्रं अतएव
आतपक्लांतं आचारपूतं शुद्धं तं नृपं सिषेवे आचारपूतत्वात्स राजा जगत्पावनस्य पवनस्यापि सेव्य आसीदिति भावः १३ शशामेति गोप्तरि तस्मिन्
राज्ञि वनं गाहमाने प्रविशति सति वृष्ट्या विनापि दवाग्निः वनाग्निः दवदावौ वनानले वने इति हेमः शशाम फलानां पुष्पाणां वृद्धिः विशिष्यत इति वि
शेषा अतिशयिता आसीत् सत्वेषु प्राणिषु अधिकः प्रबलः ऊनं दुर्बलं हरिणादिकं न बबाधे १४ संचारेति पल्लवस्य रागो वर्णः पल्लवरागः रागोऽ

पृक्तस्तुषारैर्गिरिनिर्झराणामनोकहाकंपितपुष्पगंधी तमातपक्लांतमनातपत्रमाचारपूतं पवनः सिषेवे १३॥
शशाम वृष्ट्यापि विना दवाग्निरासीद्विशेषा फलपुष्पवृद्धिः ऊनं न सत्वेष्वधिको बबाधे तस्मिन्वनं गोप्तरि गाहमाने १४
संचारपूतानि दिगंतराणि कृत्वा दिनांते निलयाय गंतुं प्रचक्रमे पल्लवरागताम्रा प्रभा पतंगस्य मुनेश्च धेनुः १५ तां देवतापित्र
तिथिक्रियार्थामन्वग्ययौ मध्यमलोकपालः बभौ च सा तेन सतां मतेन श्रद्धेव साक्षाद्विधिनोपपन्ना १६॥ ९ नुरक्तेमात्सर्येक्लेश

द्रौ लोहितादिषु इति शाश्वतः सइव ताम्रा पल्लवरागताम्रा पतंगस्य सूर्यस्य प्रभा कांतिः पारदे शलभे शाल्वोप पतंगः पक्षिसूर्ययोरिति शाश्वतः मुनेः धेनुश्च
दिगंतराणि दिशावकाशान् अंतरमवकाशावधीत्यमरः संचारेण पूतानि शुद्धानि कृत्वा दिनांते सायंकाले निलयाय अस्तमयाय धेनुपक्षे आलयाय
च गंतुं प्रचक्रमे १५ तामिति मध्यमलोकपालः भूपालः देवतापितृतिथीनां क्रियाः यागश्राद्धदानानि ता एवार्थः प्रयोजनं यस्यास्तां धेनुं अन्वक् अनुप
दं ययौ अन्वगन्वक्षमनुगेनुपदं क्लीवमव्ययमित्यमरः सतां मतेन सद्भिर्मान्येन गति बुद्धीत्यादिना वर्त्तमाने क्तः तस्य च वर्त्तमान इति षष्ठी तेन राज्ञा सा धेनुः विधि

नानुष्ठानेन उपपन्ना युक्ता साक्षात् श्रद्धा आस्तिक्यबुद्धिरिव ॥ १६॥

र॰टी॰ सरतिसराजापल्वलेभ्यः अल्पजलाशयेभ्यः उत्तीर्णानिनिर्गतानिवराहाणांयूथानिकुलानियेषुतानि वर्हाण्येषांसंतीतिवर्हिणः मयूराः मयूरोवर्हि
स॰२ णोवर्हीत्यमरः फलवर्हाभ्यामिनच् प्रत्ययोवक्तव्यः आवासवृक्षाणांउन्मुखावर्हिणायेषुतानि श्यामायमानानि वराहवर्हिणादिश्यामलिम्नाश्यामानि
१६ भवंतिश्यामायमानानिलोहितादिडाज्भ्यः क्यषितिक्यषप्रत्ययः वाक्यषरस्यात्मनेपदेशानच् मृगैरध्यासितानि अधिष्ठिताः शाद्वलायेषुतानिशादाः शष्पाणि
येषुदेशेषुसंतीतिशाद्वलाः शष्पश्यामादेशाः शाद्वलः शादहरितइत्यमरः शादः कर्दमशष्पयोरितिविश्वः नडशादाड्ड्वलजितिड्वलच् प्रत्ययः वनानिपश्य
न्ययौ १७ आपीनेति गृष्टिः सकृत्प्रसूतागौः गृष्टिः सकृत्प्रसूतागौरितिहलायुधः नरेंद्रश्च उभौ यथाक्रमंआपीनमूधः उधस्तुक्लीवमापीनमित्यमरः आ

सपल्वलोत्तीर्णवराहयूथान्यावासवृक्षोन्मुखवर्हिणानि ययौमृगाध्यासितशाद्वलानि श्यामायमानानिवनानिपश्यन्
१७ आपीनभारोद्वहनप्रयत्नाद्गृष्टिर्गुरुत्वाद्वपुषोनरेंद्रः उभावलंचक्रतुरंचिताभ्यांतपोवनावृत्तिपथंगताभ्यां १८ वसिष्ठधेनो
रनुयायिनंतमावर्तमानंवनितावनांतात् पपौनिमेषालसपक्ष्मपंक्तिरुपोषिताभ्यामिवलोचनाभ्यां १९ पुरस्कृतावर्त्मनिपा
र्थिवेनप्रत्युद्गतापार्थिवधर्मपत्न्या

पीनभारोद्वहनेप्रयत्नात्प्रयासात् वपुषोगुरुत्वात् आधिक्याच्च अंचिताभ्यांचारुभ्यांगताभ्यांगमन
भ्यांतपोवनादावृत्तेः पंथानंतपोवनावृत्तिपथंऋक्पूरित्यादिनाऽकारप्रत्ययः समासांतः अलंचक्रतुः भूषितवंतौ १८ वसिष्ठेति वसिष्ठधेनोरनुयायिनं
अनुचरंवनांतादावर्तमानंप्रत्यागतंतंदिलीपंवनितासुदक्षिणानिमेषेण अलसामंदापक्ष्मणांपंक्तिर्यस्याः सानिमेषासतीत्यर्थः लोचनाभ्यांकरणा
भ्यांउपोषिताभ्यामिवउपवासोभोजननिवृत्तिः तद्वद्भ्यामिवावसतेः कर्त्तरिक्तः यथोयथोपोषितोऽतितृष्णयाजलमधिकंपिपासति तद्वदतितृष्णयाऽ
धिकंव्यलोकयदित्यर्थः १९ पुरस्कृतेति वर्त्मनिपार्थिवेनपृथिव्याः ईश्वरेणतस्येश्वरइतिञः प्रत्ययः पुरस्कृताअग्रतः कृताधर्मस्यपत्नीधर्मपत्नीध

र्मार्थपत्नीत्यर्थः अश्वघासादिवत्तादर्थे षष्ठीसमासं पार्थिवस्य धर्मपत्न्या प्रत्युद्गता सा धेनुस्तदंतरे तयोर्दंपत्योर्मध्ये दिनक्षपयोर्दिनरात्र्योर्मध्यगता संध्येव
वरराज २० प्रदक्षिणीकृत्येति अक्षतानां पात्रेण सह वर्त्तत इति साक्षतपात्रो हस्तो यस्याः सा सुदक्षिणा पयस्विनी प्रशस्तक्षीरां तां धेनुं प्रदक्षिणीकृत्य
प्रणम्य च अस्याः धेन्वाः विशालं शृंगांतरं शृंगमध्यं अर्थसिद्धेः कार्यसिद्धेः द्वारमिव प्रवेशमार्गमिव आनर्च्च अर्चयामास अर्चयतेर्भौवादिकाल्लिट् २१
वत्सोत्सुकेति सा धेनुर्वत्सोत्सुकापि वत्से उत्कंठितापि स्तिमिता निश्चला सती सपर्यां पूजां प्रत्यग्रहीत् इति हेतोस्तौ दंपती ननंदतुः पूजास्वीकारस्य हेतुत्वमा
ह भक्त्येति पूज्येष्वनुरागो भक्तिः तयोपपन्नेषु युक्तेषु विषयेषु तद्विधानां तस्याः धेनोः विधेव विधा प्रकारो येषां तेषां महतामित्यर्थः प्रसादस्य चिन्हानि

तदंतरे सा विरराज धेनुर्दिनक्षपामध्यगतेव संध्या २० प्रदक्षिणीकृत्य पयस्विनीं तां सुदक्षिणा साक्षतपात्रहस्ता प्रण
म्य चाऽनर्च विशालमस्याः शृंगांतरं द्वारमिवाऽर्थसिद्धेः २१ वत्सोत्सुकाऽपि स्तिमिता सपर्यां प्रत्यग्रहीत्सेति ननंदतुस्तौ
भक्त्योपपन्नेषु हि तद्विधानां प्रसादचिन्हानि पुरःफलानि २२ गुरोः सदारस्य निपीड्य पादौ समाप्य सांध्यं च विधिं दिलीपः
दोहावसाने पुनरेव दोग्ध्रीं भेजे भुजोच्छिन्नरिपुर्निषण्णां २३ ताऽमंतिकन्यस्तबलिप्रदीपामऽन्वास्य गोप्ता गृहिणीसहायः ॥

लिंगानि स्वीकरण लिंगानि पूजास्वीकारादीनि पुरः फलानि पुरोगतानि प्रत्यासन्नानि फलानि येषां तानि हि अविलंबितफलसूचकलिंगदर्शना
दानंदो युज्यत इत्यर्थः २२ गुरोरिति भुजोच्छिन्नरिपुर्दिलीपः सदारस्य दारा अरुंधत्या सह वर्त्तमानस्य गुरोरुभयोरपीत्यर्थः पादौ निपीड्य अभिवं
द्य सांध्यं संध्यायां विहितं विधिं अनुष्ठानं च समाप्य दोहावसाने निषण्णामासीनां दोग्ध्रीं दोहनशीलां धेनुमेव तृन्निति तृन् प्रत्ययः पुनर्भेजे सेवितवा
न् दोग्ध्रीमिति निरुपपदप्रयोगात्कामधेनुत्वं गम्यते २३ तामिति गोप्ता रक्षकः गृहिणीसहायः पत्नीद्वितीयः सन् उभावपीत्यर्थः अंतिकेन्यस्तावलयः

र॰टि॰ प्रदीपश्च यस्यास्तां तथोक्तां तां पूर्वोक्तां निषण्णां धेनुं अन्वास्य अनूपविश्य क्रमेण सुप्तामनु अनंतरं संविवेश सुष्वाप प्रातः सुप्तोत्थितां अनूदतिष्ठत् उत्थितवा
स॰२ न् अत्रानुशब्देन धेनुराजव्यापारयोः पौर्वापर्यमुच्यते क्रमशब्देन धेनुव्यापाराणामिति अर्थो न रुक्तं कर्मप्रवचनीययुक्ते द्वितीया २४ व्रतमिति इत्थम
१० नेन प्रकारेण प्रजार्थं संतानाय महिष्या समं अभिषिक्तपत्न्या सह कृताभिषेका महिषीत्यमरः व्रतं धारयतो महनीया पूज्या कीर्तिर्यस्य तस्य दीनानामुद्धरणं दीना
विमोचनं तत्र उचितस्य नृपस्य त्रयो गुणा आवृत्तयो येषां तानि त्रिगुणानि त्रिरावृत्तानि सप्त दिनानि एकविंशति दिनानि व्यतीयुः २५ अन्येद्युरिति अन्येद्युः अन्य
स्मिन् दिने द्वाविंशे दिने सद्यः परुत्परारीत्यादिना निपातनादव्ययत्वम् अत्राद्यचपूर्वन्हीत्यादौ पूर्वोत्तरापरात् तथाधरान्यान्यतरेतरात्पूर्वेद्युरादयः इत्यमरः ।मु

क्रमेण सुप्तामनु संविवेश सुप्तोत्थितां प्रातरनूदतिष्ठत् २४ इत्थं व्रतं पालयतः प्रजार्थं समं महिष्या महनीयकीर्तेः सप्तव्य
तीयुस्त्रिगुणानि तस्य दिनानि दीनोद्धरणोचितस्य २५ अन्येद्युरात्मानुचरस्य भावं जिज्ञासमाना मुनिहोमधेनुः गंगाप्रपातांत
विरूढशष्पं गौरीगुरोर्गह्वरमाविवेश २६ सा दुःप्रधर्षा मनसापि हिंस्रैरित्यद्रिशोभाप्रहितेक्षणेन अलक्षिताभ्युत्पतनो
नृपेण प्रसह्य सिंहः किल तां चकर्ष २७ ॥ १ मुनिहोमधेनुरात्मानुचरस्य नृपस्य भावमभिप्रायं दृढभक्तित्वं भावोभिप्राय आशय इति याद
वः जिज्ञासमाना ज्ञातुमिच्छंती ज्ञाश्रुस्मृदृशां सन इत्यात्मनेपदे शानच् प्रपतत्यस्मिन्निति प्रपातः पतनप्रदेशः गंगायाः प्रपातस्तस्यांते समीपे विरूढानि
जातानि शष्पाणि बालतृणानि यस्मिन् तत् शष्पं बालतृणं घास इत्यमरः गौरीगुरोः पार्वतीपितुः गह्वरं गुहां आविवेश २६ सेति सा धेनुः हिंस्रैर्व्याघ्रा राम
दिभिर्मनसापि दुःप्रधर्षा दुर्धर्षेति हेतोरद्रिशोभायां प्रहितेक्षणेन रतदृष्टिना नृपेण अलक्षितमभ्युत्पतनमाभिमुख्येन उत्पतनं यस्य सः सिंहस्तां धेनुं प्र १०
॥ सह्य हठात् प्रसह्यानुहठार्थकमित्यमरः चकर्ष किलेत्यलीके २७॥

तदीयमिति गुहानिबद्धेन प्रतिशब्देन प्रतिध्वनिना दीर्घं तस्याः दूरं तदीयमाक्रंदितं घोषणं आर्तध्वानं प्रसाधो र्हितकारिणः नृपस्य नगेंद्रसक्तां दृष्टिं रश्मि
षु प्रग्रहेषु किरणप्रग्रहौ रश्मीत्यमरः आदायेव गृहीत्वेव निवर्तयामास २८ स इति धनुर्द्धरः स नृपः पाटलायां रक्तवर्णायां गवि तस्थिवांसं स्थितं क्वसुश्चेति
क्वसुप्रत्ययः केसरिणं सिंहं सानुमतोऽद्रेर्धातोर्गैरिकस्य विकारो धातुमयी तस्यामधित्यकायां ऊर्ध्वभूमौ उपत्यकाद्रेरासन्ना भूमिरूर्ध्वमधित्यके समरः उ
पधिभ्यां त्यकन्नासन्नारूढयोरिति त्यकन् प्रत्ययः प्रफुल्लो विकसितः फुल्ल विकसन इति धातोः पचाद्यच् लोध्राख्यं द्रुममिव ददर्श प्रफुल्लमिति तकारपाठे
त्रिफला विशरण इति धातोः कर्तरि क्तः उत्परः स्यात् इत्युकारादेशः २९ तत इति ततः सिंहदर्शनानंतरं मृगेंद्रगामी शरणं रक्षणं शरणं गृहरक्षित्रोरित्य

तदीयमाऽऽक्रंदितमार्तसाधोर्गुहानिबद्धप्रतिशब्ददीर्घं रश्मिष्विवाऽऽदाय नगेंद्रसक्तां निवर्तयामास नृपस्य दृष्टिं २८ स
पाटलायां गवि तस्थिवांसं धनुर्द्धरः केसरिणं ददर्श अधित्यकायामिव धातुमय्यां लोध्रद्रुमं सानुमतः प्रफुल्लं २९ ततो मृगेंद्रस्य
मृगेंद्रगामी वधाय वध्यस्य शरं शरण्यः जाताभिषंगो नृपतिर्निषंगादुद्धर्तुमैच्छत् प्रसभोद्धृतारिः ३० वामेतरस्तस्य करः प्रहर्तुर्न
खप्रभाभूषितकंकपत्रे सक्तांगुलिः सायकपुंख एव चित्रार्पितारंभ इवाऽवतस्थे ३१॥ १ मरः शरणं रक्षणे गृह इति यादवः शरणे सा

धुः शरण्यः तत्र साधुरिति यत्प्रत्ययः प्रसभेन बलात्कारेणोद्धृता अरयो येन स नृपतिः राजा जाताभिषंगः जातपराभवः सन् अभिषंगः पराभवे इत्यमरः
वध्यस्य वधार्हस्य दंडादिभ्यो यत् इति यत्प्रत्ययः मृगेंद्रस्य वधाय निषंगात्तूणीरात् तूणोपासंगतूणीरनिषंगा इषुधिर्द्वयोरित्यमरः शरमुद्धर्तुमैच्छत् ३० वा
मेति प्रहर्तुस्तस्य वामेतरो दक्षिणः करः नखप्रभाभिर्भूषितानि विच्छुरितानि कंकस्य पक्षिविशेषस्य पत्राणि यस्य तस्मिन् कंकः पक्षिविशेषः स्यादुन्नाकारे युधि
ष्ठिर इति विश्वः कंकलुकर्क इति यादवः सायकस्य पुंख एव कर्तर्याख्यमूलेदेशे कर्तरी पुंखयादवः सक्तांगुलिः सन् चित्रार्पितारंभश्चित्रलिखितशरो

र.टी. वाह्विति वाह्वोः प्रतिष्टंभेन प्रतिबंधेन प्रतिबंधः प्रतिष्टंभ इत्यमरः विरूढमन्युः प्रवृद्धरोषो राजा मंत्रौषधिभ्यां रुद्धवीर्यः प्रतिबद्धशक्तिः भोगी सर्प इव भोगी राज
स.२ भुजंगयोरिति शाश्वतः अभ्यर्णमासन्नउपकंठांतिकाभ्यर्णाभ्यग्रा अप्यभितोऽव्ययमित्यमरः आगस्कृतमपराधकारिणमस्पृशद्भिः स्वतेजोभिरंतर्दह्यमान अ
१८ धिक्षेपो हि सहनं तेजः प्राणात्ययेष्वपीति यादवः ३२ तमिति निगृहीता पीडिता धेनुर्येन स सिंहः आर्यालंसतां गृह्यं पक्ष्यपि दाक्षेरिवात्यापक्षेषु चेति क्यप् म
नुवंशस्यकेतुंचिन्हंकेतुवत्व्यावर्त्तकं सिंहइव उरुसत्वो महाबलस्तं आत्मनोऽप्रतौ वाहुस्तंभरूपे व्यापारे अभूतपूर्वत्वाद्विस्मितं कर्त्तरिक्तः तं दिलीपं मनुष्यवाचा
करणेन पुनर्विस्मापयन् विस्मयमाश्चर्यं प्रापयन् निजगाद स्मिङ् ईषद्धसन इति धातोर्णिच् दृद्धौ आयादेशे प्रत्ययचसतिविस्मापयन्निति रूपं सिद्धं

वाहुप्रतिष्टंभविवृद्धमन्युरभ्यर्णमागस्कृतमस्पृशद्भिः राजास्वतेजोभिरदह्यतांतर्भोगीवमंत्रौषधिरुद्धवीर्यः ३२ तमार्य
गृह्यंनिगृहीतधेनुर्मनुष्यवाचामनुवंशकेतुं विस्मापयन्विस्मितमात्मवृत्तौ भूपालसिंहंनिजगादसिंहः ३३ अलंमहीपालतव
श्रमेणप्रयुक्तमप्यस्त्रमितोवृथास्यात् नपादपोन्मूलनशक्तिरंहः शिलोच्चयेमूर्छतिमारुतस्य ३४ कैलासगौरंवृषमारुरुक्षोः
पादार्पणानुग्रहपूतपृष्ठं॥ ((॥विस्मापयन्निति पाठे पुगागममात्रं वक्तव्यं तन्न नित्यं स्मयतेरिति हेतुभये विवक्षायामेवेति भीस्मयोर्हेतुभय इति।
आत्मनेपदे विस्मापयमान इति स्यात् तस्मान्मनुष्यवाचा विस्मापयन्निति रूपसिद्धं करण[illegible] विवक्षया न कश्चिद्दोषः ३३ अलमिति हे महीपाल तव श्रमेण अ
लं साध्यं भवता त्वया श्रमो न कर्त्तव्य इत्यर्थः अत्र गम्यमानसाधनक्रियापेक्षया श्रमस्य करणत्वात् तृतीया उक्तं च न्यासोद्योतेन केवलं श्रूयमाणैव क्रिया एम
निमित्तकरणभावस्यापि तर्हि गम्यमानापीति अलंभूषणपर्याप्तशक्तिवारणवाचकमित्यमरः इतः अस्मिन् मयि सार्वविभक्तिकस्तसिल् प्रयुक्तमप्यस्त्रं १८
वृथा स्यात् तथाहि पादपोन्मूलने शक्तिर्यस्य तत्तथोक्तं मारुतस्य रंहो वेगः शिलोच्चये पर्वते न मूर्छति न प्रसरति ३४ कैलासेति कैलास इव गौरं शुभ्रं वृषमा

चामीकरंचशुभ्रंचगौरमाहुर्मनीषिण इतिशाश्वतः स्वस्योपरिपदंनिक्षिप्यवृषमारोहतीत्यर्थः अष्टौमूर्तयोयस्यतस्यअष्टमूर्तेःशिवस्यपादार्पणंपादन्यासस्त
देवानुग्रहः प्रसादस्तेनपूतंपृष्ठंयस्यतंतथोक्तंनिकुंभमित्रंकुंभोदरनामकिंकरंमामवेहिविद्धि पृथिवीसलिलंतेजोवायुराकाशमेवच सूर्याचंद्रमसौयाजित्य
ष्टौशंकरमूर्तय इतियादवः ३५ अमुमितिपुरः अग्रतः अमुंदेवदारुंपश्यसीतिकाकुः असौदेवदारुः वृषभोध्वजेयस्यतेनशिवेनपुत्रीकृतः पुत्रत्वेनस्वी
कृतः अभूततद्भावेच्विः योदेवदारुःस्कंदस्यमातुःगौर्याः हेम्नःकुंभएवस्तनस्तस्मान्निःसृतानांपयसांअंबूनांरसज्ञःस्वादज्ञः स्कंदपक्षेहेमकुंभइवस्तनइति
विग्रहः पयसांक्षीराणांपयःक्षीरंपयोंबुचेत्यमरः स्कंदसमानप्रेमास्पदमितिभावः ३६ कंडूयमानेनेति कदाचित्कटंकपोलंकंडूयमानेनकषताकंडूःदि

अवेहिमांकिंकरमष्टमूर्तेःकुंभोदरंनामनिकुंभतुल्यं ३५ अमुंपुरःपश्यसिदेवदारुंपुत्रीकृतोसौवृषभध्वजेन योहेमकुं
भस्तननिःसृतानांस्कंदस्यमातुःपयसांरसज्ञः ३६ कंडूयमानेनकटंकदाचिद्वन्यद्विपेनोन्मथितात्वगस्य अथैनमद्रेस्तनयाशु
शोचसेनान्यमालीढमिवासुरास्त्रैः ३७ तदाप्रभृत्येववनद्विपानांत्रासार्थमस्मिन्नहमद्रिकुक्षौ व्यापारितःशूलभृताविधा
यसिंहत्वमंकागतसत्ववृत्ति ३८ तस्यालमेषाक्षुधितस्यतृप्त्यैप्रदिष्टकालापरमेश्वरेण॥ ३९ भोयक ततः शानचूवन्यद्विपेनास्यदेव

दारोःत्वक्उन्मथिता अथाद्रेस्तनयागौरी असुरास्त्रैरालीढंक्षतंसेनांनयतीतिसेनानीःस्कंदः पार्वतीनंदनःस्कंदःसेनानीत्यमरः सत्सुद्विषेत्यादिनाक्
क्विप् तमिवएनंशुशोच ३७ तदेति तदातत्कालः प्रभृतिरादिर्यस्मिन्कर्मणितत्तथा तदाप्रभृत्येववनद्विपानांत्रासार्थंभयार्थंशूलभृताशिवेनांकंस
मीपमागताः प्राप्ताः सत्वाः प्राणिनोवृत्तिर्यस्मिंस्तत् अंकःसमीपउत्संगेचिन्हेस्यानापराधयोरितिकेशवः सिंहत्वंविधायास्मिन्नद्रिकुक्षौगुहायामहं
व्यापारितःनियुक्तः ३८ तस्येति परमेश्वरेणप्रदिष्टोनिर्दिष्टःकालोभोजनवेलायस्याःसाउपस्थिता प्राप्ताएषागोरूपाशोणितपारणासुरद्विषोराहोस्वदूम

इयं चांद्रमसी सुधेव तस्य क्षुधितस्य बुभुक्षितस्य मे तृप्त्यै अलं पर्याप्ता नमः स्वस्तीत्यादिना चतुर्थी ३९ स इति स एवमुपायशून्यस्त्वं लज्जां विहाय निवर्तस्व भवान् त्वं गुरोर्दर्शिता प्रकाशिता शिष्यस्य कर्तव्या भक्तिर्येन स तथोक्तोऽसि ननु गुरुधनं विना कथं तत्समीपं गंतव्यमत आह शस्त्रेणेति यद्रक्ष्यं धनं शस्त्रेण युधेन शस्त्रमायुधलोहयोरित्यमरः अशक्यारक्षा यस्य तत् शक्यारक्ष्यं रक्षितुमशक्यमित्यर्थः तद्रक्ष्यं नष्टमपि शस्त्रभृतां यशो न हिनस्ति नहिनस्ति अशक्यार्थे प्रमतिविधानं न दोषायेति भावः ४० इतीति पुरुषाणामधिराजो नृपः इति प्रगल्भं मृगाधिराजस्य सिंहस्य वचो निशम्य श्रुत्वा गिरिशस्य ईश्वरस्य प्रभावात् प्रत्याहतास्त्रः कुंठितास्त्रः सन् आत्मनि विषयेऽवज्ञापमानं शिथिलीचकार तत्याजेत्यर्थः अवज्ञातोऽहमिति निर्वेदं न प्रापेत्यर्थः समानेषु हि क्षत्रियाणामभिमानो न सर्वेभ्य

उपस्थिता शोणितपारणा मे सुरद्विषश्चांद्रमसी सुधेव ३९ स त्वं निवर्तस्व विहाय लज्जां गुरोर्भवान् दर्शितशिष्यभक्तिः शस्त्रेण र
क्ष्यं यदशक्यरक्षं न तद्यशः शस्त्रभृतां क्षिणोति ४० इति प्रगल्भं पुरुषाधिराजो मृगाधिराजस्य वचो निशम्य प्रत्याहतास्त्रो गिरिश
प्रभावादात्मन्यवज्ञां शिथिलीचकार ४१ प्रत्यब्रवीच्चैनमिषुप्रयोगे तत्पूर्वसंगे वितथप्रयत्नः जडीकृतस्त्र्यंबकवीक्षितेन व
ज्रं मुमुक्षन्निव वज्रपाणिः ४२ संरुद्धचेष्टस्य मृगेंद्र कामं हास्यं वचस्तद्यदहं विवक्षुः॥

((रंभनीति भावः ४१ प्रतीति स एव पूर्वः प्रथमः संगः प्रतिबंधो यस्य तस्मिन् तत्पूर्वसंगे इषुप्रयोगे वितथप्रयत्नो विफलप्रयासः अत एव वज्रं कुलिशं मुमुक्षन् मोक्तुमिच्छन् अवकलोचनं दृग्दृष्टिनेत्रलोचनं चक्षुर्नयनांबकेक्षणाक्षिणीति हलायुधः त्रीणि अंबकानि अक्षीणि यस्य स त्र्यंबको हरस्तस्य वीक्षणेन जडीकृतो निष्पंदीकृतः वज्रं पाणौ यस्य स वज्रपाणिरिंद्रः प्रहरणार्थेभ्यः परे निष्ठासप्तम्यौ भवत इति वक्तव्यमिति पाणेः सप्तम्यंतस्योत्तरनिपातः स इवस्थितः नृपः एवं सिंहं प्रत्यब्रवीत् बाहुं सवज्रं शक्रस्य क्रुद्धस्यास्तंभयत्प्रभुरिति महाभारते ४२ संरुद्धेति हे मृगेंद्र संरुद्धचेष्टस्य प्रतिबद्धव्यापारस्य मम तद्वचः वाक्यं कामं हास्यं परिहसनीयं यद्वचः सत्वं मदीयेनमा

Digitized by Sarayu Foundation Trust, Delhi and eGangotri

दिकं अहं विवक्षुः वक्तुमिच्छुरस्मि तर्हि तूष्णीं स्थीयतामित्याशंक्याह ईश्वरकिंकरत्वात्सर्वं त्वं मां प्रति न स्यमित्याह अंतरिति हि यतः भवान् प्राणभृतां अंतर्गते
त्यद्गतं वाकृत्वा बहिरप्रकाशितमेव सर्वं भावं वेद वेत्ति विदो लटो वेत्ति णलादेशः अतोऽहमभिधास्ये वक्ष्यामि वच इति प्रकृतं कर्म संबध्यते अन्ये त्वीदृग्वचन
माकर्ण्य संभावितार्थमेतद्धि सूपहसंति अतस्तूष्णीं मौनमेव भूषणं त्वं तु वाङ्मनसयोरेकविधत्वमयमिति जानासि अतोऽभिधास्ये यद्वचोऽहं विवक्षुरित्यर्थः ४३
मान्य इति प्रत्यवहारः प्रलयः स्थावराणां तरुशैलादीनां जंगमानां मानुषादीनां सर्गस्थितिप्रत्यवहारेषु हेतुः स ईश्वरो मे मम मान्यः पूज्यः अलंघ्यशासन इत्य
र्थः शासनं च सिंहत्वं अंकागतसत्ववृत्तौ स्तुक्तरूपं तर्हि विसृज्य गम्यतां नेत्याह गुरोरपीति पुरस्तादग्रे नश्यदिदमाहिताग्नेर्गुरोर्धनमपि गोरूपमनुपेक्ष

अंतर्गतं प्राणभृतां हि वेद सर्वं भवानभावमतोऽभिधास्ये ४३ मान्यः स मे स्थावरजंगमानां सर्गस्थितिप्रत्यवहारहेतुः गुरोरपी
दं धनमाहिताग्नेर्नश्यत्पुरस्तादनुपेक्षणीयं ४४ स त्वं मदीयेन शरीरवृत्तिं देहेन निर्वर्तयितुं प्रसीद दिनावसानोत्सु
कबालवत्सा विमुच्यतां धेनुरियं महर्षेः ४५ अथांधकारं गिरिगह्वराणां दंष्ट्रामयूखैः शकलानि कुर्वन् भूयः स भूतेश्वरपार्श्व
वर्ती किंचिद्विहस्यार्थपतिं बभाषे ४६॥ ९ णीयं आहिताग्नेरिति विशेषणेनानुपेक्षाकारणहविःसाधनत्वं सूचयति ४४ स इति सोंका
गतसत्ववृत्तिस्त्वं मदीयेन देहेन शरीरस्य वृत्तिं जीवनं निर्वर्तयितुं संपादयितुं प्रसीद दिनावसाने उत्सुको माता ममागमिष्यतीत्युत्कंठितो बालः वत्सो यस्याः
सा महर्षेरियं धेनुर्विसृज्यतां ४५ अथेति अथ भूतेश्वरस्य पार्श्ववर्त्यनुचरः स सिंहः गिरेर्गह्वराणां गुहानां देवखातबिले गुहा गह्वरमित्यमरः अंधका
रं ध्वांतं दंष्ट्रयोर्मयूखैः शकलानि खंडानि कुर्वन्निरस्यन्नित्यर्थः किंचिद्विहस्यार्थपतिं नृपं भूयो बभाषे हासकारणं अल्पस्य हेतोर्बहु हातुमिच्छन्निति।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

एकेति एकातपत्रं एकछत्रंजगतः प्रभुत्वंस्वामित्वं नवंवयोयौवनंकांतंरम्यंवपुश्चेति एवंवहु अल्पस्यहेतोरल्पेनफलेनकारणेन अल्पफलायेत्यर्थः षष्ठी
हेतुप्रयोग इतिषष्ठी हातुंसकुमिच्छन्त्वंविचारेकार्याकार्यविमर्षमूढोमंदः प्रतिभासि ४७ भूतेति तवभूतेषु अनुकंपाकृपाचेत् कृपादयानुकंपा
स्यादित्यमरः कृपैववर्ततेचेदित्यर्थः तर्हित्वदंतेतवनाशेसति इयमेकागौः स्वस्तिक्षेममस्यास्तीतिस्वस्तिमतीभवेज्जीवेदित्यर्थः स्वस्त्याशीः क्षेमपुण्यादा
वित्यमरः हेप्रजानाथजीवन्पुनःपितेवप्रजाः उपप्लवेभ्यःविघ्नेभ्यः शश्वत्सदापुनः सहर्थयोः शश्वदित्यमरः पासिरक्षसि त्वप्राणान्पयेनएकधेनुरक्षणेनत्वत्संजी
श्री वितमेवशश्वदखिलजगत्प्राणमित्यर्थः ४८ नधर्मलोपादियंप्रवृत्तिः किंतुगुरुभयादित्यत्राह अथेतिपक्षांतरे अथवाएकैवधेनुर्यस्यतस्मादयंको

एकातपत्रंजगतः प्रभुत्वंनवंवयः कांतमिदंवपुश्च अल्पस्यहेतोर्वहुहातुमिच्छन्विचारमूढः प्रतिभासिमेत्वं ४७ भूता
नुकंपातवचेदियंगौरेकाभवेत्स्वस्तिमतीत्वदंते जीवन्पुनः शश्वदुपप्लवेभ्यः प्रजाः प्रजानाथपितेवपासि ४८ अथैक
धेनोरपराधचंडाद्गुरोः कृशानुप्रतिमाद्बिभेषि शक्योऽस्यमन्युर्भवताविनेतुंगाः कोटिशः स्पर्शयताघटोध्नीः ४९ तद्र
क्षकल्याणपरंपराणांभोक्तारमूर्जस्वलमात्मदेहं॥ ५० पकारलोपन्यास इतिविज्ञेयं अतएवापराधेधेनूपेक्षालक्षणेसतिचंडादति

कोपनात् चंडस्त्वत्यंतकोपन इत्यमरः अतएवकृशानुः प्रतिमाउपमायस्यतस्मादग्निकल्पाद्गुरोः विभेषीतिकाकुः भीत्रार्थानांभयहेतुरित्यपादाना
त्पंचमी अल्पवित्तस्यधनहानिरितिदुःसहेतिभावः अस्यगुरोर्मन्युः क्रोधः मन्युर्दैन्येक्रतौक्रुधीत्यमरः घटाइवऊधांसियासांताघटोध्नीः ऊधसोनङि २०
त्यनङादेशः वहुव्रीहिरूधसोङीप्कोटिशोगाः स्पर्शयतामतिपादयता विश्राणनंवितरणंस्पर्शनंप्रतिपादनमित्यमरः भवताविनेतुमपनेतुंशक्यः
॥४९॥तदिति तत्तस्मात्कारणात्कल्याणपरंपराणांभोक्तारंकर्मणिषष्ठी ऊर्जोवलमस्यास्तीतिऊर्जस्वलं ज्योत्स्नातमिस्रेत्यादिनाप्रत्ययांतोनिपातः॥

आत्मदेहं रक्षन्ननु गामुपेक्ष्य आत्मदेहरक्षणे स्वर्गहानिः स्यान्नेत्यत्राह महीति नवसमृद्धं राज्यं महीतलस्पर्शनमात्रेण भूतलसंबंधमात्रेण भिन्नं ऐंद्रं इंद्रसं बंधि पदं स्थानमाहुः स्वर्गान्न भिद्यत इत्यर्थः ५० एतावदिति मृगेंद्रे एतावदुक्त्वा विरते सति गुहागतेनास्य सिंहस्य प्रतिस्वनेन शिलोच्चयः शैलोऽपि प्रीत्या तमेवार्थं क्षितिपालं उच्चैरभाषतेवेत्युत्प्रेक्षा भाषिरयं ब्रुविसमानार्थत्वात् द्विकर्मकः ब्रुविशुद्धिकर्मकेषु पठितः तदुक्तं दुहियाचिरुधिप्रच्छिभिक्षिचिञा मुपयोगनिमित्तमपूर्वविधौ ब्रुविशासिगुणेन च यत्सचते तदकीर्तितमाचरितं कविनेति ५१ निशम्येति देवानुचरस्येश्वरकिंकरस्य सिंहस्य वाचं निशम्य मनुष्यदेवो राजा पुनरप्युवाच किंभूतः सन् तेन सिंहेन तदध्यासितं तदाक्रमणं नपुंसके भावे क्तः तेन कातरे अक्षिणी यस्याः सा बहुव्रीहौ सक्थ्यक्ष्णोः स्वांगात्षच्

महीतलस्पर्शनमात्रभिन्नमृद्धं हि राज्यं पदमैंद्रमाहुः ५० एतावदुक्त्वा विरते मृगेंद्रे प्रतिस्वनेनास्य गुहागतेन शिलोच्चयोऽपि क्षितिपालमुच्चैः प्रीत्या तमेवार्थमभाषतेव ५१ निशम्य देवानुचरस्य वाचं मनुष्यदेवः पुनरप्युवाच धेन्वा तदध्यासितकातराक्ष्या निरीक्ष्यमाणः सुतरां दयालुः ५२ क्षतात्किल त्रायत इत्युदग्रः क्षत्रस्य शब्दो भुवनेषु रूढः ॥ ॥

षिद्गौरादिभ्यश्चेति ङीष् किं वा वक्ष्यतीति भीत्येव स्थितयेत्यर्थः धेन्वा निरीक्ष्यमाणोऽत एव सुतरां दयालुः सन् सुतरामित्यत्र द्विवचनविभज्येत्यादि ना सुप्रत्ययात्तरप् किमेत्तिङव्ययेत्यादिना आमुप्रत्ययः तद्धितश्चासर्वविभक्तिरिति अव्ययसंज्ञा ५२ किमुवाचेत्याह क्षतादिति क्षणु हिंसायामिति धातोः संपदादित्वात्क्विप् गमादीनामिति वक्तव्यादनुनासिकलोपे तुगागमे च क्षदिति रूपं सिद्धं क्षतो नाशात्त्रायत इति क्षत्रः सुपीति योगविभागात्कः तामेतां व्युत्पत्तिं कविरर्थतोऽनुक्रामति क्षतादित्यादिना उदग्रः उन्नतः क्षत्रस्य क्षत्रवर्णस्य शब्दो वाचकः क्षत्रशब्द इत्यर्थः एतेनैकातपत्रमित्यादिना सोऽयं क्षतात् नाशात्त्रायत इति व्युत्पत्त्या भुवनेषु रूढः किल प्रसिद्धः खलु नाश्वकर्णादिवत्केवलरूढः किंतु पंकजादिवद्योगरूढ इत्यर्थः ततः किमित्यत आह

र॰टी॰ तस्य क्षत्रशब्दस्य विपरीतवृत्तेर्विरुद्धव्यापारस्य क्षतस्त्राणमकुर्वतः पुंसो राज्येन किं उपक्रोशमलीमसैर्निंदामलिनैः उपक्रोशो जुगुप्सा च कुत्सा निंदा
स॰२ च गर्हणे इत्यमरः ज्योत्स्नातमिस्रेत्यादिना मलीमसशब्दो निपातितः तैः प्राणैर्वा किं निंदितस्य सर्वं व्यर्थमित्यर्थः एतेनैकातपत्रमित्यादिना श्लोकद्वये
२१ नोक्तं इत्तोत्तरमिति वेदितव्यं ५३ अथैकधेनोरित्यस्योत्तरमाह कथमिति अनुनयः क्रोधापनयः चकारो वाकारार्थः महर्षेरनुनयो वा अन्यासां पय
स्विनीनां दोग्ध्रीणां गवां विश्राणनाद्दानात्कथं नु शक्यो न शक्य इत्यर्थः अत्र हेतुमाह इमां गां सुरभेः कामधेनोः पंचमी विभक्तिरिति पंचमी अनूनाम
न्यूनामवेहि जानीहि तर्हि कथमस्याः परिभवोऽभूदित्याह रुद्राविति अस्यां गवि त्वया प्रहृतं तु प्रहारस्तु नपुंसके भावे क्तः रुद्रौजसा ईश्वरसामर्थ्येन नतु

राज्येन किं तद्विपरीतवृत्तेः प्राणैरुपक्रोशमलीमसैर्वा ५३ कथं नु शक्योऽनुनयो महर्षेर्विश्राणनाच्चान्यपयस्विनीनां इ
मामनूनां सुरभेरवेहि रुद्रौजसा तु प्रहृतं त्वयास्यां ५४ सेयं स्वदेहार्पणनिष्क्रयेण न्याय्या मया मोचयितुं भवत्तः न पार
णा स्याद्विहता तवैवं भवेदलुप्तश्च मुनेः क्रियार्थः ५५ भवानपीदं परवानवैति महान्हि यत्नस्तव देवदारौ ॥ ॥ ॥

न त्वेतेत्यर्थः सप्तम्यधिकरणे चेति सप्तमी ५४ तर्हि किं चिकीर्षितमित्यत्राह सेयमिति सेयं गौर्मया निष्क्रियते प्रत्याह्रियतेऽनेन परगृहीतमिति निष्क्रयः प्रति
शीर्षकः एरजिति अच् प्रत्ययः स्वदेहार्पणमेव निष्क्रयस्तेन भवतः त्वत्तः पंचम्यास्तसिल् मोचयितुं न्याय्या न्यायादनपेता युक्तेत्यर्थः धर्मपथ्यर्थन्यायादिना यत्प्रत्ययः
एवं सति तव पारणा भोजनं विहता न स्यात् मुनेः क्रिया होमादिः सैवार्थः प्रयोजनं स चालुप्तो भवेत् स्वप्राणव्ययेनापि स्वामिगुरुधनं संरक्ष्यमिति भावः ५५ राम
अत्र भवानेव प्रमाणमित्याह भवानिति परवान्स्वामिपरतंत्रो भवानपीदं वक्ष्यमाणमवैति वेत्ति भवतानुभूयत एवेत्यर्थः शेषे प्रथम इति प्रथमपुरुषः २१
किमित्यत्राह हि यस्माद्धेतोः हि हेताववधारणे इत्यमरः तव देवदारौ विषये महान् हि यत्नः महतायत्नेन रक्ष्य इत्यर्थः इदं शब्दोक्तमर्थं दर्शयति स्यात्

मितिरक्ष्यं वस्तु विनाश्य विनाशं गमयित्वा स्वयमक्षतेनाव्रणेन नियुक्तेनेति शेषः नियोक्तुः स्वामिनोऽग्रे स्थातुमशक्यं ५६ सर्वथा चैतदप्रतिहार्यमित्याह कि
मपि किं चाहं तवाहिंस्यः अवध्यो मतश्चेत्तर्हि मे यशः एव शरीरं तस्मिन्दयालुः कारुणिको भव स्याद्दयालुः कारुणिकः कृपालुः सूरतः समा इत्यमरः ननु मुख्यमुपे
क्ष्यामुख्ये शरीरे कोऽभिनिवेश आह एकांतेति मद्विधानां मादृशानां विवेकिनामेकांतविध्वंसिषु चश्यं विनाशिषु भौतिकेषु पृथिव्यादिभूतविकारेषु पिंडेषु
पिंडो द्वंद्वे जयासु पुष्ये गोले वाले जासि हयोः केवल इति हैमः शरीरेषु नास्था ऽनपेक्षा आस्थात्वालंबनास्था नयत्नापेक्षासु कथ्यत इति विश्वः ५७ सौहार्दादह
मनुसरणीयोस्मीत्याह संबंधमिति संबंधं सख्यमाभाषण मालापः पूर्वकारणं यस्य तमाहुः स्यादाभाषणमालाप इत्यमरः सतोरक्तः संबंधो वनांते

स्थातुं नियोक्तुर्न हि शक्यमग्रे विनाश्य रक्ष्यं स्वयमक्षतेन ५६ किमप्यहिंस्यस्तव चेन्मतोऽहं यशःशरीरे भव मे दयालुः एकांतवि
ध्वंसिषु मद्विधानां पिंडेष्वनास्था खलु भौतिकेषु ५७ संबंधमाभाषणपूर्वमाहुर्वृत्तः स नौ संगतयोर्वनांते तद्भूतनाथानुगना
र्हसि त्वं संबंधिनो मे प्रणयं विहंतुं ५८ तथेति गामुक्तवते दिलीपः सद्यः प्रतिष्टंभविमुक्तबाहुः सन्यस्तशस्त्रो हरये स्वदेहमुपान
यत्पिंडमिवामिषस्य ५९ तस्मिन्क्षणे पालयितुः प्रजानामुत्पश्यतः सिंहनिपातमुग्रं अवाङ्मुखस्योपरि पुष्पवृष्टिः पपात विद्या

संगतयोर्नौ आवयोर्वृत्तो जातः स त्वं हे भूतनाथानुग शिवानुचर एतेन तस्य महत्त्वं सूचयति अतएव संबंधिनो मित्रस्य मे प्रणयं याच्ञां प्रणयास्त्वमी विश्रंभयाच्ञा
प्रेमाण इत्यमरः विहंतुं नार्हसि ५८ तथेति गामुक्तवते हरये सिंहाय कपौ सिंहे सुवर्णे च वर्णे विष्णौ हरिर्विदुरिति शाश्वतः सद्यस्तत्क्षणे प्रतिष्टंभान्निर्बं
धाद्विमुक्तौ बाहू यस्य स दिलीपो न्यस्तशस्त्रस्त्यक्तायुधः सन्स्वदेहमामिषस्य मांसस्य पललं क्रव्यमामिषमित्यमरः पिंडं कवलमिव उपानयत समर्पित
वान् एतेन निर्ममत्वमुक्तं ५९ तस्मिन्निति तस्मिन्क्षणे उग्रं सिंहनिपातमुत्पश्यत उत्प्रेक्षमाणस्य तर्कयतोऽवाङ्मुखस्याधोमुखस्य प्रजानां पालयितुः

Digitized by Sarayu Foundation Trust, Delhi and eGangotri

राज्ञः उपर्युपरिष्टात् उपर्युपरिष्टादिति निपातः विद्याधराणां देवविशेषाणां हस्तैर्मुक्ता पुष्पवृष्टिः पपात ६० उत्तिष्ठेति राजा अमृतमिव आचरतीति अमृतायमानं उपमानादाचार इति क्यच् उत्थितमुत्पन्नं हे वत्स उत्तिष्ठेति वचो निशम्य श्रुत्वा उत्थितः सन् अस्तेः शतृप्रत्ययः अग्रतोऽग्रे प्रस्नवो क्षीरस्रवो यस्यास्सीति प्रस्नविनीं गां स्वां जननीमिव ददर्श सिंहं न ददर्श ६१ तमिति विस्मितमाश्चर्यगतं कर्तरि क्तः तं दिलीपं धेनुरुवाच किमित्यत्राह हे साधो मया मायामुद्भाव्य कल्पयित्वा परीक्षितोऽसि ऋषिप्रभावान्मयि अंतकोपि प्रहर्तुं न प्रभुर्न समर्थः अन्ये हिंस्रा घातुकाः शरारुर्घातुको हिंस्र इत्यमरः नमिकंपीत्यादिना रप्रत्ययः किमुत सुष्ठु न प्रभवेयुरिति योज्यं बलवत्सुष्ठु किमुत स्वत्यतीव च निर्भरे इत्यमरः ६२ भक्त्येति हे पुत्र गुरौ भक्त्या ममापि अनुकंपया चैते

उत्तिष्ठ वत्सेत्यमृतायमानं वचो निशम्योत्थितमुत्थितः सन् ददर्श राजा जननीमिव स्वां गामग्रतः प्रस्नविनीं न सिंहं ६१ तं वि
स्मितं धेनुरुवाच साधो मायां मयोद्भाव्य परीक्षितोऽसि ऋषिप्रभावान्मयि नांतकोपि प्रभुः प्रहर्तुं किमुतान्यहिंस्राः ६२ भ
क्त्या गुरौ मय्यनुकंपया च प्रीतास्मि ते वत्स वरं वृणीष्व न केवलानां पयसां प्रसूतिमवेहि मां कामदुघां प्रसन्नां ६३ ततः स
मानीय समानितार्थी हस्तौ स्वहस्तार्जितवीरशब्दः वंशस्य कर्तारमनंतकीर्तिं सुदक्षिणायां तनयं ययाचे ६४ ॥ ॥

तुभ्यं प्रीतास्मि क्रियाग्रहणमपि कर्तव्यमिति चतुर्थी वरं देवेभ्यो वरणीयमर्थं देवाद्वृते वरः श्रेष्ठे त्रिषु क्लीवं मनाक् प्रियमित्यमरः वृणीष्व स्वीकुरु तथा हि मां केवलानां पयसां प्रसूतिं कारणं न अवेहि न विद्धि किंतु प्रसन्नां मां कामान् दोग्धीति कामदुघामवेहि दुहः कप् घश्चेति कप्प्रत्ययः ६३ ततइति ततः मानितार्थी स्वहस्तार्जितो वीर इति शब्दो येन सः एतेनास्य दानत्वं दैन्यराहित्यं चोक्तं स राजा हस्तौ समानीय संधाय अंजलिं बध्वेत्यर्थः वंशस्य कर्तारं प्र
॥ वर्तयितारं अत एव रघुकुलमिति प्रसिद्धिः अनंतकीर्तिं स्थिरयशसं तनयं सुदक्षिणायां ययाचे ६४ ॥

होमएवअर्थः तस्यविधिः अनुष्ठानं तस्यशेषं होमावशिष्टमित्यर्थः ॥ ३ ॥ इन्दुः

संतानेति सापयस्विनीगौः संतानं कामयत इति संतानकामः कर्मण्यण् तस्मैराज्ञेतथेतिकाम्यत इति कामोवरः कामार्थेघञ्प्रत्ययः तंप्रतिश्रुत्य प्रतिज्ञायहेपुत्र मदीयंपयः पत्रपुटेपत्रनिर्मितेपात्रेदुग्ध्वा उपभुंक्ष्वपिबेति उपभुंक्ष्वेतिपाठः तमादिदेश आज्ञापितवती ६५ वत्सस्येति हेमातः वत्सस्यवत्सपीतस्यशेषं वत्सपीतावशिष्टमित्यर्थः तवऊधसिभवं औधस्यंक्षीरं शरीरावयवाच्चेतियत्प्रत्ययः रक्षितायाः उर्व्याः षष्ठांशं षष्ठभागमिवऋषेरनुज्ञामधिगम्य उपभोक्तुमिच्छामि ६६ इत्थमिति इत्थंक्षितीशेनविज्ञापितावसिष्ठधेनुः प्रीततरापूर्वंशुश्रूषयाप्रीतासंप्रत्यनयाविज्ञापनयाप्रीततरा अतिसं

संतानकामायतथेतिकामंराज्ञेप्रतिश्रुत्यपयस्विनीसा दुग्ध्वापयःपत्रपुटेमदीयंपुत्रोपभुंक्ष्वेतितमादिदेश ६५ वत्सस्य होमार्थविधेश्चशेषंगुरोरनुज्ञामधिगम्यमातः औधस्यमिच्छामितवोपभोक्तुंषष्ठांशमुर्व्याइवरक्षितायाः ६६ इत्थंक्षितीशेनवसिष्ठधेनुर्विज्ञापिताप्रीततराबभूव तदन्वितांहैमवताच्चकुक्षेःप्रत्याययावाश्रममश्रमेण ६७ तस्याःप्रसन्नेंदुमुखःप्रसादंगुरुर्नृपाणांगुरवेनिवेद्य प्रहर्षचिन्हानुमितंप्रियायैशशंसवाचापुनरुक्तयेव ६८ सनंदिनीस्तन्यमनिंदितात्मासद्वत्सलोवत्सहुतावशेषं पपौवसिष्ठेनकृताभ्यनुज्ञःशुभ्रंयशोमूर्तमिवातितृष्णः ॥ ६९ ॥

६९ तुष्टाबभूव तदन्वितातेनदिलीपेनान्विताहैमवतात् हिमवत्संबंधिनः कुक्षेःगुहायाःसकाशादश्रमेणानायासेनाश्रमंप्रत्यापयौआगता ६७ तस्याइति प्रसन्नेंदुरिवमुखंयस्यसनृपाणांगुरुर्दिलीपः प्रहर्षचिन्हैर्मुखरागादिभिरनुमितंमूहितंतस्याधेनोःप्रसादमनुग्रहंप्रहर्षचिन्हैरेवज्ञातत्वात्पुनरुक्तयेववाचागुरवेनिवेद्यविज्ञाप्यपश्चात्प्रियायैशशंसकथितस्यैवकथनंपुनरुक्तिः नचेहतदस्ति किंतुचिन्हैः कथितप्रायत्वात्पुनरुक्तयेवस्थितयेत्युत्प्रेक्षा ६८ सइति अनिंदितात्मा अगर्हितस्वभावः सस्तुवत्सलः प्रेमवान् सद्वत्सलः वत्सांसाभ्यांकामबलेइति लच्प्रत्ययः वसिष्ठेनकृताभ्यनुज्ञः कृतानुमतिः सन्वत्सस्यहुतस्यचावशे

प्रातरिति वशीवसिष्ठः प्रातर्यथोक्तस्यपूर्वोक्तस्यव्रतस्यगोसेवारूपस्यांगभूतायापारणतस्याः अंतेप्रास्थानिकंप्रस्थानेभवंतत्कालोचितमित्यर्थःका
लाट्ठञितिठञ्प्रत्ययः यथाकथंचिदुपलक्षणवृत्त्यापिकालेवर्तमानत्वात् प्रत्ययइष्यतइतिवृत्तिकारः ईयतेप्राप्यतेऽनेनेत्ययनंस्वस्त्ययनंशुभावहमाशी
र्वादंप्रयुज्यतौदंपतीस्वांराजधानींपुरींप्रति प्रस्थापयामास ७० प्रदक्षिणीतिनृपोहुतंतर्पितंहुतमश्नातीतिहुताशोऽग्निः कर्मण्यण् तंभर्तुर्मुनेरनंतरं
प्रदक्षिणानंतरमित्यर्थः अरुंधतींचधेनुंसवत्सांचप्रदक्षिणीकृत्यप्रगतोदक्षिणंप्रदक्षिणं तिष्ठद्गुप्रभृतीनिचेत्यव्ययीभावः ततःच्विः अप्रदक्षिण
प्रदक्षिणंसंपद्यमानंकृत्वाप्रदक्षिणीकृत्यसद्भिर्मंगलैः प्रदक्षिणादिभिर्मंगलाचारैरुदग्रतरप्रभावःसन्प्रतस्थे ७१ श्रोत्रेति धर्मपत्नीसहितःसः

प्रातर्यथोक्तव्रतपारणांते प्रास्थानिकंस्वस्त्ययनंप्रयुज्य तौदंपतीस्वांप्रतिराजधानींप्रस्थापयामासवशीवसिष्ठः ७०॥
प्रदक्षिणीकृत्यहुतंहुताशमनंतरंभर्तुररुंधतींच धेनुंसवत्सांचनृपःप्रतस्थेसन्मंगलोदग्रतरप्रभावः ७१ श्रोत्राभिरा
मध्वनिनारथेनसधर्मपत्नीसहितःसहिष्णुः ययावनुद्घातसुखेनमार्गंस्वेनेवपूर्णेनमनोरथेन ७२ तमाहितौत्सु
क्यमदर्शनेनप्रजाःप्रजार्थव्रतकर्शितांगं नेत्रैःपपुस्तृप्तिमनाप्नुवद्भिर्नवोदयंनाथमिवौषधीनां ७३ सहिष्णुर्व्रतादिदुःखसह

नशीलःसनृपः श्रोत्राभिरामध्वनिनाकर्णाल्हादकरस्वनेनअनुद्घातःपाषाणादिप्रतिघातरहितोऽतएवसुखयतीतिसुखस्तेनरथेनस्वेनपूर्णेनसकलमनोर
थेनेवमार्गमध्वानंययौमनोरथपक्षेध्वनिश्रुतिः अनुद्घातःप्रतिबंधनिवृत्तिः ७२ तमिति प्रदर्शनेनप्रवासनिमित्तेनाहितौत्सुक्यंजनितंतदर्शनोत्कंठंप्रजा
र्थेनव्रतेननियमेनकर्षितंकृशीकृतमंगंयस्यसतंनवोदयंनवाभ्युदयंप्रजास्तृप्तिमनाप्नुवद्भिः अतिगृध्नुभिर्नेत्रैरोषधीनांनाथंसोममिवतंपपुःअन्या
स्वयंयारदृशुरित्यर्थःचंद्रपक्षेअदर्शनकलाक्षयनिमित्तेप्रजार्थंलोकहितार्थंव्रतंदेवताभ्यःकलादाननियमःतंचसोमंपपुर्देवाःपर्यायेणानुपूर्वशःइति

पुरंदरेति पुरः पुरीरसुराणां दारयतीति पुरंदरः शक्रः पूःसर्वयोर्दारिसहोरिति खच्प्रत्ययः वाचंयमपुरन्दरौ चेति मुमागमनिपातः तस्य श्रीरिव श्रीर्यस्य स नृपः पौ
रैरभिनंद्यमानः उत्पताकमुच्छ्रितध्वजं पताका वैजयंती स्यात्केतनं ध्वजमस्त्रियामित्यमरः पुरं प्रविश्य भुजंगेंद्रेण समानसारे तुल्यबले सारो बले स्थिरांशे
च न्याय्ये क्लीबं वरे त्रिष्वित्यमरः भुजे भूयो भूमेर्धुरमाससंज अर्पितवान् ७४ अथेति अथ द्यौः सुखवर्त्म द्यौः स्वर्गसुखवर्त्मनोरिति विश्वः अत्रेर्महर्षेर्नयनयोः समु
त्पन्नमुत्पन्नं नयनसमुत्थं आतश्चोपसर्ग इति कप्रत्ययः तज्ज्योतिरिव चंद्रमिवेत्यर्थः अत्रिनेत्रप्रसूतश्च स्यादत्रिनेत्रप्रसूत इति हलायुधः चंद्रस्यात्रिनेत्रोद्भूतत्वमुक्तं
हरिवंशे नेत्राभ्यां वारि सुस्राव दशधा द्योतयद्दिशः तं गर्भं दशधा ह्रष्टा दिशो देव्यो दधुस्तदा १ समेत्य धारयामासुर्न चैतास्तमशक्नुवन् स ताभ्यः सहसैवाथ दि
श्यो गर्भः प्रभावितः २ पपात पावयन् लोकान् शीतांशुः सुरभावन इति सुरसरिद्गंगा वन्हिना निष्ठ्यूतं विसृष्टं मैशं ईशसंबन्धि शुक्रं तेज इत्यर्थः (?) नासिके द्यौ चेत्यनेन न निपूर्वष्ठ्यीवतेर्व

पुरंदरश्रीः पुरमुत्पताकं प्रविश्य पौरैरभिनंद्यमानः भुजे भुजंगेंद्रसमानसारे भूयः स भूमेर्धुरमाससंज ७४ अथ नयनसमुत्थं
ज्योतिरत्रेरिव द्यौः सुरसरिदिव तेजो वन्हिनिष्ठ्यूतमैशं नरपतिकुलभूत्यै गर्भमाधत्त राज्ञी गुरुभिरभिनिविष्टं लोकपालानुभावैः ७५

॥ इति श्रीरघुवंशे द्वितीयः सर्गः २॥ ११ कारस्य ठुठनुतनुत्वास्त निष्ठ्यूतविहसितेरिताः समाइत्यमरः ऐशं तेजः स्कंदमिव अत्र रामायणं तेगत्वा
पर्वतं रामकेवलं धातुमंडितं अग्निं संयोजयामासुः पुत्रार्थं सर्वदेवताः १ देवकार्यमिदं देव समाधत्स्व हुताशन शैलपुत्र्यां महत्तेजो गंगायां तेज उत्सृज २॥
देवतानां प्रतिज्ञाय गंगामभ्येत्य पावकः गर्भं धारय वै देवि देवतानामिदं प्रियं ३ इत्येतद्वचनं श्रुत्वा दिव्यं रूपमधारयत् तस्या महिमानं दृष्ट्वा समंतादवकीर्य
च ४ समंततस्तदा देवि सममभ्यासिंचत पावकः सर्वस्रोतांसि पूर्णानि गंगया रघुनंदनेति ५ राज्ञी सुदक्षिणा नरपतेर्दिलीपस्य कुलभूत्यै संततिलक्षणायै गु
रुभिर्महद्भिर्लोकपालानामनुभावैस्तेजोभिरभिनिविष्टमनुप्रविष्टं गर्भमाधत्त दधावित्यर्थः अत्र मनुः अष्टानां लोकपालानां वपुर्धारयते नृप इति अत्रा

Digitized by Sarayu Foundation Trust, Delhi and eGangotri

धत्तेत्यनेन स्त्रीकर्तृधारणमात्रमुच्यते तथा मंत्रे च दृश्यते यथेयं पृथिवी मह्युत्ताना गर्भमादधे एवं तं गर्भमाधेहि दशमे मासि सूतवे इत्याश्वलायनानां सीमंत मंत्रे स्त्रीव्यापारधारणे व्याख्यानशब्दप्रयोगदर्शनादिति मालिनीवृत्तमेतत् तदुक्तं ननमयययुतेयं मालिनी भोगिलोकैरिति लक्षणात् ७५॥ इति श्रीपदवाक्यप्रमाणपारावारीणमहोपाध्यायकोलाचलमल्लिनाथसूरिविरचितायां रघुवंशव्याख्यायां संजीविनीसमाख्यायां द्वितीयः सर्गः॥ २॥

॥श्रीगणेशायनमः उपाधिगम्योप्यनुपाधिगम्यः समावलोकोप्यसमावलोक्यः भवोपि योऽभूदभवस्त्रिधा वो यं जगत्स पायादपि नः सपायात् १ राज्ञी गर्भमाधत्तेत्युक्तं सम्प्रति गर्भलक्षणानि वर्णयितुं प्रस्तौति अथेति अथ गर्भधारणानन्तरं सुदक्षिणा उपस्थितोदयं प्राप्तकालम् भर्तुरीप्सितं मनोरथम् भावेक्तः पुनः सखीजनस्योद्वीक्षणानां दृष्टीनां कौमुदीमुखं चन्द्रिकाप्रादुर्भावम् यद्वा कौमुदी नाम दीपोत्सवतिथिः तदुक्तम्भविष्योत्तरे कौ

॥श्रीगणेशायनमः अथेप्सितं भर्तुरुपस्थितोदयं सखीजनोद्वीक्षणकौमुदीमुखम् निदानमिक्ष्वाकुकुलस्य संततेः सुदक्षिणा दोहदलक्षणं दधौ १ शरीरसादादसमग्रभूषणा मुखेन सालक्ष्यत लोध्रपाण्डुना तनुप्रकाशेन विचेयतारका प्रभातकल्पा शशिनेव शर्वरी २॥

मोदन्ते जना यस्यां तेनासौ कौमुदी मतेति तस्या मुखम्प्रारम्भम् अत एव केचित्कौमुदीसुखमिति पाठं पठन्ति इक्ष्वाकुकुलस्य सन्ततेरविच्छेदस्य निदानम् मूलकारणम् निदानं त्वादिकारणमित्यमरः एवंविधं दोहदलक्षणं गर्भचिन्हं वक्ष्यमाणं दधौ स्वहृदयेन गर्भहृदयेन च द्विहृदया गर्भिणी यथाह वाग्भटः मातृजं ह्यस्य हृदयं मातुश्च हृदयं च तत् सम्बध्यते च गर्भिण्याः श्रेष्ठं श्रद्धाभिधानतमिति तत्सम्बधित्वाद्गर्भो दोहदमित्युच्यते सा च तद्योगाद्दोहदिनीति तदुक्तं संग्रहे द्विहृदयां नारीं दोहदिनीमाचक्षत इति अत्र दोहदलक्षणस्य वस्तितत्वेन कौमुदीमुखत्वेन च निरूपणात् रूपकालङ्कारः अस्मिन्सर्गे वंशस्थवृत्तं जतौ तु वंशस्थमुदीरितं जराविति लक्षणात् १ सम्प्रति क्षामताख्यं गर्भलक्ष

णं वर्णयति शरीरेति शरीरस्य सादात्कार्श्याद्समग्रभूषणा· परिमिताभरणा· लोध्रपुष्पवत्पाण्डुना मुखेनोपलक्षिता सुदक्षिणा विचेया मृग्यास्तारका यस्यां
सा तथोक्ता विरलनक्षत्रेत्यर्थः तनुप्रकाशेन अल्पकान्तिना शशिनोपलक्षिता ईषदपरिसमाप्तप्रभाता प्रभातकल्पा प्रभातादीषन्न्यूनेति तसिलादिष्वा
कृत्वसुच इति प्रभातशब्दस्य पुम्वद्भावः शर्वरी रात्रिरिवालक्ष्यत शरीरसादादि गर्भलक्षणमाह वाहृतः श्यामता गरिमा कुक्षेर्मूर्च्छा छर्दिररोचकं जृम्भा
प्रसेकः सदनं रोमराज्याः प्रकाशनमिति २ तदिति क्षितीश्वरो रहसि मृदा सुरभि सुगन्धि तस्या आननं तदाननम्· सुदक्षिणामुखं उपाघ्राय तृप्तिं न आ
ययौ कः किमिवः शुचिव्यपाये· ग्रीष्मावसाने शुचिशुद्धेऽनुपहते शृङ्गाराषाढयोः सिते ग्रीष्मे हुतवहेऽपि स्यादुपधाशुद्धमन्त्रिणीति विश्वः पयोमुचां मेघा

तदाननं मृत्सुरभि क्षितीश्वरो रहस्युपाघ्राय न तृप्तिमाययौ करीव सिक्तं पृषतैः पयोमुचां शुचिव्यपाये वनराजिपल्वलम् ३॥
दिवं मरुत्वानिव भोक्ष्यते महीं दिगन्तविश्रान्तरथो हि तत्सुतः अतोऽभिलाषे प्रथमं तथाविधे मनो बबन्धान्यरसान्विलङ्घ्य सा ४
न मे ह्रिया शंसति किंचिदीप्सितं स्पृहावती वस्तुषु केषु मागधी

३ नां पृषतैर्बिन्दुभिः पृषन्ति बिन्दुपृषता इत्यमरः सिक्तमुक्षितम् वनराज्याः
पल्वलमुपाघ्राय करी गज इव अत्र करिवनराजिपल्वलानां कान्तकामिनीवदनसमाधिरनुसन्धेयः गर्भिणीनां मृद्भक्षणं लोके प्रसिद्धमेव एतेन दोहदा
ख्यं गर्भलक्षणमुच्यते ३ दोहदलक्षणे मृद्भक्षणे हेत्वन्तरमुत्प्रेक्षते दिवमिति हि यस्मात् दिगन्तविश्रान्तरथः अव्याहतवर्त्मा तस्याः सुतस्तत्सुतो मरुत्वानि
न्द्रः इन्द्रो मरुत्वान्मघवेत्यमरः दिवं स्वर्गमिव भुवं भोक्ष्यते भुजोऽनवन इत्यात्मनेपदम् अतः प्रथमं सा सुदक्षिणा तथाविधे भूविकारे मृद्रूपे अ
भिलष्यत इत्यभिलाषो भोग्यवस्तु तस्मिन् कर्मणि घञ्प्रत्ययः रसयन्ते स्वाद्यन्त इति रसा भोग्यार्थाः अन्ये च ते रसाश्च तान् विलङ्घ्य विहाय मनो बबन्ध नि
दधौ दोहदहेतुकस्य मृद्भक्षणस्य पुत्रभूभोगसूचनार्थत्वमुत्प्रेक्षते ४ नेति मगधस्य राज्ञोऽपत्यं स्त्री मागधी सुदक्षिणा द्व्यञ्मगधकलिङ्गशूरमसाद

रित्यर्थः ह्रियाकिञ्चित्किमपीप्सितमिष्टंमेमह्यं नशंसतिनाचष्टे केवलमुत्सुकहासवतीत्यनुवेलमनुक्षणमादृतः आदृतवान् कर्त्तरिक्तः आदृतोसादरोचि
तावित्यमरः प्रियायास्सखीः सहचरीः उत्तरकोशलेश्वरोदिलीपः एच्छतिस्मपप्रच्छभूतार्थेलट् लटस्मेइत्यनेनसखीनांविस्रम्भभूमित्वादितिभावः ५ उपे
त्येति दोहदंगर्भिणीमनोरथः दोहदंदोहदं श्रद्धालालसंचसमंस्मृतमितिहलायुधः सासुदक्षिणादोहदेनगर्भिणीमनोरथेनदुःखशीलतांदुःखभावतामुपे
त्यप्राप्ययद्वस्तुवव्रे आचकाङ्क्ष तदाहृतमानीतंभर्त्राइतिशेषः तद्वस्तु अपश्यदेव आलभतेत्यर्थः कुतोहियस्मादस्यभूपतेस्त्रिदिवेपिस्वर्गेपिवस्तुअनासा
द्यम् अनवाप्यं नाभूत् किंपुनर्भुव्यनेत्याह अधिज्यधन्वनइति नहिवीरपत्नीनामलभ्यंनामकिञ्चिदस्तीतिभावः अत्रवाहटः याहग्भाविदोहान्नेश्र

इतिस्मपृच्छत्यनुवेलमादृतः प्रियासखीरुत्तरकोशलेश्वरः ५ उपेत्यसादोहददुःखशीलतांयदेवववव्रेतदपश्यदाहृतं नहीष्ट
मस्यत्रिदिवेपिभूपतेरभूदनासाद्यमधिज्यधन्वनः ६ क्रमेणनिस्तीर्यचदोहदव्यथांप्रचीयमानावयवारराजसा पुराण
पत्रापगमादनंतरंलतेवसंनद्धमनोज्ञपल्लवा ७ दिनेषुगच्छत्सुनितांतपीवरंतदीयमानीलमुखंस्तनद्वयं तिरश्चकार
भ्रमराभिलीढयोःसुजातयोःपंकजकोशयोःश्रियं ८॥ ॥ द्वाचविविधात्मकेति एतच्चपत्नीमनोरथपूरणाकरणेदृष्टदोषसम्भा
वान्नतुराज्ञःस्त्रीलोल्यात् तदुक्तम् देयमप्यहितंतस्मैहितायहितवल्यकम् श्रद्धाविघातेगर्भस्यविकृतिश्च्युतिरेवच अन्यत्रच दोहदस्याप्रदा
नेनगर्भोदोषमवाप्नुयादिति ६ क्रमेणेति सासुदक्षिणाक्रमेणदोहदव्यथांचनिस्तीर्यप्रचीयमानावयवापुष्यमाणावयवासतीपुराणपत्रा
णामपगमान्नाशादनन्तरंसन्नद्धाःसञ्जाताःमनोज्ञाःपल्लवायस्यास्सालतेवरराज ७ लक्षणान्तरवर्णयतिदिनेष्विति दिनेषुदोहददिवसे
षुगच्छत्सुनितान्तपीवरमतिस्थूलमासमंतान्नीलेमुखेचूचुकेयस्यततदीयंस्तनद्वयं भ्रमरैरभिलीढयोरभिव्याप्तयोःसुजातयोःसुन्दरयोःपङ्कजकोशयोःपद्म

राम. २५

निधानेति नृपस्ससत्वाम् आपन्नसत्वां गर्भिणीमित्यर्थः आपन्नसत्वास्याद्गुर्विण्यन्तर्वत्नी च गर्भिणीत्यमरः महिषीं निधानं निधिर्गर्भो यस्यास्तां सागराम्बरां समुद्रवसनां भूमिमित्यर्थः भूतधात्री रत्नगर्भा विपुला सागराम्बरेत्यमरः तामिव अभ्यन्तरे लीनः पावको यस्यास्तां शमीमिव शमी तरौ वह्निरस्तीत्यत्र लिङ्गं शमीगर्भादग्निं मथ्नन्तीति अन्तः सलिलामन्तर्गतजलां सरस्वतीं नदीमिव अमन्यत एतेन गर्भस्य भाग्यवत्वतेजस्वित्वपावनत्वानि विवक्षितानि ९ प्रियेति धीरः स राजा प्रियायामनुरागस्य स्नेहस्य मनसः समुन्नतेरौदार्य्यस्य भुजेन भुजबलेन करेण वा अर्जितानां न तु बालिश्यादिना दिगन्तेषु सम्पदां धृतेः पुत्रो मे भविष्यतीति सन्तोषस्य च धृतिर्योगान्तरे धैर्य्ये धारणाध्वरतुष्टिष्विति विश्वः सदृशीः अनुरूपाः पुमान् सूयतेऽनेनेति पुंसवनं तदादिर्यासां ताः क्रि

निधानगर्भामिवसागरांवरांशमीमिवाभ्यंतरलीनपावकां नदीमिवांतःसलिलांसरस्वतींनृपःससत्वांमहिषीममन्यत
९ प्रियानुरागस्यमनःसमुन्नतेर्भुजार्जितानांचदिगंतसम्पदाम् यथाक्रमंपुंसवनादिकाःक्रियाधृतेश्चधीरःसदृशीर्व्यधत्तसः
१० सुरेंद्रमात्राश्रितगर्भगौरवात्प्रयत्नमुक्तासनयागृहागतः तयोपचारांजलिखिन्नहस्तयाननंदपारिप्लवनेत्रयानृपः ११॥

याः यथाक्रममेक्रममनतिक्रम्य व्यधत्त कृतवान् आदिशब्देन अनवलोमनं सीमन्तोन्नयने गृह्यते अत्र मासि द्वितीये तृतीये वा पुंसवनम् यदाह पुंसा नक्षत्रेण चन्द्रमायुक्तः स्यादिति पारस्करः चतुर्थे नवलोमनमित्याश्वलायनः षष्ठेष्टमे वा सीमन्त इति याज्ञवल्क्यः १० सुरेन्द्रमात्रेति गृहागतो नृपः सुरेन्द्राणां लोकपालानां मात्राभिः अंशैः आश्रितस्यानुप्रविष्टस्य गर्भस्य गौरवात् भारात् प्रयत्नेन मुक्तासनया आसनादुत्थितयेत्यर्थः उपचारस्याञ्जलावञ्जलिकरणे खिन्नहस्तया पारिप्लवनेत्रया तरलेक्षणया तया सुदक्षिणया चञ्चलं तरलं चैव पारिप्लवपरिप्लवइत्यमरः ननंद सुरेन्द्रमात्राश्रिते

॥ ॥ ॥ यत्र मनुः अष्टाभिश्च सुरेन्द्राणां मात्राभिर्निर्मितो नृप इति ११ ॥ ॥ ॥

कुमारेति अथ कुमारभृत्याबालचिकित्सासंज्ञायां समजनि यदित्यादिना क्यप् तस्यां कुशलैः कृतिभिः कृती कुशल इत्यमरः आप्तैर्भिषग्भिर्वैद्यैः भिषग्वैद्यौ चिकित्सक इत्यमरः गर्भस्य भर्मणि भरणे पोषणे भर्म हेमप्रभृतिर्भर्म इति शाश्वतः भृञो मनिन् प्रत्ययः अधिष्ठिते सति आश्रिते सति काले दशमे मासि अन्यत्र ग्रीष्मावसाने प्रसवस्य गर्भमोचनस्योन्मुखीमासन्नप्रसवामित्यर्थः स्यादुत्पादे फले पुष्पे प्रसवो गर्भमोचन इत्यमरः प्रियां भार्यां अभ्राण्यस्याः संजातान्यभ्रितानि दस्य संजातं तारकादिभ्य इति इतच् प्रत्ययः तां दिवमिव पतिर्भर्ता प्रतीतः हृष्टः सन् ख्याते हृष्टे प्रतीत इत्यमरः ददर्श दृष्टवान् गर्भभर्मणीति पाठे गर्भाधानप्रतीतावौचित्यमिति भावः इति १२ ग्रहैरिति ततः शच्या इन्द्राण्या समा पुलोमजा शचीन्द्राणीत्यमरः सा सुदक्षिणा समये प्रसूतिकाले सति दशमे मासीत्यर्थः दशमे मासि जायत इति श्रुतेः उच्चसंश्रयैरुच्चसंस्थैस्तुङ्गस्थानगैरसूर्यगैरनस्तमितैः कैश्चिद्यथासम्भवं पञ्चभिर्ग्रहैः सूचिताभा

कुमारभृत्याकुशलैरधिष्ठिते भिषग्भिराप्तैरथ गर्भभर्मणि । पतिः प्रतीतः प्रसवोन्मुखीं प्रियां ददर्श काले दिवमभ्रितामिव ॥ १२॥
ग्रहैस्ततः पञ्चभिरुच्चसंश्रयैरसूर्यगैः सूचितभाग्यसंपदं । असूत पुत्रं समये शची समा त्रिसाधना शक्तिरिवार्थमक्षयम् ॥ १३॥

ग्यसम्पदं यस्य तं पुत्रं त्रीणि प्रभावमंत्रोत्साहात्मकानि साधनान्युत्पादकानि यस्याः सा त्रिसाधना शक्तिः षड्गुणाः शक्तयस्तिस्रः प्रभावोत्साहमंत्रजा इत्यमरः अक्षयमर्थमिवासूत षूङ् प्राणिगर्भविमोचने इत्यदादिषु पठ्यते तस्माल्लङ् ततः कर्तरि लङ् अत्रेदमनुसन्धेयम् अजवृषभमृगाङ्गनाकुलीराझषवणिजो च दिवाकरादितुङ्गाः दशशिखिमनुयुक्तिथीन्द्रियांशैस्त्रिनवकविंशतिभिश्च तेऽस्तनीचा इति सूर्यादीनां सप्तानां मेषवृषभादयो राशयः श्लोकोक्तक्रमविशिष्टाः उच्चस्थानानीति स्वस्वतुङ्गापेक्षया सप्तमस्थानानि नीचानीति तत्रोच्चेष्वपि दशमादयो राशित्रिंशांशा यथाक्रममुच्चेषु परमोच्च नीचेषु परमनीचा इति जातकश्लोकार्थः अत्रांशस्त्रिंशो भागः यथाह नारदः त्रिंशद्भागात्मकं लग्नमिति सूर्यप्रत्यासक्तिर्ग्रहाणामस्त

मयोनाम तदुक्तम् लघुमानसेरविणस्तमयोगस्तूदयोभवेदिति तेचस्वोच्चस्थाः फलन्ति अस्तगानामपिनीचगाः तदुक्तं राजमृगाङ्के स्वोच्चे पूर्णस्वर्क्षे मर्द्धंसुहृद्भे ऽल्पशुभंखेचरेन्दुः नीचस्थायीनास्तगोवानकिंचित्पादन्यूनंसत्त्रिकोणेददातीतितदिदमाहकविः उच्चसंस्थैरसूर्यगैरितिच एवंसतिय स्यजन्मकालेपंचप्रभृतयोग्रहाः स्वोच्चस्थाः सदेवतुल्याभवंति तदुक्तंकुटस्थीयेउत्कृष्टाः स्त्रीसुखिनः प्रकृष्टकार्याराजप्रतिरूपकाश्चराजानः एकद्वित्रि चतुर्भिर्जायन्तेअतः परंदिव्याइतितदिदमाहपञ्चभिरिति १३॥दिशइति ततस्तस्मिन्क्षणेकालाध्वनोरत्यन्तसंयोगेद्वितीयादिशः प्रसेदुः प्रस न्नावभूवुः मरुतोवाताः सुखाः मनोहरावबुः वान्तिस्म अग्निः प्रदक्षिणार्चिः सन्हविरादरदेस्वीचकार इत्थंसर्वंशुभशंसिशुभसूचकंबभूव तथाहितादृशः

दिशः प्रसेदुर्मरुतोववुः सुखाः प्रदक्षिणार्चिर्हविरग्निराददे बभूवसर्वंशुभशंसितत्क्षणंभवोहिलोकाभ्युदयायतादृशाम् १४

अरिष्टशय्यांपरितोविसारिणासुजन्मनस्तस्यनिजेनतेजसा निशीथदीपाः सहसाहतत्विषोबभूवुरालेख्यसमर्पिताइव १५

जनायशुद्धान्तचरायशंसतेकुमारजन्मामृतसंमिताक्षरं अदेयमासीत्त्रयमेवभूपतेः शशिप्रभंछत्रमुभेचचामरे १६ ॥

शां रघुप्रकाराणांभवोजन्मलोकाभ्युदयायभवतीतिशेषः ततोदेवाअपिसन्तुष्टाइत्यर्थः १४ अरिष्टेति अरिष्टंसूतिकागृहमित्यमरः अरिष्टंसूतिकागृ हेशय्यांतल्पंपरितोऽभितः परितः समयानिकषाहाप्रतियोगेषुदृश्यतइतिद्वितीया विसारिणासुजन्मनः शोभनोत्पत्तेः जनुर्जननजन्मानिजनिरुत्पत्ति रुद्भवइत्यमरः तस्यशिशोर्निजेननैसर्गिकेणतेजसासहसाहतत्विषः क्षीणकान्तयोनिशीथदीपाः अर्द्धरात्रदीपाआलेख्येसमर्पिताचित्रार्पिताइवबभू वुः निशीथशब्दोदीपानाम् प्रभाधिक्यसम्भावनार्थः १५ जनायेति भूपतेर्दिलीपस्य अमृतसंमिताक्षरममृतसमानाक्षरंसहृष्यसमसंमितादृत्याहद्र ण्डीकुमारजन्मपुत्रोत्पत्तिंशंसते कथयते शुद्धान्तचरायअन्तःपुरचारिणेजनायत्त्रयमेवादेयमासीतकिन्तत् शशिप्रभम् उज्ज्वलंछत्रम् उभेचामरे

निवातेति निवातोनिर्वातः प्रदेशः निवातावाश्रयावातावित्यमरः तत्र यत्पद्मंतद्वत् स्तिमितेननिश्चलेनचक्षुषानेत्रेणकान्तं सुन्दरंसुताननंपुत्रमुख
मपिबतस्तृष्णयापश्यतोनृपस्य गुरुरुत्कटः प्रहर्षः कर्त्ता इन्दुदर्शनाद्गुरुर्महोदधेः पूरोजलौघइव आत्मनि शरीरेनप्रबभूव आत्मानंस्थातुंनशशाक
नान्तरेऽवमातिस्मेतियावत् नत्वल्याधारे अधिकमीयतइतिभावः यद्वा प्रवाहआत्मनिस्वस्मिन् विषयेनप्रबभूवस्थातुंनशशाककिन्तुबहिर्निर्जगा
मेत्यर्थः १७ सइति सदिलीपसूनुः तपस्विनापुरोधसापुरोहितेन पुरोधास्तुपुरोहितइत्यमरः वसिष्ठेनतपस्विना तदनुष्ठितंकर्मसवीर्यस्यादितिभावः
तपोवनादेत्यआगत्याऽखिलेसमग्रेजातकर्मणिजातस्यकर्त्तव्येसंस्कारविशेषेकृतेसति प्रयुक्तसंस्कारः शाणोल्लेखनादिर्यस्यसतथोक्तः आकरो

निवातपद्मस्तिमितेनचक्षुषानृपस्यकांतंपिबतःसुताननं महोदधेःपूरइवेंदुदर्शनाद्गुरुःप्रहर्षःप्रबभूवनात्मनि १७
सजातकर्मण्यखिलेतपस्विनातपोवनादेत्यपुरोधसाकृते दिलीपसूनुर्मणिराकरोद्भवःप्रयुक्तसंस्कारइवाधिकंबभौ १८
सुखश्रवामंगलतूर्यनिःस्वनाःप्रमोदनृत्यैःसहवारयोषितां नकेवलंसद्मनिमागधीपतेःपथिव्यजृंभंतदिवौकसामपि १९

द्भवः खनिप्रभवः खनिःस्त्रियामाकरःस्यादित्यमरः मणिरिवाधिकंबभौ वसिष्ठमंत्रप्रभावात्तेजिष्ठोभूदित्यर्थः अत्रमनुः प्राङ्नाभिवर्द्धनात्पुंसो
जातकर्मविधीयतइति १८ सुखश्रवाइति सुखः सुखकरः श्रवः श्रवणंयेषांतेसुखश्रवाः श्रुतिसुखाइत्यर्थः मङ्गलतूर्यनिःस्वनाः मङ्गलवाद्यध्व
नयोवारयोषितानांवेश्यानाम् वारस्त्रीगणिकावेश्यारूपाजीवेत्यमरः प्रमोदनृत्यैर्हर्षनर्त्तनैः सहमागधीपतेर्दिलीपस्यसद्मनिकेवलंगृहएवनव्य
जृम्भत किन्तु द्यौरोकोयेषांतेदिवौकसः पृषोदरादित्वात्साधुः देवास्तेषांपथ्याकाशेऽपिव्यजृम्भन्त तस्यदेवांशत्वाद्देवोपकारित्वाच्चदेवदुन्दुभयो

रपिनेदुरितिभावः १९॥

नेति रक्षितुःसम्यक्पालनशीलस्येत्यर्थः तन्नितितृन् तस्यदिलीपस्य अतएवचोराद्यभावात्संयतोवद्धोनवभूवनाभूत्‌ किन्तेनात आह विसर्जयेदिति सुत
जन्मनाहर्षितस्तोषितस्सन् यंवद्धं विसर्जयेद्विमोचयेत् किन्तुसराजातदापितॄणाम् ऋणाभिधानाद्बन्धनात्केवलंयथातथास्वयमेवएकएवेत्यर्थः केव
लः कृत्स्नः एकश्चकेवलश्चात्तधारणे इति शाश्वतः मुमुचेकर्मकर्तरिलिट्स्वयमेवमुक्त इत्यर्थः अस्मिन्नर्थे एषवा अनृणोयः पुत्रीति श्रुतिः प्रमाणम् २०
श्रुतस्येति अर्थवित् शब्दार्थज्ञः पार्थिवः पृथिवीश्वरोदिलीपः अयमर्भकः वालकः श्रुतस्यशास्त्रस्य अन्तंपारंयायात् यथातथायुधिपरेषांशत्रूणांपा
रंचान्तंयायात् यातुंशक्नुयादित्यर्थः शकिलिङ्चेतिशक्यार्थेलिङ् इतिहेतोः अगिरघिलघिगत्यर्था इतिलघि धातोर्गमनाख्यमर्थंविदित्वाऽवेक्ष्यआ।

नसंयतस्तस्यवभूवरक्षितुर्विसर्जयेद्यंसुतजन्महर्षितः ऋणाभिधानात्स्वयमेवकेवलंतदापितॄणांमुमुचेसवंधनात् २०
श्रुतस्ययायादयमन्तमर्भकस्तथापरेषांयुधिचेतिपार्थिवः अवेक्ष्यधातोर्गमनार्थमर्थविच्चकारनाम्नारघुमात्मसंभवम् २१
पितुःप्रयत्नात्ससमग्रसंपदःशुभैःशरीरावयवैर्दिनेदिने पुपोषवृद्धिंहरिदश्वदीधितेरनुप्रवेशादिवबालचंद्रमाः २२ उमा
वृषाङ्कौशरजन्मनायथायथाजयंतेनशचीपुरंदरौ॥ ॥ २१ लोच्य आत्मसम्भवंपुत्रंनाम्नारघुंचकारलघिवह्योर्नलोपश्चेत्युप्रत्यये
वालमूललघ्वलङ्गुलीनांवालोरत्वमापद्यते इतिवैकल्पिकेरफादेशेरघुरितिरूपंसिद्धम् अत्रशंखः अशौचेतुव्यतिक्रान्तेनामकर्मविधीयत इति २१।
पितुरिति सरघुःसमग्रसम्पदःपूर्णलक्ष्मीकस्यपितुर्दिलीपस्यप्रयत्नात् शुभैर्मनोहरैः शरीरावयवैः हरिदश्वदीधितेःसूर्यस्यरश्मेःभास्वद्विवस्वत्स
प्ताश्वहरिदश्वोष्णरश्मय इत्यमरः रश्मेः अनुप्रवेशाद्बालचन्द्रमा इवदिनेदिनेप्रतिदिनम् नित्यवीप्सयोरितिद्विर्वचनम् वृद्धिंपुपोष अत्रसंहितावच
नम् सलिलमयेशशिनिरवेर्दीधितयोमूर्छितास्तमोनैशंक्षपयन्तिदर्पणोदरनिहिता इवमन्दिरस्यान्तरिति २२ उमेति उमावृषाङ्कौपार्वतीवृषभध्वजौ

Digitized by Sarayu Foundation Trust, Delhi and eGangotri

शरजन्मना कार्त्तिकेयेन कार्त्तिकेयो महासेनः शरजन्मा षडानन इत्यमरः यथा ननन्दतुः शचीपुरन्दरौ इन्द्राणीन्द्रौ पुलोमजा शचीन्द्राणीत्यमरः जयन्तेन पाकशासनिना जयन्तः पाकशासनिरित्यमरः यथा ननन्दतुः तथा तत्समौ ताभ्याम् उमावृषाङ्काभ्यां शचीपुरन्दराभ्यां च समौ सा मागधी च स नृपश्च तत्सदृशेन ताभ्यां कुमारजयन्ताभ्यां सदृशेन तेन रघुणा ननन्दतुः मागधी व्याख्याता २३ रथाङ्गनाम्नोरिति रथाङ्गनाम्नी च रथाङ्गनामा च रथाङ्गनामानौ चक्रवाकौ पुमान्स्त्रियेत्येकशेषः तयोरिव दम्पत्योर्भावबन्धनं हृदयावकर्षकम् परस्पराश्रयम् अन्योन्यविषयं प्रेम अवभूवत् एकेन केवलेन ताभ्याम् अन्येन वा एके मुख्यान्यकेवला इत्यमरः एकोऽन्यार्थे प्रधाने च प्रथमे केवले तथा साधारणे समानेऽल्पे संख्यायां च प्रयुज्य

तथा नृपः सा च सुतेन मागधी ननन्दतुस्तत्सदृशेन तत्समौ २३ रथांगनाम्नोरिव भावबंधनं बभूव यत्प्रेम परस्पराश्रयम् विभक्तमप्येकसुतेन तत्तयोः परस्परस्योपरि नव्यहीयत २४ उवाच धात्र्या प्रथमोदितं वचो ययौ तदीयामवलंब्य चांगुलिं अभूच्च नम्रः प्रणिपातशिक्षया पितुर्मुदं तेन ततान सोऽर्भकः २५ तमंकमारोप्य शरीरयोगजैः सुखैर्निषिंचंतमिवामृतं त्वचि उपांतसंमीलितलोचनो नृपश्चिरात्सुतस्प

त इति विश्वः सुतेन विभक्तमपि कृतविभागमपि परस्परस्योपरि पर्यचीयत ववृधे कर्मकर्तरि लिङ् अकृत्रिमत्वात्स्वयमेव उपचि ॥ र्शरसज्ञतां ययौ २६
तमित्यर्थः यदेकाधारवस्तु तदाधारद्वये विभज्यमानं हीयते अत्र तु तयोः प्रागेकविषयं प्रेम सम्प्रति द्वितीयलाभेऽपि न हीयत प्रत्युतोपचितमेव अभूदिति भावः २४ उवाचेति सोऽर्भकः शिशुः पोतः पाकोऽर्भको डिम्भः पृथुकः शावकः शिशुरित्यमरः धात्र्या उपमात्रा धात्री जनन्यामलकीवसुमत्युपमातृष्विति विश्वः प्रथमम् उपदिष्टं वच उवाच तदीयामङ्गुलिमवलम्ब्य ययौ प्रणिपातस्य शिक्षया उपदेशेन नम्रोऽभूच्चेति यत् पितुर्मुदं ततान २५ तमिति शरीरयोगजैः सुखैः त्वचि त्वगिन्द्रिये अमृतं निषिञ्चन्तमिव तं पुत्रमङ्कमारोप्य मुदाविर्भावात् उपान्तयोः संमीलितलोचनः स नृपः चिरात्सुतस्पर्शरसज्ञतां ययौ रसः

अमंस्तेति स्थितेरभेत्ता मर्यादापालकः स नृपः परार्ध्यजन्मना उत्कृष्टजन्मना तेन रघुणा अन्वयं वंशं प्रजानां पतिः ब्रह्मा गुणाः सत्त्वादयः गुणाः सत्त्वं रजस्त
मश्चेत्यमरः तेषु अग्र्येण मुख्येन सत्त्वेन वर्त्तते व्याप्रियत इति गुणाग्र्यवर्त्ती तेन स्वस्य मूर्तिभेदेन अवतारविशेषेण विष्णुना आत्मनः सर्गं सृष्टिमिव स्थिति
मन्तं प्रतिष्ठावन्तम् अमंस्त मन्यतेरनुदात्तत्वादिट् प्रतिषेधः अत्रोपमानोपमेययोरितरेतरविशेषणानीतरेतरत्र योज्यानि तत्र रघुपक्षे गुणो विद्याविनया
दयः गुणोऽप्रधाने रूपादौ मौर्व्यां सूदे वृकोदरे त्यागे शौर्यादिसन्ध्यादिविद्यादि हरितादिष्विति विश्वः शेषं सुगमम् २७ स इति चूडाकार्यं द्विजातीनां सर्वेषामेव ध
र्मतः प्रथमेऽब्दे तृतीये वा कर्त्तव्यं श्रुतिचोदनादिति मनुस्मरणात् तृतीये वर्षे वृत्तचूडो निष्पन्नचूडाकर्मा सन् डलयोरभेदश्च स रघुः प्राप्ते तु पञ्चमे वर्षे विद्यारम्भं च कारये

अमंस्त चानेन परार्ध्यजन्मना स्थितेरभेत्ता स्थितिमंतमन्वयं स्वमूर्तिभेदेन गुणाग्र्यवर्तिना पतिः प्रजानामिव सर्गमात्मनः २७ स वृत्तचूड
श्चलकाकपक्षकैरमात्यपुत्रैः सवयोभिरन्वितः लिपेर्यथावद्ग्रहणेन वाङ्मयं नदीमुखेनेव समुद्रमाविशत् २८ अथोपनीतं विधिवद्वि
पश्चितो विनिन्युरेनं गुरवो गुरुप्रियं अवन्ध्ययत्नाश्च वभूवुरर्भके क्रिया हि वस्तूपहिता प्रसीदति २९॥ दितिवचनात्पञ्चमे वर्षे चलकाक

पक्षकैश्चञ्चलशिखण्डकैः बालानां तु शिखा प्रोक्ता काकपक्षः शिखण्डक इति हलायुधः सवयोभिः स्निग्धैः स्निग्धो वयस्यः सवया इत्यमरः अमात्यपुत्रैरन्
न्वितस्सन् लिपेः पञ्चाशद्वर्णात्मिकाया मातृकाया यथावद्ग्रहणेन सम्यग्बोधेनोपायभूतेन वाङ्मयं शब्दजालं नद्याः द्वारं मुखं तु वदने मुख्यारम्भे द्वाराभ्युपाययो
रिति यादवः तेन कश्चिन्मकरादिः समुद्रमिवाविशत् प्रविष्टः ज्ञातवानित्यर्थः २८ अथेति गर्भादष्टमे प्रकुर्वीत ब्राह्मणस्योपनयनम् गर्भादेकादशे राज्ञो गर्भाच्च
द्वादशे विश इति मनुस्मरणात् अथ गर्भैकादशेऽब्दे विधिवदुपनीतं कृतोपवीतं गुरुप्रियमेनं रघुं विपश्चितः विद्वांसो गुरवो विनिन्युः शिक्षितवन्तः ते
गुरवोऽस्मिन् रघौ अवन्ध्ययत्नाश्च वभूवुः तथाहि क्रिया शिक्षाक्रिया तु निष्कृतौ शिक्षाविचिकित्सोपायकर्मस्विति यादवः वस्तुनि पात्रभूते उपहिता प्र

फलाप्रमाणि फलवति क्रियाद्धिर्विदिता
इत्यमिकोशः २९॥

र॰टी॰ धियइति अत्रकामन्दकः शुश्रूषाग्रहणंचैवश्रवणंधारणंतथा ऊहोपोहोर्थविज्ञानंतत्त्वज्ञानंचधीगुणाइति आन्वीक्षिकीत्रयीवार्त्तादण्डनीतिश्चशाश्व
स॰३ ती एताविद्याश्चतस्रस्तुलोकसंस्थितिहेतवइतिच उदारधीरुत्कृष्टबुद्धिः सरघुः समग्रैर्हियोगुणैः चत्वारोऽर्णवाउपमाउपमानंयासांताश्चतुरर्णवो
२६ पमाः तद्धितार्थोत्तरपदसमासः चतस्रोविद्याः हरितांदिशामीश्वरः सूर्यः पवनातिपातिभिर्हरिद्भिर्निजाश्वैः हरित्ककुभिवर्णेचतृणेवाजिविशेषयोरि
तिविश्वः चतस्रोदिशइवक्रमात्ततार चतुरर्णवोपमत्वंदिशामितिद्रष्टव्यम् ३० त्वचमिति कार्ष्णरौरववास्तानिचर्माणिब्रह्मचारिणःवसीरन्नानु
पूर्व्येणशाणक्षौमाविकानिचेतिमनुस्मरणान्मेध्यांशुद्धांरौरवींरुरुसम्बन्धिनीं रुरुर्महाकृष्णसारइतियादवः त्वचंचर्मपरिधायवसित्वामन्त्रवत्सम

धियः समग्रैः सगुणैरुदारधीः क्रमाच्चतस्रश्चतुरर्णवोपमाः ततारविद्याः पवनातिपातिभिर्दिशोहरिद्भिर्हरितामिवेश्वरः ३०
त्वचंसमेध्यांपरिधायरौरवीमशिक्षतास्त्रंपितुरेवमन्त्रवत् नकेवलंतद्गुरुरेकपार्थिवः क्षितावभूदेकधनुर्धरोपिसः ३१ महो
क्षतांवत्सतरः स्पृशन्निवद्विपेन्द्रभावंकलभः श्रयन्निव रघुः क्रमाद्यौवनभिन्नशैशवः पुपोषगांभीर्यमनोहरंवपुः ३२ अथा
स्यगोदानविधेरनंतरांविवाहदीक्षांनिरवर्त्तयद्गुरुः॥ ३१ त्वक्कमस्त्रम् आग्नेयादिकंपितुरेवोपाध्यायादशिक्षत अभ्यस्तवान् आ
ख्यातोपयोगइत्यपादानात्पञ्चमी पितुरेवेत्यवधारणमुपपादयतिनेनेति तद्गुरुरेकोद्वितीयः पार्थिवः केवलंपृथिवीश्वरएवनाभूत् किन्तुक्षितौसद्विती
वएकधनुर्धरोप्यभूत् ३१ महोक्षतामिति रघुः क्रमाद्यौवनेनभिन्नशैशवः निरस्तशिशुभावः सन् महानुक्षाचमहोक्षः महर्षभः अचतुरेत्यादिसूत्रेनिपा
तनादकारान्तत्वम् तस्यभावस्तत्तातांस्पृशन् गच्छन् वत्सतरोदम्यइवदम्यवत्सतरौसमावित्यमरः द्विपेन्द्रभावंमहागजत्वंश्रयन् व्रजन् कलभः २६
करिपोतइवगाम्भीर्येणचापलेनमनोहरंवपुःपुपोष ३२ अथेति गोर्नादित्वेवलीवर्दैक्रतुभेदर्षिभेदयोः स्त्रीत्वस्यादिशिभारत्यांभूमौचसुरभावपि

पुंस्त्रियोः स्वर्गवज्राम्बुरश्मिदृग्बाणलोमसु इति केशवः गावः लोमानि केशाः दीयन्ते खण्ड्यन्ते अस्मिन्निति व्युत्पत्त्या गोदानं नाम ब्राह्मणादीनां षोडशादिषु वर्षेषु कर्त्तव्यं केशान्ताख्यं कर्मोच्यते तदुक्तं मनुना केशान्तः षोडशे वर्षे ब्राह्मणस्य विधीयते राजन्यबन्धोर्द्वाविंशे वैश्यस्य द्व्यधिके ततः इति अथ गुरुः पिता गुरुर्गीष्पति पित्रादाविति अमरः अस्य गोदानविधेरनन्तरं विवाहदीक्षां निरवर्तयत् कृतवानित्यर्थः अथ नरेन्द्रकन्यास्तं रघुं दक्षस्य सुता रोहिण्यादयः तमोनुदं चन्द्रमिव तमोनुदोऽग्निचन्द्रार्का इति विश्वः सत्पतिमवाप्य आबभुः रघुरपि तमोनुदः अत्र मनुः वेदानधीत्य वेदौ वा वेदं वापि यथाक्रमम् अविप्लुतब्रह्मचर्यो गृहस्थाश्रममाविशेदिति ३३ सम्प्रति यौवराज्ययोग्यतामाह युवेति युवा युगो नाम धुर्यस्कन्धगतसच्छिद्रप्रान्तो यानाङ्गभूतो दारुविशेषः यानाद्यङ्गे युगः पुंसि युग्मं युगे कृतादिषु इत्यमरः युगवद्व्यायतौ दीर्घौ बाहू यस्य सः अंसोऽस्यास्तीत्यंसलो बलवान् मांसलश्चेति वृत्तिकारः बलवान्मांसलोंऽसलः इत्यमरः वत्सांसाभ्यां कामब

नरेन्द्रकन्यास्तमवाप्य सत्पतिं तमोनुदं दक्षसुता इवाबभुः ३३ युवा युगव्यायतबाहुरंसलः कपाटवक्षाः परिणद्धकन्धरः वपुः प्रकर्षाद
जयद्गुरुं रघुस्तथापि नीचैर्विनयाददृश्यत ३४ ततः प्रजानां चिरमात्मना धृतां नितान्तगुर्वीं लघयिष्यता धुरं॥

९ले इति लच् प्रत्ययः कपाटवक्षाः अररोरसाः कपाटमररं तुल्यमित्यमरः परिणद्धकन्धरो विशालग्रीवः अथ ग्रीवायां शिरोधिः कन्धरेत्यमरः परिणाहो विशालतेत्यमरः रघुर्वपुषः प्रकर्षादाधिक्याद्यौवनकृतात् गुरुं पितरमजयत् तथापि विनयात् नम्रत्वेन नीचैः स्वल्पकोऽदृश्यत अनौद्धत्यं च विवक्षितम् ३४ सम्प्रति तस्य यौवराज्यमाह तत इति ततः आत्मना स्वयं चिरं धृतां नितान्तगुर्वीं वोतोर्गुणवचनादिति ङीष् प्रजानां धुरं पालनप्रयासं लघयिष्यता तत्करोति तदाचष्टे इति लघुशब्दाण्णिच् ततो लृटः सद्वेति शतृप्रत्ययः नृपेण दिलीपेन असौ रघुर्निसर्गेण स्वभावेन संस्कारेण शास्त्राभ्यासजनितवासनया च विनीतो नम्र इति हेतोः युवराज इति शब्दं भजतीति तथोक्तः भजो ण्विरिति ण्वि प्रत्ययः चक्रे कृतः द्विविधो विनयः स्वाभाविकः कृत्रिमश्चेति कौटिल्यः तदुभयसम्पन्नत्वा

पुत्रं युवराजं चकारेत्यर्थः अत्र कामन्दकः विनयोपग्रहान्भूत्यै कुर्वीत नृपतिः सुतान् अविनीतकुमारं हि कुलमाशु विशीर्यते विनीतमौरसं पुत्रं यौवरा
ज्येभिषेचयेदिति ३५ नरेन्द्रेति गुणान् विनयादीन्सौरभ्यादींश्चाभिलषतीति गुणाभिलाषिणी श्रीः राज्यलक्ष्मीः पद्माश्रया च नरेन्द्रो दिलीप एव मूला
यतनं प्रधानस्थानं तस्मादपादानादनन्तरं सन्निहितं युवराज इति संज्ञाऽस्य संजाता युवराजसंज्ञितम् तारकादित्वादितच् प्रत्ययः आत्मनः पदं स्थान
मास्पदम् आस्पदं प्रतिष्ठायामिति निपातः सरघुरित्यास्पदं तदास्पदं कमलाच्चिरोत्पन्नान्नवावतारमचिरोत्पन्नमुत्पलमिव अंशेनागच्छत् स्त्रियो हि यू
निरज्यन्तीति भावः ३६ विभावसुरिति सारथिना सहायभूतेन एतद्विशेषणमुत्तरवाक्येष्वप्यनुषञ्जनीयम् तेन वायुना विभावसुर्वह्निरिव सूर्यवन्हो

निसर्गसंस्कारविनीत इत्यसौ नृपेण चक्रे युवराजशब्दभाक् ३५ नरेन्द्रमूलायतनादनन्तरं तदास्पदं श्रीर्युवराजसंज्ञितं अ
गच्छदंशेन गुणाभिलाषिणी नवावतारं कमलादिवोत्पलम् ३६ विभावसुः सारथिनेव वायुना घनव्यपायेन गभस्तिमानिव
बभूव तेनातितरां सुदुःसहः कटप्रभेदेन करीव पार्थिवः ३७ नियुज्य तं होमतुरंगरक्षणे धनुर्धरं राजसुतैरनुद्रुतं अपूर्णमे
केन शतक्रतूपमः शतं क्रतूनामपविघ्नमाप सः ३८ ततः परं तेन मखाय यज्वना तुरंगमुत्सृष्टमनर्गलं पुनः॥ ॥

विभावसूरित्यमरः घनव्यपायेन शरत्समयेन सारथिना गभस्तिमान्सूर्य इव कटो गण्डः गण्डः कटो मदो दानमित्यमरः तस्य प्रभेदः स्फुट
नं मदोदय इत्यर्थः तेन करीव पार्थिवो दिलीपस्तेन रघुणा अतितरामत्यन्तं सुदुःसहः सुष्ठु असह्यो बभूव ३७ नियुज्येति शतं क्रतुरिन्द्रः उपमा
नं यस्य स शतक्रतूपमः स दिलीपः शतं वै तुल्या राजपुत्रा देव आशापाला इत्यादि श्रुत्या राजसुतैरनुद्रुतम् अनुगतं धनुर्धरं तं रघुं होमतुरङ्गरक्ष
णे नियुज्य एकेन क्रतुना अपूर्णमेकोनं क्रतूनामश्वमेधानां शतमपविघ्नं यथा तथा आप ३८ ततइति ततः परमेकोनशतक्रतुप्राप्त्यनन्तरं य

Digitized by Sarayu Foundation Trust, Delhi and eGangotri

ज्वनाविधिनेष्टवतातेन दिलीपेन पुनरपि मखाय मखं कर्तुं क्रियार्थोपपदेत्यादिना चतुर्थी उत्सृष्टमुक्तमनर्गलमप्रतिबन्धम् अव्याहतस्वैरगतिमित्यर्थः
अपर्यायवर्तयन्तोः श्वमनुचरन्तीं त्यापत्सव्यस्मरणोनुरङ्गं धनुर्भृतां रक्षितॄणां रक्षकाणामग्रत एव शक्रो गूढविग्रहस्सन् जहार किलेत्यैतिह्ये ३९ वि
षादेति तत्कुमारसैन्यं सपदि विषादः इष्टनाशकृतो मनोभङ्गः तदुक्तं विषादश्चेतसो भङ्ग उपायाभावनाशयोरिति तेन लुप्ता प्रतिपत्तिः कर्तव्यज्ञानं य
स्य तत्तथोक्तं विस्मितमश्वनाशस्याकस्मिकत्वादाश्चर्याविष्टं सत् स्थितं तस्थौ अथ श्रुतप्रभावा यदृच्छया स्वेच्छया आगता नन्दिनीनाम वशिष्ठ
धेनुश्च ददृशे रघोः स्वप्रसादलब्धत्वादनुजिघृक्षयेति भावः द्वौ चकारावविलम्बसूचकौ ४० तदिति सतां पुरस्कृतः पूजितो दिलीपनन्दनो रघुः पु

धनुर्भृतामग्रत एव रक्षिणां जहार शक्रः किल गूढविग्रहः ३९ विषादलुप्तप्रतिपत्ति विस्मितं कुमारसैन्यं सपदि स्थितं च तत् ॥
वसिष्ठधेनुश्च यदृच्छयागता श्रुतप्रभावा ददृशेऽथ नन्दिनी ४० तदङ्गनिष्यन्दजलेन लोचने प्रमृज्य पुण्येन पुरस्कृतः सतां ॥
अतीन्द्रियेष्वप्युपपन्नदर्शनो बभूव भावेषु दिलीपनन्दनः ४१ स पूर्वतः पर्वतपक्षशातनं ददर्श देवं नरदेवसंभवः पुनः पुनः ॥
सूतनिषिद्धचापलं हरन्तमश्वं रथरश्मिसंयुतं ४२ ॥

॥ ९ तयेन तस्या नन्दिन्याः पदङ्गं तस्य निष्यन्दोद्भवः स एव जलं मूत्रमित्य
र्थः तेन लोचने प्रमृज्य शोधयित्वा अतीन्द्रियेषु इन्द्रियाण्यतिक्रान्तेषु अत्यादयः क्रान्ताद्यर्थे द्वितीययेति समासः द्विगुप्राप्तापन्नालंपूर्वगतिस
मासेषु परवल्लिङ्गताप्रतिषेधादिति शेष्यनिघ्नत्वं भावेषु वस्तुषु उपपन्नदर्शनः सम्पन्नसाक्षात्कारशक्तिर्बभूव ४१ स इति नरदेवसम्भवः स रघुः
पुनः पुनः सूतेन सारथिना निषिद्धचापलं निवारितौद्धत्यं रथस्य रश्मिभिः प्रग्रहैः किरणप्रग्रहौ रश्मी इत्यमरः संयुतं बद्धमश्वं हरन्तं पर्वत
॥ ॥ ॥ पक्षाणां शातनं छेदकं देवमिन्द्रं पूर्वतः पूर्वस्यां दिशि ददर्श ४२ ॥ ॥

र.टी. शनैरिति रघुसुतमश्वहर्तारं अनिमेषवृत्तिभिर्निमेषव्यापारशून्यैरक्ष्णां शनैः हरिभिः हरिद्वर्णैः हरिर्वाच्यवत्तुदाख्यातो हरित्कपिलवर्णयोरिति विश्वः वाजिभिरश्वैश्च
स.३ हरिमिन्द्रं विदित्वा ज्ञात्वा हरिर्वातार्कचन्द्रेन्द्रयमोपेन्द्रमरीचिष्विति विश्वः एनमिन्द्रं गगनस्पृशा व्योमव्यापिना धीरेण गम्भीरेण ध्वनिनेव निवर्त्तयन्निव अवोच
३९ त् ४३ मखेति हे देवेन्द्र मनीषिभिस्त्वमेव मखांशभाजां यज्ञभागभुजां प्रथमः सदा निगद्यसे कथ्यसे तथापि अजस्रदीक्षायां नित्यदीक्षायां प्रयतस्य मद्गुरोः
क्रियाभिघाताय क्रियां विहन्तुमित्यर्थः तुमर्थाच्च भाववचनादिति चतुर्थी कथं प्रवर्तसे ४४ त्रिलोकेति त्रयाणां लोकानां नाथस्त्रिलोकनाथः तद्धितार्थेत्या

शनैस्तमक्ष्णामनिमेषवृत्तिभिर्हरिं विदित्वा हरिभिश्च वाजिभिः अवोचदेनं गगनस्पृशा रघुः स्वरेण धीरेण निवर्त्तयन्निव ४३ म
खांशभाजां प्रथमो मनीषिभिस्त्वमेव देवेन्द्र सदा निगद्यसे अजस्रदीक्षाप्रयतस्य मद्गुरोः क्रियाविघाताय कथं प्रवर्त्तसे ४४ त्रि
लोकनाथेन सतां मखद्विषस्त्वया नियम्या ननु दिव्यचक्षुषा स चेत्स्वयं कर्मसु धर्मचारिणां त्वमन्तरायो भवसि च्युतो विधिः ४५
तदङ्गमग्र्यं मघवन्महाक्रतोरमुं तुरङ्गं प्रतिमोक्तुमर्हसि पथः श्रुतेर्दर्शयितार ईश्वरा मलीमसामाददते न पद्धतिं ४६ इति प्र
गल्भं रघुणा समीरितं वचो निशम्याधिपतिर्दिवौकसाम्॥ ९ दिना उत्तरपदसमासः तेन त्रैलोक्यनियामकेन दिव्यचक्षुषा अतीन्द्रि

यार्थदर्शिना त्वया मखद्विषः क्रतुविघातकाः सदा नियम्याः ननु शिक्ष्याः खलु स त्वं धर्मचारिणां सतां कर्मसु क्रतुषु स्वयमन्तरायो विघ्नो भवसि चेत् वि
धिरनुष्ठानं च्युतः लोके सत्कर्मकथैवास्तमित्यर्थः ४५ तदिति हे मघवन् तत्तस्मात्कारणात् महाक्रतोरश्वमेधस्य अग्र्यं श्रेष्ठम् अङ्गं साधनम् अमुं तु ३९
रङ्गं प्रतिमोक्तुं प्रतिदातुम् अर्हसि तथाहि श्रुतेः पथो दर्शयितारः सन्मार्गप्रदर्शका ईश्वराः महान्तः मलीमसां मलिनां पद्धतिं मार्गं नाददते न स्वीकुर्वन्ति।
असन्मार्गं नावलम्बन्त इत्यर्थः मलीमसं तु मलिनं कच्चरं मल[illegible]तमित्यमरः ४६ इतीति इति रघुणा समीरितं प्रगल्भं वचो निशम्याकर्ण्य दिवौकसः

पादि३

दिवंस्वर्गंतरिक्षंचेतिविश्वः तेषामधिपतिर्देवेन्द्रोरघुप्रभावात्सविस्मयस्सन् रथंनिवर्तयामास अनन्तरंप्रतिवक्तुंप्रचक्रमेच ४७ यदीति हेराजन्यकुमा
रक्षत्रियकुमारमूर्द्धाभिषिक्तोराजन्योबाहुजः क्षत्रियोविराडित्यमरः येह्वाक्यमात्थब्रवीषि ब्रुवः पञ्चानामित्यादिना आहादेशः तत्तथास्तु किन्तुयं
शोधनैः माद्दशैः परतः शास्त्रतोयशोरक्ष्यं ततः किमत आहभवद्गुरुस्त्वत्पिता जगत्प्रकाशंलोकप्रसिद्धमशेषंसर्वममतद्यशः इज्यया यागेनलंघयितुंत
र्कयितुमुद्यतः उद्युक्तः ४८ किंतद्यशइत्याह हरिरिति पुरुषोत्तम इतिसप्तमीसमासः नतिर्द्धारण इतिषष्ठीसमासनिषेधात् कर्मधारयेतु सन्महत्पर
मोत्तमोत्कृष्टाः पूज्यमानैरित्युत्तमपुरुषः स्यात् यथाहरिर्विष्णुरेकएवपुरुषोत्तमः स्मृतः त्र्यम्बकः शिवएवमहेश्वरस्मृतोनापरः अपरः पुमान्नतथा

निवर्तयामासरथंसविस्मयः प्रचक्रमेचप्रतिवक्तुमुत्तरम् ४७ यदात्थराजन्यकुमारतत्तथायशस्तुरक्ष्यंपरतोयशोधनैः
जगत्प्रकाशंतदशेषमिज्ययाभवद्गुरुर्लंघयितुंममोद्यतः ४८ हरिर्यथैकः पुरुषोत्तमः स्मृतोमहेश्वरस्त्र्यम्बकएवनापरः त
थाविदुर्मांमुनयः शतक्रतुंद्वितीयगामीनहिशब्दएषनः ४९ अतोयमश्वः कपिलानुकारिणापितुस्त्वदीयस्यमयापहारि
तः अलंप्रयत्नेनतवात्रमानिधाः पदंपदव्यांसगरस्यसंततेः ५०॥ ९ स्मृतः तथामांमुनयः शतक्रतुंविदुः विदोलटोवेति णलादेशः

नोऽस्माकंहरिहरयोर्ममचेत्यर्थः एषत्रितयोपिशब्दोद्वितीयगामीनहि द्वितीयाप्रकरणे गमिगम्यादीनामुपसंख्यानात्समासः ४९ अतइतिय
तोऽहमेवंशतक्रतुरतस्त्वदीयस्यपितुः अयंशततमोऽश्वः कपिलानुकारिणा कपिलमुनितुल्येनमयापहारितोऽपहृतः अपहारितइतिस्वार्थे
णिच् तवात्राश्वेप्रयत्नेनालंप्रयत्नोमा कारीत्यर्थः निषिद्धस्यनिषिद्धंप्रतिकरणे तृतीया सगरस्यराज्ञः सन्ततेः सन्तानस्यपदंमानिधाःमानिधे
हि इति निपूर्वाद्दधातेर्लुङ् नमाङ्योगे इत्याडागमप्रतिषेधः महदास्कन्दनेनविनाशमूलंभवेदितिभावः ५० ॥ ॥ ॥

ततइति ततस्तुरगस्यरक्षितारघुः प्रहस्य प्रहासंकृत्वा अपभयोनिर्भीकः सपुनःपुरन्दरंबभाषेकिमिति हेदेवेन्द्र एष अश्वमोचनरूपस्तेतवसर्गोनिश्चयो यदि सर्गःस्वभावनिर्मोक्षनिश्चयाध्यायसृष्टिष्वित्यमरः तर्हिशस्त्रंगृहाणभवान् रघुंमामनिर्जित्यकृतीकृतकृत्योनखलु दृष्टादिभ्यश्चेतिनिभन्यपः रघुग्रहणादात्मनोदुर्जयत्वंसूचयति ५१ सइति सरघुरुन्मुखः सन्मघवन्तमिन्द्रमेवमुक्त्वाशरासनंचापंसशरंकरिष्यमाणः आलीढेनआलीढाख्येनस्थानकभेदेनविशेषशोभिना अतिशयशोभिनावपुः प्रकर्षेणदेहोन्नतेनविडम्बितेश्वरोऽनुसृतपिनाकीसन् अतिष्ठत् आलीढलक्षणमाहयादवः। स्थानानिधन्विनांपञ्चतत्रवैशाखमस्त्रियाम् त्रिवितस्त्यन्तरौपादौमण्डलंतोरणाकृतिः अन्वर्थःस्यात्समपदमालीढंस्यात्तुयोग्रतः दक्षिणेवाममा

ततः प्रहस्यापभयः पुरंदरं पुनर्बभाषे तुरगस्य रक्षिता गृहाण शस्त्रं यदि सर्ग एष ते न खल्वनिर्जित्य रघुं कृती भवान् ५१।
स एवमुक्त्वा मघवंतमुन्मुखः करिष्यमाणः सशरं शरासनं अतिष्ठदालीढविशेषशोभिना वपुः प्रकर्षेण विडंबितेश्वरः ५२
रघोरवष्टंभमयेन पत्रिणा हृदि क्षतो गोत्रभिदप्यमर्षणः नवांबुदानीकमुहूर्तलाञ्छने धनुष्यमोघं समधत्त सायकं ५३
दिलीपसूनोः स बृहद्भुजांतरं प्रविश्य भीमासुरशोणितोचितः पपावनास्वादितपूर्वमाशुगः कुतूहलेनेव मनुष्यशोणितम् ५४

कुञ्च्यप्रत्यालीढंविपर्यय इति ५२ रघोरिति रघोरवष्टम्भमयेनस्तम्भरूपेण अवष्टम्भःसुवर्णेचस्तम्भप्रारम्भयोरितिविश्वः पत्रिणाबाणेनहृदि हृदये क्षतोविद्धः अतएवामर्षणोऽसहनः क्रुद्धइत्यर्थः गोत्रभिदपीन्द्रोऽपिसम्भावनीयेचोरेऽपिगोत्रः क्षोणीधरेमतइतिविश्वः नवाम्बुदानाम् अनीकस्यमुहूर्तंक्षणमात्रं लाञ्छनेचिह्नभूतेधनुषिदिव्यधनुषीत्यर्थः अमोघमवन्ध्यंसायकंसमधत्तसंहितवान् ५३ दिलीपेति भीमानामभयंकराणामसुराणांशोणितेरुधिरेउचितःपरिचितःसइन्द्रमु[illegible]आशुगःसायकःदिलीपसूनोःरघोर्बृहद्विशालंभुजान्तरंवक्षः प्रविश्यअनास्वादितपूर्वं [illegible] ५४॥

हरेरिति कुमारस्य विक्रम इव विक्रमो यस्य तथोक्तः स सप्तम्युपमानपूर्वस्येत्यादिना समासः कुमारो रघुरपि सुरद्विपस्यैरावतस्यास्फालनेन कर्कशा अङ्गुलयो यस्य स तस्मिन् शच्याः पत्रविशेषकैरङ्कितेशचीपत्रविशेषकाङ्किते हरेरिन्द्रस्य भुजे स्वनामचिन्हं स्वनामाङ्कितं सायकं निचखान निखातवान् निष्कण्टकराज्यमत्तस्यापि महाननिभव इति भावः ५५ जहारेति अन्येन मयूरपत्रिणा मयूरपत्रवता शरेण शक्रस्येन्द्रस्य महाशनिध्वजं महान्तमशनिरूपं ध्वजं जहार चिच्छेद स शक्रः सुरश्रियः प्रसह्य बलात्कारात् केशानां व्यपरोपणादवतारणात् छेदनादिव तस्मै रघवे भृशमत्यर्थं चुकोप तं हन्तुमियेषेत्यर्थः क्रुधद्रुहेत्यादिना सम्प्रदाना च्चतुर्थी ५६ तयोरिति जयैषिणोस्तयोरिन्द्ररघ्वोर्गरुत्मन्तः पक्षवन्तः गरुत्पक्षच्छदाः पत्रमित्यमरः आशि

हरेः कुमारोपि कुमारविक्रमः सुरद्विपास्फालनकर्कशांगुलौ भुजे शचीपत्रलताक्रियोचिते स्वनामचिन्हं निचखान साय
कम् ५५ जहार चान्येन मयूरपत्रिणा शरेण शक्रस्य महाशनिध्वजं चुकोप तस्मै स भृशं सुरश्रियः प्रसह्य केशव्यपरोपणादिव
५६ तयोरुपांतस्थितसिद्धसैनिकं गरुत्मदाशीविषभीमदर्शनैः बभूव युद्धं तुमुलं जयैषिणोरधोमुखैरूर्ध्वमुखैश्च पत्रिभिः ५७
अतिप्रबंधप्रहितास्त्रवृष्टिभिस्तमाश्रयं दुःप्रसहस्य तेजसः शशाक निर्वापयितुं न वासवः स्वतश्च्युतं वन्हिमिवाद्भिरंबुदः ५८॥

षि दंष्ट्रायां विषं येषां ते आशीविषास्सर्पाः पृषोदरादित्वात्साधुः आशीरुरगदंष्ट्रायामित्यमरः त इव भीमदर्शनाः सपक्षाः सर्पा इव भयावहा इत्यर्थः तै
रधोमुखैरूर्ध्वमुखैश्च धन्विनोरुपर्यधोदेशावस्थितत्वादिति भावः पत्रिभिर्बाणैः उपान्तस्थितास्तटस्थाः सिद्धा देवाः इन्द्रस्य सैनिकाश्च रघोर्यस्मि
न्तथोक्तम् तुमुलं सङ्कुलं बभूव ५७ अतीति वासवोऽतिप्रबन्धेन अतिसातत्येन प्रहिताभिः प्रयुक्ताभिः अस्त्रवृष्टिभिर्दुःप्रसहस्य दुःखेनाप्रसह्य
त इति दुःप्रसहस्य दुःखेनाप्रसहस्येत्यर्थः तेजसः प्रतापस्य आश्रयं तं रघुम् अम्बुदोऽद्भिः स्वतश्च्युतं वन्हिमिव निर्वापयितुं न शशाक रघो
॥ ॥ ॥ ॥ रपि लोकपालात्मकस्येन्द्रांशसम्भवत्वादिति भावः ५८॥ ॥ ॥ ॥

र॰टी॰ ततइति ततोरघुः हरिचन्दनाङ्कितेप्रकोष्ठेमणिबन्धे प्रमथ्यमानार्णवधीरनादिनीं प्रमथ्यमानार्णवइवधीरंगम्भीरंनदतीतितांनयोक्ताम् वेवेष्टिव्याप्नो
स॰३ तीति विडम्व्यापकमोजोयस्यतस्यविडौजसः इन्द्रस्य पृषोदरादित्वात् साधुः शरासनज्यांधनुर्मौर्वींशशांकस्यअर्द्धःखण्डइवमुखंयस्यतेनपत्रिणा
३३ अलुनाद्‌छिनत् ५८ सइति विरूढमत्सरः प्रवृद्धवैरः सइन्द्रः चापम् उत्सृज्यप्रबलस्यविद्विषः शत्रोः प्रणाशनायवधाय महींधारयन्तीतिमहीध्राःप
र्वताः मूलविभुजादित्वात्कप्रत्ययः तेषांपक्षव्यपरोपणेपक्षच्छेदे उचितंस्फुरत्प्रभामण्डलमस्त्रंवज्रायुधम् आददेजग्राह ६० रघुरिति रघुस्तेनवज्रे
णभृशमत्यर्थंवक्षसि ताडितः सन्सैनिकानाम् अश्रुभिः सहपपात तस्मिन्पतितेरुरुदुरित्यर्थः निमेषमात्रात्तद्व्यथांरुजंदुःखम् अवधूयतिरस्कृ

ततः प्रकोष्ठेहरिचंदनांकितेप्रमथ्यमानार्णवधीरनादिनीं रघुः शशांकार्द्धमुखेनपत्रिणाशरासनज्यामलुनाद्बिडौजसः ५८
सचापमुत्सृज्यविरूढमत्सरः प्रणाशनायप्रबलस्यविद्विषः महीध्रपक्षव्यपरोपणोचितंस्फुरत्प्रभामंडलमस्त्रमाददे ६० ॥
रघुर्भृशंवक्षसितेनताडितःपपातभूमौसहसैनिकाश्रुभिः निमेषमात्रादवधूयतद्व्यथांसहोत्थितःसैनिकहर्षनिस्वनैः ६१
तथापिशस्त्रव्यवहारनिष्ठुरेविपक्षभावेचिरमस्यतस्थुषः तुतोषवीर्यातिशयेनवृत्रहापदंहिसर्वत्रगुणैर्निधीयते ६२ ॥

त्यसैनिकानांहर्षेणयेनिस्वनाः क्ष्वेडाः तैः सहउत्थितश्च तस्मिन्नुत्थिते हर्षात् सिंहनादांश्चक्रुरित्यर्थः क्ष्वेडास्तुसिंहनादः स्यादित्यमरः ६१ तथापी
ति तथापिवज्रघातेऽपिशस्त्राणाम् आयुधानांव्यवहारेणनिष्ठुरेविपक्षभावेशत्रुत्वेचिरंतस्थुषः स्थितवतोऽस्यरिपोः वीर्यातिशयेनवृत्रंहतवान् ३३
इतिवृत्रहाब्रह्मभ्रूणवृत्रेषुक्विप् तुतोषस्वयंवीरएववीरंजानातीतिभावः कथंशत्रोः सन्तोषअतआहगुणैः सर्वत्रशत्रुमित्रोदासीनेषु पदंगुणैर्नि
धीयते गुणैः सर्वत्रसंक्रम्यतइत्यर्थः गुणाः शत्रूनप्यावर्जयन्तीतिभावः ६२॥

असङ्गमिति सारवत्तया अद्रिष्वप्यसङ्गं अप्रतिबन्धं मे आयुधं वज्रं त्वदन्येन विसोढुं न शक्यत इति शेषः अतो मां प्रीतं सन्तुष्टम् अवेहि तुरङ्गमात् ऋ
ते तुरङ्गं वर्जयित्वा वरं वृणीष्व अन्यारादितरर्त्तइतिपञ्चमी किमिच्छसीति स्फुटं वासवः आह तुरङ्गमादन्यद्देयं नास्तीति भावः ६३ तत इति ततः नरे
न्द्रसूनुः रघुः निषङ्गात्तूणीरात् असमग्रं यथा तथोद्धृतं सुवर्णपुङ्खद्युतिभिः रञ्जिता अङ्गुलयो येन तम् इषुम्प्रतिसंहरन्निवर्त्तयन्नाप्रहरन्ते प्रह
रिष्यामीति निश्चयादिति भावः प्रियंवदतीति प्रियम्वदः प्रियवशे वदः खजिति खच प्रत्ययः अरुर्द्विषेत्यादिना मुमागमः सुरेश्वरं प्रत्यवदत् ननु

असङ्गमद्रिष्वपि सारवत्तया न मे त्वदन्येन विसोढमायुधं अवेहि मां प्रीतमृते तुरंगमात्किं वृणीष्वेति तमाह वासवः ६३
ततो निषङ्गादसमग्रनिःसृतं सुवर्णपुंखद्युतिरंजितांगुलिं नरेंद्रसूनुः प्रतिसंहरन्निषुं प्रियंवदः प्रत्यवदत्सुरेश्वरम् ६४ नि
अमोच्यमश्वं यदि मन्यसे प्रभो ततः समाप्ते विधिनैव कर्मणि अजस्रदीक्षाप्रयतः स मद्गुरुः क्रतोरशेषेण फलेन
युज्यतां ६५ यथा च वृत्तान्तमिमं सदोगतस्त्रिलोचनैकांशतया दुरासदः तवैव संदेशहराद्विशांपतिः शृणोति देवेश तथा विधी
यतां ६६ तथेति कामं प्रतिशुश्रुवान्रघोर्यथागतं मातलिसारथिर्ययौ॥ ११ माहरन्निति भावः ६४ अमोच्यमिति हे प्रभो इन्द्र

अश्वम् अमोच्यं मन्यसे यदि ततः तर्हि अजस्रदीक्षायां सततदीक्षायां प्रयतः समद्गुरुर्मम पिता विधिनैव कर्मणि समाप्ते सति क्रतोर्यत्फलं तेन अ
शेषेण कृत्स्नेन युज्यतां युक्तोस्तु अश्वमेधफललाभे किमश्वेनेति भावः ६५ यथेति सदोगतः त्रिलोचनस्येश्वरस्य एकांशतया अष्टानामन्यतम
मूर्त्तिकतया दुरासदो माहशैः दुष्प्राप्यो विशांपतिः यथा इमं वृत्तान्तं तव संदेशहरात् वार्त्ताहरादेव शृणोति च हे लोकेश इन्द्र तथा विधीयताम् ६६
तथेति मातलिसारथिः इन्द्रः रघोः सम्बन्धिनं कामं मनोरथं तथास्त्विति प्रतिशुश्रुवान् प्रतिश्रुतवान् भाषायां सदवसश्रुव इति क्वसुप्रत्ययः ॥

Digitized by Sarayu Foundation Trust, Delhi and eGangotri

र॰टी॰ यथागतं ययौ सुदक्षिणासूनुः रघुरपि नातिप्रमनाः विजयलाभेप्यश्वनाशान्नातिहृष्टमनाः नञर्थस्य नशब्दस्य सुप्सुपेति समासः नृपस्य सदोगृहं
स॰३ प्रतिन्यवर्त्तत ६७ तमिति हरेरिन्द्रस्य शासनहारिणा पुरुषेण प्रथमं प्रबोधितो ज्ञापितो वृत्तान्तमिति शेषः प्रजेश्वरो दिलीपः हर्षजडेन हर्षशिशिरेण
३४ पाणिना कुलिशव्रणांकितं तस्य रघोरिदं तदीयम् अङ्गम् शरीरं परामृशन् स्पृशन् तं रघुं अभ्यनन्दत ६८ इतीति इतिहेतुप्रकरणप्रकारादिसमाप्तिष्विति अमरः
महनीयशासनः पूजनीयाज्ञः क्षितीश इति महाक्रतूनाम् अश्वमेधानां नवभिः अधिकां नवतिम् एकोनशतम् आयुषः क्षये सति दिवम् आरुरुक्षुः

नृपस्य नातिप्रमनाः सदोगृहं सुदक्षिणासूनुरपि न्यवर्तत ६७ तमभ्यनन्दत्प्रथमं प्रबोधितः प्रजेश्वरः शासनहारिणा हरेः
परामृशन् हर्षजडेन पाणिना तदीयमङ्गं कुलिशव्रणाङ्कितं ६८ इति क्षितीशो नवतिं नवाधिकां महाक्रतूनां महनीयशास
नः समारुरुक्षुर्दिवमायुषः क्षये ततान सोपानपरम्परामिव ६९ अथ स विषयव्यावृत्तात्मा यथाविधि सूनवे नृपतिककुदं द
त्वा यूने सितातपवारणं मुनिवनतरुच्छायां देव्या तया सह शिश्रिये गलितवयसामिक्ष्वाकूणामिदं हि कुलव्रतम् ७० इति
श्रीरघुवंशे महाकाव्ये कालिदासकृतौ रघूत्पत्तिवर्णनो नाम तृतीयः सर्गः ३ ॥ १९ आरोढुमिच्छुः सोपानपरंपरां पङ्क्तिमिव ततान इ
अथेति विषयेभ्यो व्यावृत्तात्मा निवृत्तचित्तः स दिलीपो यथाशास्त्रं यूने सूनवे नृपतिककुदं राजचिह्नं ककुद्वत्ककुदं श्रेष्ठप्रधानयोः राजलक्ष्मणीति विश्व
सितातपवारणं श्वेतच्छत्रं दत्वा तया देव्या सुदक्षिणया सह मुनिवनतरोः छायां शिश्रिये श्रितवान् वानप्रस्थाश्रमं स्वीकृतवानित्यर्थः तथाहि ३५
गलितवयसां वृद्धानाम् इक्ष्वाकूणाम् इक्ष्वाकोर्गोत्रापत्यानां तद्राजस्याकन्यादणो लुक् इदं वनगमनं कुलव्रतं हि देव्या सहेत्यनेन सपत्नीकवा
नप्रस्थाश्रमपक्ष उक्तः तथा च याज्ञवल्क्यः सुतविन्यस्तपत्नीकस्तया वानुगतो वनम् वानप्रस्थो ब्रह्मचारी साग्निः सोपासनो व्रजेदिति हरिणीवृत्तमेतत् ७०

॥ इति श्रीमहामहोपाध्यायकोलाचलमल्लिनाथसूरिविरचितायां रघुवंशव्याख्यायां सञ्जीविनीसमाख्यायां तृतीयः सर्गः ३॥ श्रीगणेशाय नमः॥ श
रदा शारदाम्भोजवदना वदनाम्बुजे सर्वदा सर्वदास्माकं सन्निधिं सन्निधिं क्रियात् १ स इति स रघुः गुरुणा पित्रा दत्तं राज्यं राज्ञः कर्म प्रजापरिपालनात्मकम्
पुरोहितादित्वाद्यक् प्रतिपद्य प्राप्य दिनान्ते सायंकाले सवित्रा सूर्येण निहितं तेजः प्रतिपद्य हुताशनोऽग्निरिव अधिकं बभौ सौरं तेजः सायमग्निं संक्राम
ति आदित्यो वा अस्तं यन्नग्निमनुप्रविशति अग्निं वा आदित्यः सायं प्रविशतीत्यादिश्रुतिः प्रमाणम् १ दिलीपेति दिलीपानन्तरं राज्ये प्रतिष्ठितमवस्थि
तं तं रघुं निशम्य आकर्ण्य पूर्वं दिलीपकाले राज्ञां हृदये प्रकर्षेण धूमोऽस्य सञ्जातो प्रधूमितोऽग्निः सन्तापाग्निरुत्थित इव प्रज्वलित इव पूर्वेभ्योऽधिक

श्रीगणेशाय नमः॥ स राज्यं गुरुणा दत्तं प्रतिपद्याधिकं बभौ दिनान्ते निहितं तेजः सवित्रेव हुताशनः १ दिलीपानन्तरं राज्ये तं
निशम्य प्रतिष्ठितं पूर्वं प्रधूमितो राज्ञां हृदयेऽग्निरिवोत्थितः २ पुरुहूतध्वजस्येव तस्योन्नयनपङ्क्तयः नवाभ्युत्थानदर्शिन्यो न
नन्दुः सप्रजाः प्रजाः ३ सममेव समाक्रान्तं द्वयं द्विरदगामिना तेन सिंहासनं पित्र्यमखिलं चारिमण्डलं ४॥ १ सन्तापोऽभूदित्यर्थः रा

ज्यकर्तृकस्यापि निशमनस्याग्न्युपचारात् तत्समानकर्तृकत्वं विरोधः इत्यर्थः २ पुरुहूतेति पुरुहूतध्वजः इन्द्रध्वजः स किल राष्ट्रार्थं राजभिः पूज्यत इत्यु
क्तं भविष्योत्तरपुराणे एवं यः कुरुते यात्रामिन्द्रकेतोर्युधिष्ठिर पर्जन्यः कामवर्षी स्यात्तस्मिन् राज्ये न संशय इति च तुरस्रं ध्वजाकारं राजद्वारे प्रतिष्ठितम् आ
हुः शक्रध्वजं नाम पौरलोकसुखावहम् पुरुहूतध्वजस्येव तस्य रघोर्नवाभ्युत्थानम् अभ्युन्नतिम् अभ्युदयं च नवाभ्युत्थानदर्शिन्यः ऊर्ध्वप्रस्थिता उल्ल
सिताश्च नयनपङ्क्तयो यासां ताः सुप्रजाः सुसन्तानाः प्रजाः प्रजा स्यात्सन्ततौ जने इत्युभयत्राप्यमरसिंहः ननन्दुः ३ सममिति द्विरद इव द्विरदैश्व वा गच्छ
तीति द्विरदगामिना कर्तर्युपमाने सुप्यजातौ णिनिः तेन रघुणा समं युगपदेव द्वयं समाक्रान्तम् अधिष्ठितं किन्तद् द्वयं पितुरागतं पित्र्यम् पितुर्यदि

तियत्नस्य यः सिंहासनम् अखिलम् अरिमण्डलं राष्ट्रं च समं युगपदेव समाक्रान्तं व्याप्तम् ४॥ अथ सिंहासनारोहणानन्तरं तस्य लक्ष्मीसन्निधानमाह छायेति अत्र रघोस्तेजोविशेषेण स्वयं सन्निहितया लक्ष्म्या छत्रधारणं कृतमित्युत्प्रेक्षते पद्मा लक्ष्मीः लक्ष्मीः पद्मालया पद्मा कमला श्रीर्हरिप्रियेत्यमरः सा स्वयमदृश्या किलेति सम्भावनायां छायामण्डललक्ष्येण कान्तिपुञ्जानुमेयेन न तु रूपतो दृश्यरूपेण छायामण्डलमित्यनेनातपत्रानं दृश्यते छाया सूर्यप्रिया कान्तिः प्रतिबिम्बमनातपः इत्युभयत्राप्यमरः तेन पद्मातपत्रेण पद्ममेवातपत्रं तेन करणभूतेन साम्राज्यदीक्षितं साम्राज्ये साम्राज्यकर्मणि मण्डलाधिपत्ये दीक्षितम् अभिषिक्तं भेजे अन्यथा कथमेतादृशी कान्तिसम्पत्तिरिति भावः ५ सम्प्रति सरस्वतीसान्निध्यमा

छायामंडललक्ष्येण तमँदृश्या किल स्वयं पद्मा पद्मातपत्रेण भेजे साम्राज्यदीक्षितम् ५ परिकल्पितसान्निध्या काले
काले च वंदिषु स्तुत्यं स्तुतिभिरर्थ्याभिरुपतस्थे सरस्वती ६ मनुप्रभृतिभिर्मान्यैर्भुक्ता यद्यपि राजभिः तथाप्यनन्यपूर्वेव तस्मि
न्नासीद्वसुंधरा ७ स हि सर्वस्य लोकस्य युक्तदंडतया मनः॥

आह परिकल्पितेति सरस्वती काले काले सर्वेष्वपि योग्यकालेषु नित्यवीप्सयोरिति वीप्सायां द्विर्वचनम् वन्दिषु परिकल्पितसान्निध्या कृतसन्निधाना सती स्तुत्यं स्तोत्रार्हं रघुम् अर्थ्याभिः धर्मपथ्यर्थन्यायादिति यत्प्रत्ययः स्तुतिभिः स्तोत्रैरुपतस्थे देवताबुद्ध्या पूजितवतीत्यर्थः देवतात्वं च विष्णुः पृथिवीपतिरिति लोकपालात्मकत्वाद्वेत्यनुसन्धेयम् एवं सति उपाद्देवपूजासङ्गतिकरणमित्रकरणपथिष्विति वर्तमानादात्मनेपदं सिद्ध्यति ६ मन्विति वसुन्धरा मनुप्रभृतिभिर्मन्वादिभिः मान्यैः पूज्यै राजभिर्भुक्ता यद्यपि भुक्तैवेत्यर्थः यद्यपीत्यवधारणेऽप्यर्थे स्यादिति केशवः तथापि तस्मिन् राज्ञि अन्यः पूर्वो यस्याः सा अन्यपूर्वा अन्या पूर्वा न भवतीत्यनन्यपूर्वा अनन्योपभुक्तेवासीत् नवप्रथमपतिकेवानुरक्तवतीत्यर्थः ७ अत्र कारणमाह स इति हि यस्मात्कारणात्स रघुः युक्तदण्डतया यथापराधदण्डतया सर्वस्य लोकस्य मन आददे जहार

Digitized by Sarayu Foundation Trust, Delhi and eGangotri

कथमिव अतिशीतोष्णो वा न भवतीति शीतोष्णः न अर्थस्य नेशब्दस्य सुप्सुपेति समासः दक्षिणदिग्भवो नभस्वान्वायुरिव मलयानिल इवेत्यर्थः युक्तद
ण्डतयेत्यत्र कामन्दकः उद्वेजयति तीक्ष्णेन मृदुना परिभूयते दण्डेन नृपतिस्तस्माद्युक्तदण्डः प्रशस्यत इति ८ नयेति नयविद्भिः नीतिशास्त्रज्ञैः नवे तस्मि
न् राज्ञि विषये तमधिकृत्येत्यर्थः सद्धर्मयुद्धादिकम् असत्कूटयुद्धादिकं चोपदर्शितं तस्मिन् राज्ञि पूर्वपक्षएवाभवत्संक्रान्त इत्यर्थः उत्तरपक्षो नाभवत्तन्न
संक्रान्त इत्यर्थः तत्र सदसतोर्मध्ये सदेवाभिमतमासीत् तज्ज्ञानं तु दानार्थमेवेत्यर्थः पक्षः साधनयोग्यार्थः पक्षः पार्श्वगरुत्साध्यसहायबलभित्तिषु इति
केशवः ९ मन्देति तेन रघुणा प्रजा गुरौ दिलीपविषये सहकारोऽतिसौरभश्चूतः आम्रश्चूतो रसालोऽसौ सहकारोऽतिसौरभ इत्यमरः तस्य फलेन पुष्पो

आरूढेनातिशीतोष्णो नभस्वानिव दक्षिणः ८ नयविद्भिर्नवे राज्ञि सदसच्चोपदर्शितं पूर्व एवाभवत्पक्षस्तस्मिन्नाभवदुत्तरः ९॥
मन्दोत्कण्ठाः कृतास्तेन गुणाधिकतया गुरौ फलेन सहकारस्य पुष्पोद्गम इव प्रजाः १० पञ्चानामपि भूतानामुत्कर्षं पुपुषुर्गुणाः न
वं तस्मिन्महीपाले सर्वं नवमिवाभवत् ११ यथा प्रह्लादनाच्चन्द्रः प्रतापात्तपनो यथा॥ ९ क्रमेति पुष्पोदय इव तेनापि गुणाधिकतया

हेतुना मन्दोत्कण्ठाः अल्पोत्सुकाः कृताः गुणोत्तरश्च उत्तरो विषयः सर्वं विस्मारयतीति भावः १० पञ्चानामिति पृथिव्यादीनां पञ्चानां भूतानामपि गु
णाः गन्धादयः उत्कर्षमतिशयं पुपुषुः अत्रोत्प्रेक्षते तस्मिन् रघोनाम नवे महीपाले सति सर्वं वस्तुजातं नवमिवाभवत् तदेव भूतजातमिदानीमपू
र्वगुणयोगादपूर्वमिवाभवदिति भावः ११ यथेति चन्द्रयति आह्लादयतीति चन्द्रः चदि धातो रोणादिरप्रत्ययः प्रह्लादनादाह्लादकारणादन्वर्थोऽ
नुगतार्थनामकोऽभूत् यथा चन्द्रः तपतीति तपनः सूर्यः नन्द्यादित्वाल्ल्युट्प्रत्ययः प्रतापात्तापजननादित्यर्थः। तथैव स राजा प्रकृतिरञ्जनादन्वर्थः

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

सार्थः सार्थकराजशब्दोऽभूत् यद्यपि राजशब्दो राजते दीप्त्यर्थात्कनिन्प्रत्ययान्तो न तु रञ्जेः तथापि धातूनामनेकार्थत्वाद्राजेरनुरक्तं कविना
१२ काममिति विशाले तस्य रघोर्लोचने कामं कर्णान्तयोर्विश्रान्ते कर्णप्रान्तगते च सूक्ष्मता तु चाक्षुषफलं त्वित्यर्थः सूक्ष्मान्कार्यार्थान्कर्तव्या
र्थान् दर्शयति प्रकाशयतीति तत्सूक्ष्मकार्यार्थदर्शिना शास्त्रेणैव शास्त्रदृष्टिर्विवेकिनामिति भावः १३ लब्धेति अथ लब्धस्य राज्यस्य प्रशमनेन
परिपन्थिनामनुरञ्जन प्रतीकाराभ्यां स्थिरीकरणेन स्वस्थं समाहितचित्तमेनं रघुं पङ्कजलक्षणा पद्मचिन्हा श्रियोपि विशेषणमेतत् रक्षा पौरजनस्य दे
शनगरग्रामेषु गुप्तिस्तथा योधानामपि संग्रहोपि तुल्यामानव्यवस्थापनं साम्यं संगिषु दानवृत्तिकरणेन्यागः समानार्चनं कार्याण्येवमहो भुजां प्रशमनान्ये

तथैव सोऽभूदन्वर्थो राजा प्रकृतिरंजनात् १२ कामं कर्णान्तविश्रांते विशाले तस्य लोचने चक्षुष्मत्ता तु शास्त्रेण सूक्ष्मकार्यार्थदर्शि
ना १३ लब्धप्रशमनस्वस्थमथैनं समुपस्थिता पार्थिवश्रीर्द्वितीयेव शरत्पंकजलक्षणा १४ निर्वृष्टलघुभिर्मेघैर्मुक्तवर्त्मा सु
दुःसहः प्रतापस्तस्य भानोश्च युगपद्व्यानशे दिशः १५ वार्षिकं संजहारेन्द्रो रघुर्जैत्रं धनुर्दधौ प्रजार्थसाधने तौ हि पर्यायोद्यतकार्मु

तानि राज्ये नवेति शरत् द्वितीया पार्थिवश्रीः राजलक्ष्मीरिव समुपस्थिता प्राप्ता १४ निर्वृष्टेति निःशेषं वृष्टा निर्वृष्टाः कर्तरि क्तः ॥कौ १६
अत एव लघवः तैर्मेघैर्मुक्तवर्त्मा त्यक्तमार्गः अत एव सुदुःसहः तस्य रघोः भानोश्च प्रतापः पौरुषमातपश्च प्रतापौ पौरुषातपावितियादवः यु ३६
गपद्दिशो व्यानशे व्याप १५ वार्षिकमिति इन्द्रो वर्षासु भवं वार्षिकं वर्षानिमित्तमित्यर्थः वर्षाभ्यष्ठगिति ठक् प्रत्ययः धनुः संजहार रघुर्जैत्रं जयशी
लं जेतृशब्दात्तृन्नन्तात् प्रज्ञादिभ्यश्चेति स्वार्थे अण् प्रत्ययः धनुर्दधौ हि यस्मात्ताविन्द्ररघू प्रजानामर्थस्य प्रयोजनस्य वृष्टिविजयलक्षणसाधनविषये
पर्यायेणोद्यते कार्मुके याभ्यां तौ पर्यायोद्यतकार्मुकौ पाठान्तरे पर्यायेणोद्यमो विश्रमश्च ययोस्तौ पर्यायोद्यतविश्रमौ द्वयोः पर्यायकरणाद्दक्षेशइतिभा

Digitized by Sarayu Foundation Trust, Delhi and eGangotri

पुण्डरीकेति पुण्डरीकं सिताम्भोजमेवातपत्रं यस्य स तथोक्तः विलसंति काशानि [illegible] काशाख्यतृणकुसुमान्येव चामराणि यस्य स तथोक्तः ऋतुः शरदृतुः
पुण्डरीकनिभातपत्रं काशनिभचामरं तं रघुं विडम्बयामास अनुचकार तस्य रघोः श्रियं पुनः शोभां तु न प्राप शोभासंपत्ति पद्मासु लक्ष्मीः श्रीरिव दृ
श्यत इति शाश्वतः १७ प्रसादेति प्रसादेन सुमुखे तस्मिन् रघौ विशदप्रभे निर्मलकान्तौ चन्द्रे च द्वयोर्विषये तदा चक्षुष्मतां प्रीतिरनुरागः समरसा सम
त्वाद्दातुल्यभोगेति यावत् रसो गन्धरसे स्वादे इति विश्वः आसीत् १८ हंस इति हंसानां श्रेणीषु ताराणां सुनक्षत्रेषु कुमुदानि येषु सन्तीति कुमुद्वन्ति कु
मुदप्रायेष्वित्यर्थः कुमुद्वान्कुमुदप्राये इत्यमरः कुमुदनड्वेतसेभ्यो ड्मतुप् तेषु वारिषु च तदीयानां रघुसम्बन्धिनां यशसां विभूतयः सम्पदः पर्यस्ता

पुंडरीकातपत्रस्तं विलसत्काशचामरः ऋतुर्विडम्बयामास न पुनः प्राप तच्छ्रियम् १७ प्रसादसुमुखे तस्मिंश्चन्द्रे च विशदप्रभे
तदा चक्षुष्मतां प्रीतिरासीत्समरसा द्वयोः १८ हंसश्रेणीषु तारासु कुमुद्वत्सु च वारिषु विभूतयस्तदीयानां पर्यस्ता यशसामिव १९
७३ इक्षुच्छायानिषादिन्यस्तस्य गोप्तुर्गुणोदयम् आकुमारकथोद्घातं शालिगोप्यो जगुर्यशः २०॥ १९ इव प्रसारिताः किमित्युत्प्रेक्षा अन्यथा
कथमेवमेषां धवलिमेति भावः १९ इक्ष्विति इक्षूणां छाया इति इक्षुच्छायम् छाया बाहुल्ये इति नपुंसकम् तत्र निषण्णा इक्षुच्छायानिषादिन्यः स्त्री
लिङ्गपाठे इक्षोः छायेति विग्रहः अन्यथा बहुत्वे सति नपुंसकत्वप्रसङ्गात् यद्वा आङ्प्रश्लेषः आसमन्तात् निषादिन्यः शालीन् गोपायन्ति रक्षन्ती
ति शालिगोप्यः सस्यपालिकाः स्त्रियः कर्मण्यण् टिड्ढाणञित्यादिना ङीप् गोप्तुः रक्षकस्य रघोः गुणेभ्यः उदयो यस्य तद्गुणोत्पन्नम् आकुमारात्कु
मारमारभ्य कथोद्घातः कथारम्भो यस्य तत् कुमारैरपि स्वयं गीयमानमित्यर्थः यशो जगुः गायन्ति स्म अथवा कुमारस्य सतो रघोर्याः कथा इन्द्रविजयाद
यः तत आरभ्य आकुमारकथं तत्रापि अभिविधावव्ययीभावः आकुमारकथमुद्घातो यस्मिन्कर्मणि गायनक्रियाविशेषणमेतत् स्यादभ्यादानमु

र०टी० द्भूतइत्यमरः आकुमारकथोद्घातमितिपाठे कुमारस्यसतस्तस्यकथाभिश्चरितैरुद्भूतंयद्यशः तद्यश आरभ्ययशोजगुरितिव्याख्येयम् २० प्रससादेति
स०४ महौजसः कुम्भयोनेरगस्त्यस्य अगस्त्यः कुम्भव इत्यमरः उदयादम्भः प्रससादप्रसन्नंबभूव महौजसोरघोरुदयात् अभिभवाशङ्किद्विषतांमनश्चुक्षु
३७ भेकालुष्यंप्राप अगस्त्योदयेजलानिप्रसीदन्तीत्यागमः २१ मदेति मदोदग्रामदोद्धताः ककुदेषामस्तीतिककुद्मन्तः महाककुदइत्यर्थः यवादित्वान्मका
रस्यवत्वाभावः सरितांकूलानि उद्रुजन्तितेकूलमुद्रुजाः उद्विकूलेरुजिवहोरितिखश्प्रत्ययः अरुर्द्विषेत्यादिनामुमागमः महान्तः उक्षाणः महोक्षाः
अचतुरेत्यादिनानिपातनादकारान्तत्वम् लीलाखेलम्विलासंसुभगंतस्यरघोरुत्साहवतः पुरुषान्तरभञ्जकस्यविक्रमंशौर्यमनुप्रापुः अनु च

प्रससादोदयादंभः कुंभयोनेर्महौजसः रघोःपरिभवाशंकिचुक्षुभेद्विषतांमनः २१ मदोदग्राःककुद्मंतःसरितांकूलमुद्रुजाः
लीलाखेलमनुप्रापुर्महोक्षास्तस्यविक्रमं २२ प्रसवैःसप्तपर्णानांमदगंधिभिराहताः असूययेवतन्नागाःसप्तधैवप्रसुस्रुवुः २३
सरितःकुर्वतींगाधाःपथश्चाश्यानकर्दमान् यात्रायैप्रेरयामासतंशक्तेःप्रथमंशरत् २४ तस्मैसम्यग्हुतोवह्निर्वाजिनीराजनाविधौ

कुः २२ प्रसवैरिति मदस्येवगन्धोयेषांतेर्मदगन्धिभिः उपमानाच्चेतिसमासान्तइत्कारः सप्तपर्णानांवृक्षविशेषाणां सप्तपर्णोविशालत्वक्शारदोविष
मच्छद इत्यमरः प्रसवैःपुष्पैः आहतास्तस्यरघोः नागाः गजाःगजेपिनागमातङ्गौ इत्यमरः असूययेव आहतनिमित्तयास्पर्द्धयेवसप्तधैवप्रसुस्रुवुःम
दंववृषुः प्रतिगजगन्धाभिमानादितिभावः करात्कटाभ्यांमेढ्राच्चनेत्राभ्यांचमदस्रुतिरितिपालकाव्ये करान्नासाग्रंघ्राभ्यामित्यर्थः २३ सरितइति स ३७
रितोगाधाःसुप्रतराः कुर्वतीपथोमार्गांश्च आश्यानकर्दमान् शुष्कपङ्कान्कुर्वती संयोगादेरातोधातोर्यण्वतइतिश्यनेर्निष्ठानत्वम् शरत् शरदृतुः
तंरघुंशाक्तेरुत्साहशक्तेः प्रथमंप्राक्यात्रायैदण्डयात्रायैचोदयामासेत्यर्थः २४॥ सम्यगिति वाजिनामश्वानांनीराजनाविधौ नीराजनाख्येशान्तिकर्म

लिसम्यग्विधिवत्हुतोहोमसमिद्धोवन्हिः प्रगतोदक्षिणं निष्टग्ग्रभृतित्वादव्ययीभावः प्रदक्षिणं या अर्चिर्ज्वालातस्याव्याजेन हस्तेनेवतस्मैजयंददौ· उक्तंमहा
यात्रायाम् इद्धः प्रदक्षिणगतोहुतभुक् नृपस्यधात्रीसमुद्र रशनां वशगांकरोतीतिवाजिग्रहणंगजादीनामप्युपलक्षणं· तेषामपिनीराजनाविधानात् २५ सेति
गुप्तोमूलंस्वंनिवासस्थानंपर्यंतः प्रान्तदुर्गंचयेनसगुप्तमूलपर्यन्तः शुद्धपार्ष्णिरनुद्धतपृष्ठशत्रुःसेनयारक्षितपृष्ठदेशोवा· अयान्वितः शुभदैवान्वितः अयः शुं
भावहोविधिरित्यमरः सरघुः षड्विधंमौलभृत्यादिरूपंबलंसैन्यंमौलंभृत्यंसुहृत् श्रेणीद्विषदाटविकंबलमित्यमरः आदायदिशांजिगीषयाजेतुमिच्छया
प्रतस्थेचचाल २६ अवाकिरन्निति वयसावृद्धाः पौरयोषितः तंरघुंप्रयान्तंलाजैराचारलाजैर्मन्दरोद्धूतैः पृषतैर्विन्दुभिः क्षीरोर्मयः क्षीरसमुद्रोर्मयः अच्यु

प्रदक्षिणार्चिर्व्याजेनहस्तेनेवजयंददौ २५ सगुप्तमूलपर्यंतःशुद्धपार्ष्णिरयान्वितः षड्विधंबलमादायप्रतस्थेदिग्जिगीषया २६॥
अवाकिरन्वयोवृद्धास्तंलाजैःपौरयोषितः पृषतैर्मन्दरोद्धूतैःक्षीरोर्मयइवाच्युतम् २७ संपयौप्रथमंप्राचींतुल्यःप्राचीनवर्हिषा अहि
तानेनिलोद्धूतैस्तर्जयन्निवकेतुभिः २८ रजोभिःस्यंदनोद्धूतैर्गजैश्चघनसन्निभैः भुवस्तलमिवव्योमकुर्वन्व्योमेवभूतलं २९॥ ९

तंविष्णुमिव अवाकिरन्पर्याक्षिपन् २७ सइति प्राचीनवर्हिर्नामकश्चिन्महाराजइतिकेचित् इन्द्रः पर्जन्यमघवावृषाहरिहयः प्राचीनवर्हिस्तथेतिइन्द्रप
र्यायेषुहलायुधाभिधानात् तेनतुल्यःसःरघुः अनिलेनानुकूलवातेनोद्धूतैःकेतुभिःध्वजैः अहितान् रिपून्तर्जयन्निव भर्त्सयन्निवतर्जिभर्त्स्योरनुदात्तत्वे
पिचक्षिङोङित्करणेनानुदात्तत्वनिमित्तस्यात्मनेपदस्यानित्यत्वज्ञापनात्परस्मैपदमितिवामनः प्रथमंप्राचीदिशंययौ २८ रजोभिरिति किंकुर्वनस्य
न्दनोद्धूतैःरजोभिःघनसन्निभैःवर्णतःक्रियातःपरिमाणतश्चमेघतुल्यैः गजैश्चयथाक्रमंव्योमआकाशंभुवस्तलमिवभूतलम्व्योमेवकुर्वन्ययौ

तत्तु त्कर्षात्तस्यागम्यं किमप्यनासीत्तिभावः ५ दि १

र॰टी॰ प्रतापइति अग्रेप्रतापस्तेजोविशेषः सप्रभावः प्रतापश्चयत्तेजः कोशदण्डजइत्यमरः ततःशब्दः सेनाकलकलः तदनन्तरं परागोधूलिःपरागःपुष्परजसिधू
स॰४ लिस्नानीययोरपीतिविश्वः पश्चाद्रथादिकंचतुरङ्गवलंइतीत्थंचतुःस्कन्धेवचतुर्व्यूहेवसाचमूः पयोस्कन्धः प्रकाण्डेकायेंसेविज्ञानादिषुपञ्चसुनृपेसमू
३८ हव्यूहेचेतिहैमः रथानीकपाठेइतिशब्दाध्याहारेणयोज्यम् ३० मरुपृष्ठानीति सरघुःशक्तिमत्वात्समर्थत्वात् मरुपृष्ठानि निर्जलस्थानानि समानौम
रुधन्वानौइत्यमरः उदम्भांस्युद्भूतजलानि चकार नाव्याः नौभिस्तार्यानदीः नाव्यंत्रिलिङ्गं नौतार्यइत्यमरः नौवयोधर्मविषमूलेत्यादिनायत्प्रत्ययः सु
प्रतराःसुखेनतार्याश्चकार विपिनानि अरण्यानि अटव्यरण्यंविपिनमित्यमरः प्रकाशानि निर्वृक्षाणिचकारतस्योत्कर्षाद्धुतस्यागम्यंकिमपिनासीत्तिभा

प्रतापोग्रेततःशब्दः परागस्तदनंतरं ययौपश्चाद्रथानीकंचतुःस्कंधेवसाचमूः ३० मरुपृष्ठान्युदंभांसिनाव्याःसुप्रतरानदीः
विपिनानिप्रकाशानिशक्तिमत्वाच्चकारसः ३१ ससेनांमहतींकर्षन्पूर्वसागरगामिनीं वभौहरजटाभ्रष्टांगंगामिवभगीरथः ३२॥
त्याजितैःफलमुत्खातैर्भग्नैश्चवहुधानृपैः तस्यासीदुल्वणोमार्गःपादपैरिवदंतिनः ३३ पौरस्त्यानेवमाक्रामंस्तांस्ताञ्जनपदानज

वः ३१ सइति महतींसेनां पूर्वसागरगामिनींकर्षन्सःरघुःहरस्यजटाभ्योभ्रष्टांगङ्गांकर्षन् सापिपूर्वसागरगामिनी भगीरथइववभौ भगीरथोनाम
कश्चित्कपिलदग्धानांसागराणांपावनायहरकिरीटात् गङ्गाम्प्रवर्तत इतिराजा यत्सम्वन्धात् गङ्गाचभागीरथीतिगीयते ३२ त्याजितैरिति फलं
फलेधनेवीजेनिष्पत्तौभोगलाभयोरितिकेशवः फलंलाभंवृक्षपक्षेप्रसवंत्याजितैः त्यजेर्ण्यन्तात् द्विकर्मकात् अप्रधानेकर्मणिक्तः उत्खातैःस्वपदा १९
त्याजितैः अन्यत्रोत्पाटितैःवहुधाभग्नैःरणेजितैः अन्यत्रछिन्नैर्नृपैः पादपैर्दन्तिनोगजस्येवतस्यरघोर्मार्गः उल्वणःप्रकाशआसीत् प्रकाशेप्रकटेस्य
दुल्वणंविशदंस्फुटमितियादवः ३३ पौरस्त्यानितिजयीजयनशीलः जिदृक्षिविश्रीविदवमित्यादिनाइनिप्रत्ययः सरघुरेवंपुरोभवान् पौरस्त्यान्प्राच्यान्

गङ्गाप्रवर्तयिता ४

दक्षिणापश्चात्पुरस्तस्यगितित्यक् प्रत्ययः तांस्तान्सर्वानित्यर्थः वीप्सायां द्विरुक्तिः जनपदान् देशान् आक्रामन् तालीवनैः श्यामं महोदधेरुपकण्ठम्
अन्तिकम्प्राप ३४ अनम्राणामिति अनम्राणां कर्मणि षष्ठी समुद्धर्तुरुन्मूलयितुः तस्माद्रघोः सकाशात् भीत्रार्थानां भयहेतुरित्यपादानत्वात्पञ्चमी ।
सिन्धुरयात् नदीवेगादिव सुह्मैः सुह्मदेशीयैः सुह्मादयः शब्दा जनपदवचनाः क्षत्रियमाचक्षते वैतसीम् वेतससम्बन्धिनीं वृत्तिम् प्रणतिमित्यर्थः आश्रि
त्य आत्मा संरक्षितः अत्र कौटिल्यः बलीयसाभियुक्तो दुर्बलः सर्वत्रानुप्रणतो वेतसधर्ममातिष्ठेदिति ३५ वङ्गानिति नेता नायकः स रघुः नौभिः साध
नैरुद्धतान् सन्नद्धान् वङ्गान् राज्ञः तरसा बलेन तरः बलं रंहसी इति यादवः उत्खाय उन्मूल्य गङ्गायाः स्रोतसाम् प्रवाहाणाम् अन्तरेषु द्वीपेषु जयस्त

प्राप तालीवनश्याममुपकंठं महोदधेः ३४ अनम्राणां समुद्धर्तुस्तस्मात्सिंधुरयादिव आत्मा संरक्षितः सुह्मैर्वृत्तिमास्थाय
वैतसीम् ३५ वंगानुत्खाय तरसा नेता नौसाधनोद्धतान् निचखान जयस्तंभान् गंगास्रोतोंतरेषु सः ३६ आपादपद्मप्रणताः कल
मा इव ते रघुं फलैः संवर्द्धयामासुरुत्खातप्रतिरोपिताः ३७ स तीर्त्वा कपिशां सैन्यैर्बद्धद्विरदसेतुभिः उत्कलादर्शितपथः कलिंगाभि
मुखो ययौ ३८ स प्रतापं महेंद्रस्य मूर्द्धि तीक्ष्णं न्यवेशयत् ॥

म्भान् निचखान स्थापितवानित्यर्थः ३६ आपादेति आपादपद्म
म् अङ्घ्रिपद्मपर्यन्तम्प्रणताः अत एव उत्खाताः पूर्वम् उद्धृता अपि प्रतिरोपिताः पश्चात्स्थापिताः ते वङ्गाः कलमा इव शालिविशेषा इव
शालयः कलमाद्याश्च षष्टिकाद्याश्च पुंसीत्यमरः ते ऽप्यापादपद्मं मूलपद्मपर्यन्तम् पादो बुध्ने तुरीयांशे शैलप्रत्यन्तपर्वते चरणे च मयूखे चे
ति विश्वः उत्खातप्रतिरोपिताश्च रघुं फलैर्धनैरन्यत्र सस्यैः समवर्द्धयामासुः फलं फले धने बीजे निष्पत्तौ भोगलाभयोः सस्य इति केशवः ३७
स इति स रघुः बद्धा द्विरदा एव सेतवो यैस्तैः सैन्यैः कपिशां नाम नदीं करमामिति केचित्पठन्ति तीर्त्वा उत्कलै राजभिर्दर्शितपथः सन्दर्शितमार्गः सन्

कलिङ्गाभिमुखो ययौ ३८

र॰टी॰ महेन्द्रो मलयः सह्यः शक्तिमानृक्षपर्वतः विन्ध्यश्च पारियात्रश्च सप्तैते कुलपर्वता इति विष्णुपुराणात् मूर्द्धिनी स्थलं दुःसहं प्रतापं यन्ता सारथिः गम्भीरवे
स॰४ दिनो द्विरदस्य गजविशेषस्य मूर्द्धिनी स्थलं निशितम् अङ्कुशमिव न्यवेशयत् निक्षिप्तवान् त्वग्भेदाच्छोणितस्रावान् मांसस्य मथनादपि आत्मानं यो
३९ न जानाति स स्याद्गम्भीरवेदितेति राजपुत्रीये चिरकालेन यो वेत्ति शिक्षां परिचितामपि गम्भीरवेदी विज्ञेयः स गजो गजवेदिभिरिति मृगचर्मीये ३९ प्रती
ति गजसाधनः सन्कालिङ्गः कलिङ्गानां राजा ह्यस्मगधकलिङ्गसूरमसादण् अस्त्रैः आयुधैस्तं रघुं पक्षाणां छेदे उद्यतम् उद्युक्तं शक्रं शिलावर्षीव
पर्वत इव प्रतिजग्राह अभियुक्तवान् ४० द्विषामिति काकुत्स्थः रघुः तत्र महेन्द्राद्रौ द्विषां नाराचदुर्दिनम् नाराचा नाम्नाणविशेषाणां दुर्दिनं लक्ष

अंकुशं द्विरदस्येव यंता गंभीरवेदिनः ३९ प्रतिजग्राह कालिंगस्तमस्त्रैर्गजसाधनः पक्षच्छेदोद्यतं शक्रं शिलावर्षीव पर्वतः
४० द्विषां विषह्य काकुत्स्थस्तत्र नाराचदुर्दिनं सन्मंगलस्नात इव प्रतिपेदे जयश्रियम् ४१ तांबूलीनां दलैस्तत्र रचितापानभूमयः
नारिकेलासवं योधाः शात्रवं च पपुर्यशः ४२ गृहीतप्रतिमुक्तस्य स धर्मविजयी नृपः श्रियं महेंद्रनाथस्य जहार न तु मेदिनीम् ४३

णया वर्षमुच्यते विषह्य सहित्वा सद्यः यथा शास्त्रं सन्मङ्गलस्नात इव विजयमङ्गलार्थम् अभिषिक्त इव जयश्रियम्प्रतिपेदे प्रापयत्तु सर्वौषधि
स्नानं तन्माङ्गल्यमरोचकमिति यादवः ४१ ताम्बूलीनामिति तत्र महेन्द्राद्रौ युध्यन्त इति योधाः पचाद्यच् रचिताः कल्पिताः आपानभूमयः
पानयोग्यप्रदेशाः यैस्ते तथोक्ताः सन्तः नारिकेलासवम् नारिकेलमद्यम् ताम्बूलीनां नागवल्लीनां दलैः पपुः तत्र विजह्रुरित्यर्थः शात्रवं यशोऽपि पपुः ३९
जह्रुरित्यर्थः दन्त्योष्ठ्यो वशब्द इवार्थे शात्रवं यश इवेत्यर्थः ४२ गृहीतेति धर्मविजयी धर्मार्थं विजयशीलः स नृपो रघुः गृहीतश्चासौ प्रतिमुक्तश्च तं
स्य महेन्द्रनाथस्य कालिङ्गस्य श्रियं जहार धर्मार्थमिति भावः मेदिनीं तु न जहार शरणागतवात्सल्यादिति भावः ४३ ॥ ॥ ॥ ॥

ततइति ततः प्राचीविजयानन्तरम् फलवत्पूगमालिना· फलितक्रमुकश्रेणीमता व्रीह्यादित्वादिनिप्रत्ययः वेलायाःसमुद्रकूलस्यतटेनउपान्तेनएव अग स्त्ये नआचरिताम्· आशांदक्षिणांदिशम्· अनाशास्यजयः अयत्नसिद्धत्वात् अप्रार्थनीयजयःसन्ययौ अगस्त्योदक्षिणमाशामाश्रित्यनभसिस्थितः वरुणःस्यात्मजोयोगीविन्ध्यवातापिमर्दन इतिब्रह्मपुराणे ४४ सइति सरघुः गजानांदानेन· मदेन· सुगन्धिना· सुरभिगन्धिना गन्धस्येत्यादिना इकारादेशः समासान्तः यद्यपिगन्धस्येत्त्वे तदेकान्तग्रहणंकर्तव्यमितिनैसर्गिकगन्धविवक्षायामेवेकारादेशः तथापिनिरङ्कुशाः कवयः तथामाघकाव्ये· ववुरयुक्छदगुच्छसुगन्धयः सततगास्ततगानगिरोलिभिः नैषधेच अथाहितप्रायनवारिधाराःस्वादुःसुगन्धिःस्वदतेतुषारे इतिनकर्मधारयान्मत्वर्थीयइतिनिषे

ततोवेलातटेनैवफलवत्पूगमालिना अगस्त्याचरितामाशामनाशास्यजयोययौ ४४ ससैन्यपरिभोगेनगजदानसुगंधिना॥
कावेरींसरितांपत्युःशंकनीयामिवाऽकरोत् ४५ बलैरध्युषितास्तस्यविजिगीषोर्गताध्वनः मारीचोद्भ्रांतहारीतामलयाद्रेरुपत्यकाः
४६ ससंजुरश्वक्षुण्णानामेलानामुत्पतिष्णवः तुल्यगंधिषुमत्तेभकटेषुफलरेणवः ४७॥ ९ धादिनिप्रत्ययइति पक्षोपिजघन्यएवसेना

यांसमवेताः सैन्याः सेनायांसमवेतायेसैन्यास्तेसैनिकाश्चत इत्यमरः सेनायावेतिण्यप्रत्ययः सैन्यानांपरिभोगेन· उपभोगेन· कावेरीनामसरितम् सरितांपत्युः समुद्रस्य· शङ्कनीयांनविश्वासनीयामिवाकरोत्· सम्भोगलिङ्ग·दर्शनाद्भर्तुरविश्वासोभवतीतिभावः ४५ बलैरिति विजिगीषोः विजेतुमिच्छोः गताध्वनस्तस्यरघोः बलैः सैन्यैः बलंशक्तिर्बलंसैन्यमितियादवः मारीचेषुमरीचवनेषु उद्भ्रान्ताः हारीताः पक्षिविशेषाः यासुताः तेषांविशेषाहारीतो मद्गुः कारण्डवः प्लवइत्यमरः मलयाद्रेरुपत्यकाः आसन्नभूमयः उपत्यकाद्रेरासन्नाभूमिरित्यमरः उपाधिभ्यांत्यकन्नित्यादिनात्यकन्प्रत्ययः अध्युषिताः उपत्यकासूषितमित्यर्थः उपान्वध्याङ्वस इतिकर्मत्वम् ४६ ससञ्जुरिति अश्वैः क्षुण्णानामेलालतानामुत्पतिष्णवः उत्पतनशीलाः अलंकृञ

इत्यादिना इस्युच् प्रत्ययः फलरेणवः फलरजांसि तुल्यगन्धिषु समानगन्धिषु सर्वधनीतिवदिनन्तो वहुव्रीहिः मत्तेभानां कटेषु गण्डेषु ससञ्जुः सक्ताः गजगण्
डौ कटी कटाविन्यमरः ४७ भोगीति चन्दनानां चन्दनवृक्षाणां भोगिवेष्टनमार्गेषु सर्पवेष्टनानां निम्नेषु समर्पितं सञ्जितं त्रिपदीच्छेदिनां पादशृंखलच्छेदिना
मपि त्रिपदीपादबन्धनमिति यादवः करिणां ग्रीवासु भवं ग्रैवेयं कण्ठबन्धनम् ग्रीवाभ्योऽण् चेति अण् प्रत्ययः नास्रसत् न स्रस्तमभूत् ध्वंसो लुङीति परस्मै
पदम् पुषादित्वादङ् अनिदितामित्यादिना नकारलोपः ४८ दिशीति दक्षिणस्यां दिशि रवेरपि तेजो मन्दायते मन्दम्भवति लोहितादित्वात्क्यष् वाक्यष
इत्यात्मनेपदम् दक्षिणायने तेजोमान्द्यादिति भावः तस्यामेव दिशि पाण्ड्याः पाण्डानां जनपदानां राजानः पाण्ड्याः पाण्डोर्ड्यण् वक्तव्यः रघोः प्रतापम्

भोगिवेष्टनमार्गेषु चंदनानां समर्पितं नास्रसत्करिणां ग्रैवं त्रिपदीच्छेदिनामपि ४८ दिशि मंदायते तेजो दक्षिणस्यां रवेरपि
तस्यामेव रघोः पांड्याः प्रतापं न विषेहिरे ४९ ताम्रपर्णीसमेतस्य मुक्तासारं महोदधेः ते निपत्य ददुस्तस्मै यशः स्वमिव संचितं ५०
स निर्विश्य यथाकामं तटेष्वालीनचंदनौ स्तनाविव दिशस्तस्याः शैलौ मलयदर्दुरौ ५१॥ ११ प्रतापस्तेजसि खेद इति हेमः न विषेहिरे न

सोढवन्तः सूर्यविजयिनोऽपि विजितवानिति नायकस्य महानुत्कर्षो गम्यते ४९ ताम्रपर्णीति ते पांड्याः ताम्रपर्ण्या नद्या समेतस्य सङ्गतस्य महोदधेः स
म्बन्धि सञ्चितं मुक्तासारं मौक्तिकवरम् सारो बले स्थिरांशे च न्याय्ये क्लीबे वरे त्रिष्वित्यमरः स्वं स्वकीयं सञ्चितं यश इव तस्मै रघवे निपत्य प्रणिपत्य ददुः यशसः
शुभ्रत्वादौपम्यं ताम्रपर्णीसङ्गमे मौक्तिकोत्पत्तिरिति सिद्धम् ५० स इति असह्येति युग्ममेतत् असह्यविक्रमः सरघुः तटेषु सानुषु आलीनचन्दनौ व्याप्त
चन्दनद्रुमौ गन्धसारो मलयजो भद्रश्रीश्चन्दनोऽस्त्रियामित्यमरः स्तनपक्षे प्रान्तेषु व्याप्तचन्दनानुलेपौ तस्याः दक्षिणस्याः दिशः स्तनाविव स्थितौ मलयदर्दुरौ ४१
नाम शैलौ यथाकामं यथेष्टं निर्विश्य उपभुज्य निर्वेशो भृतिभोगयोरित्यमरः उदकान्यस्य सन्तीत्युदन्वानुदधिः उदन्वानुदधौ चेति निपातः उदन्वता दूरान्मुक्तं

दूरतस्त्यक्तम् स्तोकान्तिकदूरार्थकृच्छ्राणि क्तेनेति समासः पञ्चम्याः स्तोकादिभ्य इत्यलुक् स्रस्तांशुकं मेदिन्याः नितम्बमिव स्थितम् सह्यं सह्याद्रिमलङ्घयत् यान्त्रसः अ
तिक्रान्तो वा ५२ युग्मम् सम्प्रति प्रतीचीं दिशमभियायाविन्याह तस्येति अपरान्तानां पाश्चात्यानां जये उद्यतैरुद्युक्तैः अपरान्तास्तु पाश्चात्यास्ते च शूर्पारकादय इति याद
वः विसर्पद्भिर्गच्छद्भिस्तस्य रघोः अनीकैः सैन्यैः अनीकं तु रणे सैन्ये इति विश्वः अर्णवो रामस्य जामदग्न्यस्यास्त्रैरुत्सारितः परिसारितोपि सह्यलग्न इवासीत् सैन्यं हि
तीयोऽर्णव इव दृश्यत इति भावः ५३ भयेति तेन रघुणा भये नोत्सृष्टविभूषणानां परित्यक्तभूषणानां केरलयोषितां केरलाङ्गनानाम् अलकेषु चमूरेणुः सेना
रजः चूर्णस्य कुङ्कुमादिरजसः प्रतिनिधीकृतः एतेन योषितां पलायनं चमूनां च तदनुधावनं च ध्वन्यते ५४ मरुलेति मरुला नाम केरलदेशेषु काचिन्नदी मु

असह्यविक्रमः सह्यं दूरान्मुक्तमुदन्वता नितम्बमिव मेदिन्याः स्रस्तांशुकमलंघयत् ५२ तस्यानीकैर्विसर्पद्भिरपरान्तजयोद्यतैः रामा
स्त्रोत्सारितोप्यासीत्सह्यलग्न इवार्णवः ५३ भयोत्सृष्टविभूषाणां तेन केरलयोषिताम् अलकेषु चमूरेणुश्चूर्णप्रतिनिधीकृतः ५४ म
रुलामारुतोद्धूतमगमत्कैतकं रजः तद्योधवारवाणानामयत्नपटवासतां ५५ अभ्यभूयत वाहानां चरतां गात्रशिञ्जितैः मर्मरः पव
नोद्धूतराजतालीवनध्वनिः ५६॥

९. रवीति केचित्पठन्ति तस्यामारुतेनोद्धूतमुत्थापितं कैतकं केतकीसम्बन्धि रजः तद्योधवारवाणानां रघु
भटकंचुकानाम् कञ्चुको वारबाणोऽस्त्री त्यमरः अयत्नपटवासताम् अयत्नसिद्धवस्त्रवासनाद्रव्यत्वमगमत् पिष्टातः पटवासक इत्यमरः ५५ अभ्यभूयते
ति चरतां गच्छतां वाहानां वाजिनाम् वाजिवाहार्वगन्धर्वहयसैन्धवसप्तय इत्यमरः गात्रसिञ्जितैः गात्रेषु शब्दायमानैः कर्तरि क्तः सञ्जितैरिति वा पाठः स
ञ्जयतेरार्यन्तात्कर्मणि क्तः वर्मभिः कवचैः पवनेनोद्धूतानां कम्पितानां राजतालीवनानां ध्वनिरभ्यभूयत तिरस्कृतः मर्मर इति पाठे वाहानां गात्रसिञ्जि
॥ ॥ ॥ तैः गात्रध्वनिभिरित्यर्थः मर्मरः मर्मरायमाण इति ध्वनेर्विशेषणम् ५६॥ ॥ ॥

खर्जूरीति खर्जूरीणां तृणद्रुमविशेषाणां खर्जूरी केतकी ताली खर्जूरी च तृणद्रुमा इत्यमरः स्कन्धेषु प्रकाण्डः स्कन्धस्स्यान्मूलाच्छाखावधिस्तरोरित्यमरः नद्धानां बद्धानां करिणां मदोद्गारेण मदस्रावेण सुगन्धिषु गन्धस्येत्यादिनाऽकारः कटेषु गण्डेषु पुन्नागेभ्यः नागकेसरेभ्यः पुन्नामपुष्पाणि विहाय तल्लोपेपत्वमी शिलीमुखाः अलयः पेतुः अलिबाणौ शिलीमुखावित्यमरः ततोधिकसौगन्ध्यातिशयादिति भावः ५७ अवकाशमिति उदन्वानुदधिः रामाय जामदग्न्यायार्थिने याचितः सन्नवकाशं स्थानं ददौ किलेति प्रसिद्धावित्यर्थः रघवे तु अपरान्तमहीपालव्याजेन करं बलिं ददौ बलिहस्तांशवः करा इत्यमरः अपरान्तानां समुद्रमध्यदेशवर्तित्वात्तैर्दत्ते करे समुद्रदत्तत्वोपचारः करदानं च भीत्या न तु याच्ञयाऽइति रामादपि रघोरुत्कर्षः ५८ मत्तेति तत्र सरघुर्मत्तानामि

खर्जूरीस्कंधनद्धानां मदोद्गारसुगंधिषु। कटेषु करिणां पेतुः पुन्नागेभ्यः शिलीमुखाः ५७ अवकाशं किलोदन्वान्रामायाभ्यर्थितो ददौ। अपरांतमहीपालव्याजेन रघवे करं ५८ मत्तेभरदनोत्कीर्णव्यक्तविक्रमलक्षणं। त्रिकूटमेव तत्रोच्चैर्जयस्तंभं चकार सः ५९ पारसीकांस्ततो जेतुं प्रतस्थे स्थलवर्त्मना। इंद्रियाख्यानिव रिपूंस्तत्त्वज्ञानेन संयमी ६० यवनीमुखपद्मानां सेहे मधुमदं न सः॥ ॥

भानां रदनोत्कीर्णानि दन्तक्षतान्येव भावक्तः व्यक्तानि स्फुटानि व्यक्तोमनीषिस्फुटयोरिति हेमः विक्रमलक्षणानि पराक्रमचिन्हानि विजयवर्णवलिस्थानानि यस्मिन् तं तथोक्तं त्रिकूटमेव उच्चैर्जयस्तम्भं चकार गाढप्रकारस्त्रिकूटाद्रिरेवोत्कीर्णवर्णस्तम्भः स्वरघोर्जयस्तम्भोभूदित्यर्थः ५९ पारसीकानिति ततः सरघुः संयमी योगी तत्त्वज्ञानेनेन्द्रियनामकान् रिपूनिव पारसीकान्राज्ञो जेतुं स्थलवर्त्मना प्रतस्थे न तु निर्दिष्टेनापि जलपथेन समुद्रयानस्य निषिद्धत्वादिति भावः ६० यवनीति सरघुः यवनीनां यवनस्त्रीणां जातेरस्त्रीविषयादिति ङीष् मुखानि पद्मानीव मुखपद्मानि उपमितसमासः तेषां मधुनामद्येन यो मदो मदरागः कार्यकारणभावयोरभेदेन निर्देशः तं न सेहे कमिव अकाले प्रावृड इति रिक्ते काले जलदोदयः। ५१

प्रायेण प्राह्णविषयत्वविकाशस्याप्रसक्तत्वादब्जानां सम्बन्धिनं बालातपमिव अब्जहितत्वादब्जसम्बन्धित्वं सौरातपस्य ६१ सङ्ग्राम इति तस्य रघोः अ
श्वसाधनैः वाजिसैन्यैः साधनं सिद्धिसैन्ययोरुपायेऽप्यगमे मेढ्रे निर्वृत्तौ कारके वधे दापने मृतसंस्कारे प्रमाणे गमने धन इति हैमः पश्चाद्भवैः पाश्चा
त्यैर्यवनैः सह दाक्षिणपश्चात्पुरसस्त्यक सहार्थे तृतीया शृङ्गाणां विकाराणि शार्ङ्गाणि धनूंषि तेषां कूजितैः शब्दैः हेतुलक्षणं तैः शार्ङ्गं पुनर्धनुषि
शार्ङ्गिणः जये च शृङ्गं विहते चापेऽप्याह विशेषत इति केशवः अथवा शार्ङ्गैः शृङ्गसम्बन्धिभिः कूजितैः विज्ञेयाः अनुमेयाः प्रतियोधाः प्रतिभटा य
स्मिन् रजसि तुमुलः सङ्ग्रामः सङ्कुलं युद्धमभूत् तुमुलं रणसङ्कुलमिति विश्वः ६२ भल्लेति स रघुर्भल्लापवर्जितैर्बाणविशेषकृत्तैः लेहाद्दलफलीभ

बालातपमिवाब्जानामकालजलदोदयः ६१ संग्रामस्तुमुलस्तस्य पाश्चात्त्यैरश्वसाधनैः शार्ङ्गकूजितविज्ञेयप्रतियोधे रजस्य
भूत् ६२ भल्लापवर्जितैस्तेषां शिरोभिः श्मश्रुलैर्महीम् तस्तार सरघाव्याप्तैः स क्षौद्रपटलैरिव ६३ अपनीतशिरस्त्राणाः शेषास्तं शरणं
ययुः प्रणिपातप्रतीकारः संरम्भो हि महात्मनां ६४ विनयन्ते स्म तद्योधा मधुभिर्विजयश्रमं ॥ ९ लाः इति यावत् श्मश्रुलैः प्रवृद्धमुखरोमभिः

सिध्मादित्वाल्लच्प्रत्ययः तेषां पाश्चात्यानां शिरोभिः सरघाभिर्मधुमक्षिकाभिः व्याप्तैः सरघा मधुमक्षिकेत्यमरः क्षुद्राः सरघाः क्षुद्राव्यङ्गानटीवेश्यासरघा
कण्टकारिके त्यमरः ताश्च ताः क्षुद्राभिः कृतानि क्षौद्राणि मधूनि क्षौद्रं मधु निपानीय इत्यमरः क्षुद्राभ्रमरवटरपादपादिति संज्ञायामण् प्रत्ययः तेषां पटलैः सञ्च
यैरिव पटलं तिलके नेत्ररोगच्छन्दसि सञ्चये पटिके परिवारे चेति हेमः महीं तस्तार आच्छादयामास ६३ अपनीतेति शेषाः हता एव शिष्टाः अपनीतशि
रस्त्राणाः अपसारितशीर्षण्याः सन्तः शीर्षकं शीर्षण्यं शिरस्त्राणमित्यमरः शरणागतलक्षणमेतत् तं रघुं शरणं ययुः तथाहि महात्मनां संरम्भः कोपः संरम्भः स
म्भ्रमे कोप इति विश्वः प्रणिपातः प्रणतिरेव प्रतिकारो यस्य सहि महतां परकीयमौद्धत्यमेवासह्यं न तु जीवितमिति भावः ६४ विनयन्त इति तस्य रघोर्योधा भटा

आसीर्णान्यजिनरत्नानि॰ चर्मश्रेष्ठानि यासु तासु॰ द्राक्षावलयानां भूमिषु मृद्वीका गोस्तनी द्राक्षा स्वाद्वी मधुरसेति चेत्यमरः मधुभिर्द्राक्षाफलप्रकृतिकैर्मद्यैर्विजय
श्रमं युद्धखेदं विनयन्ते स्म अपनीतवन्तः कर्तृस्थे चाशरीरकर्मणीत्यात्मनेपदम् लट्स्मे इति भूतार्थे लट् ६५ ततइति ततो रघुर्भास्वान्सूर्य्य इव शरैर्वाणैरुस्रैः
किरणैरिव किरणोस्रमयूखांशुगभस्तिघृणिरश्मय इत्यमरः उदीच्यान् उदग्भवान्नृपान् रसानुदकानीव उद्धरिष्यन् कौवेरीं कुवेरसम्बन्धिनीं दिशम् उदीचीं
प्रतस्थे अनेकेवशब्देनेयमुपमा यथाह दण्डी एकानेकेवशब्दत्वात्सा वाक्यार्थोपमा द्विधेति ६६ विनीतेति सिन्धुर्नाम काश्मीरदेशेषु कश्चिन्नदविशेषः
देशे नदविशेषेऽब्धौ सिन्धुर्ना सरिति स्त्रियामित्यमरः सिन्धोस्तीरे विचेष्टनैरङ्गपरिवर्तनैर्विनीताध्वनः श्रमास्तस्य रघोर्वाजिनोऽश्वाः लग्नाः कुङ्कुमकेसराः

आसीर्णाजिनरत्नासु द्राक्षावलयभूमिषु ६५ ततः प्रतस्थे कौवेरीं भास्वानिव रघुर्दिशम् शरैरुस्रैरिवोदीच्यानुद्धरिष्यन् रसानि
व ६६ विनीताध्वश्रमास्तस्य सिंधुतीरविचेष्टनैः दुधुवुर्वाजिनः स्कंधान्लग्नकुंकुमकेसरान् ६७ तत्र हूणावरोधानां भर्तृषु व्यक्तवि
क्रमं कपोलपाटलादेशि बभूव रघुचेष्टितं ६८ काम्बोजाः समरे सोढुं तस्य वीर्य्यमनीश्वराः॥

९. कुङ्कुमकुसुमकिञ्जल्का येषां तान् यद्वा
लग्नकुङ्कुमाः केसराः सटा येषां तान् अथ कुङ्कुमं काश्मीरजन्माग्निशिखं वरं वाल्हीकपीतनं रक्तसंकोचपिशुनं धीरं लोहितचन्दनमित्यमरः जटास
टाकेशयोरिति हैमः केसरो नागकेसरतुरङ्गसिंहयोः स्कन्धकेशेषु वकुलद्रुमे पुन्नागवृक्षे किञ्जल्के केसरस्स्यादिति हैमः स्कन्धान्॰ कायान् कायो दे
हः क्लीवपुंसोरित्यमरः स्कन्धः प्रकाण्डकायांसविज्ञानादिषु पञ्चसु नृपे समूहे व्यूहे चेति हैमः स्कन्धान् दुधुवुः कम्पयन्ति स्म ६७ तत्रेति तत्र उदीच्यां दिशि ४२
भर्तृषु व्यक्तविक्रमम् भर्तृवधेन स्फुटपराक्रममित्यर्थः रघुचेष्टितं॰ रघुव्यापारः हूणां जनपदाः क्षत्रियास्तेषामवरोधाः अन्तःपुरस्त्रियः तासां कपोलेषु
पाटलस्य पाटलिम्नः ताडनादिकृतस्य आदेशि॰ उपदेशकं॰ बभूव अथवा पाटलः आदेशी॰ आदेशो यस्य तद्बभूव सयं लेख्यायन्तरस्यार्थः ६८ काम्बो

सोढुमनीश्वराः अशक्ताः सन्तः वीर्यं तेजः प्रभावयोः शुक्रे शक्तौ चेति हैमः गजानामालानं बन्धनम् भावे ल्युट् विभाषा लीयतेरित्यात्वम् तेन परिक्लिष्टैः परिस्रुतैः अ
क्षोटैर्वृक्षविशेषैः सार्द्धमानताः ६९ तेषामिति तेषां काम्बोजानां सद्भिरश्वैः भूयिष्ठा बहुलास्तुङ्गाः द्रविणानां हिरण्यानाम् हिरण्यं द्रविणं द्युम्नमित्यमरः राश
यः एव उपदाः उपायनानि उपायनमुपग्राह्यमुपहारस्तथोपदेत्यमरः कोसलेश्वरं कोसलदेशाधिपतिं तं रघुं शश्वदशकृद्विविशुः मुहुः पुनः शश्वदभी— क्ष्णम
सकृत्समा इत्यमरः तथापि उत्सेकाः गर्वास्तु न विविशुः सत्यपि गर्वकारणे न जगर्वुरित्यर्थः ७० तत इति ततोनन्तरम् अश्वसाधनः सन् गौर्याः गुरुं पितरं शैलं
हिमवन्तं उद्धूतैः अश्वखुरोद्धूतैर्धातूनां गैरिकादीनां रेणुभिः स्वकूटान् तस्य शृङ्गाणि कूटोस्त्री शिखरं शृङ्गमित्यमरः वर्द्धयन्निव आरुरोह उत्पतन धूलिदर्श

गजालानपरिक्लिष्टैरक्षोटैः सार्द्धमानताः ६९ तेषां सदश्वभूयिष्ठास्तुंगा द्रविणराशयः विविशुस्तं विघ्नानां घमुदन्वेतमिवापगाः
७० ततो गौरीगुरुं शैलमारुरोहाश्वसाधनः वर्द्धयन्निव तत्कूटानुद्धूतैर्धातुरेणुभिः ७१ शशंस तुल्यसत्वानां सैन्यघोषेप्यसंभ्रमं
गुहाशयानां —— सिंहानां परिवृत्यावलोकितं ७२ भूर्जेषु मर्मरीभूताः कीचकध्वनिहेतवः॥ ९ नाद्रिशिखरहद्भिन्नमोजायन इतिभा

वः ७१ शशंसेति तुल्यसत्वानां सैन्यैः समानबलानां गुहासु शेरत इति गुहाशयाः अधिकरणे शेतेरित्यच्प्रत्ययः तेषां सिंहानां दरी तु कन्दरो वा स्त्री देवखात
विले गुहेत्यमरः हरीणाम् सिंहो मृगेन्द्रः पञ्चास्यो हर्यक्षः केसरी हरिरित्यमरः। सिंहस्तु राशिभेदे मृगाधिपे श्रेष्ठः स्यादुत्तरस्थश्चेति हैमः सम्बन्धिपरिवृत्य
परावर्त्यावलोकितं शयित्वैव ग्रीवाभङ्गेनावलोकनं कर्तृ सैन्यघोषे सेनाकलकले सम्भ्रमकारणे सत्यपि असम्भ्रमम् अन्तः शोभाविरहितं न त्रासहर्य
सञ्ज्य प्रतिषेधेपि समास इष्यते शशंस कथयामास सैन्येभ्य इत्यर्थाल्लभ्यते बाह्यचेष्टितमेव मनोवृत्तेरनुमापकमिति भावः असम्भ्रमत्वे हेतुस्तुल्यसत्वानामि
ति न हि समबलः समबलाद्बिभेतीति भावः ७२ भूर्जेष्विति भूर्जेषु भूर्जपत्रेषु भूर्जपत्रो भुजो भूर्जौ मृदुत्वक्चर्मिका मतेनियादवः मर्मरः शुष्कपर्णध्वनिः मर्मरः

शुष्कपर्णानामितियादवः अयंचशुक्लादिशब्दवद्गुणिन्यपिवर्त्तते प्रयोज्यतेच मर्मरैः गुरुधूपगन्धिभिरिति अतोमर्मरीभूताःमर्मरशब्दवन्तोभूताइत्यर्थः
कीचकानांवेणुविशेषाणांध्वनिहेतवः श्रोत्रसुखावहाश्चेतिभावःगङ्गाशीकरिणः शीतला इत्यर्थः मरुतोवाताः मार्गेतंसिषेविरे ७३ विशश्रमुरिति सैनि
काःसेनायांसमेताः प्राग्वहतीयष्ठक्प्रत्ययः नमेरूणांसुरपुन्नागानांछायासुनिषण्णानांदृषदुपविष्टानांमृगाणांकस्तूरीमृगाणांनाभिभिर्वासितोत्सङ्गा
सुरभितलाःदृषदः शिलाः अध्यास्य अधिशीङ्स्थासांकर्मेतिकर्मत्वम् दृषत्सु अधिरुह्येत्यर्थः विशश्रमुः विश्रान्ताः ७४ सरलेति सरलेषुदेवदारुविशे
षेषुआसक्तानियानिमातङ्गानांगजानांग्रीवासुभवानिग्रैवेयाणिकण्ठशृङ्खलानि ग्रीवाभ्योऽण्चेतिचकारात्ठञ्प्रत्ययः तेषुस्फुरितत्विषः प्रतिफलितभा

गंगाशीकरिणोमार्गेमरुतस्तंसिषेविरे ७३ विशश्रमुर्नमेरूणांछायास्वध्यास्यसैनिकाः दृषदोवासितोत्संगानिषण्णमृगनाभि
भिः ७४ सरलासक्तमातंगग्रैवेयस्फुरितत्विषः आसन्नोषधयोनेतुर्नक्तमस्नेहदीपिकाः ७५ तस्योत्सृष्टनिवासेषुकंठरज्जुक्षत
त्वचः गजवर्ष्मकिरातेभ्यः शशंसुर्देवदारवः ७६ तत्रजन्यंरघोर्घोरंपार्वतीयैर्गणैरभूत् नाराचक्षेपणीयाश्मनिष्पेषोत्पतितानलं ७७

सः ओषधयः नक्तंरात्रौउज्ज्वलन्तोज्योतिर्लताविशेषाः नेतुःनायकस्यरघोः अस्नेहदीपिकाः तैलनिरपेक्षाःप्रदीपिकाआसन् ७५ तस्येति तस्यरघोरुत्सृष्टेषु
उज्झितेषुनिवासेषुकण्ठरज्जुभिः गजग्रैवेयैः क्षतानिष्पिष्टात्वचोयेषांतेदेवदारवः किरातेभ्योवनचरेभ्योगजानांवर्ष्मप्रमाणम् वर्ष्मदेहप्रमाणयोरित्यम
रः शशंसुःकथितवन्तः देवदारुस्कन्धत्वक्क्षतैर्गजानामौन्नत्यमनुमीयतइत्यर्थः ७६ तत्रेति तत्रहिमाद्रौरघोःपर्वतेभवैःपार्वतीयैः पर्वताच्चेतिछ
प्रत्ययः गणैरुत्सवसङ्केताख्यैः सप्तभिस्सहागणानुत्सवसंकेतानजयत्सप्तपाण्डवइतिमहाभारते नाराचानांवाणविशेषाणां क्षेपणीयानां भिन्दिपा
लानामश्मनांच निष्पेषेणसङ्घर्षेणआउत्पतिताः अनलायस्मिन्तत्तथोक्ताः क्षेपणीयोभिन्दिपालःस्याद्गोरीघोमहाफलइतियादवः घोरंभीमंजन्यंयु

शरैरिति सरघुः शरैर्बाणैः उत्सवसङ्केतान्नाम गणान्विरतोत्सवान् कृत्वा जित्वेत्यर्थः किन्नरान्बाहोः स्वभुजयोर्जयोदाहरणं जयाख्यायकं प्रबन्धविशेषं गापयामास गानिबुद्धीत्यादिना किन्नराणां कर्मत्वम् ७८ परस्परेणेति तेषुगणेषु उपायनयुक्ताः पाणयो येषां तेषु सत्सु परस्परेण अन्योन्यं राज्ञा हिमवतः सारो धनरूपो विज्ञातः हिमाद्रिणा राज्ञः सारो बलरूपो विज्ञातः एतेन तत्रत्यवस्तूनामनर्घ्यत्वं गणानामभूतपूर्वपराजय इति ध्वन्यते ७९ तत्रेति सरघुस्तत्र हिमाद्रौ अक्षोभ्यम् अप्रधृष्यं यशोराशिं निवेश्य निधाय पौलस्त्येन रावणेन तुलितस्य चालितस्य अद्रेः कैलासस्य ह्रियम् आदधानो जनयन्निवावरुरोह अवततार कैलासमगत्वैव प्रतिनिवृत्त इत्यर्थः नहि शूराः परेण पराजितम् अभियुञ्जत इति भावः ८० चकम्प इति तस्मिन् रघौ तीर्णलौहित्ये

शरैरुत्सवसंकेतान्स कृत्वा विरतोत्सवान् जयोदाहरणं बाह्वोर्गापयामास किन्नरान् ७८ परस्परेण विज्ञातस्तेषूपायनपाणिषु राज्ञा हिमवतः सारो राज्ञः सारो हिमाद्रिणा ७९ तत्राक्षोभ्यं यशोराशिं निवेश्यावरुरोह सः पौलस्त्यतुलितस्याद्रेरादधान इव ह्रियम् ८० चकंपे तीर्णलौहित्ये तस्मिन्प्राग्ज्योतिषेश्वरः तद्गजालानतां प्राप्तैः सह कालागरुद्रुमैः ८१ न प्रसेहे स रुद्धार्कमधारावर्षदुर्दिनं रथवर्त्मरजोऽप्यस्य कुत एव पताकिनीं ८२ तमीशः कामरूपाणामत्याखण्डलविक्रमं भेजे भिन्नकटैर्नागैरन्यानुपरुरोध यैः ली ८

नामनदीयेन तस्मिन्तीर्णलौहित्ये सति प्राग्ज्योतिषाणां जनपदानामीश्वरस्तस्य रघोर्गजानामालानतां प्राप्तैः कालागरुद्रुमैः कृष्णागरुवृक्षैः सह चकम्पे कम्पितवान् ८१ नेति स प्राग्ज्योतिषेश्वरः रुद्धार्कम् आवृतसूर्यम् अर्कोद्गमस्फटिकेनाम्नि सूर्यविडौजसीति हैमः अधारावर्षं च तद्दुर्दिनं च धारावृष्टिं विना दुर्दिनमभूतम् अस्य रघोः रथवर्त्मरजोऽपि न प्रसेहे पताकिनीं सेनां कुत एव प्रसेहे न कुतोऽपीत्यर्थः ८२ तमिति कामरूपाणां नाम देशानामीशः अत्याखण्डलविक्रमम् अतीन्द्रपराक्रमं तं रघुम् भिन्नाः स्रवन्मदाः कटाः गण्डाः येषां तैर्नागैः गजैः साधनैः भेजे नागान्दत्वा शरणं गत इत्यर्थः कीदृशैर्नागैरन्या

रघुमितिभावः ८२ ॥

कामरूपेति कामरूपेश्वरो हेमपीठस्याधिदेवताम् पीठमासनमित्यमरः तस्य रघोः पादयोः छायां कनकमयपादपीठव्यापिनीं कान्तिं रत्नान्येव पुष्पाणि· ते
षामुपहारेण समर्पणेन आनर्च· अर्चयामास उपायनमुपग्राह्यमुपहारस्तथोपदेत्यमरः ८४ इतीति जिष्णुः जयशीलः ग्लाजिस्थश्च ग्स्नुरिति ग्स्नुप्रत्य
यः स रघुरित्थं दिशो जित्वा· रथैरूढं तं रजः छत्रशून्येषु रघोरेकछत्रकत्वादिति भावः राज्ञां मौलिषु किरीटेषु धमिल्लेषु वा विश्रामयन्संक्रामयन्नित्यर्थः
न्यवर्तत· निवृत्तः ८५ स इति स रघुः सर्वस्वं दक्षिणा यस्य तत् दानं यस्य तं सर्वस्वदक्षिणम् दक्षिणादिकं प्रतिष्ठाय तत्र दान इति हेमः· विश्वजित्सर्वस्वदक्षिण इति
श्रुतेः विश्वजितं नाम यज्ञम् आरेभे कृतवानित्यर्थः युक्तं चैतदित्याह सतां साधूनां वारिमुचां मेघानामिव आदानम् अर्जनं विसर्गाय यद्धि पात्रविनियोगाय

कामरूपेश्वरस्तस्य हेमपीठाधिदेवतां रत्नपुष्पोपहारेण छायामानर्च पादयोः ८४ इति जित्वा दिशो जिष्णुर्न्यवर्तत रथोद्धतं र
जो विश्रामयन् राज्ञां छत्रशून्येषु मौलिषु ८५ स विश्वजितमारेभे यज्ञं सर्वस्वदक्षिणं आदानं हि विसर्गाय सतां वारिमुचामिव
८६ सत्रान्ते सचिवसखः पुरस्क्रियाभिर्गुर्वीभिः शमितपराजयव्यलीकान् काकुत्स्थश्चिरविरहोत्सुकावरोधान् राजन्यान्स्वपुर
निवृत्तयेऽनुमेने ८७

यत्यर्थः ८६ सत्रान्त इति काकुत्स्थो रघुः सत्रान्ते· यज्ञान्ते सत्रमाच्छादने यज्ञे सदादाने धनेऽपि चेत्यमरः सचिवानाम् अमा
त्यानां सखा इति· सचिवसखः सन् सचिवो भृतके ... मात्य इति हेमः तेषामन्यं तानुसरणद्योतनार्थं राज्ञः सखित्वव्यपदेशः राजाहः सखिभ्यष्टच् गुर्वीभि
र्महतीभिः गुरुर्महत्याङ्गिरसे पित्रादौ धर्मदेशके इति हेमः पुरस्क्रियाभिः पूजाभिः शमितं पराजयेन व्यलीकं दुःखं वैलक्ष्यं वा येषां तान् दुःखे वैलक्ष्ये व्यली ४४
कमिति यादवः चिरं विरहेण उत्कण्ठिताः उत्सुकाः अवरोधाः अन्तःपुराङ्गनाः येषां तान् राज्ञोऽपत्यानि राजन्याः क्षत्रियास्तान् राजश्वशुराद्यदिति यत्
मूर्द्धाभिषिक्तो राजन्यो बाहुजः क्षत्रियो विराडित्यमरः स्वपुरं प्रति निवृत्तये प्रतिगमनाय अनुमेने अनुज्ञातवान् ८७ ॥ ४ ॥ ॥ ४ ॥

Digitized by Sarayu Foundation Trust, Delhi and eGangotri

तइति तेराजानोरेखाएवध्वजाश्चकुलिशाश्चातपत्राणिचध्वजाद्याकारारेखाइत्यर्थः तानिचिन्हानियस्यतत्तथोक्तम् प्रसादेनैवअनुग्रहेणैवलभ्यमिति
प्रसादलभ्यं संम्राजः सार्वभौमस्य रघोश्चरणयुगंप्रस्थानेप्रयाणसमयेयाः प्रणतयोनमस्काराः ताभिः करणैः अङ्गुलीषुमौलिषुकेशबंधनेषुयाः
स्रजोमाल्यानिताभ्यः श्च्युतैर्मकरन्दैः पुष्परसैः रेणुभिः परागैश्चगौरंगौरवर्णंचक्रुः ८८ इतिपदवाक्यप्रमाणपारावारीणश्रीमहोपाध्यायकोलाचल
मल्लिनाथसूरिविरचितायांरघुवंशव्याख्यायांसञ्जीविनीसमाख्यायांचतुर्थःसर्गः ४॥ ॥ श्रीगणेशायनमः॥ इन्दीवरदलश्याममिन्दिरान
न्दकन्दलम् वन्दारुजनमन्दारंवन्देहंयदुनन्दनम् १ तमिति विश्वजिति विश्वजिन्नाम्नि अध्वरेयज्ञे यज्ञःसवोध्वरोयागइत्यमरः निःशेषविश्रा

तैरेखाध्वजकुलिशातपत्रचिन्हंसम्राजश्चरणयुगंप्रसादलभ्यं प्रस्थानप्रणतिभिरंगुलीषुचक्रुर्मौलिस्रक्च्युतमकरं
दरेणुगौरम् ८८ इतिश्रीरघुवंशेमहाकाव्येकालिदासकृतौरघुदिग्विजयोनामचतुर्थःसर्गः ४ ॥श्रीगणेशायनमः
तमध्वरेविश्वजितिक्षितीशंनिःशेषविश्राणितकोशजातं उपात्तविद्योगुरुदक्षिणार्थीकौत्सःप्रपेदेवरतंतुशिष्यः १
समृन्मयेवीतहिरण्मयत्वात्पात्रेनिधायार्घ्यमनर्घ्यशीलः॥ १ णितंदत्तम् श्रणदानेचुरादिः कोशानाम र्थराशीनांजातंसमूहोयेन

तंतथोक्तम् कोशोस्त्रीकुड्मले दिव्यखड्गपिधानेर्थौघदिव्ययोरित्यमरः जातंजनसमूहयोरितिविश्वः एतेनकौत्सस्यानवसरप्राप्तिंसूचयति क्षिती
शंरघुम् उपात्तविद्योलब्धविद्यः वरतन्तोःशिष्यःकौत्सः ऋषिःस्वकेनपण गुरुदक्षिणार्थीपुष्करादिभ्योदेशेइत्यत्रार्थाच्चसन्निहितात्तदन्ताच्चेतिइनि
अप्रत्याख्येयइतिभावः प्रपेदेप्रापसर्गेऽस्मिन्वृत्तमुपजातिः तल्लक्षणंतु स्यादिन्द्रवज्रायदितौजगौगउपेन्द्रवज्राजतजास्ततोगौ अनन्तरो
दीरितलक्ष्मभाजौपादौयदीयावुपजातयस्ताइति १ सइति अनर्घ्यशीलः अमूल्यस्वभावः असाधारणस्वभाव इत्यर्थः मूल्येपूजाविधावर्घ्यः

र॰टी॰ शीलं स्वभावे सद्वृत्त इति चामरः । श्रुतौ यशसा कीर्त्या प्रकाशत इति प्रकाशः पचाद्यच् अतिथिषु साधुरातिथेयः पथ्यतिथिवसतिस्वपतेर्ढञ् इति ढञ्प्रत्ययः स रघुः
स॰५ हिरण्यस्य विकारो हिरण्मयः दाण्डिनादिसूत्रेण निपातः वीतहिरण्मयत्वात् अपगतसुवर्णपात्रत्वात् यज्ञस्य सर्वस्वदक्षिणाकत्वादिति भावः मृन्मये मृद्विका
४५ रपात्रे अर्घ्यम् अर्घ्यार्थमिदम् अर्घ्यम् पादार्घाभ्यां चेति यत्प्रत्ययः पूजार्थं द्रव्यं निधाय श्रुतेन शास्त्रेण प्रकाशम् प्रसिद्धम् श्रूयते इति श्रुतम् वेदशास्त्राभ्यां
श्रुतं शास्त्रावधृतयोरित्यमरः अतिथिम् अभ्यागतं कौत्सम् अतिथिर्ना गृहागत इत्यमरः प्रत्युज्जगाम २ तमिति विधिज्ञः शास्त्रज्ञः अकरणे प्रत्यवाय
भीरुरित्यर्थः मानधनानामग्रयायी अग्रेसरः अपयशोभीरुरित्यर्थः कृत्यवित् कार्यज्ञः आगमनप्रयोजनमवश्यं प्रष्टव्यमिति कृत्यवित् विशाम्पतिः मनु

श्रुतप्रकाशं यशसा प्रकाशः प्रत्युज्जगामातिथिमातिथेयः २ तमर्चयित्वा विधिवद्विधिज्ञस्तपोधनं मानधनाग्रयायी विशाम्पतिर्
विष्टरभाजमारात्कृताञ्जलिः कृत्यविदित्युवाच ३ अप्यग्रणीर्मन्त्रकृतामृषीणां कुशाग्रबुद्धे कुशली गुरुस्ते यतस्त्वया ज्ञानमशेष
मासं लोकेन चैतन्यमिवोष्णरश्मेः ४ कायेन वाचा मनसापि शश्वद्यत्संभृतं वासवधैर्यलोपि

जेश्वरः द्वौ विशौ वैश्यमनुजावित्यमरः विष्ट
रभाजम् आसनगतम् उपविष्टमित्यर्थः विष्टरो विटपी दर्भमुष्टिः पीठाद्यमासनमित्यमरः वृक्षासनयोर्विष्टर इति निपातः तं तपोधनं विधिवत् विध्यर्हं
यथाशास्त्रमित्यर्थः तदर्हमिति वतिप्रत्ययः अर्चयित्वा आरात् समीपे आराद्दूरसमीपयोरित्यमरः कृताञ्जलिः सन् इति वक्ष्यमाणप्रकारेणोवाच ३
अप्यग्रणीरिति हे कुशाग्रबुद्धे सूक्ष्मबुद्धे कुशाग्रीयमतिः सूक्ष्मदर्शी च यः पुमानिति हलायुधः मन्त्रस्रष्टृणाम् सुकर्ममन्त्रपापेत्यादिना क्विप् ऋषीणामग्र
णीः श्रेष्ठः ते तव गुरुः कुशल्यपि क्षेमवान् किम् अपि प्रश्ने गर्हासमुच्चयप्रश्नसम्भावनास्वपीत्यमरः यतो यस्माद्गुरोस्त्वया अशेषं ज्ञानम् लोकेन उष्णरश्मेः ७५
सूर्याच्चैतन्यम् प्रबोध इव आप्तम् स्वीकृतम् ४ कायेनेति कायेन उपवासादिकृच्छ्रचान्द्रायणादिना वाचा वेदपाठेन मनसा गायत्रीजपादिना एतैः

करणैः वासवस्य· इन्द्रस्य· धैर्य्यंलुम्पतीति· वासवधैर्य्यलोपि· स्वपदापहारं शङ्का जनकमित्यर्थः यत्तपः शश्वत· असकृत् मुहुः पुनः पुनः शश्वदभीक्ष्ण
मसकृत्समाइत्यमरः सम्भृतं सञ्चितम्· महर्षेः वरतन्तोः त्रिविधम् वाङ्मनःकायजंतपः अन्तरायैः विघ्नैः इन्द्रेणप्रेषिताः अप्सरसः शापैः व्ययं· नाशं·ना
पाद्यते कच्चिन्ननीयतेकिम् कच्चित्कामप्रवेदनइत्यमरः ५ आधारेति आधारबन्धप्रमुखैः आलवालनिर्माणादिभिः प्रयत्नैः उपायैः आधारआलवा
लेऽम्बुबन्धेऽधिकरणेपिचेतिविश्वः सुतेभ्योनिर्गतोविशेषोऽतिशयोयस्मिन्कर्मणितत्तथासंवर्द्धितानां श्रमच्छिदां· वः आश्रमपादपानाम्· वाय्वादिः
आदिशब्दाद्दवानलादिः· उपप्लवोबाधको· नकच्चिन्नास्तिकिम् ६ क्रियेतिक्रियानिमित्तेष्वपि· अनुष्ठानसाधनेष्वपि· कुशेषु मुनिभिर्वत्सलत्वात्· मृगस्ने

आपाद्यतेनव्ययमंतरायैः कच्चिन्महर्षेस्त्रिविधंतपस्तत् ५ आधारबंधप्रमुखैः प्रयत्नैः संवर्द्धितानांसुतनिर्विशेषं कच्चिन्नवाय्वा
दिरुपप्लवोवः श्रमच्छिदामाश्रमपादपानाम् ६ क्रियानिमित्तेष्वपिवत्सलत्वादभग्नकामामुनिभिःकुशेषु तदंकशय्याच्युत
नाभिनालाकच्चिन्मृगीणामनघाप्रसूतिः ७ निर्वर्त्यतेयैर्नियमाभिषेकोयेभ्योनिवापांजलयःपितॄणां॥ ९ हार्द·अभग्नकामा·अप्र

तिहतेच्छा· तेषांमुनीनामङ्का एवशय्यास्तासुच्युतानिनाभिनालानियस्यास्सातथोक्ता मृगीणांप्रसूतिःसन्ततिः अनघा· अव्यसना· कच्चित् अनपायि
नीकिमित्यर्थः दुःखेनाव्यसनेऽघमितियादवः तथाहिव्यालभयाद्दशरात्रम् अङ्क· एवधारयन्ति ७ निर्वर्त्यतइति येस्तीर्थजलैर्नियमाभिषेकोनित्यस्ना
नादिर्निर्वर्त्यते· निष्पाद्यते· येभ्योजलेभ्य उद्धृत्येतिशेषः पितॄणामग्निष्वात्तादीनां निवापाञ्जलयः तर्पणाञ्जलयः पितृदानंनिवापस्स्यादित्यमरः निर्व
र्त्यते उञ्छानाम्· प्रकीर्णोद्धृतधान्यानांषष्ठैः षष्ठभागैः पालकत्वाद्राजयाह्यैरङ्कितानि· सैकतानि· पुलिनानियेषां· तानितथोक्तानिवोयुष्माकं· तानितीर्थ
जलानिशिवानि· भद्राणिकच्चित्· अनुपप्लवानि किमित्यर्थः उञ्छोधान्यांशआदानंकणिशाद्यर्जनंशिलमितियादवः षष्ठाष्टमाभ्यां चेतिचशब्दात्षष्ठ

शब्दात् भागार्थे अन्वयः अतएवापूर्णार्थत्वात्पूरणगुणेत्यादिनानषष्ठीसमासप्रतिषेधः यद्वासञ्ज्ञाप्रमाणत्वादितिनिर्देशस्यसामान्यापेक्षत्वापकत्वात्पूरण
गुणेतिनिषेधोनित्यः सिकतायेषुसन्तीति सैकतानिसिकताशर्कराभ्याञ्चेत्यण्प्रत्ययः ८ नीवारेति कालेषुयोग्यकालेषुउपपन्नानाम् आगतानामति
थीनाम्कल्प्याभागायस्यतत्तथोक्तम् वनेभवंवन्यम् शरीरस्थितेर्जीवनस्यसाधनम् वोयुष्माकमपच्यतइतिपाकः फलंधान्यमितियावत् नीवारपाका
दि आदिशब्दाच्छ्यामाकादिधान्यसङ्ग्रहः जनपदेभ्यआगतैः जानपदैः तत आगतइत्यण् कडङ्करीयैः कडङ्करंबुसम् अर्हन्तीतिकडङ्करीयाः कडङ्करोबु
संक्लीवंधान्यत्वचिपुमांस्तुषइत्यमरः कडङ्करदक्षिणाच्छचेतिछः तैर्गोमहिष्यादिभिर्नामृष्यतेकिमितिनभक्ष्यतेकिमित्यर्थः ९ अपीति किञ्चत्वंप्रस

तान्युञ्छषष्ठांकितसैकतानिशिवानिवस्तीर्थजलानिकच्चित् ८ नीवारपाकादिकडंकरीयैर्नामृष्यतेजानपदैर्नकच्चित् कालो
पपन्नातिथिकल्प्यभागंवन्यंशरीरस्थितिसाधनंवः ९ अपिप्रसन्नेनमहर्षिणात्वंसम्यग्विनीयानुमतोगृहाय कालोह्ययं
संक्रमितुंद्वितीयंसर्वोपकारक्षममाश्रमंते १० तवार्हतोनाभिगमेनतृप्तंमनोनियोगक्रिययोत्सुकंमे॥ ११

न्नेनसतामहर्षिणासम्यग्विनीय· शिक्षयित्वा· विद्यामुपदिश्येत्यर्थः गृहाय· गृहस्थाश्रमंप्रवेष्टुम्· क्रियार्थोपपदेत्यादिनाचतुर्थी अनुमतोपि· अनु
ज्ञातः किम् हियस्मात्तेतवसर्वेषामाश्रमाणामपकारेक्षमम् शक्तम् क्षमंशक्तेहितेत्रिषित्यमरः द्वितीयमाश्रमंगार्हस्थ्यंसंक्रमितुमयंकालः विद्याग्रह
णानन्तर्यात्तस्येतिभावः कालसमयवेलासुतुमुनितितुमुन्प्रत्ययः सर्वोपकारक्षममित्यत्रमनुः यथामातरमाश्रित्यसर्वेजीवन्तिजन्तवः वर्तन्तेगृहिणस्त
द्वदाश्रित्येतरआश्रमाइति १० कुशलप्रश्नविधायागमनप्रश्नंचिकीर्षुराहतवेतिअर्हतः पूज्यस्यप्रशस्तस्य अर्हः प्रशंसायामितिशतृप्रत्ययः तवअभिगम
नेनागमनमात्रेण· मेमनोनतृप्तंनतुष्टं· किन्तुनियोगक्रियया· आज्ञाकरणेन· उत्सुकंसोत्कण्ठम् तत्परेप्रसितासक्ताविष्टार्थोद्युक्तउत्सुकइत्यमरः ॥ रघु·
४६

प्रसितोत्सुकाभ्यां तृतीया चेति सप्तम्यर्थे तृतीया शासितुर्गुरोराज्ञया पि आत्मना स्वतो वा प्रकृत्यादिभ्य उपसंख्यानमिति तृतीया मां सम्भावयितुं वनात्प्रा
प्तोसि गुर्वर्थं स्वार्थं वा आगमनमित्यर्थः ११ इतीति अर्घ्यपात्रेण मृण्मयमात्रेणानुमितो व्ययः सर्वस्वत्यागो यस्य तस्य रघोरित्युक्तप्रकाराम् उदाराम् औ
दार्य्ययुक्तामपि गाम् वाचम् मनो नियोगक्रिययोत्सुकं मे इत्येवं रूपाम् स्वर्गेषुपशुवाग्वज्रदिङ्नेत्रघृणिभूजले लक्ष्यदृष्ट्यां स्त्रियां पुंसि गौरित्यमरः निशम्य श्रुत्वा
वरतन्तुशिष्यः कौत्सः स्वार्थोपपत्तिं स्वकार्यसिद्धिम्प्रति दुर्बलाशः सन् मृण्मयपात्रदर्शनात् शिथिलमनोरथस्सन् तं रघुम् इति वक्ष्यमाणप्रकारेणावोच
त् १२ सर्वत्रेति हे राजन् त्वं सर्वत्र नोस्माकं वार्त्तं स्वास्थ्यम् अवेहि जानीहि वार्त्तं फल्गुन्यरोगे चेत्यमरः वार्त्तं पाटवमारोग्यं भव्यं स्वास्थ्यमनामयमिति यादवः न

अप्याज्ञया शासितुरात्मना वा प्राप्तोसि संभावयितुं वनान्माम् ११ इत्यर्घ्यपात्रानुमितव्ययस्य रघोरुदारामपि गां निशम्य स्वार्थो
पपत्तिं प्रतिदुर्बलाशस्तमित्यवोचद्वरतन्तुशिष्यः १२ सर्वत्र नो वार्त्तमवेहि राजन् नाथे कुतस्त्वय्यशुभं प्रजानां सूर्ये तपत्याव
रणाय दृष्टेः कल्पेत लोकस्य कथं तमिस्रा १३ भक्तिः प्रतीक्ष्येषु कुलोचिता ते पूर्वान्महाभाग तयातिशेषे॥ चैतदाश्चर्य्यमित्याह ना

थेति त्वयि नाथे ईश्वरे सति प्रजानामशुभं दुःखं कुतः तथाहि अर्थान्तरं न्यस्यति सूर्य्ये इत्यादिना सूर्ये तपति प्रकाशमाने सति तमिस्रा तमस्ततिः तमिस्रं ति
मिरं रोगे तमिस्रा तु तमस्ततौ कृष्णपक्षनिशायां चेति विश्वः तमिस्रमिति पाठे तमिस्रं तिमिरं तमः इत्यमरः लोकस्य जनस्य लोकस्तु भुवने जने इत्यमरः दृ
ष्टेरावरणाय कथं कल्पेत दृष्टिमावरितुं नालमित्यर्थः क्लृपेरलमर्थत्वात्तद्योगे नमः स्वस्तीत्यादिना चतुर्थी अलमिति पर्याप्त्यर्थग्रहणमिति भगवान्भा
ष्यकारः सम्पद्येत न कल्पेत इत्यर्थः क्लृपि सम्पद्यमाने चतुर्थी वक्तव्या १३ तवार्हत इत्यादिना यदुक्तं तन्न चित्रमित्याह भक्तिरिति प्रतीक्ष्येषु पूज्येषु पूज्यः प्र
तीक्ष्य इत्यमरः भक्तिरनुरागविशेषः ते तव कुलोचिता कुलाभ्यस्ता अभ्यस्ते तूचितं न्याय्यमिति यादवः हे महाभाग सार्वभौम तया भक्त्या पूर्वानतिशेषे

र॰टी॰ स॰५ ४७

अतिप्रवर्तसे किन्तुसर्वस्वत्यागार्त्तं चेत्तर्हि कथं खेदखिन्न इव दृश्यते अत आह व्यतीतेति अहं व्यतीतकालः अतिक्रान्तकालस्सन् अर्थिभावात्त्वामभ्युपेतं
इतिमेविषादः १४ शरीरेति हे नरेन्द्र तीर्थे सत्पात्रे प्रतिपादितात्मर्द्धिर्येन सतथोक्तः तीर्थं शास्त्राध्वरक्षेत्रोपायोपाध्यायमन्त्रिष्विति विश्वः योनोज
लावतारे च मन्त्र्याद्यष्टादशस्वपि पुण्यक्षेत्रे तथा पात्रे तीर्थं स्यादृर्शनेष्वपीति हलायुधः शरीरमात्रेण तिष्ठन् आरण्यका आरण्येभवा मनुष्या मुनिप्रमु
खाः अरण्यान्मनुष्य इति वुञ्प्रत्ययः तैरुपात्ता फलमेव प्रसूतिर्यस्य सः स्तम्बेन काण्डेनावशिष्टः प्रकृत्यादित्वात् तृतीया नीवार इव आभासि शोभसे १५ स्था
न इति भवान् एकनराधिपः सन्सार्वभौमः सन् मखजं यत्तज नविद्यते किञ्चन यस्येत्यकिञ्चनः मयूरव्यंसकादित्वान्निपातनात्तत्पुरुषः तस्य भावस्तात्वम्

व्यतीतकालस्त्वहमभ्युपेतस्त्वामर्थिभावादितिमेविषादः १४ शरीरमात्रेण नरेन्द्र तिष्ठन्नाभासि तीर्थप्रतिपादितर्द्धिः आ
रण्यकोपात्तफलप्रसूतिः स्तम्बेन नीवार इवावशिष्टः १५ स्थाने भवानेकनराधिपः सन्नकिंचनत्वं मखजं व्यनक्ति पर्याय
पीतस्य सुरैर्हिमांशोः कलाक्षयः श्लाघ्यतरो हि वृद्धेः १६ तदन्यतस्तावदनन्यकार्यो गुर्वर्थमाहर्तुमहं यतिष्ये स्वस्त्यस्तु ते नि
र्गलिताम्बुगर्भं शरद्घनं नार्दति चातकोऽपि १७॥ १९ निर्दैन्यत्वं व्यनक्ति प्रकटयति स्थाने युक्तम् युक्ते द्वे साम्प्रतं स्थाने इत्यमरः तथा
हि सुरैः पर्यायेण क्रमेण पीतस्य हिमांशोः कलाक्षयः वृद्धेः उपचयात् श्लाघ्यतरो हि वरः खलु मणिः शाणोल्लीढः समरविजयी हेतिदलितो मदक्षी
णो नागः शरदि सरितः श्यानपुलिनाः कलाशेषश्चन्द्रः सुरतमृदिता बालवनिता तनिम्ना शोभन्ते गलितविभवाश्चार्थिषु नृपा इति भावः अत्र कामन्द
कः धर्मार्थं क्षीणकोशस्य क्षीणत्वमपि शोभते सुरैः पीतावशेषस्य कृष्णपक्षे विधोरिव १६ तदिति तत्तस्मात्तावदनन्यकार्यः यावत्तावच्चसाकल्येऽवधौ ४०
मानेऽवधारणे प्रयोजनान्तररहितोऽहमन्यतो वदान्यान्तराद्गुर्वर्थं गुरुधनमाहर्तुम् अर्जयितुं यतिष्ये उद्योक्ष्ये ते तुभ्यम् स्वस्ति शुभमस्तु॥

नमस्त्वसीत्यादिनाचतुर्थी तथाहिचातकोपि धरणीपतितंतोयं चातकानांरुजाकरणमितिहेतोरनन्यगतिकोपीत्यर्थः निर्गलितः अम्बुएवगर्भो
यस्यतंशरद्घनं नार्द्दति नयाचते· अर्द्दगतौयाचनेचेतिधातुः याचनार्थमार्द्दनमितिपाद्रवः १७ एतावदिति एतावद्वाक्यमुक्त्वा·प्रतियातुंकामोयस्य
तंप्रति यातुकामं·गन्तुकामम् काममनसोरपीतिमकारलोपः महर्षेर्वरतन्तोः·शिष्यं·कौत्सं·नृपतिःरघुः निषिध्य निवार्य्य हेविद्वन्त्वयागुरवे·
प्रदेयंवस्तुकिं किमात्मकंकियत्·किम्परिमाणकम् इत्येवंतं·कौत्सम्·अन्वयुंक्त·अपृच्छत्प्रश्नोनुयोगःपृच्छाचेत्यमरः १८ ततइति ततोयथा
वत्·यथार्हम्·अर्हार्थवतिंविहिताध्वराय·विधिवदनुष्ठितयज्ञाय·सदाचारायेत्यर्थःस्मयावेशविवर्ज्जिताय·गर्वाभिनिवेशशून्याय अनुद्ध

एतावदुक्त्वाप्रतियातुकामंशिष्यंमहर्षेर्नृपतिर्निषिध्य किंवस्तुविद्वन्गुरवेप्रदेयंत्वयाकियद्वेतितमन्वयुंक्त १८ ततो
यथावद्विहिताध्वरायतस्मैस्मयावेशविवर्जिताय वर्णाश्रमाणांगुरवेसवर्णीविचक्षणःप्रस्तुतमाचचक्षे १९ समा
प्तविद्येनमयामहर्षिर्विज्ञापितोभूद्गुरुदक्षिणायै सर्मेचिरायास्खलितोपचारांतांभक्तिमेवागणयत्पुरस्तात् २० ॥

तायेत्यर्थःवर्णानांब्राह्मणादीनाम् आश्रमाणाम् ब्रह्मचार्य्यादीनांचतेषांगुरवे·नियामकाय·तेषांगुरुत्वंतद्धर्मप्रतिष्ठापकत्वंवर्णाःस्युर्ब्राह्म
णाद्यइत्यमरः ब्रह्मचारीगृहीवानप्रस्थोभिक्षुश्चतुष्टयआश्रमोस्त्रीत्यमरः सर्वकार्य्यनिर्वाहकायेत्यर्थः तस्मै·रघवे·विचक्षणः·कुशलःविद्वानः वर्णी·ब्रह्म
चारी वर्णिनोब्रह्मचारिणइत्यमरः वर्णीब्रह्मचारीतिणिनिप्रत्ययः सकौत्सः प्रस्तुतम् प्रकृतम् आचचक्षे १९ समाप्तविद्येनमया·महर्षिर्गुरुर्दक्षिणायै
दक्षिणास्वीकारार्थम्विज्ञापितोभूत्सगुरुः चिरायास्खलितोपचारांतां दुष्करामेभक्तिमेवपुरस्तात्·प्रथमम्·अगणयत्सङ्ख्यातवान् तेभक्त्यैवसन्तु
ष्टः किंदक्षिणयेत्युक्तवानित्यर्थः अथवाभक्तिमेवतांदक्षिणामगणयदितियोज्यम् २०

र०टी० ॥ ॐ ॥ निर्बन्धेति निर्बन्धेन प्रार्थनातिशयेन सञ्जातरुषा सञ्जातक्रोधेन गुरुणा अर्थकार्श्यम् दारिद्र्यं अचिन्तयित्वा अविचार्य अहं वित्तस्य धन
स०५ स्य चतस्रो दश कोटीश्चतुर्दशकोटीर्मम ह्यम् आहर आनयेति विद्यापरिसङ्ख्यया विद्यासङ्ख्यानुसारेणेत्युक्तः अत्र मनुः अङ्गानि वेदाश्चत्वारो मीमांसा
४८ न्यायविश्रुतः पुराणं धर्मशास्त्रं च विद्या ह्येताश्चतुर्दशेति २१ सोहमिति सोहं सपर्याविधिभाजनेन अर्घ्यपात्रेण भवन्तम् प्रभुशब्द एव शेषो यस्य तं म
त्वा निःस्वं निश्चित्येत्यर्थः श्रुतनिष्क्रयस्य विद्यामूल्यस्य अल्पेतरत्वात् अतिमहत्त्वात् सम्प्रति उपरोद्धुं निर्बन्धुं नाभ्युत्सहे २२ इत्थमिति द्विजराजकान्तिः
चन्द्रकान्तिः द्विजराजः शशधरो नक्षत्रेशः क्षपाकर इत्यमरः तस्मात्सोमो राजा नो ब्राह्मणानामिति श्रुतेः एनसो निवृत्तेन्द्रियवृत्तिर्यस्य सः जगदेकनाथो

निर्बंधसंजातरुषार्थकार्श्यमचिंतयित्वा गुरुणाहमुक्तः वित्तस्य विद्यापरिसंख्यया मे कोटीश्चतस्रो दश चाहरेति २१ सोऽहं
सपर्याविधिभाजनेन मत्वा भवंतं प्रभुशब्दशेषं अभ्युत्सहे संप्रति नोपरोद्धुमल्पेतरत्वाच्छ्रुतनिष्क्रयस्य २२ इत्थं द्विजेन द्वि
जराजकांतिरावेदितो वेदविदां वरेण एनोनिवृत्तेंद्रियवृत्तिरेनं जगाद भूयो जगदेकनाथः २३ गुर्वर्थमर्थी श्रुतपारदृश्वा रघोः
सकाशादनवाप्य कामं गतो वदान्यांतरमित्ययं मे माभूत्परीवादनवावतारः २४॥ (१) रघुः वेदविदां वरेण श्रेष्ठेन द्विजेन कौत्सेन इत्थ

मावेदितो निवेदितः सन् एनं कौत्सं भूयः पुनर्जगाद २३ गुर्वर्थमिति श्रुतस्य पारं दृष्टवान् श्रुतपारदृश्वा दृशेः क्वनिप्प्रत्ययः गुरवे अयं गुर्वर्थः गुरुदक्षि
णार्थं यथा तथा अर्थी याचकः विशेषणद्वयेनाप्यस्य प्रत्याख्येयत्वमाह रघोस्सकाशात्कामं मनोरथम् अनवाप्य अप्राप्य वदान्यान्तरं दात्रन्तरं ग ४८
तः स्युर्वदान्यस्थूललक्ष्यदानशौण्डा बहुप्रदे इत्यमरः इत्येवंरूपस्य परीवादस्य अपवादस्य नवः अयं प्रथमोऽवतारः आविर्भावो मे माभूत् मास्तु रघो
रिति स्वनामग्रहणं सम्भावितत्वद्योतनार्थम् तथा च सम्भावितस्य चाकीर्तिर्मरणादतिरिच्यत इति भावः २४ ॥ ॥ रामः ॥

सइति सत्वंमहिते· पूजिते· प्रशस्ते· प्रसिद्धेमदीयेग्न्यगारेत्रेताग्निशालायाम्· चतुर्थोऽग्निरिववसन् द्वित्राणि· द्वेत्रीणिवा अहानि· दिनानिसङ्ख्ययाव्ययासन्नाद
राधिकसङ्ख्यासङ्ख्येयइति बहुव्रीहिः बहुव्रीहौसङ्ख्येत्यादिनाऽच्प्रत्ययः समासान्तः सोढुम् अर्हसि हेअर्हन्· मान्य· त्वदर्थे· तवप्रयोजनम्· साधयितुम्· या
वद्यते· यतिष्ये यावत्पुरानिपातयोर्लडितिभविष्यदर्थेलट् २५ तथेति अग्रजन्मा· ब्राह्मणः प्रतीतः प्रीतस्सन्· तस्य· रघोः अवितथाम्· अमोघां· गिर
म्· प्रतिज्ञाम्· अथप्रतिज्ञाजिज्ञासासम्प्रदायस्तुसङ्गर इत्यमरः तां· गिरम्· इतिकेचित्पठन्ति तथेतिप्रत्यग्रहीत् रघुरपिगाम्· भूमिम्· आत्तसारां· गृहीत
धनाम्· अवेक्ष्य· कुवेरादर्थंनिष्क्रष्टुम् आहर्तुंचकमेइयेष २६ वसिष्ठेति वसिष्ठस्यमन्त्रेणायत् उक्षणम्· अभिमन्त्र्यप्रोक्षणं· तज्जातप्रभावात्· साम

सत्वंप्रशस्तेमहितेमदीयेवसंश्चतुर्थोग्निरिवाग्न्यगारे द्वित्राण्यहान्यर्हसिसोढुमर्हन्यावद्यतेसाधयितुंत्वदर्थं २५ त
थेतितस्यावितथांप्रतीतः प्रत्यग्रहीत्संगिरमग्रजन्मा गामात्तसारांरघुरप्यवेक्ष्यनिष्क्रष्टुमर्थंचकमेकुवेरात् २६ वसिष्ठ
मंत्रोक्षणजात्प्रभावादुदन्वदाकाशमहीधरेषु मरुत्सखस्येववलाहकस्यगतिर्विजघ्नेनहितद्रथस्य २७ अथाधिशिश्येप्र
यतः प्रदोषेरथंरघुःकल्पितशस्त्रगर्भं सामंतसंभावनयैवधीरः कैलासनाथंतरसाजिगीषुः २८॥ र्थ्याद्धेतोः उदन्वदाकाशमही

धरेषु उदन्वति उदधौवाकाशेमहीधरेषुवा मरुत्सखस्यमरुतः सखेतितत्पुरुषः बहुव्रीहौसमासान्ताभावात् ततोवायुसहायस्येतिलभ्यते वारिणांवाह
कोवलाहकः पृषोदरादित्वात्साधुः तस्येव· मेघस्येव· तद्रथस्यगतिः सञ्चारोनविजघ्नेनविहताहि २७ अथेति अथप्रदोषे रजनीमुखे तत्कालेया
त्राधिरोहणविधानात् प्रयतोधीरोरघुःसमन्ताद्भवः सामन्तो राजमंत्रमितिसम्भावनयैवकैलासनाथंकुवेरं तरसा बलेन जिगीषुः जेतुमिच्छुस्सन् क
ल्पितं· सज्जितम्· अस्त्रंगर्भेयस्यतंरथम् अधिशिश्येरथेशयितवानित्यर्थः अधिशीङ्स्थासांकर्मेतिकर्मत्वम् २८

Digitized by Sarayu Foundation Trust, Delhi and eGangotri

प्रातरिति प्रातः प्रयाणाभिमुखाय तस्मै रघवे कोशगृहे नियुक्ताः अधिकृताः भाण्डागारिकाः सविस्मयाः सन्तः कोशगृहस्य मध्ये नभस्तः पञ्चम्यास्तसिल् प्रत्ययः पतितां हिरण्मयीं सुवर्णमयीं दाण्डिनायनेत्यादिना निपातनात्साधुः वृष्टिं शशंसुः कथयामासुः २९ तमिति भूपतिः रघुः अभियास्यमानादभिगमिष्यमाणात् कुवेरात् लब्धं वज्रेण कुलिशेन भिन्नं सुमेरोः पादं प्रत्यन्तपर्वतम् इव स्थितम् पादाः प्रत्यन्तपर्वता इत्यमरः शृङ्गं सुमेरोरिति कचित्पाठः तं भासुरं भास्वरं भञ्जभासमिदो घुरच् प्रत्ययः हेमराशिं समस्तं कृत्स्नमेव कौत्साय दिदेश दत्तौ चतुर्दशकोटिमात्रमित्येवकारार्थः ३० जनस्येति तावर्थिदातारौ द्वावपि साकेतनिवासिनः अयोध्यानिवासिनः साकेतं स्यादयोध्यायां कोशलानन्दिनी च सेति यादवः जनस्याभिनन्द्यसत्वौ स्तुतव्यवसा

प्रातः प्रयाणाभिमुखाय तस्मै सविस्मयाः कोशगृहे नियुक्ताः हिरण्मयीं कोशगृहस्य मध्ये वृष्टिं शशंसुः पतितां नभस्तः २९
तं भूपतिर्भासुरहेमराशिं लब्धं कुवेरादभियास्यमानात् दिदेश कौत्साय समस्तमेव शृंगं सुमेरोरिव वज्रभिन्नम् ३० जनस्य
साकेतनिवासिनस्तौ द्वावप्यभूतामभिनंद्यसत्वौ गुरुप्रदेयाधिकनिस्पृहोऽर्थी नृपोऽर्थिकामादधिकप्रदश्च ३१ अथोष्ट्रवा
मीशतवाहितार्थं प्रजेश्वरं प्रीतमना महर्षिः स्पृशन्करेणानतपूर्वकायं संप्रस्थितो वाचमुवाच कौत्सः ३२ ॥ ((यावभूताम् द्रव्येषु

व्यवसायेसु सत्वमस्त्री तु जन्तुष्वित्यमरः कौ द्वौ गुरुप्रदेयादधिकेऽतिरिक्तद्रव्ये निस्पृहोऽर्थी अर्थिकामात् अर्थिनो मनोरथादधिकम् प्रददातीति तथोक्तः प्रेदाज्ञ इति कप्रत्ययः नृपश्च ३१ अथेति अथ प्रीतमना महर्षिः कौत्सः संप्रस्थितः प्रस्थास्यमानस्तत् आशंसायाम्भूतवच्चेति भविष्यदर्थे क्तः उष्ट्राणां क्रमेलकानां वामीनां वडवानाम् शतैर्वाहितार्थं प्रापितधनम् आनतपूर्वकायम् विनयनम्रमित्यर्थः प्रजेश्वरं रघुं करेण स्पृशन् वाचमुवाच एमः ५९

किमिति वृत्ते स्थितस्य न्यायेनार्जनमर्थस्य वर्द्धनं पालनं तथा सत्पात्रे प्रतिपत्तिश्च राजावृत्तं चतुर्विधमिति कामन्दकः तस्मिन्वृत्ते स्थितस्य प्रजानामधिपतेः नृपस्य भूः कामान्सूते इति काम सूर्यदि सन्सूहिषदुहेत्यादिना क्विप् अत्र कामप्रसवने किं चित्रमित्यर्थः किन्तु तव प्रभावो महिमा त्वचिन्तनीयः येन त्वया द्यौ रपि मनीषितम् अभिलषितम् दुग्धा दुहेर्द्विकर्मकत्वादप्रधाने कर्मणि क्तः प्रधानेकर्मण्याख्याये ण्यादीनाहुर्द्विकर्मकान् अप्रधाने दुहादीनां ण्यन्ते कर्तुश्च कर्मण इति स्मरणात् ३३ आशास्यमिति सर्वाणि श्रेयांसि हिरण्यानि अधिजग्मुषः प्राप्तवतः तेतव अन्यत्पुत्रातिरिक्तम् आशास्यम् आशीः साध्यम् आशंसनीयमाशास्यम् पुनरुक्तभूतं सर्वं सिद्धमित्यर्थः किं तु ईड्यं स्तुत्यम भवन्तम् भवतः पितेवात्मगुणानुरूपं त्वत्तुल्यगुणमित्यर्थः पुत्रं लभस्व प्राप्नुहि ३४ इत्थमिति

किं मत्र चित्रं यदि कामसूर्भूर्वृत्ते स्थितस्याऽधिपतेः प्रजानां अचिंतनीयस्तु तव प्रभावो मनीषितं द्यौरपि येन दुग्धा ३३ आशास्यमन्यत्पुनरुक्तभूतं श्रेयांसि सर्वाण्यधिजग्मुषस्ते पुत्रं लभस्वात्मगुणानुरूपं भवंतमीड्यं भवतः पितेव ३४ इत्थं प्रयुज्याशिषमग्रजन्मा राज्ञे प्रतीयाय गुरोः सकाशं राजापि लेभे सुतमाशु तस्मादालोकमर्कादिव जीवलोकः ३५ ब्राह्मे मुहूर्ते किल तस्य देवी कुमारकल्पं सुषुवे कुमारं अतः पिता ब्रह्मण एव नाम्ना तमात्मजन्मानमजं चकार ३६॥

९ अग्रजन्मा ब्राह्मणः अग्रजन्मा द्विजे श्रेष्ठे भ्रातरि ब्रह्मणि स्मृत इति विश्वः इत्थं राज्ञे आशिषम्प्रयुज्य दत्वा गुरोः सकाशं समीपम् प्रतीयाय प्राप राजापि जीवलोकः जीवसमूहः जीवः प्राणिनि गीःपताविति विश्वः अर्कादालोकम् प्रकाशमिव चैतन्यमिति पाठे ज्ञानमिव तस्मात् कौत्सवाक्यादाशु सुतं लेभे प्राप ३५ ब्राह्मे इति तस्य रघोर्देवी महिषी ब्राह्मे तस्येदमित्यण् ब्रह्मदेवताके अभिजिन्नामके मुहूर्ते किल ईषदसमाप्तं कुमारं कुमारकल्पं स्कन्दसदृशम् ईषदसमाप्तौ विभाषेति कल्पप्प्रत्ययः कुमारम्पुत्रं सुषुवे कुमारो बालके स्कन्दे इति विश्वः अतो ब्राह्ममुहूर्तोत्पन्नत्वात्पिता रघुः ब्रह्मणो विधेरेव नाम्ना तम् आत्मजन्मा

पुत्रम् अजनामकं चकार अजो हरौ हरे कामे विधौ छागे रघोः सुते इति विश्वः ३६ रूपमिति ओजस्वि तेजस्वि ओजस्तेजसि धातूनामवष्टम्भप्रकाशयोः
ओजो बले चदीप्तौ चेति विश्वः रूपम्वपुः अथरूपं नपुंसकं स्वभावाकृतिसौन्दर्यवपुषि श्लोकशब्दयोरिति विश्वः तदेव पैतृकमेव वीर्यं शौर्यं तदेव नैस
र्गिकं स्वाभाविकम् उन्नतत्वं तदेव नातिरेकेत्यर्थः कुमारो बालकः प्रवर्तितः उत्पादितो दीपः प्रदीपात् स्वोत्पादकदीपादिवस्वात् स्वकीयात् पूर्वादिभ्यो न
वभ्यो वेति स्माद्भावो वैकल्पिकः कारणात् जनकात् न विभिदे भिन्नो नाभूत् सर्वात्मना तादृश एवाभूदित्यर्थः ३७ उपात्तेति गुरुभ्यो विधिवद्यथा
शास्त्रम् उपात्तविद्यं लब्धविद्यं यौवनस्य उद्भेदादाविर्भावाद्धेतोः विशेषेण कान्तं सौम्यं तम् अजम् प्रतिसाभिलाषापि श्रीः धीरा धीरोन्नतचित्ता

रूपं तदोजस्वि तदेव वीर्यं तदेव नैसर्गिकमुन्नतत्वं न कारणात्स्वाद्बिभिदे कुमारः प्रवर्तितो दीप इव प्रदीपात् ३७ उपात्तवि
द्यं विधिवद्गुरुभ्यस्तं यौवनोद्भेदविशेषकान्तं श्रीः साभिलाषापि गुरोरनुज्ञां धीरेव कन्या पितुराचकाङ्क्ष ३८ अथेश्वरेण क्रथकै
शिकानां स्वयंवरार्थं स्वसुरिन्दुमत्याः आप्तः कुमारानयनोत्सुकेन भोजेन दूतो रघवे विसृष्टः ३९ तं श्लाघ्यसंबंधमसौ विचिं
त्य दारक्रियायोग्यदशं च पुत्रं॥ ॥ ९ स्थिरचित्तोन्नतिर्यानुतद्धैर्यमिति सञ्चितमिति भूपालः कन्यापितुरिव गुरो रघोरनुज्ञामा
चकाङ्क्ष इयेष यौवराज्यार्होऽभूदित्यर्थः अनुज्ञाशब्दात् पितृपारतन्त्र्यमुपमासामर्थ्यात् पाणिग्रहणे योग्यता च ध्वन्यते ३८ अथेति अथ स्वसुः भ
गिन्याः इन्दुमत्याः स्वयम्वरार्थं कुमारस्याजस्यानयने उत्सुकेन क्रथकैशिकानां विदर्भदेशानामीश्वरेण स्वामिना भोजेन राज्ञा आप्तो हितो
दूतो रघवे विसृष्टः प्रेषितः क्रियामात्रयोगेपि चतुर्थी आप्तग्रहणमत्रैव तात्पर्यमिति द्योतनार्थम् ३९ तमिति असौ रघुः तम् भोजं श्लाघ्यसम्बंधम् अनू
चानत्वादिगुणयोगात्स्पृहणीयसम्बन्धम् विचिन्त्य विचार्य पुत्रं च दारक्रियायोग्यदशम् विवाहयोग्यवयसं सञ्चिन्त्य ससैन्यमेनम् पुत्रम् ऋद्धां

समृद्धाम्· विदर्भाधिपस्य· भोजस्य· राजधानीम्· पुरीम्प्रति प्रस्थापयामास· धीयतेऽस्यामिति धानी करणाधिकरणयोश्चेत्यधिकरणे ल्युट् प्रत्ययः राज्ञां
धानीति विग्रहः ४० तस्येति उपकार्यासु राजयोग्येषु पटभवनादिषु· सौधोऽस्त्री राजसदनमुपकार्योपकारिके त्यमरः वचनव्याख्याने क्षीरस्वामी· उप
क्रियते उपकरोति च पटमण्डपादिराजसदनमिति रचिता उपचाराः शयनादयो येषु तेन तथोक्ताः जानपदानां जनपदेभ्य आगतानां· उपदाभिः उपायनैः
वन्याः वने भवाः इतरे येषां ते वन्येतराः अवन्याः इत्यर्थः नव्बहुव्रीहाविति सर्वनामसंज्ञानिषेधः तत्पुरुषे सर्वनामसंज्ञा दुर्वारैव तस्य मनुजेन्द्रसूनोः अजस्य
मार्गे निवासा वासनिकाः उद्यानान्याक्रीडाः पुमानाक्रीड उद्यानमित्यमरः तान्येव विहाराः विहारस्थानानि तत्कल्पाः तत्सदृशा इत्यर्थः ईषदसमाप्ताविति क

प्रस्थापयामास ससैन्यमेनमृद्धां विदर्भाधिपराजधानीं ४० तस्योपकार्यारचितोपचारा वन्येतरा जानपदोपदाभिः मार्गे नि
वासा मनुजेन्द्रसूनोर्बभूवुरुद्यानविहारकल्पाः ४१ स नर्मदारोधसि शीकरार्द्रैर्मरुद्भिरानर्तितनक्तमाले निवेशयामास विलं
घिताध्वा क्लान्तं रजोधूसरकेतु सैन्यं ४२ अथोपरिष्टाद्भ्रमरैर्भ्रमद्भिः प्राक्सूचितान्तःसलिलप्रवेशः॥ ९ल्पप्प्रत्ययः बभूवुः ४१ स इति

विलङ्घिताध्वा अतिक्रान्तमार्गः सोऽजः शीकरार्द्रैः शीतलैरित्यर्थः मरुद्भिर्वातैः आनर्तिताः कम्पिताः नक्तमाला यस्मिन् तस्मिन् निवेशार्हे इत्यर्थः चिरवि
ल्वाख्यवृक्षभेदाः चिरविल्वो नक्तमालः करञ्जश्च करञ्जके इत्यमरः नर्मदाया रोधसि रोधायां तीरे क्लान्तं श्रान्तं रजोभिः धूसराः केतवो ध्वजा यस्य तत्सै
न्यं निवेशयामास ४२ अथेति अथ उपरिष्टादूर्ध्वम् उपर्युपरिष्टादिति निपातः भ्रमद्भिर्मदलोभादिति भावः भ्रमरैः प्राग्गन्मज्जनात्पूर्वं सूचितो ज्ञापितो
ऽन्तः सलिले प्रवेशो यस्य स तथोक्तः निर्धौतदाने क्षालितमदे अत एवामलगण्डभित्ती यस्य स तथोक्तः दानं गजमदे त्यागे इति शाश्वतः निर्धौतदानात्सोऽम
लगण्डभित्तिश्च प्रशस्तो गण्डो गण्डभित्ती प्रशंसावचनैश्चेति समासः भित्तिशब्दः प्रशस्तार्थः तथा च गणरत्नमहोदधौ· मतल्लिकोद्धमिश्रास्सुः प्रका

Digitized by Sarayu Foundation Trust, Delhi and eGangotri

र॰टी॰ एडस्थलभित्तयः इतिभित्तिप्रदेशोवाभित्तिः प्रदेशकुड्यमित्तिरितिविश्वः निर्धौतदानेनामलगण्डभित्तिर्यस्येतिवावन्योगजः सरित्तो नर्मदायाः सकाशात्
स॰५ पञ्चम्यास्तसिल्प्रत्ययः उन्ममज्ज उत्थितः ४३ निश्शोषेति किंलक्षणोगजः निश्शेषंविक्षालितधातुनापि धौतगैरिकादिनापि नीलाभिः ऊर्ध्वाभिःरेखा
५१ भिः तटाभिघातजनिता भिः शैवलेन कर्बुरेणचित्रंकिर्मीरकल्माषशबलैताश्चकर्बुरइत्यमरः अश्मभिः पाषाणैः विकुण्ठीकृतेन दन्तद्वयेन मांसला
न्नामकश्चितत्रयः पर्वतः तस्यतटेषु वप्रक्रियामवप्रक्रीडाम् उत्खातकेलिमित्यर्थः उत्खातकेलिः शृङ्गाद्यैर्वप्रक्रीडानिगद्यतेइतिशब्दार्णवः शंसन् क
थयन् सूचयन्नित्यर्थः युग्मम् ४४ संहारेति संहारविक्षेपयोः संकोचनप्रसारणयोः लघुक्रियेण क्षिप्रव्यापारेण लघुक्षिप्रमरंद्रुतमित्यमरः हस्तेन शुण्डा

निर्धौतदानामलगंडभित्तिर्वन्यः सरित्तोगजउन्ममज्ज ४३ निःशेषविक्षालितधातुनापिवप्रक्रियामृक्षवतस्तटेषुनीलोर्ध्वरेखाङ्क
शैवलेनशंसन् दंतद्वयेनाश्मविकुंठितेन ४४ संहारविक्षेपलघुक्रियेणहस्तेनतीराभिमुखः सशब्दं बभौसभिंदन्बृहत
स्तरंगान्वार्यर्गलाभंगइवप्रवृत्तः ४५ शैलोपमः शैवलमञ्जरीणांजालानिकर्षन्नुरसासपश्चात् पूर्वंतदुत्पीडितवारिराशिः
सरित्प्रवाहस्तटमुत्ससर्प ४६ तस्यैकनागस्यकपोलभित्त्योर्जलावगाहक्षणमात्रशान्ता वन्येतरानेकपदर्शनेनपुनर्दिदीपेम

दण्डेनहस्तोनक्षत्रभेदेस्यात्करेभकरयोरपीतिविश्वः सशब्दं सघोषं बृहतस्तरंगान्भिन्दन् विदारयन् तीराभिमुखः सगजवारीगजबन्धनस्थानम् वा
रीतुगजबन्धिनीतियादवः वार्याः अर्गलायाः विष्कम्भस्यभङ्गे भञ्जने प्रवृत्तइवबभौ ४५ शैलेति शैलोपमः सगजः शैवलमञ्जरीणांजालानि वृन्दानित
रसाकर्षन् पश्चात् तटमुत्ससर्प पूर्वन्तेन गजेन उत्पीडितोनुन्नो वारिराशिर्यस्यसः सरित्प्रवाहस्तटमुत्ससर्प ४६ तस्येति तस्यैकनागस्यैकाकिनोगजं ५१
स्यकपोलभित्त्योर्जलावगाहेनक्षणमात्रेणशान्तानिवृत्तामदद्युर्दिनश्रीः मदवर्षलक्ष्मीः वन्येतराणाम् ग्राम्याणाम् अनेकपानांद्विपानां दर्शनेन पुनर्दिदीपे

सप्तच्छदेति सप्तच्छदस्य वृक्षविशेषस्य क्षीरवत्कटुः सुरभिः प्रवाहः प्रसारो यस्य तम् कटुतिक्तकषायास्तु सौरभ्येपि प्रकीर्तिता इति यादवः असह्यं तदीयं मदमा
घ्राय सेनागजेन्द्राः विलङ्घिताः तिरस्कृतः आधोरणानां हस्तिपकानां नीत्रो महान् प्रयत्नो येस्ते तथोक्ताः सन्तः आधोरणा हस्तिपका हस्त्यारोहा निषादिन इत्यमरः
विमुखाः पराङ्मुखाः बभूवुः ४८ सइति स गजः छिन्नाः बन्धाः येस्ते छिन्नबन्धाः अतएव द्रुताः पलायिताः युगं वहन्तीति युग्याः वाहाः यस्मिन्स सचासौ शून्य
श्चेतं भग्नाः अक्षाः रथावयवा दारुविशेषाः अक्षो रथस्यावयवे पाशकेप्यक्षमिन्द्रियमिति शाश्वतः भग्नाक्षा अतएव पर्यस्ताः पतिताः रथाः यस्मिन्तम् रामा
णां स्त्रीणाम् परित्राणे संरक्षणे विहस्ताः व्याकुलाः विहस्तव्याकुलौ समौ विस्मयः योधा यस्मिन्तं सेनानिवेशं शिबिरं क्षणेन तुमुलं सङ्कुलं चकार ४९ ॥

सप्तच्छदक्षीरकटुप्रवाहमसह्यमाघ्राय मदं तदीयं विलंघिताधोरणतीव्रयत्नाः सेनागजेंद्रा विमुखा बभूवुः ४८ सच्छि
न्नबंधद्रुतयुग्यशून्यं भग्नाक्षपर्यस्तरथं क्षणेन रामापरित्राणविहस्तयोधं सेनानिवेशं तुमुलं चकार ४९ तमापतंतं नृप
तेरवध्यो वन्यः करीति श्रुतवान्कुमारः निवर्तयिष्यन्विशिखेन कुंभे जघान नात्यायतकृष्टचापः ५० स विद्धमात्रः किल
नागरूपमुत्सृज्य तद्विस्मितसैन्यदृष्टः स्फुरत्प्रभामंडलमध्यवर्ति कांतं वपुर्व्योमचरं प्रपेदे ५१॥ ९९ तमिति नृपतेः राज्ञः वन्यः करी अ

वध्य इति श्रुतवान् शास्त्राज्ज्ञातवान् कुमारः आपतन्तम् अभिधावन्तं गजं निवर्तयिष्यन् नतु प्रहरिष्यन् अतएव नात्यायतमनतिदीर्घमेनन्नर्थस्य | यथास्यात २
नञ्शब्दस्य सुप्सुपेति समासः कृष्टशार्ङ्गः ईषदाकृष्टचापस्सन् विशिखेन बाणेन कुम्भे जघान अत्र चाक्षुषः लक्ष्मीकामो युद्धादन्यत्र करिवधं न कुर्यात्
इयं हि श्रीर्यैकारिण इति अतएव युद्धादन्यत्र द्योतनार्थमेव वन्यग्रहणं कृतम् ५० सइति स गजो विद्धमात्रः ताडितमात्रः किल न तु प्रहृतः तथापि ना | ५
गरूपं गजशरीरमुत्सृज्य तेन वृत्तान्तेन विस्मितैः तद्विस्मितैः सैन्यैः दृष्टस्सन् स्फुरतः प्रभामण्डलस्य मध्यवर्ति कान्तं मनोहरं व्योमचरम् वपुः प्रपेदे प्राप

Digitized by Sarayu Foundation Trust, Delhi and eGangotri

अथेति अथप्रभावोपनतैः प्राप्तैः कल्पद्रुमोत्थैः कल्पवृक्षोत्पन्नैः पुष्पैः कुमारम् अजम् अवकीर्य अभिवृष्य दशनप्रभाभिः दन्तकान्तिभिः सम्वर्द्धिताउरस्थ लेयेतारहाराः स्थूलमुक्ताहारास्तेयेनसतथोक्तः वाचोऽस्यसन्तीतिवा ग्मी· वक्तावाचोग्मिनिरितिग्मिनिप्रत्ययः सपुरुषउवाच ५२ मतङ्गेति अवलेपमूला त् गर्वहेतुकात् अवलेपस्तुगर्वेस्यात्लेपनेदूषणेपिचेतिविश्वः मतङ्गस्यमुनेः शापात् मतङ्गजत्वंप्राप्तवानस्मिमांप्रियदर्शनस्यप्रियदर्शनाख्यस्यगंध र्वपतेः गन्धर्वराजस्यतनूजमस्त्रियांमूर्तिस्तनुस्तनूरित्यमरः तन्वावेतिकेचित्स्मूङ्पुत्रंप्रियंवदं· प्रियंवदाख्यम् अवेहिजानीहि प्रियंवदतीतिप्रियम्वदः

अथप्रभावोपनतैः कुमारं कल्पद्रुमोत्थैरवकीर्यपुष्पैः । उवाचवाग्मीदशनप्रभाभिः संवर्द्धितोरस्थलतारहारः ५२ मतंग शापादवलेपमूलादवाप्तवानस्मिमतंगजत्वं । अवेहिगंधर्वपतेस्तनूजंप्रियंवदंमांप्रियदर्शनस्य ५३ सचानुनीतः प्रणते नपश्चान्मयामहर्षिर्मृदुतामगच्छत् । उष्णत्वमग्न्यातपसंप्रयोगाच्छैत्यंहियत्साप्रकृतिर्जलस्य ५४ इक्ष्वाकुवंशप्रभवोयदा तेभेत्स्यत्यजः कुंभमयोमुखेन । संयोक्ष्यसेस्वेनवपुर्महिम्नातदेत्यवोचत्सतपोनिधिर्माम् ५५ संमोचितः सत्ववतात्वया हंशापाच्चिरप्रार्थितदर्शनेन । प्रतिप्रियंचेद्भवतोनकुर्यांवृथाहिमेस्यात्स्वपदोपलब्धिः ५६। प्रियवशेवदः खजितिखच्प्रत्ययः ५३सइति

समहर्षिः प्रणतेनमया अनुनीतः सन्पश्चान्मृदुतां शान्तिम् अगच्छत् तथाहि जलस्यउष्णत्वम्· अग्नेः आतपस्यवासम्प्रयोगात्· सम्पर्कात्· ननुप्र

रघु॰ कृत्यायत् शैत्यंसाप्रकृतिः स्वभावः विधेयप्राधान्यात् सेतिस्त्रीलिङ्गनिर्देशः महर्षीणांशान्तिरेवस्वभावोनक्रोधइत्यर्थः ५४ इक्ष्वाकिति इक्ष्वाकुवं ५२

शः प्रभवोयस्यसः अजोयदातेकुम्भमयोमुखेन लोहाग्रेणशरेणभेत्स्यति विदारयिष्यति तदास्वेनवपुषामहिम्ना पुनः संयोक्ष्यसेइतिसतपोनिधिर्माम्

अवोचत् ५५ संमोचितइति चिरंप्रार्थितंदर्शनंयस्यतेनसत्ववता· वलवता· त्वया· अहंशापात्संमोचितः मोक्षंप्रापितः भवतः प्रतिप्रियं प्रत्युपकारं

कुर्यां चेत् मेस्वपदोपलब्धिः स्वस्थानप्राप्तिः पदम्त्यवसितत्राणस्थानलक्ष्मांघ्रिवस्तुषु इत्यमरः वृथा स्याद्धि तदुक्तं प्रतिकर्तुमशक्यस्य जीवितान्मरणं
वरमिति ५६ सम्मोहनमिति हे सखे सखित्वेन समभ्यर्थितो मया यथाक्रमम् संगागासहनोबन्धुः सदैवानुमतः सुहृत् एकक्रियो भवेन्मित्रं समप्रा
णः सखा भवेदिति प्रयोगसंहारयोर्विभक्तमन्त्रं गांधर्वं गन्धर्वदैवताकं संमोह्यते ऽनेनेति संमोहनं नामास्त्रम् आधत्स्व गृहाण यतोऽस्त्रात् प्रयोक्तु
रस्त्रप्रयोगिणोऽरिहिंसा न च विजयश्च हस्ते हस्तगतो विजयो भवतीत्यर्थः ५७ वधलज्जितः कथमस्त्रग्रहणं परस्मादिति चेत्तत्राह अलमिति किं त्वं मां
प्रतिहृिया प्रहारनिमित्तया अलंकृतः यद्यतो हेतोः त्वम् मां प्रहरन्नपि मुहूर्तं दयापरः कृपालुरभूः तस्मादुपच्छन्दयति प्रार्थयमाने मयि त्वया प्रति

संमोहनं नाम सखे ममास्त्रं प्रयोगसंहारविभक्तमंत्रम् गांधर्वमाधत्स्व यतः प्रयोक्तुर्न चारिहिंसा विजयश्च हस्ते ५७ अलं
ह्रियामां प्रति यन्मुहूर्तं दयापरोऽभूः प्रहरन्नपि त्वं तस्मादुपच्छन्दयति प्रयोज्यं मयि त्वया न प्रतिषेधरौक्ष्यं ५८ तथेत्यु
पस्पृश्य पयः पवित्रं सोमोद्भवायाः सरितो नृसोमः उदङ्मुखः सोऽस्त्रविदस्त्रमंत्रं जग्राह तस्मान्निगृहीतशापात् ५९ एवं
तयोरध्वनि दैवयोगादासेदुषोः सख्यमचिन्त्यहेतु ॥ ९ बंधपरिहारः स एव रौक्ष्यम् पारुष्यम् तन्न प्रयोज्यं न कर्त्तव्यम् ५८ तथे
ति नासोम श्चन्द्र इव इति नृसोमः सोम औषधिचन्द्रयोरिति शाश्वतः पुरुषश्रेष्ठ इत्यर्थः उपमितसमासः अस्त्रविद् अस्त्रज्ञः सोऽजस्सोमोद्भवा
द्भवोपस्याः तस्याः सोमोद्भवायाः सरितो नर्मदायाः रेवा तु नर्मदा सोमोद्भवा मेकलकन्यके त्यमरः पवित्रं पयः उपस्पृश्य पीत्वा आचम्येत्यर्थः
उदङ्मुखस्सन् निगृहीतशापात् निवर्तितशापात् उपकर्तादित्यर्थः तस्मात् प्रियम्वदादस्त्रमन्त्रं जग्राह ५९ एवमिति एवम ध्वनि मार्गे दैवयोगाद्दैवव
शाद् अचिन्त्यहेतुं अनिर्धार्यहेतुकं सख्यं सखित्वम सख्युर्य इति यप्रत्ययः आसेदुषोः प्राप्तवतोः तयोर्मध्ये एको गन्धर्वः चैत्ररथस्य कुबेरोद्यानस्य प्रदे

अस्योद्यानं चैत्ररथमित्यमरः अपरोऽजः सौराज्येन राजन्यतया रम्यान्विदर्भदेशान् ययौ ६० तमिति नगरस्योपकंठे समीपे तस्थिवांसं स्थितमतम् अजम्
मतस्याऽजस्यागमेन आरूढ उत्पन्नो गुरुः प्रहर्षो यस्य सः क्रथकैशिकेन्द्रः विदर्भराजः प्रवृद्धोर्मिः ऊर्मिमाली समुद्रः चन्द्रमिव प्रत्युज्जगाम ६१ प्रवेश्येति ए
नमजमः अग्रयायी सेवाधर्मेण पुरोगच्छन्नित्यर्थः नीचैर्नम्रः पुरं प्रवेश्य प्रवेशं कारयित्वा प्रीत्या अर्पितश्रीः तथा तेन प्रकारेण उपाचरत् उपाचरितवान्
यथा येन प्रकारेण तत्र पुरे समेतो मिलितो जनो वैदर्भं भोजम् आगन्तुम् आध्वनिकं मेने अजं गृहेशं गृहपतिं मेने ६२ तस्येति रघुप्रतिनिधिः रघुकल्पः र
घुतुल्य इत्यर्थः उक्तं च दंडिना सादृश्यवाचकप्रस्तावे कल्पदेश्यदेशीयादिप्रख्यप्रतिनिधी अपीति सोऽजः प्रणतैर्नमस्कृतवद्भिः कर्तरि क्तः तस्य भोजस्य

एकौ ययौ चैत्ररथप्रदेशान् सौराज्यरम्यानपरो विदर्भान् ६० तं तस्थिवांसं नगरोपकंठे तदागमारूढगुरुप्रहर्षः प्रत्यु
ज्जगाम क्रथकैशिकेंद्रश्चंद्रं प्रवृद्धोर्मिरिवोर्मिमाली ६१ प्रवेश्य चैनं पुरमग्रयायी नीचैस्तथोपाचरदर्पितश्रीः मेने यथा
तत्र जनः समेतो वैदर्भमागंतुमजं गृहेशं ६२ तस्याधिकारिपुरुषैः प्रणतैः प्रदिष्टां प्राग्द्वारवेदिविनिवेशितहेमकुंभां र
म्यां रघुप्रतिनिधिः स नवोपकार्यां बाल्यात्परामिव दशां मदनोऽध्युवास ६३॥ ९ अधिकारो नियोगः तस्य पुरुषैरधिकृतैरित्यर्थः

प्रदिष्टां निर्दिष्टां प्राग्द्वारस्य वेद्यां विनिवेशितः प्रतिष्ठापितः पूर्णकुम्भो यस्यास्तां स्थापितमङ्गलकलशामित्यर्थः रम्यां रमणीयां नवोपकार्याम्
नूतनं राजभवनं उपकार्या राजसद्मन्युपकारचितेऽप्यवदिति विश्वः मदनो बाल्यात्परां शैशवादनन्तरां दशामिव यौवनमिवेत्यर्थः अध्युवास ५३
अधिष्ठितवान् तत्रोषितवानित्यर्थः उपान्वध्याङ्वस इति कर्मत्वम् ६३॥ रामचन्द्राय नमो नमः॥ छ छ छ छ ॥ ॥

Digitized by Sarayu Foundation Trust, Delhi and eGangotri

तत्रेति तत्रोपकार्यायां स्वयम्वरनिमित्तं समाहृतः संमेलितो राजलोको येन तत्र कमनीयं स्पृहणीयं कन्याललाम कन्यासु श्रेष्ठम् ललामोस्त्री ललामा
पि प्रभावे पुरुषे ध्वजे श्रेष्ठ भूषा पुंज शृङ्ग पुच्छ चिन्हाश्व लिंगिषु इति पादवः लिप्सोर्लब्धुमिच्छोः लभेस्सन्नन्तादु प्रत्ययः अजस्य भावाववोधैः पुरुष
स्याभिप्रायपरिज्ञाने कलुषा असमर्थादपि तेवा रात्रौ निद्रा चिरेण नयनाभिमुखी वभूव राजा नं कामिनं चौरं प्रविशन्ति प्रजागराइति भावः अभिमुखी शब्दोजीव
न्तश्श्रन्तोवा तस्येत्यारभ्य भवति विरले त्यन्तं वसन्ततिलकाछन्दः तल्लक्षणम् उक्ता वसन्ततिलका तभजाजगौगः इति ६४ तमिति कर्णभूषणाभ्यां निपीम
डितौ पीवरौ पीनावंसौ यस्य तं शय्याया उत्तरच्छदस्योपर्यास्तरणवस्त्रस्य विमर्देन घर्षणेन कृशो विरलोऽङ्गरागो यस्य तम् नत्वङ्ग नासंगादिति भावः

तत्र स्वयंवरसमाहृतराजलोकं कन्याललामं कमनीयमजस्य लिप्सोः भावाववोधकलुषा दयितेव रात्रौ निद्रा चिरेण।
नयनाभिमुखी वभूव ६४ तं कर्णभूषणनिपीडितपीवरांसं शय्योत्तरच्छदविमर्दकृशाङ्गरागं वैतालिकाललितवंध
मनोहराभिः प्रावोधयन्नुषसि वाग्भिरुदारवाचः ६५ रात्रिर्गता मतिमतां वर मुंच शय्यां धात्रा द्विधैव ननु धूर्जगतो विभक्ता
यामेक तस्तव विभर्ति गुरुर्विनिद्रस्तस्या भवानपर धूर्यपदावलंवी ६६॥ ९ प्रथितवोधं प्रकृष्टज्ञानं तमेनमजं सवयः समानवय
स्का उदारवाचः प्रगल्भगिरः सूतात्मजाः वन्दिपुत्राः वैतालिका इतिवा पाठः वैतालिका वोधकरा इत्यमरः सुंदरप्रवन्धरचनया मनोहराभिः वाग्भिः सु
तिपाठैः उषसि प्रावोधयन् प्रवोधयामासुः ६५ रात्रिरिति हे मतिमतां वर निर्द्धारणे षष्ठी रात्रिर्गता शय्यां मुञ्च विनिद्रो भवेत्यर्थः विनिद्रत्वे फलमाह धा
त्रेति धात्रा ब्रह्मणा जगतो धूर्भारः धूस्स्यादानमुखे भार इति यादवः द्विधैव द्वयोरेवेत्यर्थः एवकारस्तृतीयाद्यंशनिषेधार्थः विभक्ता ननु विभज्य स्थापिता ख
लु तत्किमत आह यां धुरम् एकत एककोटौ तव गुरुः पिता विनिद्रस्सन् विभर्ति तस्या धुरो भवानधुरं वहतीति धूर्य्यो भारवाही तस्य पदं वहनस्थानम

Digitized by Sarayu Foundation Trust, Delhi and eGangotri

१·टी· अपरं पर्युत्सुकं परं तदवलम्बीत ततो विनिद्रो भवेत्यर्थः नत्युभयं वा ह्यमेको वहतीतिभावः ६६ निद्रेति चन्द्रारविन्दराजवदनादम्भोल क्ष्मीनिवासस्थाना
स·५ नीति प्रसिद्धिमाश्रित्योच्यते निद्रावशेन निद्राधीनेन स्वन्तरसङ्गेत्र ध्वन्यते भवतापर्युत्सुकत्वमपित्वय्यनुरक्तत्वमपीत्यर्थः प्रसितोत्सुकाभ्यां
५४ तृतीयाचेति सप्तम्यर्थे तृतीया अपिशब्दस्तद्विषयानुरागस्यानपेक्षत्वद्योतनार्थः निशिखण्डिता भर्तुरन्यासङ्ग ज्ञान कलुषिता अवलेव नायकेव
ज्ञातेन्यासङ्ग विकृते खण्डिते र्या कषायितेनिदर्शरूपके अनपेक्ष्यमाणा· अविचारयन्ती सती· उपेक्ष्यमाणेत्यर्थः लक्ष्मीर्येन चन्द्रेण सहत्वदाननसा
दृश्यत्वादितिभावः विनोदयति विनोदं करोति विनोदशब्दात्तत्करोति तदाचष्ट इति णिच् सादृश्यदर्शनादयो हि विरहिणां विनोदस्थानानि

५१ निद्रावशेन भवताप्यनवेक्ष्यमाणा पर्युत्सुकत्वमबला निशि खण्डितेव · लक्ष्मीर्विनोदयति येन दिगन्तलम्बी सोपि त्व
दाननरुचिं विजहाति चन्द्रः ६७ तदुल्लोनायुगपदुन्मिषितेन तावत्सद्यः पर स्परतुलामधिरोहतां द्वे प्रस्पन्दमान
परुषेतरतारमन्तश्चक्षुस्तव प्रचलितभ्रमरं च पद्मम् ६८ ॥

इतिभावः सचन्द्रोपि दिगन्तलम्बी पश्चिमाशांगतः सन् अस्तंग
च्छन्नित्यर्थः अतएव त्वदाननरुचिं विजहाति त्वन्मुखसादृश्यं त्यजतीत्यर्थः अतो निद्रां विहाय तां लक्ष्मीमनन्यशरणां परिगृहाणेत्यर्थः अथवा निद्रा
वशेन भवता अनवेक्ष्यमाणा अनिरीक्ष्यमाणा कर्मणि शानच् लक्ष्मीः प्रयोजककर्त्री येन चन्द्रेण प्रयोज्येन पर्युत्सुकत्वं त्वद्विरहवेदनां कालास
मत्वम्· औत्सुक्यं मनस्तापज्वरादिकमित्यलङ्कारे विनोदयति निरासयतीति योजना शेषं पूर्ववत् नाथस्तु अर्थापत्तिमपश्यन् इमं पक्षमुपेक्षि
ष्ट ६७ तदिति तत्तस्मात्· लक्ष्मीपरिग्रहकरणाद्धलुना मनोज्ञेनाव लुस्थाने मनोज्ञे च वलुभाषिनमन्यवदिति विश्वः युगपत्तावदुन्मिषितेन युग ५८
पदेवोन्मीलनेन सद्यो द्वे अपि परस्परतुलाम् अन्योन्यसादृश्यमधिरोहताम् प्राप्नुताम् प्रार्थनायां लोट् द्वे के· अन्तः प्रस्पन्दमाना चलन्ती· परुषेतरास्नि

था तारा कनीनिकायस्य तथोक्तम् तारका क्ष्णः कनीनिका इत्यमरः तव चक्षुः अन्तः प्रचलितभ्रमरं चलद्भृङ्गं पद्मं च युगपदुन्मेषे सति संपूर्णसादृश्यलाभरतिभा
वः ६८ वृन्तेति विभातवायुः प्रभातवायुः स्वाभाविकं नैसर्गिकम् तेत तव मुखमारुतस्य निःश्वासपवनस्य सौरभ्यं तादृक् सौरभ्यमित्यर्थः परगुणेना
न्यदीयगुणेन साङ्क्रामिकगन्धेनेत्यर्थः ईप्सुः आप्तुमिच्छुरिव आप्लृव्याप्तौ धामीदित्वीकारादेशः अनोकहानां वृक्षाणां श्लथं शिथिलं पुष्पं वृन्तात्
प्रसववन्धनात् वृन्तं प्रसववन्धनमित्यमरः हरति आदत्ते अरुणांशुभिन्नैः तरणिकिरणोद्बोधितैः सरसिजातैः सरसिजैः कमलैः सह तत्पुरुषे
कृति बहुलमिति सप्तम्या अलुक् संसृज्यते सङ्गच्छते सजेर्दैवादिकत्वात्कर्तरि लट् ६९ ताम्रेति ताम्रोदरेषु अरुणाभ्यन्तरेषु तरुपल्लवेषु प
वृन्तश्लथं हरति पुष्पमनोकहानां संसृज्यते सरसिजैररुणांशुभिन्नैः स्वाभाविकं परगुणेन विभातवायुः सौरभ्यमीप्सु-
रिव ते मुखमारुतस्य ६९ ताम्रोदरेषु पतितं द्रुमपल्लवेषु निर्धौतहारगुलिका विशदं हिमांभः आभाति लब्धपरभा
गतया धरोष्ठे लीलास्मितं सदशनार्चिरिव त्वदीयं ७० यावत्प्रतापनिधिराक्रमते न भानुरह्नाय तावदरुणेन तमो नि
रस्तं आयोधनाग्रसरतां त्वयि वीर याते किं वारिपूंस्तव गुरुः स्वयमुच्छिनत्ति ७१॥ ९ तितं निर्धौता याः हारगुलिकाः मुक्तामणयः
तद्वद्विशदं हिमाम्भः लब्धपरभागतया लब्धगुणोत्कर्षतया परभागो गुणोत्कर्ष इतियादवः अधरोष्ठे त्वदीयं सदशनार्चिः दन्तकान्तिसहितं लील
स्मितमिवाभाति शोभते ७० यावदिति प्रतापनिधिः तेजोनिधिः भानुः सविता यावन्नाक्रमते नोद्गच्छति आङ उद्गमने इत्यात्मनेपदम् भानाव
पि आयोधनेषु युद्धेषु युद्धमायोधनं जन्यमित्यमरः अग्रसरतां पुरःसरतां याते सति तव गुरुः पिता रिपून् स्वयमुच्छिनत्ति किं वा नोच्छिनत्त्येवेत्य

Digitized by Sarayu Foundation Trust, Delhi and eGangotri

शय्यामिति उभाभ्यां पक्षाभ्यां विनीता अपनीता निद्रा येषां ते उभयपक्षविनीतनिद्राः अत्र समासविषये उभशब्दस्थाने उभयप्रयोग एव साधुरित्यनु
सन्धेयम् यथाह कैयटः तत्रोभादुदात्तो नित्यमिति नित्यग्रहणस्येदं प्रयोजनम् वृत्तिविषये उभशब्दस्य प्रयोगो मा भूत् उभयशब्दस्यैव यथा स्या
दुभयपुत्र इत्यादि भवतीति मुखराण्युत्थानचलनाच्छब्दायमानानि शृंखलानि निगडानि कर्षन्तीति तथोक्ताः ते तव स्तम्बेरमाः स्तम्बे रमन्त इति
स्तम्बेरमाः हस्तिनः स्तम्बकर्णयो रमिजपोरिति च प्रत्ययः हस्तिसूचकयोरिति वक्तव्यात् इभः स्तम्बेरमः पद्मीत्यमरः तत्पुरुषे कृति बहुलमिति सप्तम्या
अलुक् शय्यां जहति त्यजन्ति येषां स्तम्बेरमाणां दन्ताः कोशा इव दन्तकोशाः दन्तकुड्मलाः तरुणारुणरागयोगाद्बालार्कसम्पर्काद्धेतोः भिन्ना

शय्यां जहत्युभयपक्षविनीतनिद्राः स्तंबेरमा मुखरशृंखलकर्षिणस्ते । येषां विभांति तरुणारुणरागयोगाद्भिन्नाद्रिगै
रिकतटा इव दन्तकोशाः ७२ दीर्घेष्वमी नियमिताः पटमंडपेषु निद्रां विहाय वनजाक्ष वनायुदेश्याः । वक्त्रोष्मणा मलिनयं
ति पुरोगतानि लेह्यानि सैंधवशिलाशकलानि वाहाः ७३ भवति विरलभक्तिर्म्लानपुष्पोपहारः स्वकिरणपरिवेषोद्भेदशू

द्रिगैरिकतटा इव विभान्ति धातुरक्ता इव भान्तीत्यर्थः ७२ दीर्घेष्विति हे वनजाक्ष नीरजाक्ष वनं नीरं वनं सत्वमिति शाश्वतः दीर्घे ((न्याः प्रदीपाः॥
षु पटमण्डपेषु नियमिताः बद्धाः वनायुदेश्याः वनायुदेशे भवाः पारसीका वनायुजा इति हलायुधः अमी वाहाः अश्वाः निद्रां विहाय पुरोगतानि अग्रे
स्थानि लेह्यानि आस्वाद्यानि सैन्धवशिलाशकलानि सैन्धवो स्त्री शीतशिवं मणिमन्थं च सिन्धुजमित्यमरः वक्त्रोष्मणा मुखमारुतेन मलिनं
यन्ति मलिनानि कुर्वन्ति उक्तञ्च सिद्धयोगसङ्ग्रहे पूर्वाह्णकाले चाश्वानां प्रायशो लवणं हितम् शूलानाहविबन्धघ्नं लवणं सैंधवं वरमित्यादि ७३ ५५
भवतीति म्लानपुष्पोपहारः पुष्पपूजा म्लानत्वादेव विरलभक्तिः विरलरचनो भवति प्रदीपाश्च स्वकिरणानां परिवेषस्य मण्डलस्य उद्भेदेन स्फुरणेन

शून्याभवन्तिनिस्तेजस्काभवन्तीत्यर्थः अपिच अयंमञ्जुवाक् मधुरवचनः पञ्जरस्थः ते तव शुकः त्वत्प्रबोधनिमित्तं प्रयुक्ताम् उच्चारितां नोऽस्माकं गि
रं वाणीम् अनुवदति अनुकृत्यवदतीत्यर्थः इत्थम्प्रभातलिङ्गानिवर्तन्तेऽतः प्रबोधव्यमितिभावः भवतीत्यनयोर्मालिनीछन्दः तल्लक्षणंननमयय
युतेयंमालिनीभोगिलोकैरिति ७४ इतीति इत्थंविरचितवाग्भिर्वन्दिपुत्रैः वैतालिकैः पुत्रग्रहणंसमानवयस्कद्योतनार्थम् सपदिविगतनिद्रः सक्त
निद्रः कुमारस्तल्पंशय्याम् तल्पंशय्याऽट्टदारेष्वित्यमरः उज्झांचकार विससर्ज उज्झ उत्सर्गेएतस्मादिजादेश्चगुरुमतोऽनृच्छ इत्याम्प्रत्ययः कथमिवम
देनपटुमधुरंनिनदद्भिः राजहंसैर्बोधितः सुप्रतीकाख्यः सुरगजः ईशानदिग्गजः गङ्गायाइदं गाङ्गं सैकतं पुलिनमिवतोयोत्थितंतत्पुलिनंसैकतं सि

अयमपिचगिरंनस्त्वत्प्रबोधप्रयुक्तामनुवदतिशुकस्तेमंजुवाक्पंजरस्थः ७४ इतिविरचितवाग्भिर्वंदिपुत्रैः कुमारः सप
दिविगतनिद्रस्तल्पमुज्झांचकारमदपटुनिनदद्भिर्बोधितोराजहंसैः सुरगजइवगांगंसैकतंसुप्रतीकः ७५ अथविधिमव
साय्यशास्त्रदृष्टंदिवसमुखोचितमंचिताक्षिपक्ष्मा कुशलविरचितानुरूपवेषः क्षितिपसमाजमगात्स्वयंवरस्थं ७६ इतिश्री

कतामयमित्यमरः सिकताशर्कराभ्यांचेत्यण् प्रत्ययः सुप्रतीकग्रहणंप्रायसः कैलासवासिनस्तस्यनि ॥ रघुवंशकाव्येअजस्वयंवरप्रवेशोनामपंचमः स
र्गःगङ्गातटेविहारसम्भवादित्यनुसन्धेयम् ७५ अथेति अथोत्थानानन्तरम् अञ्चितानिचारूणिअक्षिपक्ष्माणियस्यसोऽजः शास्त्रेदृष्टमवगतं दिवसमुखोचितंप्रातः
कालोचितं विधिरनुष्ठानम् अवसाय्यसमाप्यस्यतेर्ण्यन्तात्ल्यप् कुशलैः प्रधानदक्षैर्विरचितः सम्पादितः अनुकूलः स्वयम्वरोचितोवेषोनेपथ्यंयस्यसतथोक्तः सन्
स्वयम्वरस्थंमण्डलंगतंक्षितिपसमाजं राजसमूहम् अगात् अगमत् इणोगालुङीतिगादेशः पुष्पिताग्राछन्दमेतत् तदुक्तम् तल्लक्षणम् अयुजिनयुगरेफतोयकारोयु
जिचनजौजरगाश्चपुष्पिताग्रेति ७६ ॥ इतिश्रीपदवाक्यप्रमाणपारावारीणश्रीमहोपाध्यायकोलाचलमल्लिनाथसूरिविरचितायांरघुवंशव्याख्यायांसंजीवनीस

र०टी० श्रीगणेशायनमः अनूपंमुर्द्धिपादेचकालंकण्ठेवपुष्यथ कामारिंकामतातंवाकश्चिदेकंभजाम्यहम् १ सइति सोऽजस्तत्रस्थाने उपचारवत्सुराज्ञोपकरणव
स०६ त्सुमञ्चेषुपर्यङ्केषु सिंहासनस्था नमनोज्ञवेषान् मनोहरनेपथ्यान् वैमानिकानां विमानेश्चरन्तीति ठक्प्रत्ययः मरुताम् अमराणाम् मरुतौपवना
५६ मराविल्यमरः आकृष्टलीलान् आकृष्टमरुल्लीलानित्यर्थः सापेक्षत्वेपिगमकत्वात्समासः नरलोकंपालयन्तीतिनरलोकपालाः कर्मण्यण्प्रत्ययः तान्भूपा
लानपश्यत् सर्गेस्मिन्नुपजातिश्छन्दः १ रतेरिति रतिः स्मरप्रियायांचरागेचसुरतेस्मृताइतिविश्वः रतेः कामप्रियायाः गृहीतानुनयेनस्वीकृतप्रार्थनेनगृही
तरत्यनुनयेनेत्यर्थः सापेक्षत्वेपिगमकत्वात्समासः ईश्वरेण हरेणप्रत्यर्पितस्वाङ्गं काममिवस्थितम् काकुत्स्थम् अजम् आलोकयतांनृपाणांमनः इन्दु

श्रीगणेशायनमः सतत्रमंचेषुमनोज्ञवेषान्सिंहासनस्थानुपचारवत्सु वैमानिकानांमरुतामपश्यदाकृष्टलीलान्नरलोकपा
लान् १ रतेर्गृहीतानुनयेनकामंप्रत्यर्पितस्वांगमिवेश्वरेण काकुत्स्थमालोकयतांनृपाणांमनोबभूवेंदुमतीनिराशम् २ वैदर्भ
निर्दिष्टमसौकुमारःक्लृप्तेनसोपानपथेनमंचं शिलाविभंगैर्मृगराजशावस्तुंगंनगोत्संगमिवारुरोह ३ परार्ध्यवर्णास्तरणोपपन्न
मासेदिवानरत्नवदासनंसः भूयिष्ठमासीदुपमेयकांतिर्मयूरपृष्ठाश्रयिणागुहेन ४॥ ९ मतीनिराशंवैदर्भीनिःस्पृहंबभूव इन्दुमतीस
त्यतिमेनंविहायनास्मान्वरिष्यतीतिनिश्चिक्युरित्यर्थः सर्वातिशयसौन्दर्यमस्येतिभावः २ वैदर्भेति असौकुमारोवैदर्भेण भोजेननिर्दिष्टंप्रदर्शितंमञ्चं।
पर्य्यङ्कं क्लृप्तेन सुविहितेनसोपानपथेनमृगराजशावः सिंहपोतःपोतःपाकोर्भकोडिम्भः पृथुकश्शावकश्शिशुरित्यमरः शिलानांविभङ्गैः भङ्गीभिःतुङ्ग
मुन्नतंनगोत्सङ्गं शैलाग्रमिवआरुरोह ३ परार्ध्येति परार्ध्याः श्रेष्ठावर्णाः नीलपीतादयोयस्यतेनास्तरणेन कम्बलादिना उपपन्नंसङ्गतं रत्नवद्रत्नख ५६
चितम् आसनंसिंहासनम् आसेदिवान् अधिष्ठितवान्सोऽजः मयूरपृष्ठाश्रयिणागुहेन सेनान्यासहसेनानीरग्निभूर्गुहइत्यमरः भूयिष्ठम् अत्यन्तम्

उपेयकान्तिरासीत् मयूरस्य विचित्ररूपत्वात् साम्यं रत्नासनस्य तन्नद्वारान्तरारूढयोरपीति भावः ४ तास्विति तासु राजपरम्परासु श्रिया कर्त्र्या पयोमुचा म्मेघानां पङ्क्तिषु श्रेणीषु विद्युतेव सहस्रधा विभक्तस्तरङ्गेषु तरणिरिव स्वयमेक एव प्रत्येकं संक्रामतीत्यर्थः प्रभाविशेषस्योदयेन आविर्भावेन दुर्निरीक्ष्यो दुर्दर्शनः आत्मा श्रिया स्वरूपं व्यरुचत् व्यद्योतिष्ट घुट्भ्यो लुङीति परस्मैपदम् द्युतादित्वादङ् प्रत्ययः तस्मिन् समये प्रत्येकं संक्रान्तलक्ष्मीकतया तेषां किंमपि दुरासदं तेजः प्रादुरासीदित्यर्थः ५ तेषामिति महार्हासनसंस्थितानां श्रेष्ठसिंहासनेस्थानाम् उदारनेपथ्यभृताम् उज्ज्वलवेषधारिणां तेषां राज्ञां मध्ये कल्पद्रुमाणां मध्ये पारिजात इव सुरद्रुमविशेष इव पञ्चैते देवतरवो मन्दारः पारिजातकः सन्तानः कल्पवृक्षश्च पुंसि वा हरिचन्दनमित्यमरः स रघुसूनुरेव धा

तासु श्रिया राजपरंपरासु प्रभाविशेषोदयदुर्निरीक्ष्यः सहस्रधात्मा व्यरुचद्विभक्तः पयोमुचां पंक्तिषु विद्युतेव ५ तेषां महार्हासनसंस्थितानामुदारनेपथ्यभृतां स मध्ये रराज धाम्ना रघुसूनुरेव कल्पद्रुमाणामिव पारिजातः ६ नेत्रव्रजाः पौरजनस्य तस्मिन्विहाय सर्वान्नृपतीन्निपेतुः मदोत्कटे रेचितपुष्पवृक्षा गंधद्विपे वन्य इव द्विरेफाः ७ अथ स्तुते वंदिभिरन्वयज्ञैः सोमार्कवंश्ये नरदेवलोके

म्ना तेजसा रराज भून्नेति पाठे अतिशयेनेत्यर्थः अत्र कल्पद्रुमशब्दः पञ्चान्यतमविशेषवचनमुपकल्पयन्ति मनोरथानिति व्युत्पत्त्या सुरद्रुममात्रोपलक्षिकतया प्रयुक्त इत्यनुसन्धेयम् कल्पा इति द्रुमा इति विग्रहः ६ नेत्रेति पौरजनस्य नेत्रव्रजाः सर्वान्नृपतीन्विहाय तस्मिन्नजे निपेतुः स एव सर्वोत्तमोऽजो दृश्य इत्यर्थः कथमिव मदेनोत्कटे उद्भिन्नगण्डे निर्भरे वा वन्ये गन्धद्विपे गन्धप्रधाने गजे रेचिता रिक्तीकृताः पुष्पाणां वृक्षा यैस्ते त्यक्तपुष्पवृक्षा इत्यर्थः द्विरेफा भृङ्गा इव पुष्पवन्यविशेषणं द्विरेफाणां पुष्पवृक्षत्यागसम्भावनाकृतम् ७ अथेति पुरेति मनुष्येति त्रिभिर्विशेषकमाह अथान्वयज्ञै राजवंशाभिज्ञैर्वन्दिभिः स्तुतिपाठकैः वन्दिनस्तुतिपाठका इत्यमरः सोमार्कवंश्ये सोमसूर्यवंशभवे नरदेवलोके स्तुते सति मञ्चान्तरराजमार्गमाविवेशेत्युत्तरेण सम्बन्धः

र॰टी॰ एवमुत्तरत्रापि योज्यम् सञ्चारिते समन्तात्प्रसारिते अगरुसारो निर्यासो योनिः कारणं यस्य तस्मिन्धूपे वैजयन्तीः पताकाः समुत्सर्पति सति अतिक्रम्य गच्छ
स॰६ ति सति ८ किञ्च पुरस्योपकण्ठे समीपे उपवनान्याश्रयो येषां कलापिनां बर्हिणाम् उद्धतनृत्यहेतौ मेघध्वनिसादृश्येनाण्डवकारणे प्रध्माताः परितः शं
५७ खा यस्मिन्मङ्गलार्थे मङ्गलप्रयोजके तूर्यस्वने वाद्यघोषे परितः सर्वतो दिगन्तान्मूर्छति व्याप्नुवति सति ९ पतिम्वृणोतीति पतिम्वरा स्वयम्वरा पतिम्वरा च
वर्या चेत्यमरः संज्ञायां भृजवृजीत्यादिना खच् प्रत्ययः क्लृप्तविवाहवेषा कन्या इन्दुमती मनुष्यैर्वाह्यं परिवारेण परिजनेन शोभि चतुरस्रं यानं चतुरस्रवा
हनं शिविकामध्यास्यारुह्य मञ्चान्तरं मञ्चमध्ये यो राजमार्गस्तं प्रविवेश १० नेत्रशतानामेकलक्ष्ये एकदृश्ये कन्यामये कन्यारूपे तस्मिन् विधातुः ब्रह्म

संचारिते चागरुसारयोनौ धूपे समुत्सर्पति वैजयंतीः ८ पुरोपकंठोपवनाश्रयाणां कलापिनामुद्धतनृत्यहेतौ प्रध्मात
शंखे परितो दिगंतांस्तूर्यस्वने मूर्छति मंगलार्थे ९ मनुष्यवाह्यं चतुरस्रयानमध्यास्य कन्या परिवारशोभि विवेश मंचांतर
राजमार्गं पतिंवरा क्लृप्तविवाहवेषा १० तस्मिन्विधानातिशये विधातुः कन्यामये नेत्रशतैकलक्ष्ये निपेतुरंतःकरणैर्नरें
द्रा देहैः स्थिताः केवलमासनेषु ११ तां प्रत्यभिव्यक्तमनोरथानां महीपतीनां प्रणयाग्रदूत्यः॥ ११ णो विधानातिशये सृष्टिविशेषे नरेन्द्राः

अन्तःकरणैर्निपेतुः आसनेषु केवलं देहैरेव स्थिताः देहानपि विस्मृत्य तत्रैव दत्तचित्ता बभूवुरित्यर्थः अन्तःकरणकर्तृके निपतने नरेन्द्राणां कर्तृत्वव्य
पदेशः आदरातिशयार्थः ११ तामिति तामिन्दुमतीम्प्रति अभिव्यक्तमनोरथानां प्रकटाभिलाषिणां महीपतीनां राज्ञां प्रणयाग्रदूत्यः प्रणयः प्रार्थ
ना प्रेम वा प्रणयास्त्वमी विस्रम्भयाच्ञाप्रेमाण इत्यमरः प्रणयेष्वग्रदूत्यः प्रथमदूतिकाः प्रणयप्रकाशकत्वसाम्यात् दूतीत्वव्यपदेशः विविधाः शृं ५७
गारचेष्टाः शृङ्गारविकाराः पादपानां प्रवालशोभाः पल्लवसम्पद इव बभूवुः अत्र शृङ्गारलक्षणं रसार्णवसुधाकरे विभावैरनुभावैश्च स्वोचितैर्व्य

भिचारिभिः नीतासरस्यरसत्वंरतिः शृङ्गार उच्यते रतिरिच्छाविशेषः उत्पन्नातत्त्वोक्तं तत्रैव· यूनोरन्योन्यविषयः स्थायिनीच्छा रतिः स्मृतेतिचेष्टा शब्दे
नतदनुभावविशेषा उच्यंते ते पितत्रैवोक्ताः भावं मनोगतं साक्षात्स्वहेतुं व्यञ्जयन्ति ये ते नुभावा इति ख्याता भ्रूविक्षेपस्मितादयः ते च तु दृष्टिचिन्त शा
न्तवाकूध्यारम्भसम्भवाइति तत्रगात्रारम्भभेदाश्चेष्टाशब्देनोक्ता ननुभावात्कश्चिदित्यादिभिः श्लोकैर्वक्ष्यति शृङ्गाराभासाश्चायमेकत्रैवं प्रतिपादनं
त तदुक्तम् एकत्रैवो नुरागश्चेत्तिर्यक्कुच्छ्रेयोगतेषिवा योषितां बहुशक्तिश्चे द्रसाभासस्त्रिधामत इति १२ शृङ्गारचेष्टा वभूवुरित्युक्तम् ताएवदर्शयति क
श्चिदित्यादि कश्चिद्राजाकराभ्याम् उपगूढनालं गृहीतनालम् आलोलैः चञ्चलैः पत्रैरभि हता स्ताडिताद्विरेफाः भ्रमरा येन तत्तथोक्तम् रजोभिः परागैर

प्रवालशोभा इव पादपानां शृंगारचेष्टा विविधा बभूवुः १२ कश्चित्कराभ्यामुपगूढनालमालोलपत्राभिहतद्विरेफं रजोभि
रंतःपरिवेषवंधिलीलारविंदं भ्रमयांचकार १३ विस्रस्तमंसादपरो विलासी रत्नानुविद्धांगदकोटिलग्नं प्रावारमुत्क्षिप्य यथा
प्रदेशं निनाय साचीकृतचारुवक्त्रः १४ आकुंचिताग्रांगुलिना ततो न्यः किंचित्समावर्जितनेत्रशोभः तिर्यग्विसंसर्पिनखप्रभे
णपादेन हैमं विलिलेख पीठं १५॥

१९ न्तः परिवेषं मण्डलं वध्नातीति अन्तःपरिवेषबन्धि लीलारविन्दं भ्रमयाञ्चकार करस्थलीलारवि
न्दवत्त्वयाहं भ्रमितव्य इति नृपाभिप्रायः हस्तघूर्णकोयमपलक्षणकङ्गीन्तुमन्त्यभिप्रायः १३ विस्रस्तमिति विलासनशीलो विलासी वोकषलषकान्त्यं स्र
भ इतिघिशुन् प्रत्ययः अपरो राजा अंसात्स्कन्धात् विस्रस्तं रत्नानुविद्धं रत्नखचितम् अङ्गदं केयूरं तस्य कोटिलग्नमम्मिलग्नं अस्युत्कर्षाश्रय· कोट्युद्रत्यमरः प्रा
लम्बिनीम् ऋजुलम्बिनी स्रजम् प्रालंबमृजुलंबिस्यादित्यमरः प्रावारपाठं तु उत्तरीयवस्त्रम् उत्क्षिप्य उद्धृत्य साचीकृतम् तिर्यक्कृतम् चारुवक्त्रं य
स्य सतथोक्तः यथावकाशं स्वस्थाने निनाय प्रावारोत्क्षेपणछलेनाहं त्वामेव परिरप्स्य इति नृपाभिप्रायः गोपनीयं किञ्चिदङ्ग सितनोयंप्रावृणुतेरतीरु

मन्त्यभिप्राय· १४ आकुञ्चितेति ततः पूर्वोक्तादन्यो राजा किञ्चित्समावर्जितनेत्रशोभः

Digitized by Sarayu Foundation Trust, Delhi and eGangotri

ईषद्वक्रीकृपातितनेत्रशोभः सन् आकुञ्चिताः आभुग्ना अग्रांगुल्यो यस्य तेन तिर्यग्विसंसर्पिणी नखप्रभा यस्य तेन पादेन हैमं हिरण्मयं पीठं पादपीठं विलिलेख लिखितवान् पदाङ्गुलीनामाकुञ्चितेन त्वं मत्समीपमागच्छेति नृपाभिप्रायः भूमिविलेखको यमपलक्षणं इत्तीन्नुमत्याशयः भूमिविलेखनं लक्ष्मीविनाशहेतुः १५ निवेश्येति कश्चिद्राजा वामं भुजमासनार्द्धे सिंहासनैकदेशे निवेश्य· संस्थाप्य· तत्सन्निवेशात्तस्य वामभुजस्य· संनिवेशात्संस्थापना त्· अधिकोन्नतो· वामांस एव यस्य स तथोक्तः सन् विवृत्ते· परावृत्ते· त्रिके· त्रिकप्रदेशे भिन्नहारः लुण्ठितहारः पृष्ठवंशाधरे त्रिकमित्यमरः सुहृत्समाभाषणतत्परोऽभूत् वामपार्श्वाविभिन्नेनैव मित्रेण सम्भाषयितुं प्रवृत्त इत्यर्थः अत एव विवृत्तत्रिकत्वं घटते त्वया वामाङ्गनिवेशितया सह एवं वृत्तं करिष्य

निवेश्य वामं भुजमासनार्द्धे तत्सन्निवेशादधिकोन्नतांसः कश्चिद्विवृत्तत्रिकभिन्नहारः सुहृत्समाभाषणतत्परोऽभूत् १६ विलासिनीविभ्रमदन्तपत्रमापाण्डुरं केतकपत्रमन्यः प्रियानितम्बोचितसन्निवेशैर्विपाटयामास युवा नखाग्रैः १७ कुशेशयाताम्रतलेन कश्चित्करेण रेखाध्वजलाञ्छनेन रत्नाङ्गुलीयप्रभयानुविद्धानुदीरयामास सलीलमक्षान् १८॥ ॥ ॥

इति नृपाभिप्रायः परं दृष्ट्वा पराङ्मुखो यं न कार्यकर्त्ता इतीन्नुमत्यभिप्रायः १६ विलासिनीति अन्यो युवा विलासिन्याः प्रियायाः विभ्रमार्थं दन्तपत्रं दन्तपत्रभूतम् आपाण्डुरं केतकबर्हं केतकदलम् दलेऽपि बर्हमित्यमरः प्रियानितम्बे उचितसंनिवेशैः अभ्यस्तनिक्षेपणैः नखाग्रैः विपाटयामास विदारयामास अहं त्वन्नितम्बे एवं नखव्रणादीन् दास्यामीति नृपाशयः तृणच्छेदकवत्पत्रपाटको यमपलक्षणं इतीन्नुमत्याङ्गीकृतम् १७ कुशेशयेति कश्चिद्राजा कुशेशयं शतपत्रमिव ताम्रं तलं यस्य तेन शतपत्रं कुशेशयमित्यमरः रेखाध्वजलाञ्छनं यस्य तेन करेण अङ्गुलीषु भवान्यङ्गुलीयानि ऊर्मिकाः अङ्गुलीयकमूर्मिके समरः जिह्वामूलाङ्गुलेश्छ इति छप्रत्ययः रत्नानामङ्गुलीयानि तेषां प्रभयाऽनुविद्धान् व्याप्तान् अक्षान् पाशान् अक्षास्तु देवनाः कितवाश्च इत्यमरः

सलीलमुदीरयामास उच्चिक्षेप अहं त्वया सह एवं रमे इति नृपाभिप्रायः अक्षचातुर्यको यं पुरुष इत्यनुमत्यभिप्रायः अक्षैर्मा दीव्य इति श्रुतिनिषेधात् १८
कश्चिदिति कश्चिद्यथाभागं यथास्थानं अवस्थितः स्वसन्निवेशाद्व्यतिलङ्घिनीव स्वस्थानाच्चलितइव किरीटे वज्राणां किरीटगतानाम् अंशवो ग
र्भे येषां तान्यङ्गुलीरन्ध्राणि यस्य तमेकं करं व्यापारयामास किरीटवन्मम शिरसि स्थितामपि त्वां भारं न मन्ये इति नृपाभिप्रायः शिरसि न्यस्तहस्तोऽयम् अपल
क्षण इतीनुमत्यभिप्रायः १९ तत इति ततो नृपाणां श्रुतवृत्तवंशा श्रुताचरणकुले नर्थः सापेक्षत्वेपि गमकत्वात्समासः प्रगल्भा वाग्मिनी सुनन्दा सुनन्दा
ख्या प्रतिहाररक्षतीति प्रतिहाररक्षी द्वारपालिका कर्मण्यण् प्रत्ययः टिड्ढाणञित्यादिना ङीप् प्राक् प्रथमं कुमारीम् इन्दुमतीम् मगधेश्वरस्य सन्निकर्षं

कश्चिद्यथाभागमवस्थितेपि स्वसन्निवेशाद्व्यतिलङ्घिनीव वज्रांशुगर्भाङ्गुलिरंध्रमेकं व्यापारयामास करं किरीटे १९ त
तो नृपाणां श्रुतवृत्तवंशा पुंवत्प्रगल्भा प्रतिहाररक्षी प्राक्सन्निकर्षं मगधेश्वरस्य नीत्वा कुमारीमवदत्सुनंदा २० असौ श
रण्यः शरणोन्मुखानामगाधसत्त्वो मगधप्रतिष्ठः राजा प्रजारंजनलब्धवर्णः परंतपो नाम यथार्थनामा २१॥ १ समीपं नीत्वा पुम्व

त् पुंसा तुल्यं तेन तुल्यं क्रिया चेद्वतिरिति वति प्रत्ययः अवदत् २० असाविति असौ राजा असाविति पुरोवर्तिनो निर्देशः एवमुत्तरत्रापि द्रष्टव्यम् शरणोन्मु
खानां शरणार्थिनां शरणे रक्षणे साधुः तत्र साधुरिति यत्प्रत्ययः शरणं भवितुमर्हति शरण्यः इति नाथनिरुक्तिर्निर्मूलैव अगाधसत्त्वो गम्भीरस्वभावः
सत्त्वं गुणे पिशाचादौ बले द्रव्यस्वभावयोरिति विश्वः मगधा जनपदाः तेषु प्रतिष्ठा आस्पदं यस्य स मगधप्रतिष्ठः प्रतिष्ठा कृत्यमास्पदमित्यमरः प्रजारञ्जने
लब्धवर्णो विचक्षणः यद्वा प्रजारञ्जनेन लब्धो वर्णः उत्कर्षः परान् शत्रून् तापयतीति परन्तपः परन्तपाख्यः द्विषत्परयोस्तापेरिति खच्प्रत्ययः खचि ह्रस्व इति ह्र
स्वः अरुर्द्विषदजन्तस्य मुमिति मुमागमः नामेति प्रसिद्धौ यथार्थनामा शत्रुसन्तापनादिति भावः २१ ॥ ॥ ॥ ॥ ॥ ॥

काममिति अन्येनृपाः कामंसहस्रशः सन्तिभूमिमनेन राजन्वतींशोभनराजवतीमाहुः नैतादृक्कश्चिदस्तीत्यर्थः सुराज्ञिदेशेराजन्वान्स्यात्ततोन्यत्रराजवानित्यमरः राजन्वान्सौराज्ये इतिनिपातनात्साधुः तथाहि नक्षत्रैरश्विन्यादिभिः ताराभिः साधारणैर्ज्योतिर्भिर्ग्रहैः भौमादिभिश्चसंकुलापिरात्रिः चन्द्रमसैवज्योतिरस्यास्तिज्योतिष्मती नान्येन ज्योतिषेत्यर्थः २२ क्रियेति अयंपरन्तपोऽध्वराणां क्रतूनां क्रियाप्रबन्धात् अनुष्ठानसातत्यात् अविछिन्नादनुष्ठानादित्यर्थः अजस्रंनित्यमाहूतसहस्रनेत्रस्सन् चिरं शच्या अलकान् पाण्डुकपोलयोर्लम्बान् स्वस्तान् पचाद्यच मन्दारैः कल्पद्रुमकुसुमैः शून्यांश्चकार प्रोषितभर्तृकाहिकेशसंस्कारंनकुर्वन्तिप्रोषितेमलिनाकृशेतिस्मरणादितिभावः २३ अनेनेति वरेण्येन वरणीयेन वृणोतेरेण

कामंनृपाः संतिसहस्रशोऽन्येराजन्वतीमाहुरनेनभूमिं नक्षत्रताराग्रहसंकुलापिज्योतिष्मतीचंद्रमसैवरात्रिः २२ क्रियाप्रबंधादयमध्वराणामजस्रमाहूतसहस्रनेत्रः शच्याश्चिरंपांडुकपोललंबान् मंदारशून्यानलकांश्चकार २३ अनेनचेदिच्छसिगृह्यमाणंपाणिंवरेण्येनकुरुप्रवेशे प्रासादवातायनसंश्रितानांनेत्रोत्सवंपुष्पपुरांगनानां २४ एवंतयोक्तेतमवेक्ष्यकिंचिद्विस्रंसिदूर्वांकमधूकमाला ऋजुप्रणामक्रिययैवतन्वीप्रत्यादिदेशैनमभाषमाणा २५ ॥ ॥

दिकोहृनः एण्यइतिएण्यप्रत्ययः अनेनराज्ञागृह्यमाणंपाणिमिच्छसिचेत् पाणिग्रहणमिच्छसिचेदित्यर्थः प्रवेशेप्रवेशकाले प्रासादवातायनसंश्रितानाम् राजभवनगवाक्षस्थितानाम् पुष्पपुराङ्गनानाम् पाटलीपुराङ्गनानाम् नेत्रोत्सवंकुरुसर्वोत्तमानांतासामपिदर्शनीयाभविष्यसीतिभावः २४ एवमिति एवंतयासुनन्दयोक्तेसतितम् परन्तपम् अवेक्ष्यकिञ्चिद्विलंविनीदूर्वाङ्कादूर्वाचिन्हामधूकमालागुडपुष्पमालायस्याःसा मधूकेतुगुडपुष्पमधुद्रुमावित्यमरः वरणेशिथिलप्रयत्नेतिभावः तन्वीइन्दुमतीएनम् नृपम् अभाषमाणा ऋज्वा भावशून्ययाप्रणामक्रिय

तामिति सेवनान्याचिन्तत्वादितिभावः वेत्रग्रहणेनियुक्ता· दौवारिकी सुनन्दानांराजसुतां राजान्तरम् अन्यराजानंनिनाय नयतेर्द्विकर्मकः कथमिव स
मीरणोत्थावातोत्पन्नातरङ्गलेखा ऊर्मिपङ्क्तिः मानसे सरसियाराजहंसीताम् पद्मान्तरमिव २६ जगादेति एनामिन्दुमतींजगादकिमिति अयम
ङ्गनाथः अङ्गदेशाधीश्वरः सुराङ्गनाभिः प्रार्थिता कामिता· यौवनश्रीर्यस्यसतथोक्तः पुराकिलेनमिन्द्रसहायार्थम् इन्द्रपुरगामिनम् अकाम
यन्त अप्सरसइतिप्रसिद्धिः किञ्च· सूत्रकारैः गजशास्त्रकृद्भिः पालकाप्यादिभिः महर्षिभिः विनीतनागः शिक्षितगजः किलेत्यैतिह्ये अतएव
भूमिगतोपि· ऐन्द्रम्पदम्· ऐश्वर्यम्भुङ्क्ते भूर्लोकएवस्वर्गसुखमनुभवतीत्यर्थः गजाप्सरोदेवर्षिसेव्यत्वमेन्द्रपदशब्दार्थः पुराकिलकुतश्चिच्छाप

तांसैववेत्रग्रहणेनियुक्ताराजांतरंराजसुतांनिनाय समीरणोत्थेवतरंगलेखापद्मांतरंमानसराजहंसीम् २६ जगा
देचैनामयमंगनाथः सुरांगनाप्रार्थितयौवनश्रीः विनीतनागः किलसूत्रकारैरैंद्रंपदंभूमिगतोपिभुंक्ते २७ अनेनपर्या
सयताश्रुबिंदून्मुक्ताफलस्थूलतमांस्तनेषु प्रत्यर्पिताः शत्रुविलासिनीनामाक्षिप्यसूत्रेणविनैवहाराः २८ निसर्गभि
न्नास्पदमेकसंस्थमस्मिन्द्वयंश्रीश्चसरस्वतीच॥ २९ कारणाद्भुवमवतीर्णोदिग्गजवर्गमालोक्यस्वयमशक्तेरिन्द्राभ्यनुज्ञयाआ

नीतैः देवर्षिभिः प्रणीतेनशास्त्रेणगजान्वशीकृत्यभुविसम्प्रदायंप्रावर्त्तयदितिकथागीयते २७ अनेनेति शत्रुविलासिनीनां· स्तनेषुमुक्ता
फलस्थूलतमान् अस्त्रविन्दून् अस्त्रमश्रुणीतिविश्वः पर्यासयता· प्रसारयता· भर्तृवधादितिभावः अनेनाङ्गनाथेनउन्मुच्याक्षिप्य सूत्रेणवि
नाहाराएवप्रत्यर्पिताः अविच्छिन्नाश्रुविन्दुप्रवर्त्तनादुत्सूत्रहारार्पणमेवकृतमित्युत्प्रेक्षागम्यते २८ निसर्गेति निसर्गतः स्वभावतोभिन्नास्पदं
भिन्नाश्रयं सहावस्थानविरोधीत्यर्थः श्रीश्चसरस्वतीचेतिद्वयमस्मिन्नङ्गनाथेएकत्रसंस्थास्थितिर्यस्यतदेकसंस्थम् उभयमिहसङ्गतमित्य

हे कल्याणि वह्वादिभ्यश्चेति ङीष् कान्त्या सूनृतया -- सत्यप्रियया गिरा च योग्या संसर्गार्हा त्वमेव तयोः श्रीसरस्वत्योस्तृतीया समानगुणयोर्युवयोर्दां पत्यं युज्यत एवेति भावः दक्षिणनायकत्वं चास्य ध्वन्यते तदुक्तं तुल्ये नेकत्र दक्षिण इति २९ अथेति अथ कुमारी अङ्गराजाच्चक्षुः अवतार्य अपनीयेत्यर्थः जन्यां मातृसखीं सुनन्दां याहि गच्छेत्यवदत् अथवा जनीं वधूं वहतीति जन्याः वधूबन्धवः तान्वा गच्छेत्यवदत् जन्या मातृसखी मुदः जनो वरवधूज्ञातिप्रियभृत्यहितेपि चेति पक्षद्वये विश्वः अथवा जन्या वधूभृत्याः भृत्याश्चापि नवोढा इति केशवः संज्ञायां जन्या इति यत्प्रत्ययान्तो निपातः परत्राह वृत्तिकारः जनीं वधूं वहतीति जन्या मातुर्वयस्या इति यच्चामरः जन्याः स्निग्धा वरस्य ये इति तत्सर्वमुपलक्षणार्थमित्यविरोधः न चायमङ्गराज

कान्त्या गिरा सूनृतया च योग्या त्वमेव कल्याणि तयोस्तृतीया २९ अथाङ्गराजादवतार्य चक्षुर्याहीति जन्यामवदत्कुमा
री नासौ न काम्यो न च वेद सम्यग्द्रष्टुं न सा भिन्नरुचिर्हि लोकः ३० ततः परं दुःप्रसहं परेषां नृपं नियुक्ता प्रतिहारभूमौ नि
दर्शयामास विशेषदृश्यमिन्दुं नवोत्थानमिवेन्दुमत्यै ३१ अवन्तिनाथोयमुदग्रबाहुर्विशालवक्षास्तनुवृत्तमध्यः॥ ॥

निषेधो दृश्यदोषान्नापि दृष्टदोषादित्याह नेत्यादिना असौ अङ्गराजः काम्यः कमनीयो नेति न किन्तु काम्य एवेत्यर्थः सा कुमारी च सम्यग्द्रष्टुं विवेक्तुं न वेदेति न वेदेत्यर्थः किन्तु लोको जनो भिन्नरुचिर्हि रुचिरमपि किञ्चित्कस्मैचिन्न रोचते किं कुर्मो न हीच्छा नियन्तुं शक्यत इति भावः ३० तत इति ततोनन्तरं प्रतिहारभूमौ द्वारदेशे नियुक्ता दौवारिकी स्त्री द्वाद्वारं प्रतीहार इत्यमरः द्विषद्भिः शत्रुभिः दुःप्रसहम् शूरमित्यर्थः विशेषेण दृश्यं दर्शनीयं रूपवन्तमित्यर्थः परमन्यं नृपम् नवोत्थानं नवोदयम् इन्दुमिवेन्दुमत्यै निदर्शयामास ३१ अवन्तीति उदग्रबाहुः दीर्घबाहुः विशालवक्षाः तनुवृत्तमध्यः कृशवर्तुलमध्यो यं राजा अवन्तिनाथः अवन्तिदेशाधीश्वरः त्वष्ट्रा विश्वकर्मणा भर्त्रुस्तेजो वेगमसहमानया दुहित्रा संज्ञादेव्या प्रार्थितेन

चक्रभ्रमं चक्राकारं शस्त्रोत्तेजनं यन्त्रम् भ्रमोम्बुनिर्गमे भ्रान्तौ कुण्डाख्ये शिल्पियन्त्रके इति विश्वः आरोप्यय न्त्रोल्लिखितः उष्णतेजाः सूर्य इव विभा
ति अत्र मार्कण्डेयः विश्वकर्मा त्वनुज्ञातः शाकद्वीपे विवस्वतः भ्रममारोप्य नत्तेजः शातनं नायोपचक्रमे इति ३२ अस्येति समग्रशक्तेः शक्तित्रयसम्पन्न
स्य अवन्तिनाथस्य प्रयाणेषु जैत्रयात्रासु अग्रेसरैः वाजिभिः अश्वैः उत्थितानि रजांसि सामन्तानां समन्तोद्भवानां राज्ञां ये शिखामणयः चूडामणयः तेषां
प्रभाप्ररोहास्तमयं तेजोङ्कुरनाशं कुर्वन्ति नासीरैरेवास्य शत्रवः पराजीयन्त इति भावः ३३ असाविति अशावन्तिनाथः महाकालं नाम स्थानविशेषः तत्रैव
निकेतनं स्थानं यस्य तस्य चन्द्रमौलेः ईश्वरस्यादूरे समीपे वसन् अत एव हेतोस्तमिस्रपक्षेऽपि कृष्णपक्षेऽपि प्रियाभिः सह ज्योत्स्नावतः प्रदोषान् रात्रीः निर्विश

आरोप्य चक्रभ्रममुष्णतेजास्त्वष्ट्रेव यन्त्रोल्लिखितो विभाति ३२ अस्य प्रयाणेषु समग्रशक्तेरग्रेसरैर्वाजिभिरुत्थितानि कुर्वन्ति
सामन्तशिखामणीनां प्रभाप्ररोहास्तमयं रजांसि ३३ असौ महाकालनिकेतनस्य वसन्नदूरे किल चन्द्रमौलेः तमिस्रपक्षेऽपि सह
प्रियाभिर्ज्योत्स्नावतो निर्विशति प्रदोषान् ३४ अनेन यूना सह पार्थिवेन रम्भोरु कच्चिन्मनसो रुचिस्ते शिप्रातरङ्गानिलकम्पि
तासु विहर्तुमुद्यानपरम्परासु ३५ तस्मिन्नभिद्योतितबन्धुपद्मे प्रतापसंशोषितशत्रुपङ्के ॥ ॰ त्यनुभवति किल नित्यज्योत्स्नातिहारत्वम

तस्यैव नान्यस्येति भावः ३४ अनेनेति रम्भे कदलीस्तम्भाविव ऊरू यस्याः सा रम्भोरूः तस्याः सम्बोधने हे रम्भोरु ऊरूत्तरपदादौपम्ये इत्यूङ् प्रत्ययः नदी
त्वाद्ध्रस्वः यूनाऽनेन पार्थिवेन सह शिप्रा नाम तत्रत्या नदी तस्यास्तरङ्गाणाम् अनिलेन कम्पितासु उद्यानानां परम्परासु पङ्क्तिषु विहर्तुं ते तव मनसो रु
चिः कच्चित्स्पृहास्ति किमित्यर्थः अभिषङ्गे स्पृहायां रुचिः स्त्रियामित्यमरः ३५ तस्मिन्निति उत्तमसौकुमार्य्या उत्कृष्टाङ्गमार्दवा सा इन्दुमती कुमु
द्वतीव अभिद्योतिता उल्लसिता बन्धव एव पद्मानि येन तस्मिन् प्रतापेन तेजसा संशोषिताः शत्रव एव पङ्काः कर्दमाः येन तस्मिन्नवन्तिनाथे कुमु

Digitized by Sarayu Foundation Trust, Delhi and eGangotri

र॰टी॰ ह्मी कुमुदनड्वेतसेभ्योड्मतुप् इति ड्मतुप्प्रत्ययः भानुमती॰ अंशुमतीव भावं चित्तं नबबन्ध तत्र नानुरागमकरोदित्यर्थः बन्धूनां पङ्मत्वेन शत्रूणांपङ्क

स॰६ त्विनचनिरूपणं राज्ञः सूर्य्यसाम्यार्थम् ३६ तामितिसुनन्दा तामरसान्तराभाम् पद्मोदरतुल्यकान्तिं कनकगौरीमित्यर्थः गुणैरनूनाम् अधिकामित्यर्थः

६१ शोभनाः दन्ताः यस्याः सासुदती वयसिदन्तस्य दत्रिति दत्रादेशः उगितश्चेति ङीप् ताम् प्रख्याताम् प्रसिद्धाम् वा॰ विधातुर्ललितां सृष्टिम् मधुरनिर्माणं

स्त्रियमित्यर्थः अनुगता आपो येषु ते नूपा नाम देशाः ऋक्पूरब्धूः पथामानक्षे इत्यप् प्रत्ययः समासान्तः ऊदनोर्देशे इत्यूदादेशः तेषां राज्ञः नूपराज

स्याग्रेविधाय व्यवस्थाप्य भूयः पुनर्जगाद ३७ सङ्ग्रामेति सङ्ग्रामेषु॰ युद्धेषु॰ निर्विष्टा अनुभूताः सहस्रं बाहवो यस्य स तथोक्तः युद्धादन्यत्र द्विभुज ए

बबंधसानोत्तमसौकुमार्यांकुमुद्वतीभानुमतींवभावं ३६ तांमग्रतस्तामरसांतराभामनूपराजस्यगुणैरनूनां विधायसृष्टिंल

लितांविधातुर्जगाद्भूयःसुदतींसुनंदा ३७ संग्रामनिर्विष्टसहस्रबाहुरष्टादशद्वीपनिखातयूपः अनन्यसाधारणराजशब्दों

बभूवयोगीकिलकार्तवीर्यः ३८ अकार्यचिंतासमकालमेवप्रादुर्भवंश्चापधरःपुरस्तात् अंतःशरीरेष्वपियःप्रजानांप्रत्यादिदे

वदृश्यत इत्यर्थः अष्टादशसुद्वीपेषु निखाताः स्थापिताः यूपाः येन स तथोक्तः सर्वक्रतुयाजी सार्वभौमश्चेति भावः जरायुजा (शां विनयंविनेता ३९

दिसर्वभूतरञ्जनादनन्यसाधारणो राजशब्दो यस्य स तथोक्तः योगी ब्रह्मविद् विद्वानित्यर्थः सकिल भगवतो दत्तात्रेयाल्लब्धयोगः इति प्रसिद्धिः कृत

वीर्यस्यापत्यम्पुमान् कार्तवीर्यो नामराजा बभूव किलेति चास्य महिमा सर्वोपिदत्तात्रेयवरप्रसादलब्ध इति महाभारते दृश्यते ३८ अकार्येति विने रामः

ता शिक्षकः यः कार्त्तवीर्य्यः अकार्यस्य असत्कार्यस्य चिन्तया एवं करिष्यामीति बुद्ध्या समकालमेककालमेव यथा तथा पुरस्तादग्रे चापधरः प्रादु ६१

र्भवन् प्रजास्यात्सन्ततौ जन इत्यमरः अन्तः शरीरेषु अन्तःकरणेषु शरीरशब्देनेन्द्रियंलक्ष्यते अविनयमपि प्रत्यादिदेश मनसापराधमपि निवार

Digitized by Sarayu Foundation Trust, Delhi and eGangotri

ज्यावन्धेति ज्ययामौर्व्या वन्धेन निस्पन्दा. निश्चेष्टा भुजा यस्य तेन विनिश्वसती ज्यावन्धो यत्र धात् दीर्घनिःश्वसंती वक्त्रपरम्परा दशमुखी यस्य तेन निर्जितवासवेन इन्द्रविजयिना अत्रेन्द्रादयोप्यनेनजितप्राय एवेतिभावः लङ्केश्वरेण दशास्येन कार्तवीर्यस्य कारागृहे वन्धानागारे कारास्याद्व न्धनालये इत्यमरः आप्रसादात् अनुग्रहपर्यन्तम् उषितं स्थितम् नपुंसके भावे क्तः एतत्प्रसाद एव तस्य मोक्षोपायो न तु क्षात्रमिति भावः ४० तस्येति आगमवृद्धसेवी श्रुतवृद्धसेवी प्रतीप इति ख्यात इति शेषः एषभूपतिस्तस्य कार्तवीर्यस्यान्वये वंशे जातः येन प्रतीपेन संश्रयस्याश्रयस्य पुंसः दोषैः व्यसनादिभिः रूढम् उत्पन्नं श्रियस्सम्बन्धि स्वभावलोला प्रकृतिचञ्चला इत्येवंरूपमयशो दुष्कीर्तिः प्रमृष्टं निरस्तम् दुष्टाश्रयत्यागशीलाया

ज्यावंधनिस्पंदभुजेन यस्य विनिश्वसद्वक्त्रपरंपरेण कारागृहे निर्जितवासवेन लंकेश्वरेणोषितमाप्रसादात् ४० तस्यान्वये भूपतिरेष जातः प्रतीप इत्यागमवृद्धसेवी येन श्रियः संश्रयदोषरूढं स्वभावलोलेत्ययशः प्रमृष्टं ४१ आयोधने कृष्णगतिं सहायमवाप्य यः क्षत्रियकालरात्रिं धारां शितां रामपरश्वधस्य संभावयत्युत्पलपत्रसाराम् ४२ अस्यांकलक्ष्मीर्भव दीर्घवाहोर्माहिष्मतीवप्रनितंवकाञ्चीम्॥ ९ प्रकृतिचापलप्रवादो मूढजनपरिकल्पित इत्यर्थः अयन्तु दोषराहित्यान्न कदाचिदपि श्रिया त्यज्यत इति भावः ४१ आयोधन इति यः प्रतीपः आयोधने युद्धे कृष्णगतिः कृष्णवर्त्मानम् अग्निं सहायमवाप्य क्षत्रियाणां कालरात्रिं संहाररात्रिमि त्यर्थः रामपरश्वधस्य जामदग्न्यपरशोः द्वयोः कुठारस्वधितिः परशुश्च परश्वध इत्यमरः शितां तीक्ष्णां धारां मुखं खड्गादीनां च निशितमुखे धारा प्र कीर्तितेति विश्वः उत्पलपत्रस्य सार इव सारो यस्यास्तां तथाभूतां संभावयति मन्यते एतन्नगरजिगीषया तान् रिपून् स्वयमेव दहस्यामीति भगव ताव्वैश्वानरेण दत्तवरोयं राजा दहतेत याऽऽगताः शत्रव इति भारते कथानुसन्धेया ४२ अस्येति दीर्घवाहोरस्य प्रतीपस्य अङ्के लक्ष्मीर्भव एनं र रघु० टी० ६

अनेनायं विष्णुतुल्य इति ध्वन्यते माहिष्मती नामास्य नगरी तस्याः प्राकार एव नितम्बः तस्य काञ्चीरसनाभूतां जलानां वेण्या प्रवाहेण रम्याम् ओघः प्रवाहो वेणी चेति हलायुधः रेवां नर्मदां प्रासादजालैः गवाक्षैः जालं समूह आनायो गवाक्षस्तारकावपीत्यमरः प्रेक्षितुं काम इच्छा ऽस्ति यदि ४३ तस्या इति प्रकामं प्रियं प्रीतिकरम् दर्शनीयोपीत्यर्थः स क्षितीशः शरदा प्रमृष्टाम्बुधरोपरोधः निरस्तमेघावरणः पर्याप्तकलः पूर्णकलः शशी नलिन्या इव तस्याः इन्दुमत्याः रुचये न बभूव रुचिं नाजीजनदित्यर्थः लोको भिन्नरुचिरिति भावः ४४ सेति लोकान्तरे स्वर्गादावपि गीतकीर्तिम् आचारेण शुद्धयोरुभयोर्वंशयोर्मातापितृकुलयोः दीपम् प्रकाशकम् उभयवंशोत्पत्त्योभयपक्षवन्निर्वाहः शूरसेनानां देशानामधिपतिं सुषेणं नाम नृपतिम् उद्दि

प्रासादजालैर्जलवेणिरम्यां रेवां यदि प्रेक्षितुमस्ति कामः ४३ तस्याः प्रकामं प्रियदर्शनोपि न स क्षितीशो रुचये बभूव शरत्प्रमृष्टाम्बुधरोपरोधः शशीव पर्याप्तकलो नलिन्याः ४४ तां शूरसेनाधिपतिं सुषेणमुद्दिश्य लोकान्तरगीतकीर्तिं आचारशुद्धोभयवंशदीपं शुद्धान्तरक्ष्या जगदे कुमारी ४५ नीपान्वयः पार्थिव एष यज्वा गुणैर्यमाश्रित्य परस्परेण सिद्धाश्रमं शान्तमिवैत्य सत्त्वैर्नैसर्गिकोप्युत्ससृजे विरोधः ४६ यस्यात्मगेहे नयनाभिरामा कान्तिर्हिमांशोरिव सन्निविष्टा॥ ९ श्यामभिसन्धाय शुद्धान्तरक्ष्या अन्तःपुरपालिकया

कर्मण्यण् टिड्ढेति ङीप् सा कुमारी जगदे ४५ नीपेति यज्वा विधिवदिष्टवान् सुयजोर्ङ्वनिप् इति ङ्वनिप्प्रत्ययः एषः पार्थिवो नीप नामान्वयो यस्येति नीपान्वयः नीपवंशजः यं सुषेणम् आश्रित्य गुणैर्ज्ञानादिभिः शान्तम् प्रसन्नं सिद्धाश्रमम् ऋष्याश्रमम् एत्य प्राप्य सत्त्वैः गजसिंहादिभिः प्राणिभिरिव नैसर्गिकः स्वाभाविकोपि परस्परेण विरोधः उत्ससृजे त्यक्तः ४६ यस्येति हिमांशोः कान्तिः चन्द्रकिरण इव नयनानाम् अभिरामा यस्य ६२
सुषेणस्य कान्तिः शोभा आत्मगेहे स्वभवने सन्निविष्टा सङ्क्रान्ता अविषह्यम् विसोढुमशक्यं तेजः प्रतापस्तु हर्म्याग्रेषु संरूढा तृणाङ्कुरा येषां ते

शून्येष्वित्यर्थः रिपुमन्दिरेषु नगरेषु मन्दिरं नगरे गृहे इति विश्वः स्वजनाह्लादको हितवन्तपश्चेतिभावः ४७ यस्येति यस्य सुषेणस्य वारिविहारकाले जलक्रीडा समये अवरोधानाम् अन्तःपुराङ्गनानाम् स्तनेषु चन्दनानाम् मलयजानाम् प्रक्षालनाद्धेतोः कलिन्दो नाम शैलः तस्य कन्या यमुना कालिन्दी सूर्यतनया यमुना श्यमनस्वसेत्यमरः मथुरापां गङ्गाभावं सूचयत्यपि श्वः कालिन्दीतीरे मथुरा लवणासुरवधकाले शत्रुघ्नेन निर्मास्यत इति वक्ष्यति तत्कथमधुनाम पुरासम्भव इति चिन्त्यम् मथुरा मधुरा पुरीति शब्दभेदप्रकाशो यद्वा सान्येति मथुरानामास्य राज्ञो नगरीं गतापि गङ्गाया विप्रकृष्टापीत्यर्थः गङ्गाया भागीरथ्या ऊर्मिभिः संसक्तजलेव भाति धवलचन्दनसंसर्गात्प्रयागादन्यत्राप्यत्र गङ्गासङ्गे तेव भातीत्यर्थः सितासिते हि गङ्गायमुनेति घण्टापथः॥

हर्म्याग्रसंरूढतृणांकुरेषु तेजोविसह्यं रिपुमंदिरेषु ४७ यस्यावरोधस्तनचंदनानां प्रक्षालनाद्वारिविहारकाले कलिंदकन्या मथुरां गतापि गंगोर्मिसंसक्तजलेव भाति ४८ त्रसेन तार्क्ष्यात्किल कालियेन मणिं विसृष्टं यमुनौकसो यः वक्षस्थलव्यापिरुचं दधानः सकौस्तुभं ह्रेपयतीव कृष्णम् ४९ संभाव्य भर्तारममुं युवानं मृदुप्रवालोत्तरपुष्पशय्ये वृंदावने चैत्ररथादनूने निर्विश्यतां सुंदरि यौवनश्रीः ५० ॥

॥ ॥४९॥ त्रसेनेति तार्क्ष्याद्गरुडात्त्रस्तेन यमुना ओकस्स्थानं यस्य तेन कालियेन नामनागेन विसृष्टं किल अभयदाननिष्क्रयत्वेन दत्तं किलेत्यैतिह्ये वक्षस्स्थलव्यापिरुचं मणिं दधानो यः सुषेणः सकौस्तुभं कृष्णं विष्णुं ह्रेपयतीव व्रीडयतीव अतिहीनत्वादिना युगागमः कौस्तुभमणेरप्युत्कृष्टोयं मणिरिति भावः ४९ सम्भाव्येति युवानम् अमुं सुषेणम् भर्तारं संभाव्य मत्वा पतित्वेनाङ्गीकृत्येत्यर्थः मृदुप्रवालोत्तरा उपरि प्रसारितकोमलपल्लवा पुष्पशय्या यस्मिन् तच्चैत्ररथात् कुवेरोद्यानात् अनूने वृन्दावननामके उद्याने दे

॥ सुन्दरियौवनश्रीः फलं निर्विश्यतां भुज्यतां ५० ॥

र॰टी॰ अध्यास्येति॰ किञ्च प्रावृषिवर्षासु कान्तासु गोवर्द्धनस्याद्रेः कन्दरासु दरीषु दरीतु कन्दरो वास्त्री त्यमरः अम्भसः पृषतैर्विन्दुभिः उक्षितानि सिक्तानि शिलाभवं
स॰६ शैलेयं शिलाजतु शैलेयमिति यादवः यद्वा शिलापुष्पाख्य औषधिविशेषः कालानुसार्य्य वृद्धाश्म पुष्पशीतशिवानितु शैलेयमित्यमरः शिलाया ढक् इ
६३ त्यत्र शिलाया इति योगविभागादिवार्थे ढक् प्रत्ययः तद्गन्धवन्ति शैलेयगन्धानि शिलातलान्यध्यास्याधिष्ठाय कलापिनां बर्हिणां नृत्यं पश्य ५१ नृपमि
ति स्यादावर्त्तोम्भसाम्भ्रम इत्यमरः आवर्त्तमनोज्ञानाभिर्यस्याः सा इदं च नदीसाम्यार्थमुक्तम्॰ अन्यवधूरन्यपत्नी भवित्री भाविनी साकुमारी तं नृपं सा
गरगामिनी सागरं गन्त्री स्रोतोवहा नदी मार्गवशादुपेतम् प्राप्तम् महीधरम् पर्वतमिव व्यत्यगात् अतीत्य गता ५२ अथेति अथ भुजिष्या किङ्करी

अध्यास्य चांभः पृषतोक्षितानि शैलेयगंधानि शिलातलानि कलापिनां प्रावृषि पश्य नृत्यं कांतासु गोवर्द्धनकंदरासु ५१॥
नृपं तमावर्त्तमनोज्ञनाभिः सा व्यत्यगादन्यवधूर्भवित्री महीधरं मार्गवशादुपेतं स्रोतोवहा सागरगामिनीव ५२ अथांगदा
श्लिष्टभुजं भुजिष्या हेमांगदं नाम कलिंगनाथं आसेदुषीं सादितशत्रुपक्षं बालामबालेंदुमुखीं बभाषे ५३ असौ महेंद्राद्रि
समानसारः पतिर्महेंद्रस्य महोदधेश्च यस्य क्षरत्सैन्यगजच्छलेन यात्रासु यातीव पुरो महेंद्रः ५४॥ ९ सुनन्दा भुजिष्यः किङ्क

रीमत इति हलायुधः अङ्गदाश्लिष्टभुजं केयूरनद्धवाहं सादितशत्रुपक्षं विनाशितशत्रुवर्गम् हेमाङ्गदं नाम कलिङ्गनाथमासेदुषीम् आसन्नाम् राम॰
अबालेन्दुमुखीम् पूर्णेन्दुमुखीम् बालामिन्दुमतीमबभाषे ५३ असाविति महेन्द्राद्रेः समानसारः तुल्यबलः असौ हेमाङ्गदः महेन्द्रस्य नामकुल ६३
पर्वतस्य महोदधेश्च पतिः स्वामी महेंद्र महोदधी एवास्य गिरिजलदुर्गे इति भावः यस्य॰ यात्रासु क्षरन्तो मदस्राविणः सैन्यगजानां॰ छलेन महेन्द्रो म
हेन्द्राद्रिः पुरोऽग्रेयातीव अद्रिकल्पा अस्य गजा इत्यर्थः ५४॥

ज्याघातेति सुभुजश्चापभृताम् पुरोगो धनुर्धराग्रेसरो यो वन्दीकृतानां गृहीतानाम् प्रग्रहोपग्रहौ वन्द्यामित्यमरः रिपुश्रियां साञ्जनो बाष्पसेको य यास्ते कज्जलमिश्राश्रुसिक्ते इत्यर्थः पद्धती इव द्वे ज्याघातानां मौर्वीकिणानां रेखे राजी भुजाभ्यां बिभर्ति द्विवचनात्सव्यसाचित्वं गम्यते रिपुश्रियो भुजाभ्यामेवाहरणात् तद्धतरेखयोस्तत्पद्धतित्वेनोत्प्रेक्षा तयोः श्यामत्वात्साञ्जनाश्रुसेकोक्तिः ५५ यमिति आत्मनस्सद्मनि सुप्तं यं हेमाङ्गदं सद्मनि सन्निकृष्टः समीपस्थः अतएव प्रासादवातायनैः दृश्यवीचिः मन्द्रेण गम्भीरेण ध्वनिना त्याजितो विसर्जितः यामस्य तूर्यः प्रहरावसानसूचकं वाद्यं येन स तथोक्तः मन्द्रस्तु गम्भीर इत्यमरः द्वौ यामप्रहरौ समाविति चामरः अर्णव एव प्रबोधयति अर्णवस्यैव तूर्यकार्यकारित्वात्तद्वैयर्थ्यमित्यर्थः समुद्रस्यापि से

ज्याघातलेखेसुभुजोभुजाभ्यांविभर्तियश्चापभृतांपुरोगः रिपुश्रियांसांजनवाष्पसेकेवंदीकृतानामिवपद्धतीद्वे ५५ य
मात्मनःसद्मनिसन्निकृष्टोमंद्रध्वनित्याजितयामतूर्यः प्रासादवातायनदृश्यवीचिःप्रबोधयत्यर्णवएवसुप्तं ५६ अनेन
सार्द्धंविहराम्बुराशेस्तीरेषुतालीवनमर्मरेषु द्वीपांतरानीतलवंगपुष्पैरपाकृतस्वेदलवामरुद्भिः ५७ प्रलोभिताप्याकृतिलो
भनीयाविदर्भराजावरजातयैवं तस्मादपावर्ततदूरकृष्टानीत्येवलक्ष्मीःप्रतिकूलदैवात् ५८ ॥ (१ व्यः किमन्येषामितिभावः ५६ ॥

अनेनेति अनेन राज्ञा सार्द्धं तालीवनैर्मर्मरेषु मर्मरेति घनं तु अथ मर्मरः स्वनिते शुष्कपर्णानामित्यमरवचनाद्गुणपरस्यापि मर्मरशब्दस्य गुणिपरत्वम्प्रयोगादवज्ञेयम् अम्बुराशेस्तीरेषु द्वीपान्तरेभ्य आनीतानि लवङ्गपुष्पाणि देवकुसुमानि येषां ते लवङ्गं देवकुसुममित्यमरः मरुद्भिर्वातैरपाकृताः प्रशमिताः स्वेदस्य लवाः विन्दवो यस्याः सा तथाभूता सती विहर क्रीड ५७ प्रलोभितेति आकृत्या रूपेण लोभनीया आकर्षणीया ननु वर्णनामात्रेणेत्यर्थः विदर्भराजावरजा भोजानुजा इन्दुमती तया सुनन्दया एवं प्रलोभिता प्रचोदितापि नीत्या पुरुषकारेण दूरकृष्टा दूरमानीता लक्ष्मीः प्रतिकूलं दैवं यस्य ॥

र॰टी॰ तस्मात्तुंस इव तस्माद्धेमाङ्गदात्पावर्ततप्रतिनिवृत्ता ५८ अथेति अथ द्वारे नियुक्ता दौवारिकी सुनन्दा तत्र नियुक्त इति ठक्प्रत्ययः द्वारादीनां चेत्यैजागमः

स॰६ आकारेण देवसरूपं देवतुल्यम् उरगाख्यस्य पुरस्य पाराड्य देशे कान्यकुब्जनीरवर्त्तिनागपुरनाथमेत्य प्राप्य हे चकोराक्षि इतोऽवलोकयपूर्वानुशिष्टा

६४ नु पूर्वमुक्तां भोजस्य राज्ञो गोत्रापत्यं स्त्रियं भोज्याम् इन्दुमतीम् क्रौड्यादिभ्यश्चेत्यत्र भोजात् क्षत्रियादिसुपसङ्ख्यानात् ष्यङ् प्रत्ययः षङश्चापिति

चाप् निजगाद इतो वलोकयेति पूर्वमुक्त्वा पश्चादुक्तवंनि जगादेत्यर्थः ५९ पाण्ड्य इति अंसयोरर्पिता लम्बं तद्विति लम्बा हारा यस्य सः हरिचन्दनेन गो

शीर्षाख्येनचन्दनं तैलपर्णी तु गोशीर्षं हरिचन्दनमित्यमरः कृताङ्गरागः सिद्धानुलेपनोऽयम् पाण्डूनां जनपदानां राजा पाण्ड्यः पाण्डो र्जनपदश

अथोरगाख्यस्यपुरस्य नाथं दौवारिकी देवसरूपमेत्य इतश्चकोराक्षि विलोकयेति पूर्वानुशिष्टां निजगाद भोज्याम् ५९॥

पाण्ड्यो यमंसार्पितलंबहारः कॢप्ताङ्गरागो हरिचंदनेन आभाति बालातपरक्तसानुः सनिर्झरोद्गार इवाद्रिराजः ६० विंध्य

स्य संस्तंभयिता महाद्रेर्निः शेषपीतोज्झितसिंधुराजः प्रीत्याश्वमेधावभृथार्द्रमूर्त्तेः सौस्नातिको यस्य भवत्यगस्त्यः ६१॥

ब्दान् क्षत्रियात् ड्यराबक्तव्य इति ड्यण् प्रत्ययः तस्य राजन्यपत्यवदिति वचनात् बालातपेन रक्ता अरुणाः सानवो यस्य स निर्झरोद्गारः प्रवाहस्तेन

नसहितः प्रवाहो निर्झर इत्यमरः अद्रिराज इवाभाति ६० विन्ध्यस्येति विन्ध्यस्य नाम्नो महाद्रेः तपनमार्गनिरोधाय वर्द्धमानस्येति शेषः सं ६४

स्तम्भयिता निवारयिता निःशेषं पीतः उज्झितः पुनस्त्यक्तः सिन्धुराजः समुद्रो येन सः अगस्त्यः अश्वमेधस्याऽवभृथे दीक्षान्तकर्मणि दी

क्षान्तोऽवभृथो यज्ञ इत्यमरः आर्द्रमूर्त्तेः स्नातस्येत्यर्थः यस्य पाण्ड्यस्य प्रीत्या स्नेहेन नतु दाक्षिण्येन सुस्नातम् पृच्छतीति सौस्नाति

॥ को भवति पृच्छतौ सुस्नातादिभ्य इत्युपसङ्ख्यानाट्ठक् ६१॥

Digitized by Sarayu Foundation Trust, Delhi and eGangotri

अस्त्रमिति पुरा पूर्वं जनस्थानस्य खरालयस्य विमर्दशङ्की दृप्तः उद्धतः लङ्काधिपतिः रावणः दुरापं दुर्लभम् अस्त्रम् ब्रह्मशिरो नामकं हरादाप्तवता
येन पाण्ड्येन सन्धाय इन्द्रलोकावजयाय इन्द्रलोकं जेतुम्प्रतस्थे· इन्द्रविजयिनो रावणस्यापि विजेतेत्यर्थः ६२ अनेनेति महाकुलीनेन· महाकु-
ले जातेन महाकुलादञ्खञाविति खञ्प्रत्ययः अनेन पाण्ड्येन पाणौ त्वदीये विधिवद्यथाशास्त्रं गृहीते सति· गुर्वी गुरुः वोतो गुणवचनादिति ङी-
ष् महीव रत्नैरनुविद्धो व्याप्तोऽर्णव एव मेखला यस्यास्तस्या इदं विशेषणम् महाभिरनुमत्यां च योज्यम् दक्षिणस्या दिशः सपत्नी भव अनेन सपत्न्य-
न्तराभावो ध्वन्यते ६३ ताम्बूलेति ताम्बूलवल्लीभिर्नागवल्लीभिः परिणद्धाः परिरब्धाः पूगाः क्रमुकाः यासु ताम्बूलवल्लीमेखलाखङ्गबन्धे स्यात्काञ्ची शैल-

अस्त्रं हरादाप्तवता दुरापं येनेन्द्रलोकावजयाय दृप्तः पुरा जनस्थानविमर्दशङ्की संधाय लङ्काधिपतिः प्रतस्थे ६२ अनेन पा-
णौ विधिवद्गृहीते महाकुलीनेन महीव गुर्वी रत्नानुविद्धार्णवमेखलाया दिशः सपत्नी भव दक्षिणस्याः ६३ ताम्बूलव-
ल्लीपरिणद्धपूगास्वेलालतालिङ्गितचन्दनासु तमालपत्रास्तरणासु रन्तुं प्रसीद शश्वन्मलयस्थलीषु ६४ इन्दीवरश्याम-
तनुर्नृपोऽसौ त्वं रोचनागौरशरीरयष्टिः अन्योन्यशोभापरिवृद्धये वां योगस्तडित्तोयदयोरिवास्तु ६५ ॥ ॥ ॥

नितम्बयोः नागवल्ल्यपीति घोरटा तु पूगः क्रमुक इति चामरः एलालताभिरालिङ्गिताश्चन्दना मलयजा यासु तासु गन्धसारो मलयजो भद्रश्रीश्चन्द-
नोऽस्त्रियामित्यमरः तमालस्य तापिच्छस्य पत्राण्येवास्तरणानि यासु तासु कालस्कन्धस्तमालः स्यात्तापिच्छोऽपीत्यमरः मलयस्थलीषु शश्वत् मुहुः सदा
वा रन्तुं प्रसीद अनुकूला भव ६४ इन्दीवरेति· असौ नृप इन्दीवरश्यामतनुः त्वं रोचना गोरोचनेव गौरी शरीरयष्टिर्यस्याः सा· अतस्तडित्तोयदयोः
विद्युन्मेघयोरिव वां युवयोर्योगः समागमोऽन्योन्यशोभायाः परिवृद्धयेऽस्तु ६५ ॥ ॥

र॰टी॰ स्वसुरिति विदर्भाधिपतेः भोजस्य स्वसुरिन्दुमत्याः चेतसि तदीयः सुनन्दासम्बन्धी उपदेशो वाक्यं दिवाकरस्यादर्शनेन बद्धकोशे मुकुलिते अरविन्दे नक्षत्रना
स॰६ नाथांशुः चन्द्रकिरण इवान्तरमवकाशं न लेभे ६६ सञ्चारिणीति पतिंवरा सा इन्दुमती रात्रौ सञ्चारिणी दीपशिखेव यं यं भूपालं व्यतीयाय अती
६५ त्यगता स स भूमिपालः स सर्व इत्यर्थः नित्यवीप्सयोरिति वीप्सायां द्विर्वचनम् नरेन्द्रमार्गे राजपथे अट्टाख्यो गृहभेद इव स्याद्दृः क्षौममस्त्रियामित्य
मरः विवर्णभावं विच्छायत्वम् अट्टस्तु तमोवृतत्वम् प्रपेदे ६७ तस्यामिति तस्याम् इन्दुमत्याम् उपस्थितायाम् आसन्नायां सत्यां रघोः सूनुरजो

स्वसुर्विदर्भाधिपतेस्तदीयो लेभेंतरं चेतसि नोपदेशः दिवाकरादर्शनबद्धकोशे नक्षत्रनाथांशुरिवारविंदे ६६ संचा
रिणी दीपशिखेव रात्रौ यंयं व्यतीयाय पतिंवरा सा नरेंद्रमार्गाट्ट इव प्रपेदे विवर्णभावं स स भूमिपालः ६७ तस्यां रघोः
सूनुरुपस्थितायां वृणीत मां नेति समाकुलोभूत् वामेतरः संशयमस्य बाहुः केयूरबंधोच्छ्वसितैर्नुनोद ६८ तं प्राप्य सर्वा
वयवानवद्यं व्यावर्तता न्योपगमात्कुमारी नहि प्रफुल्लं सहकारमेत्य वृक्षांतरं कांक्षति षट्पदाली ६९॥ ॥ ॥

मां वृणीत न वेति समाकुलः संशयितोऽभूत् अथास्याजस्य वामेतरो दक्षिणो बाहुः केयूरं बध्यते अत्रेति केयूरबन्धः अङ्गदस्थानं तस्योच्छ्वसितैः
स्फुरणैः संशयं नुनोद ६८ तमिति कुमारी सर्वेष्ववयवेषु अनवद्यम् अदोषं तम् अजम् प्राप्य अन्योपगमात् राजान्तरोपगमात् व्यावर्तत नि ६५
वृत्ता तथाहि षट्पदाली भृङ्गावलिः प्रफुल्लतीति प्रफुल्लम् विकसितम् पुष्पितमित्यर्थः फुल्लतेस्तु प्रफुल्लमिति पठितव्यम् अनुपसर्गादिति
निषेधादित्युभयस्यापि न क्वचि ——— चिदनुपपत्तिरित्युक्तम्प्राक् सहकारं चूतविशेषमेत्य आम्रश्चूतो रसालोसौ सहकारोऽतिसौरभः
इत्यमरः वृक्षांतरं न काङ्क्षति न हि सर्वोत्कृष्टवस्तुलाभेपि वस्त्वन्तरस्याभिलाषस्स्यादित्यर्थः ६९॥

तस्मिन्निति तस्मिन्नजे समावेशिता सङ्क्रामिता चित्तवृत्तिर्यस्याः ताम् इन्दोः प्रभेव प्रभा यस्यास्ताम् आह्लादकत्वादिन्दुसाम्याम् इन्दुमतीमवेक्ष्य अनुक्रम वाक्यपौर्वापर्य्याऽभिज्ञा सुनन्दा इदम् वक्ष्यमाणं सविस्तरं सप्रपञ्चम् प्रथनेवावशब्द इति घञो निषेधात् ऋदोरप् इत्यप्प्रत्ययः स तु शब्दस्य विस्तर इत्यमरः वाक्यं वक्तुम् प्रचक्रमे ७० इक्ष्वाक्विति इक्ष्वाकोः मनुपुत्रस्य वंश्यः वंशभवः नृपाणां ककुदं श्रेष्ठः ककुच्च ककुदं श्रेष्ठवृषांसे राजलक्ष्मणीति विश्वः आहितलक्षणः प्रख्यातगुणः गुणैः प्रतीते तु कृतलक्षणाहितलक्षणौ विस्समरः ककुदि वृषांसे तिष्ठतीति ककुत्स्थः इति प्रसिद्धः कश्चिद्राजाऽभूत् यतः ककुत्स्थादारभ्य उन्नतेच्छाः महाशयाः महोक्ष सुमहाशय इत्यमरः उत्तरकोसलेन्द्रा राजानो दिलीपादयः श्लाघ्यं प्रशस्तं ककुत्स्थस्यापत्यं पुमान्

तस्मिन समावेशितचित्तवृत्तिमिंदुप्रभामिंदुमतीमवेक्ष्य प्रचक्रमे वक्तुमनुक्रमज्ञा सविस्तरं वाक्यमिदं सुनंदा ७० इ
क्ष्वाकुवंश्यः ककुदं नृपाणां ककुत्स्थ इत्याहितलक्षणोऽभूत् काकुत्स्थशब्दं यत उन्नतेच्छाः श्लाघ्यं दधत्युत्तरकोशलेंद्राः ७१
महेंद्रमास्थाय महोक्षरूपं यः संयति प्राप्तपिनाकिलीलः चकार बाणैरसुरांगनानां गंडस्थलीः प्रोषितपत्रलेखाः ७२ ॥

काकुत्स्थ इति शब्दं संज्ञां दधति बिभ्रति तन्नामसंस्पर्शोऽपि वंशस्यैव निकर इति भावः पुरा किल पुरञ्जयो नाम साक्षाद्भगवतो विष्णोरंशः अवतारः कश्चिदैक्ष्वाको राजा देवैः सह समयबद्धेन देवासुरयुद्धे महोक्षरूपधारिणो महेन्द्रस्य ककुदि स्थित्वा पिनाकिलीलया निखिलमसुरकुलं निहत्य ककुत्स्थसंज्ञां लेभे इति पौराणिकी कथानुसन्धेया वक्ष्यते चायमेवार्थ उत्तरश्लोके ७१ महेन्द्रमिति यः ककुत्स्थः संयति युद्धे महान् उक्षा महोक्षः अचतुरेति निपातः तस्य रूपमिव रूपं यस्य तं महेन्द्रमास्थायारुह्य अत एव प्राप्तपिनाकिनः ईश्वरलीलायेन स तथोक्तः सन् बाणैः असुराङ्गनानां गण्डस्थलीः प्रोषितपत्रलेखा निवृत्तपत्ररचनाश्चकार तद्भर्तॄनसुरानवधीदित्यर्थः नहि विधवाः प्रसाधयन्त इति ७२

ऐरावतेति यः ककुत्स्थ ऐरावतस्य स्वर्गजस्यास्फालनेन ताडनेन विश्लथं शिथिलम् अङ्गदम् ऐन्द्रमङ्गदेन स्वकीयेन सङ्घट्टयन् सङ्घर्षन् स्वाम ग्र्यां श्रेष्ठां मूर्तिमुपेयुषोपि प्राप्तस्यापि गोत्रभिदः इन्द्रस्य अर्द्धमानस्यार्द्धमासनम् अर्द्धन्नपुंसकमिति समासः अधितष्ठौ अधिष्ठितवान् स्यादिष्वभ्या सेन चाभ्यासस्येति व्यवायेपि षत्वम् न केवलं महोक्षरूपधारिण एवेन्द्रस्य ककुदमारुरुक्षत् किन्तु निजरूपधारिणोपीन्द्रस्यार्द्धासनमित्यपि शब्दार्थः अथवार्द्धासनमपीत्यपेरन्वयः ७३ जात इति उरुकीर्तिः महायशाः कुलप्रदीपको दिलीप इति नृपतिस्तस्य कुले जातः किल यो दिलीपः शक्राभ्यसूया यानिवृत्तये न त्वशक्त्येति भावः एकेनोनाः शतं क्रतवो यस्य स एकोनशतक्रतुस्तस्य भावे तत्त्वे अतिष्ठत् इन्द्रप्रीतये शततमं क्रतुमवशेषितवानित्यर्थः

ऐरावतास्फालनविश्लथं यः संघट्टयन्नंगदमंगदेन । उपेयुषः स्वामपि मूर्तिमग्र्यामर्द्धासनं गोत्रभिदोधितष्ठौ ७३ जातः कु
ले तस्य किलोरुकीर्तिः कुलप्रदीपो नृपतिर्दिलीपः । अतिष्ठदेकोनशतक्रतुत्वे शक्राभ्यसूयाविनिवृत्तये यः ७४ यस्मिन् म
हीं शासति वाणिनीनां निद्रां विहारार्द्धपथे गतानां । वातोपि नास्रंसयदंशुकानि को लंबयेदाभरणाय हस्तं ७५ पुत्रो रघु
स्तस्य पदं प्रशास्ति महाक्रतोर्विश्वजितः प्रयोक्ता । चतुर्दिगावर्जितसंभृतां यो मृत्पात्रशेषामकरोद्विभूतिं ७६ ॥ ॥

॥७४॥ यस्मिन्निति यस्मिन् दिलीपे महीं शासति सति विहरत्यत्रेति विहारः क्रीडास्थानं तस्यार्द्धपथे निद्रां गतानां वाणिनीनां मत्ताङ्गनानाम् वाणिनी नर्त्तकी मत्ता विदग्धवनितासु चेति विश्वः वाणिन्यो नर्त्तकी मत्तेत्यमरश्च अंशुकानि वस्त्राणि वातोपि नास्रंसयन् नाकम्पयत् आहरणाय हर्तुं को हस्तं लम्बयेत् तस्याज्ञासिद्धत्वादकुतोभयसञ्चारास्तत्प्रजा इत्यर्थः अर्द्धश्चासौ पन्थाश्चेति विग्रहः समप्रविभागे प्रमाणाभावान्नैकदेशिस मासः ७५ पुत्रेति विश्वजितो नाम महाक्रतोः प्रयोक्ता अनुष्ठाता तस्य दिलीपस्य पुत्रो रघुः पदं पैतृकमेव प्रशास्ति पालयति यो रघुश्चतसृभ्यो

रिण्य आवर्जितात् हृता सम्भृता सम्यग्वर्द्धिता च या तां चतुर्दिग्वर्जितसम्भृतां विभूतिं सम्पदं मृत्पात्रमेव शेषो यस्यास्तामकरोत् विश्वजिद्यागस्य सर्वस्वदक्षिणाकत्वादित्यर्थः ७६ आरूढमिति किञ्च अद्रीनारूढम् उदधीन्वितीर्णम् अवगाढं सकलभूगोलव्यापकमित्यर्थः भुजङ्गमानां वसतिम् पातालम्प्रविष्टम् ऊर्ध्वं स्वर्गादिकं गतं व्याप्तम् इत्थं सर्वदिग्व्यापीत्यर्थः अनुबध्नातीत्यनुबन्धि च अविच्छेदकालत्रयव्यापकं चेत्यर्थः अतएवं वम्भूतं यस्य यशः इयत्तया देशतः कालतो वा केनचिन्मानेन परिच्छेत्तुम् परिमातुं नालं न शक्यम् ७७ असाविति असावजाख्यः कुमारः त्रिविष्टपस्य स्वर्गस्य पतिम् इन्द्रं जयन्त इव जयन्तः पाकशासनिरित्यमरः तं रघुम् अनुजातः तस्माज्जात इत्यर्थः तज्जाते पितरनुजातो भवति जन्यज

आरूढमद्रीनुदधीन्वितीर्णं भुजंगमानां वसतिं प्रविष्टं। ऊर्ध्वं गतं यस्य न चानुबंधि यशः परिच्छेत्तुमियत्तयालं ७७ असौ कुमारस्तमजोऽनुजातः त्रिविष्टपस्येव पतिं जयंतः गुर्वीं धुरं यो भुवनस्य पित्रा धुर्येण दम्यः सदृशीं बिभर्ति ७८ कुलेन कांत्या वयसा नवेन गुणैश्च तैस्तैर्विनयप्रधानैः त्वमात्मनस्तुल्यममुं वृणीष्व रत्नं समागच्छतु कांचनेन ७९ ततः सुनंदावचनावसाने लज्जां तनूकृत्य नरेंद्रकन्या॥ ८०

नकयोरानन्तर्यात् गत्यर्थाकर्मकश्लिषशीङ्स्थासवसजनरुहजीर्यतिभ्यश्चेति क्तः सोपसृष्टत्वात् सकर्मकत्वम् आह चात्रैव सूत्रे वृत्तिकारः श्लिषादयस्सोपसृष्टाः सकर्मका भवन्तीति दम्यः शिक्षणीयावस्थो योऽजः गुर्वीं भुवनस्य धुरं धुर्येण धुरंधरेण चिरनिरूढेन पित्रा सदृशीं तुल्यां यथा तथा बिभर्ति यथा कश्चिद्दम्यतरोऽपि धुर्येण महोक्षेण समं वहतीत्युपमालङ्कारो ध्वन्यते दम्यवत्सतरौ समावित्यमरः ७८ कुलेनेति कुलेन कान्त्या लावण्येन नवेन वयसा यौवनेन विनयः प्रधानं येषां तैस्तैर्गुणैः श्रुतशीलादिभिश्च आत्मनस्तुल्यम् स्वानुरूपममुमजं त्वं वृणीष्व किं बहुना रत्नं काञ्चनेन समागच्छतु सङ्गच्छताम् प्रार्थनायां लोट् रत्नकाञ्चनयोरिव

सत्त्वमनुरूपत्वात् युवयोः समागमः प्रार्थ्यत इत्यर्थः ७९ ततः इति ततः सुनन्दावचनस्यावसाने

Digitized by Sarayu Foundation Trust, Delhi and eGangotri

अन्तरे नरेन्द्रकन्या इन्दुमती· लज्जां तनुं कृत्य· सङ्कोच्य· प्रसादेन· मनःप्रसादेनामलया प्रसन्नया दृष्ट्या: सम्बरणस्य स्रजा स्वयम्वरणार्थं स्रजेव
कुमारम् अजं प्रत्यग्रहीत् सम्यक् सानुरागमपश्यदित्यर्थः ८० सेति सा कुमारी यूनि तस्मिन्नजे ऽभिलाषवन्धं अनुरागग्रन्थिं शालीनतया ऽधृ
ष्टतया स्याद् धृष्टस्तु शालीन इत्यमरः शालीनकौपीने अधृष्टाकार्ययोरिति निपातः वक्तुं न शशाक तथापि अरालकेश्याः सो ऽभिलाषवन्धो
रोमाञ्चलक्ष्येण पुलकव्याजेन व्याजो ऽपदेशो लक्ष्यं चेत्यमरः गात्रयष्टिम् भित्वा निराक्रामत् सात्विका विर्भावलिङ्गेन प्रकाशित इत्यर्थः
८१ तथेति सख्यामिन्दुमत्यां तथागतायां तथाभूतायां दृष्टानुरागायां सत्यामित्यर्थः सखी सहचरी· सख्यशिश्वीति भाषायामिति निपातनात्

दृष्ट्या प्रसादामलया कुमारं प्रत्यग्रहीत् संवरणस्रजेव ८० सा यूनि तस्मिन्नभिलाषवंधं शशाक शालीनतया न
वक्तुं रोमांचलक्ष्येण स गात्रयष्टिं भित्वा निराक्रामदरालकेश्याः ८१ तथागतायां परिहासपूर्वं सख्यां सखी वेत्रधरा
वभाषे आर्ये व्रजामो ऽन्यत इत्यथैनां वधूरसूयाकुटिलं ददर्श ८२ सा चूर्णगौरं रघुनंदनस्य धात्री कराभ्यां करभोपमो
रूः आसंजयामास यथाप्रदेशं कंठे गुणं मूर्तमिवानुरागं ८३॥

॥ ङीष् वेत्रभृत् सुनन्दा हे आर्ये· पूज्ये· अन्यतो ऽन्यस्य प्रति व्रजा
म इति परिहासपूर्वमावभाषे अथ वधूरिन्दुमती एनां सुनन्दाम् असूयया रोषेण कुटिलं ददर्श अन्यगमनस्यासह्यत्वादिति भावः ८२ से
ति करभः करप्रदेशविशेषः मणिवन्धादा कनिष्ठात्करस्य करभो वहिरित्यमरः करभ उपमा ययोस्तावूरू यस्याः सा करभोरूः उरूत्तरपदादौ
पम्ये इत्यूङ् प्रत्ययः सा कुमारी चूर्णेन मङ्गलचूर्णेन गौरं लोहितं गुणं स्रजं· मूर्तम् मूर्तिमन्त मनुरागमिव· धात्र्या उपमातुः सुनन्दायाः करा ६७
भ्यां रघुनन्दनस्याजस्य कण्ठे यथाप्रदेशं यथास्थानम् आसंजयामास आसक्तं कारयामास न तु स्वयमाससञ्ज अनौचित्यात् ८३ ॥

तयेति वरेण्यः वरणीय उत्कृष्टः [illegible] सोऽजः मङ्गलपुष्पमय्या मधूकादिकुसुमप्रकृतया विशालवक्षस्थले लम्बया लम्बमानया स्रजा विदर्भराजावरजाम् इन्दुमतीं कण्ठार्पितौ बाहू एव पाशौ यया ताम् अमंस्त मन्यते र्लुङ् बाहुपाशकल्पसुखम् अन्वभूदित्यर्थः ८४ शशिनमिति तत्र स्वयंवरे समगुणयोः तुल्यगुणयोः इन्दुमतीरघुनन्दनयोः योगेन प्रीतिर्येषां ते समगुणयोगप्रीतयः पौराः पुरे भवाः इयम् अजसङ्गतेन्दुमती मेघैर्मुक्तं शशिनं शरच्चन्द्रमुपगता कौमुदी अनुरूपं सदृशं जलनिधिम् अवतीर्णा प्रविष्टा जह्नुकन्या भागीरथी तत्सदृशीत्यर्थः इत्येवं नृ‑

तया स्रजा मंगलपुष्पमय्या विशालवक्षस्थललंबया सः। अमंस्त कंठार्पितबाहुपाशां विदर्भराजावरजां वरेण्यः ८४
शशिनमुपगतेयं कौमुदी मेघमुक्तं जलनिधिमनुरूपं जह्नुकन्यावतीर्णा। इति समगुणयोगप्रीतयस्तत्र पौराः श्रवण
कटु नृपाणामेकवाक्यं विवव्रुः ८५ प्रमुदितवरपक्षमेकतस्तत्क्षितिपतिमंडलमन्यतो वितानं। उषसि सर इव प्रफुल्ल
पद्मं कुमुदवनप्रतिपन्ननिद्रमासीत् ८६ इति श्रीरघुवंशे महाकाव्ये कालिदासकृतौ स्वयंवरवर्णनं नाम षष्ठः सर्गः ६॥

पाणां श्रवणयोः कटु परुषम् एकम् अविसंवादि वाक्यम् एकवाक्यं विवव्रुः मालिनी छन्दः ८५ प्रमुदितेति एकत एकत्र प्रमुदितो हृष्टो वरस्य जामातुः पक्षो वर्गो यस्य तत्तथोक्तम् अन्यतोऽन्यत्र वितानं शून्यम् भग्नाशयत्वादप्रहृष्टमित्यर्थः तत् क्षितिपतिमण्डलम् उषसि प्रभाते प्रफुल्लपद्मं कुमुदवने प्रतिपन्नं तन्द्राप्राप्तनिमीलनं सर इव सरस्तुल्यमासीत् पुष्पिताग्रा छन्दः ८६ इति श्रीपदवाक्यप्रमाणपारावारपारीणश्रीमहोपाध्यायकोलाचलमल्लिनाथसूरिविरचितायां सञ्जीविनीसमाख्यायां रघुवंशटीकायां षष्ठस्सर्गः ६ ॥ ॥ ॥

Digitized by Sarayu Foundation Trust, Delhi and eGangotri

श्रीगणेशायनमः भजेमहिनिपीयैकं मुहुरन्यं पयोधरम् मार्गन्तं बालमालोक्यांश्वासयन्तौ हिदम्पती १ अथेति अथ विदर्भनाथो भोजः सदृशेनो
पयन्त्रा वरेण युक्तां नाम अत एव सा क्षात्मत्यक्षं साक्षात्स्य सतुल्ययोरित्यमरः स्कंदेन युक्तां देवसेनामिव देवसेनानामदेवपुत्री स्कंन्दपत्नी नामि
वस्थितांस्वसारंभ गिनीमादाय गृहीत्वा पुरप्रवेशाभिमुखो बभूव उपजातिश्छन्दस्सर्गेस्मिन् १ सेनेति भोजस्य राज्ञो गोत्रापत्यं स्त्री भोज्या नाम
मिन्दुमतीम् प्रतिव्यर्थमनोरथत्वाद्दूयेषु आकृतिषु वेशेषु च नेपथ्येषु साभ्यसूयाद्दृष्ट्येति निन्दन्तः किञ्च विभाते प्रातः येग्रहाः चन्द्रादयस्त्वम
न्द्रभासः क्षीणकान्तयः पृथिवीक्षितो नृपा अपि सेनानिवेशान् शिविरात्तिजग्मुः २ ननु क्रुद्धाश्चेद्युद्ध्यन्तां तत्राह सान्निध्येति तत्रस्वयम्वरमा

श्रीगणेशायनमः अथोपयन्त्रा सदृशेन युक्तां स्कंदेन साक्षादिव देवसेनां स्वसारमादाय विदर्भनाथः पुरप्रवेशाभिमु
खो बभूव १ सेनानिवेशान्पृथिवीक्षितोपि जग्मुर्विभातग्रहमन्दभासः भोज्यां प्रति व्यर्थमनोरथत्वाद्रूपेषु वेशेषु च साभ्य
सूयाः २ सान्निध्ययोगात्किल तत्र शच्याः स्वयंवरक्षोभकृतामभावः काकुत्स्थमुद्दिश्य समत्सरोपि शशाम तेन क्षितिपाल
लोकः ३ तावत्प्रकीर्णाभिनवोपचारमिन्द्रायुधद्योतिततोरणांकं॥ १ त्रे शच्या इन्द्राण्याः सन्निधिरेव सान्निध्यं तस्य योगात्सद्भा
वाद्धेतोः स्वयम्वरस्य क्षोभकृतां विघ्नकारिणाम् अभावः किल किलेति स्वयम्वरविघातकाः शच्या विनाश्यन्त इत्यागमसूचनार्थः तेन हेतुना
काकुत्स्थम् अजमुद्दिश्य समत्सरोपि क्षितिपाललोकः शशाम नाक्षुभ्यत् ३ तावदिति यावत्तावच्च साकल्य इत्यमरः तावत्प्रकीर्णाः साकल्ये ६८
ल्येन प्रसारिताः अभिनवाः उपचाराः पुष्पप्रकारादयो यस्य तं तथोक्तम् इन्द्रायुधानीव द्योतितानि प्रकाशितानि तोरणान्यङ्कः काञ्चिन्हा
नि यस्य तं ध्वजानां छाया ध्वजच्छायम् छाया बाहुल्ये इति नपुंसकत्वम् तेन निवारितमुष्णमातपो यस्य तं॥ ॥ ॥

राजमार्गं सवरो वोढा वध्वा सह प्राप विवेश ४ ततइति ततः चामीकरजालवत्सु सौवर्णगवाक्षयुक्तेषु सौधेषु तस्य अजस्य आलोकने तत्परा
णाम् आसक्तानाम् पुरसुन्दरीणाम् इत्थं वक्ष्यमाणप्रकाराणि त्यक्तान्यकार्याणि केशबंधनादीनि येषु तानि विचेष्टितानि व्यापारा बभूवुः ५ ता
न्येवाह पञ्चभिः श्लोकैः आलोकेति सहसा आलोकमार्गं गवाक्षपथं व्रजन्त्या कयाचित् कामिन्या उद्वेष्टनवान्तमाल्यः उद्वेष्टनेन द्रुतगतिवि
शेषाद् उन्मुक्तबन्धविश्लेषणेन उद्गीर्णमाल्य बन्धनः अत एव वान्तमाल्यः करेण रुद्धोऽपि गृहीतोऽपि च केशपाशः केशकलापः पाशः पक्षश्च हस्त
श्च कलापार्थाः कचात्परे इत्यमरः तावदालोकमार्गप्राप्तिपर्यन्तं बद्धुं बन्धनार्थं न सम्भावितो न चिन्तितः ६ प्रसाधिकेति काचित् कयाचित्प्रसा

वरः स वध्वा सह राजमार्गं प्राप ध्वजच्छायनिवारितोष्णम् ४ ततस्तदालोकनतत्पराणां सौधेषु चामीकरजालवत्सु बभू
वुरित्थं पुरसुंदरीणां त्यक्तान्यकार्याणि विचेष्टितानि ५ आलोकमार्गं सहसा व्रजंत्या कयाचिदुद्वेष्टनवांतमाल्यः बद्धुं
न संभावित एव तावत्करेण रुद्धोऽपि हि केशपाशः ६ प्रसाधिकालंबितमग्रपादमाक्षिप्य काचिद्द्रवरागमेव उत्सृष्ट
लीलागतिरागवाक्षादलक्तकांकां पदवीं ततान ७ विलोचनं दक्षिणमंजनेन संभाव्य तद्वंचितवामनेत्रा ॥ ॥

धिकया अलंकर्त्र्या लम्बितं रञ्जनार्थं धृतं द्रवरागमेव आर्द्रालक्तकमेव अग्रं चासौ पादश्चेत्यग्रपाद इति समानाधिकरणकर्मधारयसमासः ह
स्ताग्रे हस्ताग्रयाग्रण्यग्रणीनां भेदाभेदाविति वामनः तमाक्षिप्याकृष्य उत्सृष्टलीलागतिः त्यक्तमन्दगमना सती आगवाक्षात् गवाक्षपर्यन्तं पदवी
मलक्तकांकां लाक्षारागचिन्हां ततान चकार ७ विलोचनमिति अपरा स्त्री विलोचनं दक्षिणं वामेतरम् अञ्जनेन सम्भाव्य अलंकृत्य सम्भ्रमादिति भा
वः तद्वञ्चितं तेनाञ्जनेन वर्जितं वामनेत्रं यस्याः सा तथैव शलाकामञ्जनकलिकां वहन्ती सती वातायनसन्निकर्षं गवाक्षसमीपं ययौ ॥

Digitized by Sarayu Foundation Trust, Delhi and eGangotri

दक्षिणग्रहणं संभ्रमात् व्युत्क्रमद्योतनार्थं सव्यमक्षि पूर्वं मनुष्या अञ्जत इति श्रुतेः ८ जालेति अन्या स्त्री जालान्तरप्रेषितदृष्टिः सती प्रस्थानेन गमनेन भि
न्नां त्रुटितां नीवीं वसनग्रन्थिं नीवी परिपणो ग्रन्थिः स्त्रीणां जघनवाससः इति विश्वः न ववन्ध किन्तु नाभिप्रविष्टा आभरणानां कङ्कणादीनां प्रभा यस्य ते
न प्रभेव नाभे राभरणमभूदिति भावः हस्तेन वासोऽवलम्ब्य गृहीत्वा तस्थौ ९ अर्द्धेति सत्वरं शीघ्रमुत्थितायाः कस्याश्चिदर्द्धमाचिता मणिभिरर्द्धगुम्फि
ता पदे दुर्निमिते संभ्रमादुत्क्षिप्ते डुमिञ् प्रक्षेपणे इति धातोः कर्मणि क्तः पदे पदे प्रतिपदम् वीप्सायां द्विर्भावः गलन्ती गलद्रत्ना रसना मेखला तदानीम्
अङ्गुष्ठमूलेऽर्पितं गर्भितं सूत्रमेव शेषो यस्याः सा आसीत् १० तासामिति तदानीं सान्द्रकुतूहलानां तासां स्त्रीणामासवगन्धो गर्भे येषां तैः विलोलानि ने

तथैव वातायनसंनिकर्षं ययौ शलाकामपरा वहंती ८ जालांतरप्रेषितदृष्टिरन्या प्रस्थानभिन्नां न बबंध नीवीं नाभि
प्रविष्टाभरणप्रभेण हस्तेन तस्थाववलंब्य वासः ९ अर्धाचिता सत्वरमुत्थितायाः पदे पदे दुर्निमिते गलंती कस्याश्चिदासी
द्रशना तदानीमंगुष्ठमूलार्पितसूत्रशेषा १० तासां मुखैरासवगंधगर्भैर्व्याप्तांतराः सांद्रकुतूहलानां विलोलनेत्रभ्रमरैर्गवा
क्षाः सहस्रपत्राभरणा इवासन् ११ ता राघवं दृष्टिभिरापिबंत्यो नार्यो न जग्मुर्विषयांतराणि तथाहि शेषेंद्रियवृत्तिरासां सर्वा

त्राण्येव भ्रमरा येषां तैर्मुखैर्व्याप्तान्तराः श्छन्नावकाशाः गवाक्षाः सहस्रपत्राभरणा इव आसन् कमलालङ्कृता इव स्थिता इत्य ॥ त्मना चक्षुरिव प्र
र्थः सहस्रपत्रं कमलमित्यमरः ११ ता इति ताः नार्यः रघोरपत्यं राघवम् अजम् तस्यापत्यमित्यणप्रत्ययः दृष्टिभिरापिबन्त्योऽतितृष्णया पश्यन्त्यः विष
यान्तराणि कार्यान्तराणि ततोन्यविषयान्न जग्मुर्न विविदुरित्यर्थः तथाहि आसां नारीणां शेषेन्द्रियवृत्तिः श्रोत्रादीन्द्रियव्यापारः सर्वात्मना स्वरूपका
र्त्स्न्येन चक्षुः प्रविष्टेव श्रोत्रादीनीन्द्रियाणि स्वातन्त्र्येण ग्रहणाशक्तेः चक्षुरेव प्रविश्य कौतुकात्स्वयमप्येनम् उपलभन्ते किमु अन्यथा स्वविषयाभि

शृण्वन्कथाः श्रोत्रसुखाः कुमार इतिवक्ष्यतितत्ताः कथयति स्थान इत्यादिभिस्त्रिभिः श्लोकैः भोज्या इन्दुमतीपरोक्षैरदृष्टैः भूपतिभिर्वृताममैवेयमिति प्रार्थितापि स्वयम्वरमेवसाधुंहितममंस्त मेने ननुपरोक्षमेवकिञ्चित् प्रार्थितंयत्तत्स्थानेयुक्तमेतत् युक्ते द्वे सांप्रतं स्थाने इत्यमरः कुतः अन्यथास्वयम्वराभावे सावैन्दुमती पद्मसस्यास्तीतिपद्मालक्ष्मीः अर्शआदिभ्योच् इत्यच्प्रत्ययः नारायणमिवात्मतुल्यंस्वानुरूपंकान्तंपतिंकथंलभेत नलभेतैवसदसद्विवेकासौकार्यादितिभावः १३ परस्परेणेति स्पृहणीयशोभंसर्वाशास्यसौन्दर्य्यमिदंद्वन्द्वं मिथुनं द्वन्द्वरहस्येत्यादिनिपातः परस्परेणनायोजयिष्यच्चेत् नयोजयेद्यदि प्रजानांपत्युर्विधातुः अस्मिन्द्वये द्वन्द्वे योरूपविधानयत्नः सौन्दर्य्यनिर्माणप्रयासोवितथोभविष्यत् एतदनुरूपस्त्रीपुंसान्त

स्थाने वृता भूपतिभिः परोक्षैः स्वयंवरं साधुममंस्त भोज्या पद्मेव नारायणमन्यथासौ लभेत कांतं कथमात्मतुल्यं १३ परस्परेण स्पृहणीयशोभं न चेदिदं द्वंद्वमयोजयिष्यत् अस्मिन्द्वये रूपविधानयत्नः पत्युः प्रजानां वितथोभविष्यत् १४ रतिस्मरौ नूनमिमावभूतां राज्ञां सहस्रेषु तथाहि बाला गतेयमात्मप्रतिरूपमेव मनो हि जन्मांतरसंगतिज्ञम् १५ इत्युद्गताः पौरवधूमुखेभ्यः शृण्वन्कथाः श्रोत्रसुखाः कुमारः॥

राभावादितिभावः लिङ्निमित्ते लङ् क्रियातिपत्तौ वितिलङ् १४ रतीति रतिस्मरौ यौनित्यसहचरावित्यभिप्रायः नूनंतावितरयंचायंचरमौदम्पती एतद्रूपेणभूतामुत्पन्नौ कुतः तथाहि प्रसिद्धमेवैतत् यदियंबाला राज्ञांसहस्रेषुमध्ये सत्स्वपिव्यत्यासकारणेइतिभावः आत्मप्रतिरूपंस्वतुल्यमेव तुल्यसंकाशनीकाशप्रतीकाशप्रतिरूपका इत्याहदण्डी गतात्राप्तेति तदपिकथंजातमत आह मनोहिजन्मान्तरसंगतिज्ञमिति प्रत्यभिज्ञानवासनावशादनुभूतार्थेषुमनः प्रवृत्तिरस्तीत्युक्तम् जन्मान्तरसाहचर्य्यमेवात्रनियामकमित्यर्थः १५ इतीति इतिस्थानेवृतेत्याद्युक्तप्रकारेणपौरवधूमुखेभ्यः उद्गताः उत्पन्नाः श्रोत्रयोस्सुखाः मधुराः सुखशब्दोविशेष्यनिघ्नश्च अथत्रिषु

र॰ टी॰ दृव्येपापंपुण्यंसुखानिचेत्यमरः कथागिरः शृण्वन् कुमारोऽजोमङ्गलसंविधाभिः मङ्गलरचनाभिः उद्भासितंसम्बन्धिनः कन्यादायिनः सद्म समाससार या
स॰ ७ य २६ ततइति ततोऽनन्तरंकरेणुकायाः हस्तिन्याः सकाशात् आशु शीघ्रम् अवतीर्य कामरूपेश्वरदत्तोहस्तोयेनसोऽजः अनन्तरंवैदर्भेनिर्दिष्टं प्रदर्शि
७० तम् अन्तश्चतुष्कं चत्वरं नारीणांमनांसीवविवेशप्राविशत् २७ महार्हेति महार्हेसिंहासनेसंस्थितोऽसौ अजः भोजेनउपनीतंरत्नैः सहितंसरत्नंमधु
ना पृच्यतेइति मधुपर्कः तेनमिश्रम् अर्घ्यंपूजासाधनद्रव्यं दुकूलयोः क्षौमयोः युग्मंचवनिताकटाक्षैः अन्यस्त्रीणामपाङ्गदर्शनैः सार्द्धंजग्राह गृही
तवान् मूल्येपूजाविधावर्घ्यमित्यमरः अर्घ्यायपूजाविधये इदमर्घ्यं पादार्घाभ्यांचेतियत्प्रत्ययः २८ दुकूलेति दुकूलंक्षौमम्वासः आच्छादनंय

उद्भासितंमंगलसंविधाभिःसंबंधिनःसद्मसमाससाद २६ ततोऽवतीर्याशुकरेणुकायाःसकामरूपेश्वरदत्तहस्तः वैद
र्भनिर्दिष्टमजोविवेशनारीमनांसीवचतुष्कमंतः २७ महार्हसिंहासनसंस्थितोसौसरत्नमर्घ्यंमधुपर्कमिश्रं भोजोपनीतं
चदुकूलयुग्मंजग्राहसार्द्धंवनिताकटाक्षैः २८ दुकूलवासाःसवधूसमीपंनिन्येविनीतैरवरोधरक्षैः वेलासकाशंस्फुटफे
नराजिर्नवैरुदन्वानिवचंद्रपादैः २९ तत्रार्चितोभोजपतेःपुरोधाहुत्वाग्निमाज्यादिभिरग्निकल्पः ॥तमेवचाधायविवाहसा
क्ष्येवधूवरौसंगमयांचकार ३० ॥ २९ स्यसोऽजः विनीतैः नम्रैः अवरोधरक्षैः अन्तःपुराधिकृतैः वध्वाः इन्दुमत्याः समीपंनिन्ये नीतः तत्रदृ ७०
ष्टान्तः स्फुटाफेनपङ्क्तिर्यस्यसफेनराजिः उदन्वान्समुद्रः नवैर्नूतनैश्चन्द्रपादैश्चन्द्रकिरणैः वेलासकाशंसमीपमिवपूर्णदृष्टान्तोयम् २९ तत्रेति त
त्रसद्मनि अर्चितः पूजितः अग्निकल्पोभोजपतेःपुरोधाः पुरोहितः पुरोधास्तुपुरोहितइत्यमरः भोजदेशाधीश्वरस्यपुरोहितः आज्यादिभिर्द्रव्यैरग्नि
हुत्वातमेवाग्निंविवाहसाक्ष्यंचाधाय साक्षिणंकृत्वेत्यर्थः वधूवरौसङ्गमयाञ्चकारयोजयामास ३०

हस्तेनेति सराजसूनुः अजः हस्तेन वध्वाः इन्दुमत्याः हस्तं परिगृह्य अन्तरायाः सन्निहितायाः अशोकलतायाः प्रवालं पल्लवम् प्रतिगतेन पल्लवेन स्वकीयेन प्राप्यचूतः आम्र इवसुतरामवभासे २१ आसीदिति वरः कण्टकितः पुलकितः प्रकोष्ठो यस्य स आसीत् सूच्यग्रेक्षुद्रशत्रौ च रोमहर्षे च कण्टक इत्यमरः कुमारी इन्दुमती वयसि प्रथम इति ङीप् खिन्नाः स्वेदाञ्चिताः अङ्गुलयो यस्याः सा खिन्नाङ्गुलिः सम्ववृते बभूव अत्रोत्प्रेक्षते अस्मिन् द्वये अजेन्दुमतीरूपमिथुने तत् क्षणमात्मवृत्तिः सात्त्विकोदयरूपावृत्तिः मनोभवेन कामेन समं विभक्ते वपृथक्कृतेव अपरार्द्धस्य पाठान्तरेण व्याख्यानं पाणिसमागमेन पाण्योः संस्पर्शेन तयोर्वधूवरयोर्मनोभवस्य वृत्तिरवस्थितिः समविभक्तं च समीकृतेवेत्यर्थः प्राक् सिद्धस्याप्यनुरागसाम्यस्य सम्प्रतितनत् कार्य्यद

हस्तेन हस्तं परिगृह्य वध्वाः स राजसूनुः सुतरां वभासे अनन्तराशोकलताप्रवालं प्राप्येव चूतः प्रतिपल्लवेन २१ आसीद्वरः कण्टकितप्रकोष्ठः खिन्नाङ्गुलिः संववृते कुमारी तस्मिन्द्वये तत्क्षणमात्मवृत्तिः समं विभक्तेव मनोभवेन २२ तयोरपाङ्गप्रतिसारितानि क्रियासमापत्तिनिवर्तितानि ह्रीयन्त्रणामानशिरे मनोज्ञामन्योन्यलोलानि विलोचनानि २३ प्रदक्षिणप्रक्रमणात्कृशानोरुदर्चिषस्तन्मिथुनं चकाशे॥ २१ दर्शनात्पाणिस्पर्शकृततत्त्वमुत्प्रेक्षते अत्र वात्स्यायनः रोमाञ्चितस्तु पुरुषः कन्याखिन्नाङ्गुलिर्भवेदिति अत्र स्त्रीपुरुषयोः स्वेदरोमाञ्चाभिधानं सात्त्विकोक्तिमात्रोपलक्षणं न तु प्रतिनियमो विवक्षितः एभिरिति बहुवचनसामर्थ्यादिवं सति कुमारस्सम्भवे रोमोद्गमः प्रादुरभूदुमायाः खिन्नाङ्गुलिः पुङ्गवकेतुरासीदिति कुल्कामवचनं न दोषायेति २२ तयोरिति अपाङ्गेषु नेत्रप्रान्तेषु प्रतिसारितानि प्रवर्तितानि क्रियया निरीक्षणलक्षणयोः समापत्त्या यदृच्छया निसङ्गत्या निवर्तितानि आकृष्टानि अन्योन्यस्मिन् लोलानि सतृष्णानि लोलश्चलसतृष्णयोरित्यमरः तयोर्दम्पत्योर्विलोचनानि दृष्टयो मनोज्ञां रम्यां ह्रियानिमीलितेन यन्त्रणां सङ्कोचनमानशिरे प्रापुः २३ प्रदक्षिणेति तस्मि

Digitized by Sarayu Foundation Trust, Delhi and eGangotri

र॰ टी॰ उन्नतज्वालस्य कृशानोरग्नेः प्रदक्षिणीकरणात् चकाशे कथमिव मेरोः कनकाचलस्य उपान्तेषु समीपेषु परिसरभूमिषु वर्त्तमानं मेरुं प्रदक्षिणीकु
स॰ ७ र्वदित्यर्थः अन्योन्यसंसक्तं सङ्गतं मिथुनस्याप्यतद्विशेषणम् अहश्च त्रियामा च अहस्त्रियामम् रात्रिदिवसमिव समाहारे द्वन्द्वैकवद्भावः चकाशेदितीप २४
७१ नितम्बिनि नितम्बेन गुर्वी अलघ्वी दुर्द्धरा लघुनो गुर्वीतियादवः विधातृप्रतिमेन ब्रह्मतुल्येन गुरुणा याजकेन प्रयुक्ता जुहुधीति प्रेरिता मत्तचकोरस्येव नेत्रे
यस्यास्सा लज्जावती सा वधूः अग्नौ लाजविसर्गं चकार २५ हविरिति हविर्हीतव्यं सर्पिर्मिनोः हविषः आज्यादेः शमीपल्लवानां लाजानां च गन्धोस्यास्तीति हवि:
शमीपल्लवलाजगन्धी शमीपलाशमिश्रान् लाजानञ्जलिना वपतीति कासायनः पुण्यो धूमः कृशानोरुदियाय उद्भूतः कपोलयोः संसर्पिणी प्रसरण

मेरोरुपान्तेष्विव वर्त्तमानमन्योन्यसंसक्तमहस्त्रियामं २४ नितम्बगुर्वीं गुरुणा प्रयुक्ता वधूर्विधातृप्रतिमेन तेन चकार सा म
त्तचकोरनेत्रा लज्जावती लाजविसर्गमग्नौ २५ हविःशमीपल्लवलाजगन्धी पुण्यः कृशानोरुदियाय धूमः कपोलसंसर्पि
शिखः स तस्या मुहूर्त्तकर्णोत्पलतां प्रपेदे २६ तदञ्जनक्लेदसमाकुलाक्षं प्रम्लानबीजाङ्कुरकर्णपूरं वधूमुखं पाटलगण्डलेख
माचारधूमग्रहणाद्बभूव २७ तौ स्नातकैर्बन्धुमता च राज्ञा पुरन्ध्रिभिश्च क्रमशः प्रयुक्तम्॥ शीलाशिखा यस्य स तथोक्तः स धूमस्तस्याः

वध्वा मुहूर्त्तकर्णोत्पलतां प्रपेदे २६ तदिति तद्वधूमुखम् आचारेण प्राप्तात् धूमग्रहणात् अञ्जनस्य क्लेदः अञ्जनमिश्रबाष्पोदकद्रव इत्यर्थः तेन समाकु
ले अक्षिणी यस्य तत् समाकुलाक्षम् प्रम्लानो बीजाङ्कुरो यवाङ्कुर एव कर्णपूरो वतंसो यस्य तत् पाटलगण्डलेखं मरुणगण्डस्थलं च बभूव २७ ताविति ७१
कनकासनस्थौ तौ कन्याकुमारौ स्नातकैर्गृहस्थविशेषैः स्नानं कृत्वाप्लुतो व्रती त्यमरः बन्धुमता बन्धुपुरःसरेणेत्यर्थः राज्ञा पुरन्ध्रिभिः पतिपुत्रवतीभिर्ना
रीभिश्च क्रमशः प्रयुक्तं स्नातकादीनां पूर्वपूर्ववैशिष्ट्यात्क्रमेण कृतमार्द्राक्षतानामारोपणम् अन्वभूताम् अनुभूतवन्तौ त्रिविधा हि स्नातका विद्या॥

Digitized by Sarayu Foundation Trust, Delhi and eGangotri

स्नातकोव्रतस्नातकोविद्याव्रतस्नातकश्चेति तथा च याज्ञवल्क्यः गुरवेतु वरं दत्वा स्नापितं तदनुज्ञया वेदव्रतानि वा पारं नीत्वा ह्युभयमेव चेति २८ इतीति अधिश्रीः अधिकसम्पन्नो भोजकुलप्रदीपः स राजा इति स्वसुरनुमत्याः पाणिग्रहणं विवाहं सम्पाद्य कारयित्वा महीपतीनाम् स्वयम्वरगतानां राज्ञां पृथक् कैकशः अर्हणार्थं पूजार्थं अधिकृतान् अधिकारिणः समादिदेश आज्ञापयामास २९ लिङ्गैरिति मुदः सन्तोषस्य लिङ्गैः चिन्हैः कपटहासादिभिः संवृतविक्रियाः निगूढमत्सराः अतएव प्रसन्नाः वहिर्निर्मलाः गूढनक्राः अन्तर्लीनग्राहाः ह्रदा इव स्थिताः ते नृपाः वैदर्भम् भोजम् आमन्त्र्य तदीयां पूजाम् उपदाछलेनोपायनव्याजेन प्रत्यर्प्य ययुः गतवन्तः ३० स इति आरम्भसिद्धौ कार्यसिद्धौ विषये पूर्वं कृता इति कृतपूर्वा सुप्सुपेति समासः कृतपूर्वं

कन्याकुमारौ कनकासनस्थावार्द्राक्षतारोपणमन्वभूतां २८ इति स्वसुर्भोजकुलप्रदीपः संपाद्य पाणिग्रहणं स राजा महीपतीनां पृथगर्हणार्थं समादिदेशाधिकृतानधिश्रीः २९ लिङ्गैर्मुदः संवृतविक्रियास्ते ह्रदाः प्रसन्ना इव गूढनक्राः वैदर्भमामन्त्र्य ययुस्तदीयां प्रत्यर्प्य पूजामुपदाच्छलेन ३० स राजलोकः कृतपूर्वसंविदारम्भसिद्धौ समयोपलभ्यं आदास्यमानः प्रमदामिषं तदावृत्य पन्थानमजस्य तस्थौ ३१ भर्त्रापि तावत्क्रथकैशिकानामनुष्ठितानन्तरजाविवाहः ॥ ॥

संवित् सङ्केतो मार्गावरोधरूपो विषयो येन स तथोक्तः संविद्युद्धे प्रतिज्ञायां सङ्केताचारनामस्विति केशवः स राजलोकः समयोपलभ्यम् अजप्रस्थानकाले लभ्यं तदा जस्यैकाकित्वात् सर्वेषामप्येकत्र सम्भवात् साध्यमित्यर्थः समरोपलभ्यमिति पाठे युद्धसाध्यमित्यर्थः तत्प्रमदैवामिषं भोग्यवस्तु आमिषं त्वस्त्रियां मांसे तथा स्याद्भोग्यवस्तुनीति यादवः आदास्यमानः ग्रहीष्यमाणस्सन् अजस्य पन्थानं मार्गम् आवृत्य अवरुध्य तस्थौ स्थितवान् ३१ भर्त्रेति अनुष्ठितः कृतः अनन्तरजाया विवाहो येन स तथोक्तः क्रथकैशिकानां देशानां भर्ता स्वामी भोजोपि तावत् दासत्वानु

र.टी. रूपम् उत्साहानुरूपम् यथा तथा आसमन्ताद्दिसनेन अनियतवस्तुदानमित्यर्थः हरणीकृता श्रीः येन स तथोक्तस्सन् हरणं कन्यायै देयं धनम् यौ
स.७ तकादि तु यद्देयं सुदायो हरणं च तत् इत्यमरः ह्रियत इति हरणम् कर्मणि ल्युट् कन्यादानकाले प्रतिभिक्षादौ च दीयमानं द्रव्यं हरणमिति पर्यवा
७२ च्यम् तदुक्तम् हरणं यौतकादीनां द्रव्ये तु तेत्तावपीति राघवम् अजम् प्रास्थापयत् प्रस्थापितवान् स्वयमन्वगाच्च अनुजगाम ३२ तिस्र इति
कुंडिनं विदर्भनगरं तस्येशो भोजः त्रिषु लोकेषु प्रथितेन अजेन सार्द्धं मार्गे पथि तिस्रो वसतीः त्रिरात्रीः उषित्वा स्थित्वा वसती रात्रिवेश्मनोरित्यमरः
कालाध्वनोरत्यन्तसंयोगे द्वितीया पर्वात्यये दर्शान्ते उष्णरश्मेः सूर्यात्सकाशात् सोमश्चन्द्रमा इव तस्मादजात् अपावर्ततत विसृज्य निवृत्त इत्यर्थः

संत्वानुरूपं हरणीकृतश्रीः प्रास्थापयद्राघवमन्वगाच्च ३२ तिस्रस्त्रिलोकप्रथितेन सार्द्धमजेन मार्गे वसतीरुषित्वा
तस्मादपावर्तत कुंडिनेशः पर्वात्यये सोम इवोष्णरश्मेः ३३ प्रमन्यवः प्रागपि कोसलेंद्रे प्रत्येकमात्तस्वतया बभूवुः अ
तो नृपाश्चक्षमिरे समेताः स्त्रीरत्नलाभं न तदात्मजस्य ३४ तमुद्वहंतं पथि भोजकन्यां रुरोध राजन्यगणः स दृप्तः बलिप्र
दिष्टां श्रियमाददानं त्रैविक्रमं पादमिवेंद्रशत्रुः ३५ तस्याः स रक्षार्थमनल्पयोधमादिश्य पित्र्यं सचिवं कुमारः॥

३३ प्रमन्यव इति नृपाः राजानः प्रागपि प्रत्येकमात्तस्वतया दिग्विजये गृहीतधनत्वेन कोशलेन्द्रे रघौ प्रमन्यवो गूढवैरा बभूवुः अतो हेतोः समेताः सन्तः त
दात्मजस्य रघुसूनोः स्त्रीरत्नलाभं न चक्षमिरे न सेहिरे ३४ तमिति दृप्तः उद्धतः स राजन्यगणः राजसमूहः भोजकन्यामुद्वहन्तं नयन्तमजं बलिप्रदि
ष्टां बलिना वैरोचनेन प्रदिष्टां दत्तां श्रियं आददानं स्वीकुर्वाणं त्रिविक्रमस्येमं त्रैविक्रमं पादमिन्द्रशत्रुरिव प्रल्हाद इव पथि रुरोध तथा वामनपु
राणे विरोचनविरुद्धोपि प्रल्हादः प्राक्तनं स्मरन् विष्णोरनुक्रममाणस्य पादांभोजं रुरोध हेति ३५ तस्या इति सकुमारोऽजस्तस्या इन्दुमत्या रक्षार्थ

Digitized by Sarayu Foundation Trust, Delhi and eGangotri

मनल्पयोधं बहुभटं पितुरागतम् पित्र्यमाप्तमित्यर्थः सचिवमादिश्य ज्ञाप्य तां पार्थिववाहिनीं राजसेनाम् ध्वजिनी वाहिनी सेना इत्यमरः भागी
रथीम् उत्तरङ्गः शोणः शोणाख्यो नद इव प्रत्यग्रहीत् अभियुक्तवान् ३६ पत्तिरिति पत्तिः पादचारी योद्धा पदातिं पादचारम् अभ्यपतत् पद्भ्
्यामततीति पदातिः पादः पदिति पदादेशः पदातिपत्ति पदग पादातिकपदाजपदातयः इत्यमरः रथिनः स्यन्दनारोहा अश्वारोहास्तु सादिनः इत्यमरः रथे
शः रथिनम् अभ्यपतत् तुरङ्गसादी अश्वारोहः तुरङ्गाधिरूढम् अश्वारोहमभ्यपतत् गजस्य यन्ता हस्त्यारोहो गजस्थं पुरुषमभ्यपतत् इत्थमने
नप्रकारेण तुल्यप्रतिद्वन्द्वि एकजातिसुभटं युद्धं बभूव अन्योन्ये द्वन्द्वं कलहो येषामस्तीति प्रतिद्वन्द्विनः योधाः तुल्याः समबलाः प्रतिद्वन्द्विनो यस्मि

प्रत्यग्रहीत्पार्थिववाहिनीं तां भागीरथीं शोण इवोत्तरंगः ३६ पत्तिः पदातिं रथिनं रथेशस्तुरंगसादी तुरगाधिरूढं यन्ता ग
जस्याभ्यपतद्गजस्थं तुल्यप्रतिद्वन्द्वि बभूव युद्धं ३७ नदत्सु तूर्येष्वविभाव्यवाचो नोदीरयन्ति स्म कुलोपदेशान् बाणाक्षरैरेव
परस्परस्य नामोर्जितं चापभृतः शशंसुः ३८ उत्थापितः संयति रेणुरश्वैः सान्द्रीकृतः स्यंदनवंशचक्रैः विस्तारितः कुंजरकर्ण

न्युद्धे तत् तुल्यप्रतिद्वन्द्वि द्वन्द्वं कलहयुग्मयोरित्यमरः ३७ नदत्स्विति तूर्येषु नदत्सु अविभाव्यवाचः अनवधा(तालैर्नेत्रक्रमेणोपरुरोध
र्यगिरः चापभृतो योधाः धानुष्काः कुलमुपदिश्यते प्रख्याप्यते यैस्ते कुलोपदेशाः तान्कुलोपदेशान् कुलनामानि नोदीरयन्ति स्म नोच्चारयामासुः श्रो
तुमशक्यत्वाद्वाचो न ब्रुवन्नित्यर्थः किं तु बाणाक्षरैः बाणेषु लिखिताक्षरैरेव हानरूपाक्षरैरित्यर्थः परस्परस्यान्योन्यस्य ऊर्जितम् प्रख्यातं नाम शशंसुः ऊ
चुः ३८ उत्थापित इति संयति सङ्ग्रामे अश्वैरुत्थापितः स्यन्दनवंशानां रथसमूहानां चक्रैः रथाङ्गैः सान्द्रीकृतः घनीकृतः वंशः पृष्ठ्यास्थि गेहाद्यूर्ध्वकाष्ठे वे
णौ गणे कुल इति केशवः कुञ्जरकर्णतालैस्ताडनैः विस्तारितः प्रसारितो रेणुर्नेत्रक्रमेणांशुकपरिपाट्या अंशुकेनेवेत्यर्थः स्याज्जटांशुकयोर्नेत्रं क

र॰टी॰ मोघ्रोपरियाद्यांकेशवः सूर्यमुपरुरोध आच्छादयामास अर्थात्प्रापयामास ३९ मत्स्येति वायुवशाद्विदीर्णैर्विवृतैः मुखैः प्रवृद्धानि ध्वजिनीनां
स॰७ रजांसि सैन्यरेणून् पिबन्तो गृह्णन्तो मत्स्यध्वजा मत्स्याकारा ध्वजाः पर्य्याविलानि परितः कलुषितानि नवोदकानि पिबन्तः परमार्थमत्स्याः सत्यमत्स्या
७३ इव बभूवुः ४० रथ इति सान्द्ररजसि रथोरथाङ्गध्वनिना चक्रस्वनेन विजज्ञे ज्ञातः नागो हस्ति विलोलानां घण्टानां क्वणितेन नादेन विजज्ञे आत्मपरा
ववोधः स्वपरविवेकः योधानामिति शेषः स्वभर्तॄणां स्वस्वामिनां नामग्रहणान्नामोच्चारणाद्बभूव रजोन्धतया स्वं परं च शब्दादेवानुमाय प्रजह्रुः प्र
हरन्ती सर्थः ४१ आवृण्वत इति लोचनमार्गमावृण्वतो दृष्टिपथमुपरुंधतः आजौ युद्धे विजृम्भितस्य व्याप्तस्य रजएवान्धकारस्तस्य शस्त्रक्षतेभ्यः

मत्स्यध्वजा वायुवशाद्विदीर्णैर्मुखैः प्रवृद्धध्वजिनीरजांसि बभुः पिबंतः परमार्थमत्स्याः पर्याविलानीव नवोदकानि ४०॥
रथो रथांगध्वनिना विजज्ञे विलोलघंटाक्वणितेन नागः स्वभर्तृनामग्रहणाद्बभूव सांद्रे रजस्यात्मपराववोधः ४१ आवृण्व
तो लोचनमार्गमाजौ रजोंधकारस्य विजृंभितस्य शस्त्रक्षताश्वद्विपवीरजन्मा बालारुणोभूद्रुधिरप्रवाहः ४२ सच्छिन्नमूलः क्ष
तजेन रेणुस्तस्योपरिष्टात्पवनावधूतः अंगारशेषस्य हुताशनस्य पूर्वोत्थितो धूम इवाबभासे ४३ प्रहारमूर्छापगमे रथस्थाः यं

श्वद्विपवीरेभ्यो जन्म यस्य स तथोक्तः रुधिरप्रवाहः बालारुणोऽभूत् बालसूर्योऽभूत् अरुणो भास्करेपि स्यादित्यम ((न्तृनुपालभ्य निवर्तितांश्वाः
रः बालविशेषणं रुधिरसावर्ण्यार्थम् ४२ स इति क्षतजेन रुधिरेण छिन्नमूलः त्याजितभूतलसम्बन्ध इत्यर्थः तस्य क्षतजस्य उपरिष्टात्पवनावधूतः
वातेनाहतः स रेणुः अङ्गारशेषस्य हुताशनस्याग्नेः पूर्वोत्थितो धूम इवाबभासे दिदीपे ४३ प्रहारेति रथस्था रथिनः प्रहारेण या मूर्च्छा तस्या अप ७३
गमे सति रथस्था रथे स्थित्वा संरक्षत इत्यर्थः मूर्च्छितानामन्यत्र नीत्वा संरक्षणमिति सारथिधर्म इति कृत्वा यंतृन् सारथीननुपालभ्य आसाधुकृतमिति

धिक्षिप्य निवर्त्तिताश्वास्सन्तः पूर्वं यैः सादिताः स्वयं प्रहृताः इदानीम् आसमन्ताल्लक्षितपूर्वकेतून् पूर्वदृष्टैः केतुभिः प्रत्यभिज्ञातानित्यर्थः तानेव सामर्षैः ता
यानिजघ्नुः प्रजह्रुः ४४ अपीति अर्द्धश्चासौ मार्गश्चेति विग्रहः तस्मिन्नर्द्धमार्गे परेषां बाणैः लूनाः छिन्ना अपि हस्तवतां कृतहस्तानां धनुर्भृतां पृषत्काः शराः
आत्मजवानुवृत्त्या वेगानुबन्धेन हेतुना फलिभिः लोहाग्रवद्भिः सस्य बाणाग्रयोः फलमिति विश्वः अर्द्धे ते भागाः अपूर्वैर्द्धभागाः शृणातीति शरः तस्मै हितं शर
व्यम् लक्ष्यम् उगवादिभ्यो यदिति यत्प्रत्ययः विध्यं लक्ष्यं शरव्यं चेत्यमरः सम्प्रापुरेव न तु मध्ये पेततुरित्यर्थः ४५ आधोरणानामिति गजसन्निपाते गजयुद्धे
निशितैः चक्रारोपितैः अत एव क्षुरस्येवाग्रं येषां तैः क्षुराग्रैः चक्रैरायुधविशेषैः हृतानि छिन्नान्यपि श्येनानां पक्षिविशेषाणाम् पक्षी श्येन उलूकस्तु इत्य

यैः सादितार्ल्लक्षितपूर्वकेतूंस्तानेव सामर्षतया निजघ्नुः ४४ अप्यर्द्धमार्गे परबाणलूना धनुर्भृतां हस्तवतां पृषत्काः संप्रापुरेवात्म
जवानुवृत्त्या पूर्वार्द्धभागैः फलिभिः शरव्यम् ४५ आधोरणानां गजसन्निपाते शिरांसि चक्रैर्निशितैः क्षुराग्रैः हृतान्यपि श्येननखा
ग्रकोटिव्यासक्तकेशानि चिरेण पेतुः ४६ पूर्वं प्रहर्त्ता न जघान भूयः प्रतिप्रहाराक्षममश्वसादी तुरंगमस्कंधनिषण्णदेहं प्रत्याश्वसं
तं रिपुमाचकांक्षे ४७ तनुत्यजां वर्मभृतां विकोशैर्बृहत्सु दंतेष्वसिभिः पतद्भिः ॥

मरः नखाग्रकोटिषु व्यासक्ताः केशा येषां तानि आधोरणानां ह
स्त्यारोहाणाम् आधोरणा हस्तिपका हस्त्यारोहा निषादिन इत्यमरः शिरांसि चिरेण पेतुः शरव्यपातात्प्रागेवारुह्य पश्चादुत्थितानां पक्षिणां नखेषु केशस
ङ्गात् चिरपातहेतुरित्यर्थः ४६ पूर्वमिति पूर्वं प्रहर्त्ता प्रथमं प्रहर्त्ता अश्वसादी तौरङ्गिकः प्रतिप्रहार अक्षमम् अशक्तम् तुरङ्गमस्याश्वस्य स्कन्धे निष
ण्णदेहं मूर्च्छन्तमित्यर्थः रिपुं भूयो न जघान पुनर्न प्रजहार किन्तु प्रत्याश्वसन्तं पुनरुज्जीवन्तम् आचकाङ्क्षे नायुधव्यसनं प्राप्तं नार्तं नातिपरिक्षतमिति
निषेधस्मरणादिति भावः ४७ तनुत्यजामिति तनुत्यजां तनुषु निस्पृहाणामित्यर्थः वर्मभृतां कवचिनां सम्बन्धिभिः बृहत्सु दन्तेषु पतद्भिः अत एव विकोशैः

विगतपिधानकैः कोशास्त्री कुड्मले खड्गपिधाने ऽर्थौघदिव्ययोरित्यमरः असिभिः खड्गैः उद्यन्तम् उद्धतमग्निमुद्विविग्नाः भीता गजाः करशीकरेण शुण्डा
दण्डजलकणेन शमयाम्बभूवुः शान्तं चक्रुरित्यर्थः ४८ शिलीमुखेति शिलीमुखैर्बाणैः अलिबाणौ शिलीमुखाविरत्यमरः उत्कृत्तानि शिरांस्येव फलानि तै
राढ्या सम्पन्ना च्युतैर्भ्रष्टैः शिरांसि त्रायन्त इति शिरस्त्राणि शीर्षण्यानि शीर्षण्यं च शिरस्त्राणमित्यमरः आतोऽनुपसर्गे क इति कप्रत्ययः तैश्चषकोत्तरेव पा
नपात्रप्रचुरेव चषकोऽस्त्री पानपात्रमित्यमरः शोणितान्येव मद्यं तस्य कुल्या प्रवाहो यस्यां सा कुल्याल्पा कृत्रिमा सरिदित्यमरः रणक्षितिः युद्धभूमिः मृत्योः पान
भूमिरिव रराज ४९ उपान्तयोरिति उपान्तयोः प्रान्तयोः विहङ्गैः पक्षिभिः निष्कुषितं खण्डितम् इणिषधातोर्मितीडागमः भुजच्छेदं भुजखण्डं तेभ्यो विहङ्गेभ्य आ

उद्यन्तमग्निं शमयांबभूवुर्गजा विविग्नाः करशीकरेण ४८ शिलीमुखोत्कृत्तशिरःफलाढ्या च्युतैः शिरस्त्रैश्चषकोत्तरेव रण
क्षितिः शोणितमद्यकुल्या रराज मृत्योरिव पानभूमिः ४९ उपान्तयोर्निष्कुषितं विहङ्गैराक्षिप्य तेभ्यः पिशितप्रियापि केयूरकोटिक्ष
तताल्वुदेशा शिवा भुजच्छेदमपाचकार ५० कश्चिद्द्विषत्खड्गहृतोत्तमाङ्गः सद्यो विमानप्रभुतामुपेत्य वामाङ्गसंसक्तसुराङ्गनः स्वं नृत्य
त्कबंधं समरे ददर्श ५१ अन्योन्यसूतोन्मथनादभूतां तावेव सूतौ रथिनौ च कौचित्॥ १९ क्षिप्य आच्छिद्य पिशितप्रिया मांसप्रियापि शिवा क्रो

ष्टी शिवः कीलः शिवा क्रोष्टी स्यादिति विश्वः स्त्रियां शिवा भूरिमायुगोमायुमृगधूर्तकाः शृगालवञ्चकक्रोष्टु फेरु फेरवजम्बुका इत्यमरः केयूरस्याङ्गदस्य
कोटिना क्षतताल्वुदेशो यस्याः सा सती अपाचकार अपसारयामास करोतेः कर्तरि लिट् ५० कश्चिदिति द्विषत्खड्गेन हृतोत्तमाङ्गः छिन्नशिराः कश्चिद्वीरः
सद्यो विमानप्रभुतां देवत्वमुपेत्य प्राप्य वामाङ्गसंसक्ता सव्योत्सङ्गसङ्गिनी सुराङ्गना यस्य स तथोक्तः सन् समरे नृत्यन्तं स्वं निजं कबन्धं अशिरस्कं कलेवरं ददर्श ७४
कबन्धोऽस्त्री क्रियायुक्तमपमूर्द्धकलेवरमित्यमरः ५१ अन्योन्यमिति कौचिद्द्वौ रथिनौ अन्योन्यं सूतोन्मथनात् परस्परसारथिनाशात् निधनात् तावेव सूतौ सारथी रथिनौ

चयोर्हारौ चाभूतां व्यश्वौ गतवाहौ अपिच गदाभ्यां व्यायतो दीर्घः सम्प्रहारो युद्धं ययोस्तौ अभूतां ततो भग्नायुधौ भग्नशरौ सन्तौ वाहुविमर्दनिष्ठौ वाहु
युद्धप्रसक्तावभूताम् ५२ परस्परेति परस्परेण क्षतयोः प्रहृतयोः समकालमेककालं यथा तथोत्क्रान्तवाय्वोः युगपद्गतप्राणयोः एकैवाप्सरः प्रा
र्थिता याभ्यां तयोरेकाप्सरः प्रार्थितयोः प्रार्थितैकाप्सरसोरित्यर्थः वाहिताग्न्यादिषु इति परनिपातः अथवा एकस्यामप्सरसि प्रार्थितं प्रार्थना ययो
रिति विग्रहः स्त्रियां बहुष्वप्सरस इति बहुत्वमिधानं प्रायिकम् तथाच कोशान्तरे आपः सुमनसो वर्षा अप्सरः सिकतासमाः एते स्त्रियां बहुत्वे स्युरेकत्वे
प्युत्तरत्रिकम् इति एतच्चोणादिवृत्तौ स्पष्टम् कयोश्चित्प्रहर्त्रोः योद्धोः अमर्त्यभावेपि देवभूयेपि विवादः कलहः आसीत् एकामभिलाषो हि महद्वैरवीज

व्यश्वौ गदाव्यायतसंप्रहारौ भग्नायुधौ वाहुविमर्दनिष्ठौ ५२ परस्परेण क्षतयोः प्रहर्त्रोरुत्क्रान्तवाय्वोः समकालमेव अमर्त्य
भावेपि कयोश्चिदासीदेकाप्सरः प्रार्थितयोर्विवादः ५३ व्यूहावुभौ तावितरेतरस्माद्भङ्गं जयं चापतुरव्यवस्थम् पश्चात्पुरोमा
रुतयोः प्रवृद्धौ पर्यायवृत्त्येव महार्णवोर्मी ५४ परेण भग्नेपि वले महौजा ययावजः प्रत्यरिसैन्यमेव धूमो निवर्त्येत समीरणेन
यतो हि कक्षस्तत एव वह्निः ५५॥ ९९मितिभावः ५३ व्यूहाविति तौ उभौ व्यूहौ सेनासंघौ व्यूहस्तु वलविन्यास इत्यमरः पश्चाच्च पुरश्च यौ

मारुतौ तयोः पर्यायवृत्त्या क्रमवृत्त्या अनुक्रमव्यापारेणेति यावत् प्रवृद्धौ महान्तौ अर्णवोर्मी इवेतरेतरस्मादन्योन्यस्मात् अव्यवस्थम् व्यवस्थारहित
म् अनियतं जयं भङ्गम् पराजयं चापतुः प्रापुवन्तौ ५४ परेणेति वले स्वसैन्ये परेण परवलेन भग्नेपि महौजाः महावलोऽजः अरिसैन्यं प्रत्येव ययौ
तथाहि समीरणेन वायुना धूमो निवर्त्येत कक्षादपसार्येत वर्तते एर्यन्तात् कर्मणि लिङ् वह्निस्तु यतो यत्र कक्षस्तृणम् कक्षो तु तृणवीरुधौ इत्यमरः त
त एव तत्रैव प्रवर्ततइति शेषः सार्वविभक्तिक आद्यादिभ्यश्चेति सुपसङ्ख्यानात्तसिल्प्रत्ययः ५५

रथीति रथी रथारूढः निषङ्गी तूणीरवान् तूणोपासङ्गः तूणीरनिषङ्गाइषुधिर्द्वयोरित्यमरः कवची वर्मधरः धनुष्मान् धनुर्धरः दृप्तो रणउद्धतः एकवीरः असहायः शूरः सोऽजः राजन्यकम् राजसमूहं गोत्रोक्षेत्यादिना वुञ्प्रत्ययः महावराहः वराहावतारो विष्णुः कल्पक्षये कल्पान्तकाले उद्धृतमर्णवाम्भ इव निवारयामास ५६ स इति सोऽजः आजौ सङ्ग्रामे दक्षिणेन हस्तेन तूणमुखेन निषङ्गविवरेण वाममतिसुन्दरं वामं सव्यं प्रतीपं च दक्षिणे चातिसुन्दरे इति विश्वः व्यापारयन् लक्षन्तेऽशरसन्धानादयस्तु दुर्लक्ष्याइत्याह स कृत आकर्णकृष्टा योद्धुरस्याऽजस्य मौर्वी रिपून् घ्नन्तीति रिपुघ्नास्तान् अमनुष्यकर्तृकेचेतिक प्रत्ययः बाणान् सुषुवे इव प्रसुषुवे किम् उत्प्रेक्षा ५७ स इति सोऽजः रोषेण दष्टा अधराः अतएवाधिकलोहिता ओष्ठा

रथी निषंगी कवची धनुष्मान् दृप्तः स राजन्यकमेकवीरः विलोडयामास महावराहः कल्पक्षयोद्वृत्तमिवार्णवांभः ५६।
स दक्षिणं तूणमुखेन वामं व्यापारयन् हस्तमलक्ष्यताजौ आकर्णकृष्टा सकृदस्य योद्धुर्मौर्वीव बाणान्सुषुवे रिपुघ्नान् ५७
स रोषदष्टाधिकलोहितोष्ठैर्व्यक्तोर्ध्वरेखा भ्रुकुटीर्वहद्भिः तस्तार गां भल्लनिकृत्तकण्ठैर्हुंकारगर्भैर्द्विषतां शिरोभिः ५८ सर्वैर्बलांगैर्द्विरदप्रधानैः सर्वायुधैः कंकटभेदिभिश्च सर्वप्रयत्नेन च भूमिपालास्तस्मिन्प्रजह्रुर्युधि सर्व एव ५९॥ ॥

यषां तैः व्यक्ता उर्द्ध्वरेखा यासां ताः भ्रुकुटीर्भ्रुभङ्गान् वहद्भिः भल्लनिकृत्ताः बाणविशेषाच्छिन्नाः कण्ठा येषां तैः हुङ्कारगर्भैः सहुङ्कारैर्द्विषतां शिरोभिः गां भूमिं तस्तार छादयामास ५८ सर्वैरिति द्विरदप्रधानैर्गजमुख्यैः सर्वैर्बलाङ्गैः हस्त्यश्वरथपादातं सेनाङ्गं स्याच्चतुष्टयमित्यमरः कङ्कटभेदिभिः कवचभेदिभिः अश्वैः कङ्कटकोऽजगरः कवचोऽस्त्रियामित्यमरः सर्वायुधैश्च बाह्यबलमुक्त्वा आन्तरमाह सर्वप्रयत्नेनच सर्वएव भूमिपाला युधि तस्मिन्नजे प्रजह्रुः तं प्रजह्रुरित्यर्थः सर्वत्र सर्वकारकशक्तिसम्भवात्कर्मणोऽप्यधिकरणविवक्षायां सप्तमी तदुक्तम् अनेकशक्तियुक्तस्य विश्वस्यानेककर्मणः सर्वदा सर्वथा भावात्क्वचि

१५

न्या २

सहति सोऽजः परेषां द्विषां अस्त्रव्रजैश्छन्नरथः नीहारैर्हिमैर्मग्नो दिनपूर्वभागः प्रातःकालः किञ्चित्प्रकाशेनेषल्लक्ष्येण विवस्वतेव ध्वजाग्रमात्रेण लक्ष्यो
वभूव ध्वजाग्रैर्न किंचिद् लक्ष्यत इत्यर्थः ६० प्रियम्वदादिति अधिराजसूनुः महाराजपुत्रः कुसुमास्त्रकान्तो मदनसुन्दरः स्वमान्निवृत्तलौल्योऽवि
तृष्णः जागरूक इत्यर्थः असौ कुमारः प्रियम्वदात्पूर्वोक्तप्रियम्वदनामकाद्गन्धर्वात्प्राप्तं गान्धर्वं गन्धर्वदेवताकं प्रस्वापयतीति प्रस्वापनं निद्राजनकम
स्त्रं राजसु प्रायुंक्त प्रयुक्तवान् ६१ ततइति ततो धनुष्कर्षणेन मूढहस्तम् अव्यापृतहस्तम् एकस्मिन्नंसे पर्यस्तं स्रस्तं शिरस्त्रजालं यस्य तत् शीर्षण्यं च शि

सोऽस्त्रव्रजैश्छन्नरथः परेषां ध्वजाग्रमात्रेण बभूव लक्ष्यः नीहारमग्नो दिनपूर्वभागः किंचित्प्रकाशेन विवस्वतेव ६० प्रि
यंवदात्प्राप्तमसौ कुमारः प्रायुंक्त राजस्वधिराजसूनुः गांधर्वमस्त्रं कुसुमास्त्रकांतः प्रस्वापनं स्वप्ननिवृत्तलौल्यः ६१ ततो ध
नुष्कर्षणमूढहस्तमेकांसपर्यस्तशिरस्त्रजालं तस्थौ ध्वजस्तंभनिषण्णदेहं निद्राविधेयं नरदेवसैन्यं ६२ ततः प्रियोपात्तरसेऽध
रोष्ठे निवेश्य दध्मौ जलजं कुमारः तेन स्वहस्तार्जितमेकवीरः पिबन्यशो मूर्तमिवाबभासे ६३ शंखस्वनाभिज्ञतया निवृत्तास्तं छि
न्नशत्रुं ददृशुः स्वयोधाः निमीलितानामिव पंकजानां मध्ये स्फुरंतं प्रतिमाशशांकं ६४॥ (९ रस्त्राणमित्यमरः ध्वजस्तम्भेषु निषण्णा अवष्ट

ब्धा देहाः यस्य तत् नरदेवानां राज्ञां सेनैव सैन्यम् चातुर्वर्ण्यादित्वात्स्वार्थे ष्यञ्प्रत्ययः निद्राविधेयं निद्रापरतन्त्रमित्यर्थः तस्थौ ६२ ततइति ततः कुमारः प्रिया
या इन्दुमत्याः उपात्तरसे आस्वादितमाधुर्ये अतिश्लाघ्य इति भावः अधरोष्ठे जलजं शङ्खं निवेश्य जलजं शङ्खपद्मयोरिति विश्वः दध्मौ मुखमारुतेन पू
रयामास तेनोष्ठनिवेशितेन शङ्खेन एकवीरः सोऽजः स्वहस्तार्जितं मूर्तं मूर्तिमद्यशः पिबन्निवाबभासे यशसः शुभ्रत्वादिति भावः ६३ शङ्खस्वनस्या
जशङ्खध्वनेरभिज्ञतया प्रत्यभिज्ञानत्वान्निवृत्ताः प्राक्पलाय्य सम्प्रति प्रत्यागताः स्वयोधाः शान्तशत्रुं तमजं निमीलितानाम् पङ्कजानां मध्ये स्फुरन्तं

प्रतिमाचासौ शशाङ्कश्चेति प्रतिबिम्बचन्द्रमि
वेत्यर्थः ६४॥

Digitized by Sarayu Foundation Trust, Delhi and eGangotri

सशोणितैरिति सम्प्रति राघवेण रघुपुत्रेण पूर्वं रघुणेति भावः हे राजानः वो युष्माकं यशो हृतं जीवितं कृपया न हृतं न त्वशक्त्येति भावः इत्येवंरूपाः वर्णाः ए
तदर्थप्रतिपादकं वाक्यमित्यर्थः सशोणितैः शोणितदिग्धैः शिलीमुखाग्रैः बाणाग्रैः साधनैः तेन अजेन प्रयोजककर्त्रा पार्थिवानां केतुषु निक्षेपिताः प्रयोज्यैरस्त्रैः
निवेशिता लेखिता इत्यर्थः विशतेर्ण्यन्तात्कर्मणि क्तः ६५ स इति चापकोट्यां निहित एकबाहुर्येन सः शिरस्त्रस्य निष्कर्षणेनापनयनेन भिन्नमौलिः श्लथके
शबन्धः ललाटबद्धाः श्रमवारिबिन्दवो यस्य सोऽजो भीतां प्रियामिन्दुमतीम् एत्य आसाद्य वचो बभाषे ६६ किमित्यत आह इतइति हे वैदर्भि इन्दुमति इतः इ
दानीम् अर्भकहार्यशस्त्रान् बालकहार्यशस्त्रान् परान् शत्रून् पश्य मयाऽनुमतासि द्रष्टुमिति शेषः एभिर्नृपैः एवंविधेन निद्रारूपेण आहवचेष्टितेन रणकर्म

सशोणितैस्तेन शिलीमुखाग्रैर्निक्षेपिताः केतुषु पार्थिवानां यशो हृतं संप्रति राघवेण न जीवितं वः कृपयेति वर्णाः ६५ स चाप
कोटीनिहितैकबाहुः शिरस्त्रनिष्कर्षणभिन्नमौलिः ललाटबद्धश्रमवारिबिन्दुर्भीतां प्रियामेत्य वचो बभाषे ६६ इतः परान्
र्भकहार्यशस्त्रान्वैदर्भि पश्यानुमता मयाऽसि एवंविधेनाऽऽहवचेष्टितेन त्वं प्रार्थ्यसे हस्तगता ममैभिः ६७ तस्याः प्रति
द्वन्द्विभवाद्विषादात्सद्यो विमुक्तं मुखमाबभासे निःश्वासबाष्पापगमात्प्रपन्नः प्रसादमात्मीयमिवात्मदर्शः ६८ ॥

णा मम हस्तगता हस्तगतवद्ग्रहे इत्यर्थः त्वम् प्रार्थ्यसे अपजिहीर्षसे इत्यर्थः एवंविधेनात्यन्तस्वहस्तेन निर्देशेन सोपहासं चाहेति द्रष्टव्यम् ६७॥
तस्या इति प्रतिद्वन्द्विभवात् रिपूत्थात् विषादात् दैन्यात् सद्यो विमुक्तं तस्या मुखं निःश्वासस्य यो बाष्पः ऊष्मा बाष्पो नेत्रजलोष्मणोरिति विश्वः तस्या
पगमाद्धेतोरात्मीयं प्रसादं नैर्मल्यं प्रपन्नः प्राप्तः आत्मा स्वरूपं दृश्यते अनेनेत्यात्मदर्शो दर्पण इवाबभासे ६८ ॥ मंगलमूर्तये नमः ॥

Digitized by Sarayu Foundation Trust, Delhi and eGangotri

दृष्टेति साऽइन्दुमती दृष्टापि पत्युः पौरुषेण प्रमुदितापि ह्रिया विजिता यन्तोः तः प्रियमजं साक्षात्स्वयं नाभ्यनन्दत् न प्रशंस किन्तु न वैरस्यः एषनैः अम्भोभि
र्नुभिः अभिवृष्टाभिषिक्ता स्थली अकृत्रिमा भूमिः जानपदकुण्डगोणस्थेत्यादिना ऽकृत्रिमार्थे ङीष् अभ्रवृन्दं मेघसङ्घं मयूरकेकाभिरिव सखीनां वाग्भि
रभ्यनन्दत् तुतोष ९८ इतीति नोद्यते नोच्यते इत्यवद्यं गर्ह्यम् अवद्यपण्येत्यादिना निपातः कुत्सिते कुत्सितावद्यखेटगर्ह्याणकाः स्मृता इत्यमरः तस्माद
पेतो निर्दोष इत्यर्थः सोऽजः इति राज्ञां शिरसि वामं पादमाधाय अनवद्याम् अदोषां तामिन्दुमतीमुदवहदुपानयत् आत्मसाच्चकारेत्यर्थः अयमर्थः नमुद्व
हन्तं पथि भोजकन्या मिसत्त्रनश्लिष्टः तस्याजस्य रथतुरगाणां खुरोद्धूतरजोभिः रुक्षालिपरुषाणि अलकाग्राणि यस्यास्साऽइन्दुमत्येव मूर्ता मूर्तिमती सम

दृष्टापि सा ह्रीविजिता न साक्षाद्वाग्भिः सखीनां प्रियमभ्यनंदत् स्थली नवांभः पृषताभिवृष्टा मयूरकेकाभिरिवाभ्रजालम्
९८ इति शिरसि स वामं पादमाधाय राज्ञामुदवहदनवद्यां तामवद्यादपेतः रथतुरगरजोभिस्तस्य रूक्षालकाग्रा समरविजयलक्ष्मीः
सैव मूर्ता बभूव ७० प्रथमपरिगतार्थस्तं रघुः सन्निवृत्तं विजयिनमभिनंद्य श्लाघ्यजायासमेतं तदुपहितकुटुंबः शांतिमार्गोत्सु
कोऽभून्नहि सति कुलधुर्ये सूर्यवंश्या गृहाय ७१ इति श्रीरघुवंशे कविकालिदासकृतौ राजविजयो नाम सप्तमः सर्गः ७ ॥

रविजयलक्ष्मीर्बभूव एतल्लाभादन्यः को विजयलाभ इत्यर्थः ७० प्रथमेति प्रथममागमनात्प्रागेव परिगतो ज्ञातोऽर्थो विवाहरूपो येन सः प्रथमपरिग
तार्थो रघुः विजयिनं विजययुक्तं श्लाघ्यं जायया समेतं सन्निवृत्तं प्रत्यागतं तमजमभिनन्द्य तस्मिन्नजे उपहितकुटुम्बः विन्यस्तसुतपत्नीक इति याज्ञ
वल्क्यस्मरणादिति भावः सन् शान्तिमार्गे मोक्षमार्गे उत्सुकोऽभूत् तथाहि कुलधुर्ये कुलधुरं धरे सति सूर्यवंश्याः सूर्यकुलोद्भूताः गृहाय गृहस्थाश्र
मायन भवन्ति उभयोरन्वययोर्मालिनीछन्दः इति श्रीमहोपाध्यायकोलाचलमल्लिनाथसूरिविरचितायां रघुवंशव्याख्यायां सञ्जीविनीसमाख्यायां स

श्रीगणेशाय नमः हेरंबमवलंबेहं यस्मिन्यातालकेलिषु दंतेनोद्धृतिदृष्टोणीं विश्राम्यंति फणीश्वराः १ अथेति अथ पार्थिवो रघुः ललितं सुभगं विवा
हकौतुकं विवाहमंगलं हर्षं वा हस्तसूत्रं वा बिभ्रत एव कौतुकं मंगले हर्षे हस्तसूत्रे कुतूहल इति यादवः तस्याजस्यापरामिंदुमतीमिव वसुधामपि हस्त
गामिनीं हस्तगतामकरोत् अस्मिन् सर्गे वैतालीयछंदः १ दुरितैरिति नृपसूनवो राजपुत्राः यद्राज्यं दुरितैरपि विषप्रयोगादिनिषिद्धोपायैरपि आ
त्मसात्स्वाधीनं कर्तुं तद्दीनवचन इति साति प्रत्ययः प्रयतंते हि प्रवर्तंत एवेत्यर्थः हि शब्दोऽवधारणे हि हेतावधारणे इत्यमरः उपस्थितं स्वतः प्रा
प्तं तद्राज्यमजः पितुराज्ञेति हेतोः अग्रहीत् स्वीचकार भोगतृष्णया पितुर्नाग्रहीत् २ अनुभूयेति मेदिनी भूमिः महिषी च ध्वस्तपते वशिष्ठेन संभृतैरर्जि

श्रीगणेशाय नमः अथ तस्य विवाहकौतुकं ललितं बिभ्रत एव पार्थिवः वसुधामपि हस्तगामिनीमकरोदिंदुमतीमिवापरा
म् १ दुरितैरपि कर्तुमात्मसात्प्रयतंते नृपसूनवो हि यत् तदुपस्थितमग्रहीदजः पितुराज्ञेति न भोगतृष्णया २ अनुभूय वसि
ष्ठसंभृतैः सलिलैस्तेन सहाभिषेचनं विशदोच्छ्वसितेन मेदिनी कथयामास कृतार्थतामिव ३ स बभूव दुरासदः परैर्गुरुणा
अथर्वविदा कृतक्रियः ॥

तैः सलिलैः तेनाजेन सहाभिषेचनमनुभूय विशदोच्छ्वसितेन स्फुटमुद्गमेन आनंदनिर्मलोच्छ्वसितेन च ध्वस्तम्
ते कृतार्थतां गुणवद्भर्तृलाभकृतं साफल्यं कथयामासेव नचैतावता पूर्वेषामपकर्षः वर्ण्यते गुणसापरत्वात्सर्वत्र जयमन्विच्छत्पुत्रादेकात्पराज
यमित्यंगीकृतत्वाच्च ३ स इति अथर्वविदा अथर्ववेदाभिज्ञेन गुरुणा वसिष्ठेन कृतक्रियः अथर्वविधिना कृताभिषेकसंस्कार इत्यर्थः सोऽजः परैः ७७
शत्रुभिर्दुरासदो दुर्धर्षो बभूव तथाहि अस्त्रतेजसा क्षात्रतेजसा सहितं युक्तं ब्रह्मतेजो यत् अयं पवनाग्निसमागमो हि तत्कल्प इत्यर्थः अत्र मनुः ब्रह्म
क्षत्रमिथो यत्र न क्षत्रं ब्रह्मवर्धते ब्रह्मक्षत्रे तु संपृक्ते इह चामुत्र वर्धत इति पवनाग्नी सत्र पूर्वनिपातस्यानित्यत्वाद्द्वंद्वे घीतिनाग्निशब्दस्य पूर्वनिपातः

तथाच वृत्तिकारः अयमेव लक्षणहेत्वोरिति निर्देशः पूर्वनिपातस्यानित्यत्वे लिंगमिति क्षात्रेणैवायं दुर्धर्षः किमयं पुनर्वसिष्ठमंत्रप्रभावे सतीत्यर्थः
४ रघुमिति प्रजाः नरेश्वरं तमजं निवृत्तयौवनं रघुमेवामन्यंत तयोर्न कश्चिद्भेदो ऽसीदित्यर्थः कुतः हि यस्मात्कारणात्सोऽजः तस्य रघोः केवलामेकां श्रियं
न प्रतिपेदे किंतु सकलान्गुणानपि श्रुतशौर्यौदार्यदाक्षिण्यादीनपि प्रतिपेदे अतस्तद्गुणयोगात्तद्बुद्धियुक्ता इत्यर्थः ५ अधिकमिति शुभंयुना शुभ
वत्ता शुभंयुस्तु शुभान्वितः इत्यमरः अहं शुभंयाः शुभंयुरसितियुसप्रत्ययः द्वितयेन संगतं समधिगतं द्वयमेव अधिकं शुशुभे दिदीपे किं केनेत्यत आह पद
मिति पैतृकं पितुरागतं पितुष्ठञ् ऋद्धं समृद्धं पदं राज्यं अजेन अस्याजस्य नवं यौवनं विनयेन इंद्रियजयेन च विनयो हींद्रियजयस्तदुक्तं शास्त्रमर्हति

पवनाग्निसमागमो ह्ययं सहितं ब्रह्म यदस्त्रतेजसा ४ रघुमेव निवृत्तयौवनं तममन्यंत नरेश्वरं प्रजाः सहितस्य न केवलां श्रियं
प्रतिपेदे सकलान्गुणानपि ५ अधिकं शुशुभे शुभंयुना द्वितयेन द्वयमेव संगतं पदमृद्धमजेन पैतृकं विनयेनास्य नवं च यौवन
म् ६ सदयं बुभुजे महाभुजः सहसोद्वेगमियं व्रजेदिति अचिरोपनतां स मेदिनीं नवपाणिग्रहणां वधूमिव ७ अहमेव मतो म
हीपतेरिति सर्वः प्रकृतिष्वचिंतयत्॥ ११ तिकामंदकः राज्यस्यापि प्राक्तनवत्तनदृढो ऽभूत् इत्यर्थः सदयमिति महाभुजः सो ऽजः अचिरोपन
तां नवोपगतां मेदिनीं भुवं नवं पाणिग्रहणं विवाहो यस्यास्तां नवोढां वधूमिव सहसा बलात्कारेण चेत् सहो बलं सहामार्ग इत्यर्थः इयं मेदिनी वधूर्वा उ
द्वेगं भयं व्रजेदिति हेतोः सदयं बुभुजे भुक्तवान् भुजो ऽनवने इत्यात्मनेपदं ७ अहमिति प्रकृतिषु प्रजासु मध्ये सर्वो जनः अथवा प्रकृतिष्वहमित्येने
नान्वयः व्यवधानं तु सह्यं सर्वो जनः प्रकृतिष्वहमेव महीपतेर्मतः महीपतिना मान्यमानः मतिबुद्धिपूजार्थेभ्यश्चेति वर्तमाने क्तः क्तस्य च वर्तमाने इ
ति षष्ठी इत्यचिंतयत् अमन्यत उदधेर्निम्नगाशतेष्विव अस्य नृपस्य कर्तुः कर्तृकर्मणोः कृतीति कर्तरि षष्ठी कश्चिदपि जनविषये विमाननातिर

स्कारोनाभवत् यतोनकंचिदवमन्यते अतः सर्वोजनः अहमेवास्याभिमतइत्यमन्यतेत्यर्थः ८ नखरइति सनृपः भूयसाबाहुल्येनखरस्तीक्ष्णो
नभूयसामृदुरभिगम्योपिनचकिंतुपुरस्कृतमध्यमक्रमः सन्मध्यमप्रकारमालंब्येत्यर्थः पवमानोवायुः पृथिवीरुहान्तरूनिवनृपाननुद्धरन् अनु
त्पाटयन्नेवनमयामास अत्रकामंदकः मृदुरप्यवमन्येततीक्ष्णादुद्विजतेजनः तीक्ष्णश्चैवमृदुश्चैवप्रजानांसचसंमतइति ९ अथेति अथरघुरात्म
जंपुत्रंआत्मवत्तयानिर्विकारमनस्कतयेत्यर्थः उदयादिष्वविकृतिर्मनसः सत्वमुच्यते आत्मवान्सत्ववानुक्तः इत्युत्पलमालायां प्रकृतिष्वमात्या
दिषुप्रतिष्ठितंरूढंवलंवीक्ष्य ज्ञात्वाविनाशोधर्मोयेषांतेषुविनाशधर्मसुधर्मादनिच्केवलादित्यनिच्प्रत्ययः समासांतः त्रिदिवस्थेषुस्वर्गेविषमा

उदधेरिवनिम्नगाशतेष्वभवन्नास्यविमाननाक्वचित् ८ नखरोनचभूयसामृदुः पवमानः पृथिवीरुहानिव संपुरस्कृतमध्य
मक्रमोनमयामासनृपाननुद्धरन् ९ अथवीक्ष्यरघुः प्रतिष्ठितंप्रकृतिष्वात्मजमात्मवत्तया विषयेषुविनाशधर्मसुत्रिदिवस्थे
ष्वपिनिस्पृहोऽभवत् १० गुणवत्सुतरोपितश्रियः परिणामेहिदिलीपवंशजाः पदवींतरुवल्कवाससांप्रयताः संयमिनांप्रपे
दिरे ११ तमरण्यसमाश्रयोन्मुखंशिरसावेष्टनशोभिनासुतः पितरंप्रणिपत्यपादयोरपरित्यागमयाचतात्मनः १२॥ १०नेष्वपिविषयेषु

शब्दादिषुनिस्पृहोऽभवत् १० सकलधर्मान्व्याख्यापयन्नाह गुणेति दिलीपवंशजाः परिणामेवार्धकेगुणवत्सुसुतेष्वारोपितश्रियः स्थापितलक्ष्मी
काः प्रयताः संतः तरुवल्कान्येववासांसियेषांतेषांसंयमिनांयतीनांयोगिनांपदवींप्रपेदिरेयस्मात्तस्मादस्यापिइदमुचितमित्यर्थः ११ तमिति अर
ण्यसमाश्रयोन्मुखंवनवासोद्युक्तंपितरंरघुंसुतोऽजोवेष्टनशोभिनाउष्णीषमनोहरेणशिरसापादयोः प्रणिपत्यआत्मनः अपरित्यागमयाचत
मांपरित्यज्यनगंतव्यमितिप्रार्थितवानित्यर्थः १२॥

रघुरिति आत्मजप्रियः पुत्रवत्सलो रघुः अश्रूणि मुखे यस्य तस्यात्मजस्य तत् परित्यागरूपमीप्सितं अभिलषितं कृतवान् किंतु सर्पस्त्वचमिवापवर्जितां स
क्तां श्रियं पुनर्न प्रतिपेदे न प्राप १३ स इति स रघुः किलांत्यमाश्रमं चतुर्थाश्रमाश्रितः सन् पुराद्बहिः आवसथे स्थाने निवसन् अविकृतेंद्रियो तिशयेनावि
कृतानि इंद्रियाणि येन जितेंद्रिय इत्यर्थः अत एव पुत्रेण भोग्यया स्नुषयेव वध्वेव समुपास्यत शुश्रूषितः जितेंद्रियस्य तस्य स्नुषयेव श्रिया पुष्प
फलादिरक्षाहरणादिशुश्रूषाव्यतिरेकेणापि न किंचिदपेक्षितमासीदित्यर्थः अत्र यद्यपि ब्राह्मणाः प्रव्रजंतीति श्रुतेः आत्मन्यग्नीन् समारोप्य ब्रा
ह्मणः प्रव्रजेद्गृहादिति मनुवचनात् मुखजानामयं धर्मो यद्विष्णोर्लिंगधारणं बाहुजातोरुजातानामयं धर्मो न विद्यते इति निषेधात् ब्राह्मण
स्यैव प्रव्राज्यं न क्षत्रियादेरित्याहुस्तथापि यदहरेव विरजेत्तदहरेव प्रव्रजेदित्यादिश्रुतेस्त्रैवर्णिकसाधारण्यात् त्रयाणां वर्णानां वेदमधीत्य च

रघुरश्रुमुखस्य तस्य तत् कृतवानीप्सितमात्मजप्रियः नतु सर्प इव त्वचं पुनः प्रतिपेदे व्यपवर्जितां श्रियम् १३ स किला
श्रममंत्यमाश्रितो निवसन्नावसथे पुराद्बहिः समुपास्यत पुत्रभोग्यया स्नुषयेवाविकृतेंद्रियः श्रिया १४ प्रशममस्थितपू
र्वपार्थिवं कुलमभ्युद्यतनूतनेश्वरं॥

चत्वार आश्रमा इति सूत्रकारः ब्राह्मणः क्षत्रियो वापि वैश्यो वा प्रव्रजेद्गृहादिति स्मरणाच्च मु
खजानामयं धर्मो वैष्णवं लिंगधारणं बाहुजातोरुजातानां त्रिदंडं न विधीयत इति त्रिदंडविषयत्वदर्शनाच्च क्वापि कस्यचिद्ब्राह्मणस्योपल
क्षणतामाचक्षाणाः केचित्त्रैवर्णिकाधिकारं प्रपेदिरे तथा स इति स किलाश्रममंत्यमाश्रित इति अत्रापि कविनाप्ययमेव पक्षो विवक्षित इति मनीमः
अन्यथा वानप्रस्थाश्रमतया व्याख्याने विरोधः विरुद्धे विधिमस्य नैष्ठिकं यतिभिः सार्द्धमनग्निमग्निचिदिति वक्ष्यमाणेनानग्निसंस्कारेण
विरोधः स्यात् अग्निसंस्काररहितस्य वानप्रस्थस्यैवाभावात् इत्यलं प्रासंगिकेन १४ प्रशमेति प्रशमे स्थितः पूर्वपार्थिवो रघुर्यस्य तत् अभ्युद्यतो

Digitized by Sarayu Foundation Trust, Delhi and eGangotri

र॰ टी॰ भ्युदितः नूतनेश्वरेः जोयस्य तत्र कुलं निभृतेंदुना अस्तमयासन्नचंद्रेण उदितार्केण च नभसा तुल्यां सादृश्यं आरुरोह प्राप न च नभसा तुलामित्यत्र तु
स॰ ८ ल्यार्थैरित्यादिना प्रतिषेधस्मृतौ यायात्तस्य सदृशवाचितुलाशब्दविषयत्वात् कृष्णस्य तुला नास्तीति प्रयोगादस्य सादृश्यवाचित्वादिति १५ यतीति
७८ यतिर्भिक्षुः पार्थिवो राजा तयोर्लिंगधारिणौ रघुराघवौ अपवर्गमहोदयार्थयोर्मोक्षाभ्युदयफलयोर्धर्मयोर्निवर्तकप्रवर्तकरूपयोर्भुवं गतौ भूलोक
मवतीर्णौ अंशौ भागा विव जनैर्ददृशाते दृष्टौ १६ अजितेति अजः अजिताधिगमाय अजितपदलाभाय नीतिविशारदैर्नीतिज्ञैर्मंत्रिभिर्युयुजे सं
गतः रघुरप्यनपायिपदस्य मोक्षस्योपलब्धये प्राप्तये यथार्थदर्शिनो यथार्थवादिनश्चाप्तास्तैर्योगिभिः समियाय संगतः उभयत्राप्युपायचिंतार्थमि

नभसा निभृतेंदुना तुलामुदितार्केण समारुरोह तत् १५ यतिपार्थिवलिंगधारिणौ ददृशाते रघुराघवौ जनैः अपवर्गम
होदयार्थयोर्भुवमंशाविव धर्मयोर्गतौ १६ अजिताधिगमाय मंत्रिभिर्युयुजे नीतिविशारदैरजः अनपायिपदोपलब्धये
रघुराप्तैः समियाय योगिभिः १७ नृपतिः प्रकृतीरवेक्षितुं व्यवहारासनमाददे युवा परिचेतुमुपांशुधारणां कुशपूतं प्रवया
स्तु विष्टरं १८ अनयत्प्रभुशक्तिसंपदा वशमेको नृपतीननंतरान् अपरः प्रणिधानयोग्यया मरुतः पंचशरीरगोचरान् १९

तिशेषः १७ नृपतिरिति युवा नृपतिरजः प्रकृतीः प्रजाः कार्यार्थं नीरवेक्षितुं द्रष्टुं दृष्टपरिज्ञानार्थमित्यर्थः व्यवहारासनं धर्मासनमाददे स्वी
चकार प्रवया रघुः प्रवयाः स्थविरो वृद्ध इत्यमरः धारणां चित्तस्यैकात्मतां परिचेतुं अभ्यसितुं उपांशु विजने उपांशु विजने प्रोक्तमिति हलायुधः ७८
कुशैः पूतं विष्टरमाददे यमादिगुणसंयुक्ते मनसः स्थितिरात्मनि धारणा प्रोच्यते सद्भिर्योगशास्त्रविशारदैरिति वसिष्ठः १८ अनयदिति एकः
कोन्यतमोजः अनंतरान् स्वभूम्यनंतरान् नृपतीन् यातव्यपार्ष्णिग्राहादीन् प्रभुशक्तिसंपदा कोशदंडमहिम्ना वशं स्वायत्ततां अनयत् अपरो रघुः प्रणि

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust, Delhi and eGangotri

धानयोग्ययासमाध्यभ्यासेन योग्योभ्यासकार्ययोरितिविश्वः शरीरगोचरान्देहाश्रयान्पंचमरुतः पंचप्राणादीन्वशमनयत् १९॥ अकरोदि
ति अचिरेश्वरोऽजः क्षितौ द्विषतामारंभाः कर्माणि तेषां फलानि भस्मसादकरोत् भस्मीचकार विभाषासातिकार्त्स्न्ये इति सातिप्रत्ययः इतरो रघुः
ज्ञानमयेन तत्त्वज्ञानप्रचुरेण वह्निना करणेन पावकेन स्वकर्मणां भववीजभूतानां दहने भस्मीकरणे ववृते स्वकर्माणि दग्धुं प्रवृत्त इत्यर्थः ज्ञा
नाग्निः सर्वकर्माणि भस्मसात्कुरुतेऽर्जुनेति गीतायाम् २० पणेति अजः पणबंधः संधिरिति कौटिल्यः पणबंधमुखान्संध्यादीन्षड्गुणान्संधिर्नावि
ग्रहो यानमासनं द्वैधमाश्रयः षड्गुणा इत्यमरः तत्फलं तेषां गुणानां फलं समीक्ष्य आलोच्य प्रायुंक्त फलिष्यन्तमेव गुणं प्रायुंक्तेत्यर्थः प्रोपाभ्यां युजेरयज्ञ

अकरोदचिरेश्वरः क्षितौ द्विषदारंभफलानि भस्मसात् इतरो दहने स्वकर्मणां ववृते ज्ञानमयेन वह्निना २० पणबंधमु
खान्गुणानजः षडुपायुंक्त समीक्ष्य तत्फलम् रघुरप्यजयद्गुणत्रयं प्रकृतिस्थं समलोष्टकांचनः २१ न नवः प्रभुराफलोदया
त्स्थिरकर्मा विरराम कर्मणः न च योगविधेर्नवेतरः स्थिरधीरापरमात्मदर्शनात् २२ इति शत्रुषु चेंद्रियेषु च प्रतिषिद्धप्रसरेषु जा

पात्रेऽपि स्वात्मने परं समतुल्यो यथा भावितो लोष्टो मृत्खंडपिंडः कांचनं सुवर्णं यस्य स समलोष्टकांचनो निःस्पृह इत्यर्थः लोष्टानि लोष्टवः पुंसी सम २१ ग्रतौ न
रः रघुरपि गुणत्रयं सत्त्वादिकम् गुणाः सत्त्वं रजस्तम इत्यमरः प्रकृतौ साम्यावस्थायामेव तिष्ठतीति प्रकृतिस्थं पुनर्विकारशून्यं यथा भवति तथा अजयत् २१
नेति स्थिरकर्मा आफलोदयकारी नवः प्रभुरजः आफलोदयात्फलसिद्धिपर्यंतं कर्मण आरंभात् न विरराम न निवृत्तः जुगुप्साविरामप्रमादार्थानामुप
संख्यानात्पंचमी व्याङ्परिभ्यो रम इति परस्मैपदम् स्थिरधीर्नवेतरो रघुः आपरमात्मदर्शनात् परमात्मसाक्षात्कारपर्यंतं योगविधेरात्मानुसंधानान्न
विरराम २२ इतीति इत्येवं प्रतिषिद्धः प्रसरः स्वार्थप्रवृत्तिर्येषां तेषु शत्रुषु चेंद्रियेषु च जाग्रतावप्रमत्तौ उदयापवर्गयोरभ्युदयमोक्षयोः प्रसितावासक्तौ

र.टी. तत्परे प्रसितासक्ताविसमरः उभावजरघू उभयीं द्विविधां अभ्युदयमोक्षरूपां उभादुदात्तो नित्यमिति तयपोऽयजादेशः टिड्ढेति ङीप् सिद्धिं फल
स.८ मवापतुः उभावुभे सिद्धी यथासंख्यमवापतुः २२ अथेति अथ रघुः समदर्शनः सर्वभूतेषु समदृष्टिः सन्नजव्यपेक्षया अजकांक्षानुरोधेन काश्चित्समाः क
८० तिचिद्वर्षाणि हायनोऽस्त्री शरत्समा इत्यमरः समा वर्षं समं तुल्यमिति विश्वः गमयित्वा योगसमाधिना सेव्यानुसंधानेन संयोगो योग इत्युक्तो जीवात्मपरमा
त्मनोरिति विशिष्टः अव्ययमविनाशिनं तमसः परं अविद्यायाः परं अव्ययमनंतं पुरुषं परमात्मानं प्रापत् परमात्मैक्यं प्रापदित्यर्थः २३ श्रुतेति अग्नि
चित् अग्निं चितवान् अग्निचित् अग्नेश्चेरिति क्विप्प्रत्ययः राघवोऽजः पितुः श्रुतदेहविसर्जनः श्रुतपितृदेहत्यागः सन् चिरमश्रूणि बाष्पान् विमुच्यास्यपि

प्रसितावुदयापवर्गयोरुभयोः सिद्धिमुभाववापतुः २३ अथ काश्चिदजव्यपेक्षया गमयित्वा समदर्शनः समाः तमसः प
रमापदव्ययं पुरुषं योगसमाधिना रघुः २४ श्रुतदेहविसर्जनः पितुश्चिरमश्रूणि विमुच्य राघवः विदधे विधिमस्य नैष्ठिकं य
तिभिः सार्धमनग्निमग्निचित् २५ अकरोत्स तदौर्ध्वदैहिकं पितृभक्त्या पितृकार्यकल्पवित् न हि तेन पथा तनुत्यजस्तनया
वर्जितपिंडकांक्षिणः २६

तुः यतिभिः परिव्राजकैः सार्द्धं अनग्निमग्निसंस्काररहितम् अनग्निसाध्यमित्यर्थः निष्ठायां मृतौ भवं नैष्ठिकं वि
धिं तत्संकल्पविधिपूर्वकश्राद्धं अंत्यकर्म विदधे चक्रे अनग्निविधिमित्यत्र शौनकः सर्वसंगनिवृत्तस्य ध्यानयोगरतस्य च न तस्य दहनं कार्यं नैव
पिंडोदकक्रिया निदध्यात् प्रणवेनैव बिले भिक्षोः कलेवरं प्रोक्षणं खननं चैव सर्वं तेनैव कारयेदिति २५ अकरोदिति पितृकार्यकल्पवित् श्राद्धविधा
नज्ञः सोऽजः तदा ऊर्ध्वदेहोद्भवं और्ध्वदेहिकं श्राद्धं ऊर्ध्वदेहाच्चेति वक्तव्यमिति ठक्प्रत्ययः अनुशतिकादित्वादुभयपदवृद्धिः पितृभक्त्या अकरोत् न तु विधिव ८०
लीत्यर्थः एतदेवाह न हीति तेन पथा योगमार्गेण तनुत्यजो देहत्यागिनः तनयेनावर्जितं पिंडं कांक्षंतीति तथोक्ताः न हि भवंति केवलं पुत्रेणावश्यं कर्त

सइति परार्ध्यगतेरुत्कृष्टगतेः प्राप्तमोक्षस्य पितुरशोच्यतां शोकानर्हत्वं उद्दिश्याभिधाय शोकोनकर्तव्य इत्युद्दिश्येत्यर्थः सदर्थवेदिभिर्वृद्धैः शमिताधिर्निवर्तितमनोव्यथः पुंस्याधिर्मानसीव्यथा इत्यमरः सोऽजः अधिज्यं ज्यया अधिकृत्य वर्तत इत्यधिज्यमारोपितमौर्वीकं कार्मुकं यस्य सः तथोक्तः सन् पालनार्थं उद्यतकोदंड इत्यर्थः जगत् कर्मभूतम् जगल्लोकमप्रतिशासनं द्वितीयाज्ञारहितं कृतवान्स्वयमेव सर्वनियामकोभूदित्यर्थः २७ क्षितिरिति क्षितिर्मही भामिनी कामिनी इंदुमती च भामिनीति विशेषणेन सपत्नीविषयं मात्सर्यं व्यज्यते भामिनी कामिनी चेति हलायुधः अग्र्यपौरुषं महापराक्रमं उत्कृष्टभोगशक्तिं च तमजं पतिमासाद्य प्राप्य तत्र प्रथमा क्षितिः बहूनि रत्नानि श्रेष्ठवस्तूनि सूते इति बहुरत्नसूरभूत् रत्नं स्वजातिश्रेष्ठेपी समरः अपरा इंदुमती वी

संपरार्ध्यगतेरशोच्यतां पितुरुद्दिश्य सदर्थवेदिभिः शमिताधिरधिज्यकार्मुकः कृतवानप्रतिशासनं जगत् २७ क्षितिरिंदु
मती च भामिनी पतिमासाद्य तमग्र्यपौरुषं प्रथमा बहुरत्नसूरभूदपरा वीरमजीजनत्सुतम् २८ दशरश्मिशतोपमद्युतिं यशसा
दिक्षु दशस्वपि श्रुतं दशपूर्वरथं यमाख्यया दशकंठारिगुरुं विदुर्बुधाः २९ ऋषिदेवगणस्वधाभुजां श्रुतयागप्रसवैः संपार्थिवः॥

रं सुतमजीजनत् जनयति स्म सहेत्यनेन सादृश्यमुच्यते २८ किंनामकोऽसावत आह दशेति दशरश्मिशतानि यस्य सः दशरश्मिशतः सूर्यः दशरश्मिशतः स उपमा यस्याः सा द्युतिर्यस्य तं यशसा करणेन दशसु दिक्षु आशास्वपि श्रुतं प्रसिद्धम् दशकंठस्य रावणस्यारेः श्रीरामचंद्रस्य गुरुं पितरं यं सुतं आख्यया नाम्ना विदुर्जानंति बुधाः दशेति पूर्वपदं यस्य दशरथपदस्य स दशपूर्वः स चासौ रथश्चेति विग्रहः बुधा विद्वांसो विदुर्जानन्ति बहुव्रीहिरत्र नेष्टः तदर्थानुपपत्तेरनेककोटिरथत्वात् दशरथश्चेत्याशयेन नामैव पूर्वपदव्यवहितं प्रयुक्तः एतदनुसारान्माघोपि हिरण्यपूर्वं कशिपुं प्रचक्षते इति प्रयुक्तम् २९ ऋषीति श्रुतयागप्रसवैः स्वाध्याययजनसंतानैः करणैः यथासंख्यं ऋषीणां देवगणानामिंद्रादीनां स्वधाभुजां पितॄणां ॥

Digitized by Sarayu Foundation Trust, Delhi and eGangotri

अनृणत्वं ऋणनिर्मुक्तत्वं उपेयिवान् प्राप्तवान् एषवा अनृणो यः पुत्री यज्वा ब्रह्मचारिवासीति श्रुतेः सपार्थिवोजः परिधेः परिवेषात् मुक्तो निर्गतः कर्म कर्त्तापरिवेषस्तु परिधिरित्यमरः उष्णदीधितिः सूर्यइव बभाविसुपमा ३० बलमिति तस्य विभोः केवलं वसुधनमेव परं प्रयोजनम् परोपकारकं नाभूत् किं तु गुणवत्तापि गुणित्वमपि परप्रयोजनं परेषामन्येषां प्रयोजनं यस्याः सापरप्रयोजना वैधेयाभ्यत्वेन प्रधानतद्गुणविशेषणादेकं वसु केवलमित्यूहनीयम् तथा हि बलं पौरुषं आर्तानामापन्नानां भयस्योपशान्तये न तु स्वार्थं परपीडार्थं वा बहुभूरि श्रुतं विद्या विदुषां सत्कृतये सत्कारायन तु स्वैकाय बभूव ३१ सइति अवेक्षितप्रजः अकुतोभयत्वेनानुसंहितप्रजः निसमसि च प्रजामेधयोरिति असिच्प्रत्ययः केवलं स्त्रैणेन भवतीति भावः शोभनाः प्रजाः यस्य सो सुप्रजाः सुपुत्र

अनृणत्वमुपेयिवान्बभौ परिधेर्मुक्त इवोष्णदीधितिः ३० बलमार्तभयोपशान्तये विदुषां सत्कृतये बहुश्रुतम् वसु तस्य विभो
र्न केवलं गुणवत्तापि परप्रयोजनम् ३१ स कदाचिदवेक्षितप्रजः सह देव्या विजहार सुप्रजाः नगरोपवने शचीसखो मरुतां पालयितेव
नन्दने ३२ अथ रोधसि दक्षिणोदधेः श्रितगोकर्णनिकेतमीश्वरम् उपवीणयितुं ययौ रवेरुदयावृत्तिपथेन नारदः ३३ ॥
कुसुमैर्ग्रथितामपार्थिवैः स्रजमातोद्यशिरोनिवेशिताम् अहरत्किल तस्य वेगवानधिवाससस्पृहयेव मारुतः ३४ ॥ ॥

वान् पुत्रस्य सम्भार इति भावः सोऽजः कदाचिद्देव्या इन्दुमत्या सह नन्दनाख्ये नगरोपवने मरुतां पालयिता शचीसख इन्द्र इव विजहार चिक्रीड ३२ अथेति दक्षिणोदधेः रोधसि तीरे श्रितो गोकर्णनिकेतो गोकर्णस्थानं येन तमीश्वरं शिवमुपवीणयितुं वीणया उपसमीपे गातुम् सत्यापपाशेत्यादिना वीणाशब्दादुपगानार्थे णिच्प्रत्ययः ततस्तुमुन् नारदो देवर्षिः रवेः सम्बन्धिना उदयावृत्तिपथेन आकाशमार्गेण ययौ ३३ कुसुमैरिति अपार्थिवैर्दिव्यैरित्यर्थः कुसुमैर्ग्रथितां रचितां तस्य नारदस्यातोद्यस्य वाद्यस्य वीणायाः शिरसि निवेशितां चतुर्विधमिदं वाद्यं वादित्रातोद्यनामकमित्यमरः अहरत्किल किलेत्यैति

भ्रमरैरिति कुसुमानुसारिभिः पुष्पानुयातिभिर्भ्रमरैः विनिकीर्णा व्याप्ता मुनेर्नारदस्य परिवादिनी वीणाविशेषः वीणा तु वल्लकी विपंची सा तु तं
त्रीभिः सप्तभिः परिवादिनी समरः पवनस्य वायोरवलेपोधिक्षेपः तज्जमवलेपजं हरणारूपगर्वजातं अंजनेन कज्जलेनाविलं कलुषं वाष्पमश्रु सृजंतीव मु
चंतीव ददृशे दृष्टा वेति शत्रुरिति च वर्तमाने आच्छीनद्योर्नुमिति नुम्विकल्पः परिभूता स्त्रियो हि रुदंतीति भावः ३५ अभिभूयेति सा अमरस्रक् दिव्यमाला मधु
गंधयोर्मकरंदसौरभयोरतिशयेनाधिक्येन वीरुधां लतानां नगरेणपवनवर्तिनीनां लतानां प्रतानिनी वीरुदित्यमरः ऋतोः प्राप्तामार्तवीं विसतत्क्रतु संबंधिनीं वि
भूतिं समृद्धिं पुष्पाणामभिभूय नृपतेः दयिताया इंदुमत्याः उरस्थस्तनं मालां वेगवान्मारुतः अधिवासे वासनायां स्पृहयेव स्रजा स्वां गं संसक्तिमित्यर्थः संस्का

भ्रमरैः कुसुमानुसारिभिर्विनिकीर्णा परि वादिनी मुनेः ददृशे पवनावलेपजं सृजती बाष्पमिवांजनाविलं ३५ अभिभूय विभू
तिमार्तवीं मधुगंधातिशयेन वीरुधाम् नृपतेरमरस्रगाप सा दयितोरस्तुंगकोटिषु स्थितिम् ३६ क्षणमात्रसखीं सुजातयोः स्त
नयोस्तामवलोक्य विह्वला निमिमील नरोत्तमप्रिया हृतचंद्रा तमसेव कौमुदी ३७ वपुषा करणोज्झितेन सा निपतंती पति
ममप्यपातयत्

रोगन्धमाल्याद्यैर्यस्यातद्धिवासनमित्यमरः दयितोरस्तुंगकोटिषु उरस्थीयते आभ्यामित्युरस्तुंगौ कुचौ पृषोदरादित्वात्साधुः तयोः सु
स्थितिं स्थानमाप उरस्थंदः कंचुक इति केचित् ३६ क्षणमिति सुजन्मनोः सुंदरयोरित्यर्थः स्तनयोः क्षणमात्रं सखीमिव स्थितां सुजातत्वसाधर्म्यान्सख
जः स्तनसखीत्वमिति भावः तां स्रजमवलोक्य विह्वला विवशा नरोत्तमप्रिया इंदुमती तमसा राहुणा तमस्तु राहुः स्वर्भानुरित्यमरः हृतचंद्रा कौमुदीव निमिमील
ममारेत्यर्थः निमीलं दीर्घनिद्रा चेति हलायुधः ३७ वपुषेति करणैरिंद्रियैरुज्झितेन करणं साधकतमं क्षेत्रमात्रेंद्रियेष्वपीत्यमरः वपुषा करणेन
निपतंती सा इंदुमती पतिमजमप्यपातयत् पातयति स्म तथा हि निषिच्यत इति निषेकः क्षारतैलमित्यर्थः

र०टी० तस्यविंदुनासहदीयार्चिः दीपज्वालांमेदिनींभुवमुपैतिननुउपैत्येवेनत्वत्रावधारणे प्रश्नावधारणानुज्ञानुनयामंत्रणेननुइत्यमरः ३८ उभयोरि
स०८ ति उभयोर्दंपत्योः परिपार्श्ववर्त्तिनांपरिजनानांतुमुलेनसंकुलेनार्त्तरवेणाकरुणस्वनेनवेजिताः भीताः कमलाकराश्रयाः सरःस्थिताविहगाहंसादयः
८२ तत्रोपवनेसमदुःखाइवचुक्रुशुः चक्रंदुः ३९ नृपतेरितिनृपतेरजस्यतमोऽज्ञानंव्यजनादिभिः साधनैर्नुनुदेअपसारितंसातुइंदुमतीतथैवसंस्थि
तामृतातथाहिप्रतीकारस्यविधानंचिकित्साआयुषोजीवितकालस्यशेषेसतिविद्यमानेआयुर्जीवितकालंफलायकल्पते आरोग्यायभवतिनान्य
थातस्मादायुषःशेषसद्भावात्प्रतीकारस्यसाफल्यंतस्यास्तदभावादित्यर्थः ४० प्रतीति अथसत्वस्यचैतन्यस्यविप्लवात् विनाशाद्धेतोः द्रव्योऽसुव्य

ननुतैलनिषेकविंदुनासहदीपार्चिरुपैतिमेदिनीम् ३८ उभयोः परिपार्श्ववर्त्तिनांतुमुलेनार्त्तरवेणवेजिताः विहगाः कम
लाकराश्रयाः समदुःखाइवतत्रचुक्रुशुः ३९ नृपतेर्व्यजनादिभिस्तमोननुदेसातुतथैवसंस्थिता प्रतिकारविधानमायुषः स
तिशेषेहिफलायकल्पते ४० प्रतियोजयितव्यवल्लकीसमवस्थामथसत्वविप्लवात् सनिनायनितांतवत्सलः परिगृह्योचि
तमंकमंगनां ४१ पतिरंकनिषण्णयातयाकरणापायविभिन्नवर्णया समलक्ष्यतविभ्रदाविलांमृगलेखामुषसीवचंद्रमाः ४२

वसायेप्युसत्वमस्त्रीतुजंतुषु इत्यमरः प्रतियोजयितव्यातंत्रीभिर्योजनीयानतुयोजितापितंत्रीत्यर्थः तस्याः वल्लक्याः वीणायाः समवस्थाइवावस्थायस्या ८२
स्तामंगनांवनितांवत्सलोऽतिप्रेमवान्सोऽजःपरिगृह्यहस्ताभ्यांगृहीत्वाउचितंपरिचितमंकंउत्संगंनिनायनीतवान् ४१ पतिरितिपतिरजः अंकनिष
ण्णयाउत्संगस्थितयाकरणानामिंद्रियाणांतदुपलक्षितचैतन्यस्यापायेनापगमेनहेतुना विभिन्नवर्णयाविगतच्छाययातयाप्रिययाउपलक्षितः उषसि
प्रातः आविलांमलिनांमृगलेखारूपंलांछनंविभ्रद्धारयन्चंद्रमाइवसमलक्ष्यतेत्युपमा ४२

विललापेति सोऽजः सहजां स्वाभाविकीमपि धीरतां धैर्यम् अपहाय त्यक्त्वा बाष्पेण कंठगतेन गद्गदं विशीर्णाक्षरं यथा तथा ध्वनिमात्रानुकारि गद्गद शब्दैर्विलला पपरिदेवितवान् विलापः परिदेवनमित्यमरः धैर्यापहाने दुःखातिशयः कारणमित्याशयेनाह अभितप्तं अग्निना संतप्तं अयोऽपि मार्दवं मृदुत्वं भजते शरीरिषु देहिषु अभिसंतप्तेष्वितिशेषः विषये कैव कथा वार्त्ता अनुक्तसिद्धमित्यर्थः ४३ कुसुमानीति कुसुमानि पुष्पाण्यपि अपिशब्दो नितांतमार्दवद्योतनार्थः गात्रसं गमात् देहसंसर्गात् आयुरपोहितुं अपहंतुं प्रभवंति यदि हंतेति विषादे हंत हर्षे विषादेऽपीत्यमरः प्रहरिष्यतो विधेर्दैवस्यान्यत् कुसुमातिरिक्तं किमिव व स्तु इवशब्दो वाक्यालंकारे कीदृशमित्यर्थः साधनं न भविष्यति सर्वमपि साधनं भविष्यत्येवेत्यर्थः ४४ अथवेति अथवा पक्षांतरे प्रजांतकः कालः मृदु

विललाप स बाष्पगद्गदं सहजामप्यपहाय धीरताम् अभितप्तमयोऽपि मार्दवं भजते कैव कथा शरीरिषु ४३ कुसुमान्यपि गात्र
संगमात्प्रभवंत्यायुरपोहितुं यदि न भविष्यति हंत साधनं किमिवान्यत्प्रहरिष्यतो विधेः ४४ अथवा मृदु वस्तु हिंसितुं मृदुनैवारभ
ते प्रजांतकः हिमसेकविपत्तिरत्र मे नलिनी पूर्वनिदर्शनं मता ४५ स्रगियं यदि जीवितापहा निहिता किं हृदये न हंति मां विषम
प्यमृतं क्वचिद्भवेदमृतं वा विषमीश्वरेच्छया ४६ अथवा मम भाग्यविप्लवादशनिः कल्पित एष वेधसा॥ यदनेन न पातितस्तरुः ३

कोमलं वस्तु मृदुनैव वस्तुना हिंसितुं हंतुं आरभते उपक्रमते अत्रार्थे हिमसेकेन तुषारनिष्यंदेन विपत्तिर्यस्याः सा नलि ((पितातद्विटपाश्रितालता
नी पद्मिनी पूर्वनिदर्शनं प्रथमोदाहरणं मे मता द्वितीयं निदर्शनं पुष्पमृत्युरिंदुमतीति भावः प्रथमोदाहरणम् ४५ स्रगिति इयं स्रक् जीवितं अपहंतीति जी
वितापहा यदि तर्हि हृदये वक्षसि हृदयं वक्षसि स्वांत इत्यमरः निहिता सती मां किं न हंति ईश्वरेच्छया क्वचित्प्रदेशे विषमप्यमृतं भवेत् क्वचिदमृतं वा विषं भवे
त् दैवमेवात्र कारणमित्यर्थः ४६ अथवेति अथवा मम भाग्यस्य विप्लवाद्विपर्ययात् एषा स्रगित्यर्थः विधेः प्राधान्यात् पुल्लिंगनिर्देशः वेधसा विधात्रा

अशनिर्विद्युतोग्निः कल्पितः दंभोलिरशनिर्द्वयोरित्यमरः यत् यस्मात्कारणादनेनाप्यशनिना प्रसिद्धाशनिनैव तरुस्तरुस्थानीयः राजा एव स्वयमेव न निपाति
तः किंतु तस्य तरोर्विटपाश्रिता लता सपिनानाशिता ४७ कृतेति मयि चिरं भूरि भृशमपराद्धेपि अपराधं कृतवत्यपि राधेः कर्त्तरि क्तः यदा यतो हेतोः यदेति हे
त्वर्थः स्वरादौ पठ्यते यदेति हेतावितिगणव्याख्यानात् अवधीरणामवज्ञां कांचित् कदाचित् न कृतवत्यसि तत्कथं एकपदे तत्क्षणे स्यात्तत्क्षणे एकप
दे इममिति विश्वः निरागसं निरपराधमिति वा यं इमं जनं इममिति स्वात्मनिर्देशः मामित्यर्थः आभाष्यं संभाष्यं न मन्यसे ४८ ध्रुवमिति हे शुचिस्मिते
धवलहसिते शठो गूढविप्रियकारी कैतवेन कपटेन वत्सलः स्निग्धः कैतववत्सल इत्यमरः ध्रुवं सत्यं तव विदितः त्वया वेद्यमानोस्मि गतिबुद्ध्यादिना

कृतवत्यसि नावधीरणामपराद्धेपि चिरं क्वचिन्मयि कथमेकपदे निरागसं जनमाभाष्यमिमं न मन्यसे ४८ ध्रुवमस्मि शठः
शुचिस्मिते विदितः कैतववत्सलस्तव परलोकमसन्निवृत्तये यदनापृच्छ्य गतासि मामितः ४९ दयितां यदि तावदन्वगाद्विनि
वृत्तं किमिदं तया विना सहतां हतजीवितं मम प्रबलामात्मकृतेन वेदनाम् ५० सुरतश्रमसंभृतो मुखे ध्रियते स्वेदलवोद्गमो
पि ते अथ वास्तमिता त्वमात्मना धिगिमां देहभृतामसारताम् ५१ ॥

९ कर्त्तरि क्तः क्तस्य च वर्तमाने इति कर्त्तरि षष्ठी कृतः यद्यस्मात् मामनापृ
च्छ्य अनामंत्र्य इतः अस्माल्लोकात्परलोकं असंनिवृत्तये अपुनरावृत्तये गतासि ४९ दयितामिति इदं मम हतं जीवितं तावद्दारादे दयितामन्वगाद् अन्व
गच्छद्यदि अन्वगादेव यद्यत्रावधारणे पूर्वं मूर्छालोस्त्वहमिति भावः तया विना किं किमर्थं विनिवृत्तं अनुगमनायुक्तमित्यर्थः अत एव आत्मकृते
न स्वदुश्चेष्टितेन निवृत्तिरूपेण प्रबलां वेदनां सहतां स्वयंकृतापराधेषु क्षमस्वैव प्रारणामिति भावः ५० सुरतेति सुरतश्रमेण संभृतो जनितः स्वे
दलवोद्गमोपि अथवा यापि ते तव मुखे ध्रियते व्याप्नोति यतः कारणात् एतादृशी त्वं आत्मना स्वरूपेण अस्तं इता प्राप्ता अतः कारणात् इमां देहभृता

मनसेति मयाकर्त्र्यामनसापितवविप्रियंनकृतपूर्वंनकृतमित्यर्थः सुप्सुपेतिसमासः किंमांजहासि ननुअहंक्षितेः शब्दपतिः शब्दएवपतिः नत्वर्थतस्त्व
र्थः भावनिबंधनाख्यभावहेतुका अभिप्रायनिबंधनामेरतिर्वाञ्छात्वय्येव अस्तीतिशेषः ५२ कुसुमेति कुसुमैः उत्कर्षेणखचितान् व्रलीभूताभृंगीयुक्तान्भृंगरुचो
नीलान् तवालकान् चलयन् कंपयन् मारुतः हेकरभोरुमेमनस्त्वदुपावर्तनशंकि पुनरागमनेशंकावत्करोति त्वदुज्जीवनेशंकांकरोतीत्यर्थः ५३ तदिति हेप्रि
यतत्तस्मात्कारणात् आशुमेविषादंदुःखंनक्तंरात्रौ औषधिः तृणज्योतिराख्यालताज्वलितेनप्रकाशेनतुहिनाद्रेर्गुहागतंतमरवप्रतिबोधेनत्वानिनत्र्यपो

मनसापिनविप्रियंमयाकृतपूर्वंतवकिंजहासिमाम् ननुशब्दपतिःक्षितेरहंत्वयिमेभावनिबंधनारतिः ५२ कुसुमोत्खचिता
न्वलीभृतश्चलयन्भृंगरुचस्तवालकान् करभोरुकरोतिमारुतस्त्वदुपावर्तनसंकिंममनः ५३ तदपोहितुमर्हसिप्रियेप्रतिबोधेन
विषादमाशुमेज्वलितेनगुहागतंतमस्तुहिनाद्रेरिवनक्तमोषधिः ५४ इदमुच्छ्वसितालकंमुखंतवविश्रांतकथंदुनोतिमां निशिसुप्त
मिवैकपंकजंविरताभ्यंतरषट्पदस्वनम् ५५ शशिनंपुनरेतिशर्वरीदयिताद्वंद्वचरंपतत्त्रिणम् इतितौविरहांतरक्षमौकथमत्यंतग
तानमांदहेः ५६॥ ॐ ॥ ९ हितुंनिरसितुमर्हसि ५४ इदमिति इदमुच्छ्वसितालकंचलितकुंतलंविश्रांतकथंनिवृत्तसंलापंतवेदंमुखंनि
शिसुप्तंनिमीलितंविरतः अभ्यंतराणामंतर्वर्तिनांषट्पदानांस्वनोयस्यतत्तनिः शब्दभृंगमित्यर्थः एकंपंकजमिवमांदुनोतिपरितापयति ५५ शशिन
मिति शर्वरीरात्रिः शशिनंचंद्रंपुनरेतिप्राप्नोति द्वंद्वीभूयचरतीतिद्वंद्वचरंसंपतत्त्रिणंचक्रवाकंदयिताचक्रवाकीपुनरेतिहेतोः तौचंद्रचक्रवाकौ
विरहांतरक्षमौविरहावधिसहौ अंतरमवकाशावधिपरिधानांतर्द्धिभेदतादर्थ्येस्समरः अत्यंतगतापुनरावृत्तिरहितांत्वंतुकथंमानदहेः अ

गीतगोविंदटी॰ ५४॥

र॰टी॰ नवेति नवपल्लवसंस्तरे नूतनप्रवालशयने अर्पितं स्थापितं अर्पिते मृदुतेयदंगं शरीरं दूयेत परितप्तं भवेत् वामौ सुंदरौ ऊरू यस्याः सा हे वामोरु वामं भ
स॰८ स्यात्सुंदरे सव्य इति केशवः सहितशफलक्षणेत्यादिना ऊङ् प्रत्ययः तदिदमंगं चितायाः काष्ठसंचयस्याधिरोहणं कथं विषहिष्यते वद ५७ इयं
८४ इति इयं प्रथमा रहः सखी सुरतसमये व्यञ्जनायाद्दिति भावः गतिविभ्रमसादनीरवा विलासोपरमेण निःशब्दा रशना मेखला अप्रतिबोधं अ
पुनरुद्बोधं यथा तथा शायिनीं मृतामित्यर्थः त्वां अनुलक्षया सह तृतीयार्थे इत्यनुशब्दस्य कर्मप्रवचनीयत्वे कर्मप्रवचनीययुक्ते द्वितीया न जीवति
शुचा शोकेनानुमृतेव न लक्ष्यत इति न लक्ष्यत एवेत्यर्थः संभाव्यनिषेधनिवर्त्तने द्वौ प्रतिषेधाविति भावः ५८ कलमिति त्रिदिवेति सुगमं अन्यभृता

नवपल्लवसंस्तरेऽपि ते मृदु दूयेत यदंगमर्पितम् तदिदं विषहिष्यते कथं वद वामोरु चिताधिरोहणम् ५७ इयमप्रतिबोधशायिनी
रशना त्वां प्रथमा रहःसखी गतिविभ्रमसादनीरवा न शुचा नानुमृतेव लक्ष्यते ५८ कलमन्यभृतासु भाषितं कलहंसीषु गतं
मदालसं पृषतीषु विलोलमीक्षितं पवनोद्धूतलतासु विभ्रमाः ५९ त्रिदिवोत्सुकयाप्यवेक्ष्य मां निहिताः सत्यममी
गुणास्त्वया विरहे तव मे गुरुव्यथं हृदयं न त्ववलंबितुं क्षमाः ६०॥

॥ सुकोकिलासु कलं मधुरं भाषितं भाषणं कलहंसीषु मदालसं मं
थरं गतं गमनं पृषतीषु हरिणीषु विलोलमीक्षितं चंचलदृष्टिः पवनेन वायुना उद्धूतलतासु ईषत्कंपितलतासु विभ्रमाः विलासाः इत्यमी पूर्वोक्ताः कलभा
षणादयो गुणाः एषु कोकिलादिस्थानेष्विति शेषः ५९ त्रिदिवोत्सुकयापि इह जीवं त्यक्त्वैव स्वर्गं प्रति प्रस्थितयापि त्वया मामवेक्ष्य विरहासहं विचार्य स ८४
त्यं निहिताः मत्प्राणधारणोपायतया स्थापिता इत्यर्थः तव विरहे गुरुव्यथमतिदुःखं मे हृदयमवलंबितुं स्थापयितुं न क्षमाः न शक्ताः ते तु त्वत्संग
म एव सुखकारिणः नान्यथा प्रत्युत प्राणानपहरंतीति भावः ६०॥

Digitized by Sarayu Foundation Trust, Delhi and eGangotri

मिथुनमिति ननु हे मयेम सहकारश्चूतविशेषः फलिनी च प्रियंगुलता चेमौ त्वया मिथुनं परिकल्पितं मिथुनत्वेनाभ्यर्थितम् संभावितम् अनयोः फलिनी
सहकारयोर्विवाहसत्क्रियां विवाहमंगलमविधाय अकृत्वा गम्यते इत्यसांप्रतमयुक्तं मातृहीनानां न किंचित्सुखमस्तीति भावः ६१ कुसुममिति इहा
स्मिन्नशोकवृक्षे दोहदं त्वया कृतं दोहदं पादताडनरूपं यस्य सः अयमशोको यत्कुसुमं उदीरयिष्यति प्रसविष्यते तं वालकानामाभरणं आभरणभूतं त
त् कुसुमं कथं नु निवापमाल्यतां नेष्यामि पितृदानं निवापः स्यादित्यमरः ६२ स्मरतेति अन्यदुर्लभं किंतु स्मर्त्तव्यमेवेत्यर्थः सशब्दं नूपुरं यस्य तच्चरणे
नानुग्रहं तेन ताडनरूपं स्मरते व कुसुमान्येवाश्रूणि तद्वर्षिणा अमुना अशोकेन सुगात्रि अंगगात्रकंठेभ्यश्चेति वक्तव्यमिति ङीष् त्वं शोच्यसे ६३

युग्मं मिथुनं परिकल्पितं त्वया सहकारः फलिनी च नन्विमौ अविधाय विवाहसत्क्रियामनयोर्गम्यत इत्यसांप्रतं ६१ कुसुमं कृ
तदोहदस्त्वया यदशोकोयमुदीरयिष्यति अलकाभरणं कथं नु तत्तव नेष्यामि निवापमाल्यताम् ६२ स्मरतेव सशब्दनूपुरं
चरणानुग्रहमन्यदुर्लभम् अमुना कुसुमाश्रुवर्षिणा त्वमशोकेन सुगात्रि शोच्यसे ६३ तव निःश्वसितानुकारिभिर्वकुलै
रर्धचितां समं मया असमाप्य विलासमेखलां किमिदं किन्नरकंठि सुप्यते ६४ समदुःखसुखः सखीजनः प्रतिपच्चंद्रनिभो

तवेति तव निःश्वसितानुकारिभिः वकुलैः वकुलकुसुमैः मया समं सार्द्धं अर्द्धचितां अर्धं यथा तथा रचितां विलासमेखलां असमाप्य किन्नरस्येव
यानिविशेषस्य कंठ इव कंठो यस्याः तत्संबुद्धिः हे किंनरकंठि अंगगात्रकंठेभ्यश्चेति ङीष् किमिदं सुप्यते वचिस्वपीत्यादिना संप्रसारणं अनुचितमि
दं स्वपनमित्यर्थः ६४ समेति सखीजनः समदुःखसुखः त्वद्दुःखेन दुःखी त्वत्सुखेन सुखीत्यर्थः अयमात्मजो बालः प्रतिपच्चंद्रनिभः दर्शनीयो वर्धिष्ण
श्चेत्यर्थः प्रतिपच्छब्देन द्वितीया लक्ष्यते प्रतिपच्चंद्रस्यादर्शनात् अहमेकरसः समानुरागः भिन्नरागः शृंगारादौ विषवीर्यगुणे रागेद्रवे रस इत्यमरः तथा

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

पिजीवनसामग्र्येसत्यपीत्यर्थः नेतवव्यवसायोस्मत्परित्यागरूपोव्यापारः प्रतिपन्नप्रानिश्चयेन निष्ठुरः प्रतिपत्तिसुकर्तव्येन दृढोगौरवेपिच प्राप्तो प्रग
ल्भेप्रतिमाज्ञानयोरपीतिकेशवः स्मर्तुंनशक्यं किमुताधिकर्तुमितिभावः ६५ धृतिरिति अद्यमेधृतिः धैर्यं प्रतीतिर्वा अस्तंनाशमितागतिः अद्युनागत
गेयंगानंविरतं ऋतुर्वसंतादिनिरुत्सवः आभरणानांप्रयोजनंगतंअपगतंशेते अस्मिन्निति शयनीयंतल्पम् कृत्यल्युटोवहुलमित्यधिकरणार्थेनी
यरप्रत्ययः परिशून्यंत्वांविनासर्वमपिनिष्फलमित्यर्थः ६६ गृहिणीति त्वमेवगृहिणी दाराः सचिवोवुद्धिसहायोमंत्रीमिथोरहसिसखीनर्मसचिवः
ललितेमनोहरेकलाविधौवाद्यनृत्यादिचतुःषष्टिकलाप्रयोगेप्रियशिष्या अतस्त्वांसर्वसमष्टिरूपांहरता अतएवकरुणाविमुखेनकृपाशून्येन

अहमेकरसस्तथापितेव्यवसायः प्रतिपत्तिनिष्ठुरः ६५ धृतिरस्तमितागतिश्चयुताविरतंगेयमृतुर्निरुत्सवः गताभरणप्रयो
जनंपरिशून्यंशयनीयमद्यमे ६६ गृहिणीसचिवः सखीमिथः प्रियशिष्याललितेकलाविधौ करुणाविमुखेनमृत्युनाहरता
त्वांवदकिंनमेहृतं ६७ मदिराक्षिमदाननार्पितंमधुपीत्वारसवत्कथंनुमे अनुपास्यसिवाष्पदूषितंपरलोकोपनतंजलाञ्जलिं
६८ विभवेपिसतित्वयाविनासुखमेतावदजस्यगण्यताम्॥ ९ मृत्युनामेसंवंधिकिंनहृतंवदसर्वमपिहृतमित्यर्थः ६७ मदिरेति माद्यत्यन
यतिमदिरालोकप्रसिद्धातथापिनार्योमदिरालोचनाइत्यादिप्रयोगदर्शनात् माद्यत्याभ्यामितिमदिरे अक्षिणीयस्याःसत्संवुद्धिर्हेमदिराक्षिमदा
ननार्पितंरसवत्स्वादुतरंमधुमद्यंपीत्वावाष्पदूषितं अश्रुनष्टमपिपरलोकोपनतंपरलोकप्रापकंमेजलांजलिंकथंनुअन्वनन्तरंपास्यसितदनंतरम
दममर्हसीत्यर्थः यथाहभाट्टमल्लः अनुपानंहिमजलंयवगोधूमप्रमिश्रितंदध्निमद्येविषेक्षौद्रेपिष्टमिष्टमयेपिचेति नचात्रइहैवयुज्यते इदंतूक्तलोका
नरोपयोगिचेत्यायुर्वेदविरोधात् कथमनुपास्यसीति ६८ विभवेपीति विभवेऐश्वर्येसत्यपित्वयाविनाअजस्यैतावदेवसुखंगण्यताम् यावत्त्वया ८५

कुतो विलोभनांतरैर्विषयांतरैः अत्र तस्यानाकृष्टस्य मम सर्वे विषया भोगादयस्त्वदाश्रयाः त्वदधीनाः त्वां विना मे न किंचिद्रोचत इत्यर्थः ६९ विलप
न्निति कोसलाधियोऽज इति करुणः शोकरसः स एवार्थः तेन ग्रथितमवबद्धं यथा तथा प्रियां प्रति विलपन्पृथिवीरुहानपि वृक्षानपि स्रुताः शाखारसाः मक
रंदा एव बाष्पाः तैर्दूषितान् अकरोत् अचेतनानप्यरोदयदित्यर्थः ७० अथेति स्वजनो बंधुवर्गः तस्याजस्यांकत उत्संगात् कथंचिदपनीय तद्दिव्यकुसु
ममेवांत्यमंडनमलंकारो यस्यास्तां सुंदरीं अगुरूणि चंदनानि एधांसि यस्मिंस्तस्मै अनलायाग्नये विससर्ज विसृष्टवान् क्रियाग्रहणमपि कर्तव्यमि
ति क्रियामात्रप्रयोगे संप्रदानत्वाच्चतुर्थी ७१ प्रमदामिति नृपतिस्सन्नपि विद्वानपि शुचा शोकेन प्रमदामनु प्रमदया सह संस्थितो मृत इति वाच्यद

अत्र तस्य विलोभनांतरैर्मम सर्वे विषयास्त्वदाश्रयाः ६९ विलपन्निति कोसलाधिपः करुणार्थग्रथितं प्रियां प्रति अकरोत्पृ
थिवीरुहानपि स्रुतशाखारसबाष्पदूषितान् ७० अथ तस्य कथंचिदंकतः स्वजनस्तामपनीय सुंदरीं विससर्ज तदंत्यमंडना
मनलायागुरुचंदनैधसे ७१ प्रमदामनुसंस्थितः शुचा नृपतिः सन्निति वाच्यदर्शनात् न चकार शरीरमग्निसात्सह देव्या न
तु जीविताशया ७२ अथ तेन दशाहतः परे गुणशेषामुपदिश्य भामिनीं विदुषा विधयो महर्द्धयः पुर एवोपवने समापिताः ७३

र्शनान्निंदादर्शनात् देव्या इंदुमत्या सह शरीरमग्निसात् अग्न्यधीनं न चकार तदधीनवचन इति सातिप्रत्ययः जीविताशया प्राणेच्छया तु न ७२
अथेति अथ विदुषा तेनाजेन गुणा रूपादयः एव शेषाः यस्यास्तां गुणशेषां भामिनीमिंदुमतीमुपदिश्योद्दिश्य दशानामह्नां समाहारो दशाहः तद्धि
तार्थे समासः समाहारस्यैकत्वादेकवचनं राजाहःसखिभ्यष्टजिति टच् रात्राह्नाहाः पुंसीति पुंस्त्वं ननलसिः तस्माद्दशाहतः परे कर्तव्याः महर्द्धयः महा
समृद्धयो विधयः श्राद्धादयः क्रियाः पुरः पुर्या उपवन एव समापिताः संपूर्णा अनुष्ठिताः दशाहश्च पत्र विप्रः शुद्ध्येद्द्वादशाहेन भूमिप इति म

नुवचनखिदेः धीनाशंकनीयः तस्य निर्गुणत्वस्त्रियविषयत्वात् गुणवत्त्वात्स्त्रियस्य दृश्याहेन शुद्धिमाह पराधारः स्त्रियस्तु दृशा हे नस्वकर्मनिरतः शुचिरि
तिसूच्यते स्वापि गुणवत्त्वं विशेषेण ७३ सइति तयेदमत्या विनाक्षणदापायेरात्रेरपगमेयः शशांकश्चंद्रस्तस्येव दर्शनं यस्य सः सद्वदृश्यमानइत्यर्थः
सोऽजः पौरवधूमुखाश्रुषु स्वशुचः स्वशोकस्य परिवाहं जलोच्छासमिवावलोकयन् जलोच्छासाः परीवाहा इत्यमरः स्वदुःखातिरेकमिव पश्यन् पु
रीं विवेश पुरीग्रहणात्तस्यामिदमन्यासख्यभिमानाद्जसमानदुःखसूचकपरिवाहो विनिर्वहति ७४ अथेति अथानंतरं सवनाय यागाय दीक्षितः
गुरुर्वसिष्ठः स्वाश्रमे स्वकीयाश्रमे आश्रितः स्थितः सन्तं अजमभिषंगजडं दुःखमोहितं प्रणिधानात् चित्तैकाग्र्यात् विजज्ञिवान् ज्ञातवानिति

सविवेश पुरीं तया विना क्षणदापायशशांकदर्शनः । परिवाहमिवावलोकयन्स्वशुचः पौरवधूमुखाश्रुषु ७४ अथतं सव
नाय दीक्षितः प्रणिधानाद्गुरुराश्रमाश्रितः । अभिषंगजडं विजज्ञिवानिति शिष्येण किलान्वबोधयत् ७५ असमाप्तवि
धिर्यतो मुनिस्तव विद्वानपि शोककारणं । न भवंतमुपस्थितः स्वयं प्रकृतौ स्थापयितुं पथः श्रुतं ७६ मयि तेन स सुवृत्त वर्तते लघु
संदेशपदा सरस्वती । शृणु विश्रुतसत्वसार तां हृदि चैनामुपधातुमर्हसि ७७॥ ९ सुरादेशः इति वक्ष्यमाणप्रकारेण शिष्येणान्वबोधयत्

त्ववोधयतेर्ण्यंतात् लङ् ७५ वशिष्ठशिष्य आह असमाप्तेति यतो हेतोर्मुनिरसमाप्तविधिरसमापितक्रतुः संस्तव शोककारणं संसारदुःखहेतुकलत्रना
शरूपं विद्वान् जानन्नपि विदेः शतुर्वसुरिति वस्वादेशः नलोकेत्यादिना षष्ठीप्रतिषेधः प्रकृतौ पथः श्रुतं स्वभावभ्रंशं भवंतं प्रकृतौ स्वभावे स्थापयितुं
समाश्वासयितुमित्यर्थः स्वयं नोपस्थितः नागतवान् ७६ मयीति हे सुवृत्त सदाचारनिष्ठ संदिश्यत इति संदेशः संदेष्टव्यार्थस्तस्य पदानि लघूनि संक्षि
प्तानि संदेशपदानि यस्याः सा लघुसंदेशपदा तस्य मुनेः सरस्वती वाक् मयि वर्तते हे विश्रुतसत्वसार प्रख्यातधैर्यातिशय तां सरस्वतीं शृणु एनां च हृदि

वक्ष्यमाणार्थानुगुणं मुनेः सर्वज्ञत्वं तावदाह पुरुषस्येति अजन्मनः पुरुषस्य पुराणपुरुषस्य भगवतः विष्णोः पदेषु विक्रमेषु त्रिभुवनेष्वपीत्यर्थः स
मतीतं भूतं च भवद्वर्त्तमानं च भावि भविष्यच्चेति त्रितयं स मुनिः प्रतिभेन ज्ञानमयं ज्ञानप्रचुरं तेन चक्षुषा ज्ञानदृष्ट्या पश्यति अतस्तदुक्तिषु न
संशयितव्यमित्यर्थः ७८ चरत इति पुरा किल दुष्करं तीव्रं तपश्चरतः तृणविंदोः तृणविंदुनाम्नः सकाशात्परिशंकितो भीतः कर्तरि क्तः भीत्रार्था
नां भयहेतुरित्यपादानत्वात् यं चमी हरिरिंद्रः समाधिभेदिनीं हरिणीं नाम सुरांगनां अप्सरसं अस्मै तृणविंदवे प्रजिघाय प्रेषितवान् ७९ स इति
स मुनिः शमः शांतिरेव वेलामर्यादा तस्याः प्रलयोर्मिणा प्रलयकालतरंगेण वैराग्यविघातकेनेत्यर्थः अध्यमुविकृतो वेलाकालमर्यादयोरपी

पुरुषस्य पदेष्वजन्मनः समतीतं च भवच्च भावि च स मुनिः प्रतिभेन चक्षुषा त्रितयं ज्ञानमयेन पश्यति ७८ चरतः किल दु
ष्करं तपस्तृणविंदोः परिशंकितः पुरा प्रजिघाय समाधिभेदिनीं हरिरस्मै हरिणीं सुरांगनां ७९ स तपः प्रतिवंधमन्युना प्रमु
खाविष्कृतचारुविभ्रमां अशपद्भव मानुषीति तां शमवेलाप्रलयोर्मिणा मुनिः ८० भगवन्परवानयं जनः प्रतिकूलाचरितं क्ष
मस्व मे इति चोपनतां क्षितिस्पृशं कृतवानासुरपुष्पदर्शनात् ८१ क्रथकैशिकवंशसंभवा तव भूत्वा महिषी चिराय सा॰॥

न्मरः तपः प्रतिवंध एव योमन्युः क्षोभस्तेन हेतुना प्रमुखे अग्रे आविष्कृतचारुविभ्रमां प्रकटीकृतविलासां तां हरिणीं भूलोके मानुषी मनुष्यस्त्री भवेति अश
पत् शशाप ८० भगवन्निति हे भगवन्महर्षे अयं जनः परो स्यास्तीति स्वामित्वेन परवान्पराधीनः अयमिति अस्याः आत्मनि निर्देशः अहं परा
धीनेत्यर्थः मे मम प्रतिकूलाचरितं अपराधं क्षमस्वेति अनेन प्रकारेणोपनतां शरणागताम् हरिणीं आसुरपुष्पदर्शनात् सुरपुष्पदर्शनप
र्यंतं क्षितिं स्पृशतीति क्षितिस्पृक् तां क्षितिस्पृशं मानुषीं कृतवान् दिव्यपुष्पदर्शने शापावधिरित्यनुगृहीतवानित्यर्थः ८१ क्रथेति ततः क्रथ

र॰टी॰ महिषी अभिषिक्तास्त्री कृताभिषेकामहिषीत्यमरः भूत्वाचिरायदिवःसकाशाच्च्युतंमुनिशापनिवृत्तिकारणंसुरपुष्पदर्शनरूपंउपलब्धवती
स॰८ विवशाअभूदितिशेषः मृतेत्यर्थः ८२ तदिति· ततस्मात्कारणात्तस्याः अपायचिंतयाअलंतन्मरणंनचिंत्यमित्यर्थः निषेधक्रियांप्रतिकारण
८७ त्वाच्चिंतयेति तृतीयाननुकलत्रंकुतोनचिंत्यमतआहउत्पत्तिमतांयतउत्पत्तिमतां जन्मवतांविपद्विपत्तिरुपस्थितासिद्धा अतएवास्यामृत्यु
र्ध्रुवमित्यर्थः तथापिकलत्रहीनस्यकिंजीवितंतत्राह त्वयाइयंवसुधेवभूरेव अवेक्ष्यतांपाल्यतांहियस्मान्नृपाःवसुमत्याभुवाकलत्रिणःकल
त्रवंतः नतुशोचितव्यमित्यर्थः ८३ उदयइति· उदये अभ्युदयेसतिमदेनयद्वाच्यंनिंदाउज्झतापरिहरतामदहेतौनिंदाहीनेनत्वयायच्छ्रुतं

उपलब्धवतीदिवः च्युतंविवशाशापनिवृत्तिकारणं ८२ तदलंतदपायचिंतयाविपदुत्पत्तिमतामुपस्थिता वसुधेयमवे
क्ष्यतांत्वयावसुमत्याहिनृपाः कलत्रिणः ८३ उदयेयदवाच्यमुज्झता श्रुतमाविष्कृतमात्मवत्त्वया मनसस्तदुपस्थितेज्व
रेपुनरक्लीबतयाप्रकाश्यताम् ८४ रुदताकुतएवसापुनर्भवतानानुमृतापिलभ्यते परलोकजुषांस्वकर्मभिर्गतयोभिन्न
पथाहिदेहिनाम् ८५॥

अध्यात्मप्रचुरशास्त्रं तज्जनितज्ञानमितियावत् आविष्कृतंप्रकाशितंतन्मनसः ज्वरेसंतापेउपस्थितेप्राप्तेस
तिअक्लीबतयाअकार्येणलिंगेन पुनःप्रकाश्यतांविदुषासर्वास्ववस्थास्वपिधैर्येणभवितव्यमित्यर्थः ८४ इतोपिनरोदितव्यमित्याहरुदतेति
रुदताअश्रुमुंचताभवतात्वयासाकुतएवपुनर्लभ्यते नलभ्यतइत्यर्थः यतोऽनुम्रियतेइतिअनुमृतक्विप्तेनानुमृतापिभवतापुनर्नलभ्यतेकथं ८७
नेत्यतआह परलोकजुषांलोकांतरभाजांदेहिनां गम्यंतइतिगतयोगम्यस्थानानिस्वकर्मभिः पूर्वाचरितपुण्यपापैर्भिन्नपथाहिपृथक्
कृतमार्गाहिस्वस्वधर्मानुरूपफलभोगायभिन्नदेहगमनान्मृतेनापिलभ्यतइत्यर्थः ८५

अपेति· किंतु अपशोकमनाः निर्दुःखचित्तः सन् कुटुंबिनीं पत्नीं निवापदत्तिभिः पिंडोदकदानैः अनुगृह्णीष्व संतर्पयेत्यर्थः अन्यथा दोषमाह अतिसततं
अनवच्छिन्नं स्वजनानां बंधूनां बंधुः स्वस्वजनाः समाः स्वसमरः अश्रुकर्तृ प्रेतं मृतं दहतीति प्रचक्षते किल अत्र याज्ञवल्क्यः श्लेष्माश्रु बंधुभिर्मुक्तं प्रे
तो भुंक्ते यतो वशः अतो न रोदितव्यं हि क्रियाः कार्याः स्वशक्तितः इति ८६ मरणमिति· शरीरिणां लोनां मरणं प्रकृतिः स्वभावः ध्रुवमित्यर्थः जीवितं वि
कृतिर्यदृच्छिकं बुधैरुच्यते जंतुः प्राणी क्षणमपि अत्यंतसंयोगे द्वितीया श्वसन् जीवन् अवतिष्ठते यदि असौ क्षणजीवी लाभवान् ननु जीवने यथा ला
भं संतोष्यं अलभ्यलाभान् मरणे तु न शोचितव्यं न स्यस्वाभाव्यादिति भावः ८७ अवगच्छतीति मूढचेतनो भ्रांतबुद्धिः प्रियनाशं इष्टनाशं हृदये अर्पि

अपशोकमनाः कुटुंबिनीमनुगृह्णीष्व निवापदत्तिभिः स्वजनाश्रु किलातिसंततं दहति प्रेतमिति प्रचक्षते ८६ मरणं प्रकृ
तिः शरीरिणां विकृतिर्जीवितमुच्यते बुधैः क्षणमप्यवतिष्ठते श्वसन्यदि जंतुर्ननु लाभवानसौ ८७ अवगच्छति मूढचेत
नः प्रियनाशं हृदि शल्यमर्पितं स्थिरधीस्तु तदेव मन्यते कुशलद्वारतया समुद्धृतम् ८८ स्वशरीरशरीरिणावपि क्षणसंयो
गविपर्ययौ यदि विरहः किमिवानुतापयेद्वद बाह्यैर्विषयैर्विपश्चितम् ८९॥ ९० तं निखातं शल्यं शंकुम् अवगच्छति मन्यते स्थिरधीः

र्विद्वांस्तु तदेव शल्यं समुद्धृतमुत्खातं मन्यते प्रियनाशे सतीति शेषः कुतः कुशलद्वारतया प्रियनाशस्य मोक्षोपायतयेत्यर्थः मन्यते विषयलाभविना
शयोर्यथाक्रमं हिताहितसाधनत्वाभिमानः पामराणां तद्विपरीतस्तु विपश्चितामिति भावः ८८ स्वशरीर इति· स्वस्य शरीरशरीरिणोः देहात्मानाव
पि यदि यतः कर्मवशात्तयोः संयोगविपर्ययौ क्षणमात्रसंयोगवियोगौ ययोस्तौ तथोक्तौ भवत इति शेषः तदा बाह्यैर्विषयैः पुत्रमित्रकलत्रादिभिर्विरहो वि
पश्चितं विद्वांसं किमिवानुतापयेन्न किंचिदित्यर्थः आत्मनः स्वस्य देहे शरीरे नष्टे सति नाश इति देहाभिमानिनां अन्येषां का वेदना विदुषामिति भावः

Digitized by Sarayu Foundation Trust, Delhi and eGangotri

नेति हे वशिनामुत्तम जितेन्द्रियवर्य पृथग्जनवत् पामरजनवत् शुचः शोकस्य वशं गन्तुं नार्हसि तथा हि द्रुमसानुमतां तरुशिखरिणां किमन्तरं को
विशेषः वायौ सति द्वितयेऽपि हि प्रकारः अपि प्रथमचरमेत्यादिना जसि सर्वनामसंज्ञाविकल्पः ते चलाः यदि सानुमतामपि चलने तेषामप्यचलसं
ज्ञानस्यादित्यर्थः ८० स इति सोऽजः उदारमतेः धीमतो विनेतुर्वशिष्ठस्य वचस्तच्छिष्यमुखेरितं तथेति प्रतिगृह्याङ्गीकृत्य मुनिं वसिष्ठशिष्यं विससर्ज
प्रेषयामास किं तु तद्वचः शोकघने दुःखसान्द्रे अस्याजस्य हृदि अलब्धपदं अप्राप्तावकाशं सत् गुरोर्वशिष्ठस्यान्तिकं प्रतियातमिव निवृत्तं किमुत इत्यु
त्प्रेक्षा तोटकवृत्तमेतत् इह तोटकमम्बुधिसैः प्रथितमिति लक्षणात् ८१ तेनेति अवितथं यथार्थं सूनृतं प्रियवचनं यस्य तेनाजेन सूनोः पुत्रस्य बाल

न पृथग्जनवच्छुचो वशं वशिनामुत्तम गन्तुमर्हसि द्रुमसानुमतां किमन्तरं यदि वायौ द्वितयेऽपि ते चलाः ८० स तथेति विने
तुरुदारमतेः प्रतिगृह्य वचो विससर्ज मुनिं तदलब्धपदं हृदि शोकघने प्रतियातमिवान्तिकमस्य गुरोः ८१ तेनाष्टौ प
रिगमिताः समाः कथंचिद्बालत्वादवितथसूनृतेन सूनोः सादृश्यप्रतिकृतिदर्शनैः प्रियायाः स्वप्नेषु क्षणिकसमागमो
त्सवैश्च ८२ तस्य प्रसह्य हृदयं किल शोकशङ्कुः प्लक्षप्ररोह इव सौधतलं बिभेद॥ ९ कत्वात् राज्याक्षमत्वादित्यर्थः प्रियायाः इ

न्दुमत्याः सादृश्यं वस्त्वन्तरगतमाकारसाम्यं प्रतिकृतिश्चित्रं तयोर्दर्शनैः स्वप्नेषु क्षणिकाः क्षणभङ्गुराः प्रियसमागमोत्सवाः तैश्च कथंचित्कृ
च्छ्रेण अष्टौ समाः वत्सराः संवत्सरो वत्सरोऽब्दो हायनोऽस्त्री शरत्समा इत्यमरः परिगमिताः अतिवाहिताः उक्तं च वियोगे वा योगे प्रियजनस
दृशानुभवनं ततश्चित्रं कर्म स्वपनसमये दर्शनमपि तदङ्गस्पृष्टानामुपगतवतां दर्शनमपि प्रतीकारः कामव्यथितमनसां कोऽपि गदित इ
ति ८२ तस्येति शोक एव शङ्कुः कीलः शङ्कुः कीले शिवे स्त्रे चेति विश्वः तस्याजस्य हृदयं प्लक्षप्ररोहः प्लक्षाङ्कुरः सौधतलमिव प्रसह्य किल बलात्का ८८

प्राणांतरहेतुंमरणकारणमपिभिषजा असाध्यमप्रतिसमाधेयं तंशोकशंकुंरागपर्यवसितंसराजाप्रियानुगमनेत्वरया उत्कंठयालाभमनुमेने
प्रियया विनाजीवितस्यदुःसहत्वात्तत्प्राप्तिकारणंमरणमेववरमित्येवामन्यतेत्यर्थः ९३ सम्यगिति अथनृपतिः राजासम्यग्विनीतंनिसर्ग
संस्काराभ्यांविनीतं वर्महरतीतिवर्महरः कवचधारणार्हवयस्कः वयसिचेत्यच्प्रत्ययः तंकुमारंदशरथंप्रजानांरक्षणविधौराज्येविधिवद्वि
ध्यर्हं यथा शास्त्रमित्यर्थः तदर्हमितिवतिप्रत्ययः आदिश्यनियुज्यरोगोपसृष्टायाः पीडितायास्तनोः शरीरस्यदुर्वसतिं दुःखावस्थितिंमुमुक्षुः जि
हासुः सन् प्रायोपवेशने अनशनावस्थानेमतिर्यस्यसः बभूव प्रायश्चानशनेमृत्यौतुल्यबाहुल्ययोरपीति विश्वः अत्रादित्यपुराणे समयुक्तो भ

प्राणांतहेतुमपितंभिषजामसाध्यंलाभंप्रियानुगमनेत्वरयासमेने ९३ सम्यग्विनीतमथवर्महरंकुमारमादिश्यरक्ष
णविधौविधिवत्प्रजानां रोगोपसृष्टतनुदुर्वसतिंमुमुक्षुः प्रायोपवेशनमतिर्नृपतिर्बभूव ९४ तीर्थेतोयव्यतिकरभवेजह्नु
कन्यासरय्वोर्देहत्यागादमरगणनालेख्यमासाद्यसद्यः पूर्वाकाराधिकतररुचासंगतः कांतयासौलीलागारेष्वरमतपुनर्नंद

वेद्यस्तुपातकैर्महदादिभिः अचिकित्स्यैर्महारोगैः पीडितो वा भवेत्तु यः स्वयंदेहविनाशस्यकालेप्राप्तेमहागतिः आब्रह्मणं ((नाभ्यंतरे
वास्वर्गादिमहाफलजिगीषयाः प्रविशेज्ज्वलनंदीप्तंकुर्यादनशनंयथा एतेषामधिकारोस्तिनान्येषांसर्ववर्णेषु नराणामथनारीणांसर्ववर्णे
षुसर्वदेति ९४ तीर्थइति असावजोजह्नुकन्यासरय्वोः भागीरथीसरयूनामनद्योः तयोः तोयानांव्यतिरेकेणसंभेदेनभवेतीर्थेगंगासरयूसंग
मेदेहत्यागाच्छरीरत्यागात्सद्यएव अमरगणनायामालेख्यंलेखनंआसाद्यप्राप्य पूर्वस्मादाकारादधिका अधिकतरारुक् यस्याः तयासंगतः
युक्तः सन् कांतयाइंदुमत्यासह अथवापूर्वापेक्षया अधिकतरारुक् कांतिर्यस्याः तयाकांतयासहितः सन्नंदनस्येंद्रोद्यानस्याभ्यंतरेषु अंतर्व

र॰टी॰
स॰ ९
८९

र्तिषु लीलागारेषु क्रीडाभवनेषु पुनररमत तच्चिक्रीडयथा कथं चिंतितीर्थे स्मिन् देहत्यागं करोति यः तस्मात्म घातदोषो न प्राप्नुयादीप्सितानपीत्या दित्यपुराणे ८५ इति रघुवंशे व्याख्यायां संजीविन्यामष्टमः सर्गः ८ ॥ ॥ श्रीगणेशाय नमः ॥ एकलोचनमेकार्धं सार्धलोचनमन्यतः लीलार्थनीलकं ठार्धं महः किमपि मन्महे १ पितुरिति समाधिना संयमेन जितेंद्रियः समाधिर्नियमे ध्याने यमवतां संयमीनां अवतां रक्षतां च धुर्यः अग्रे स्थितो महारथो दशरथः एको दश सहस्राणि योधयेद्यस्तु धन्विनां शस्त्रशास्त्रप्रवीणश्च स महारथ उच्यते पितुरनंतरं उत्तरकोसलान् जनपदानधिगम्य प्रशशास अत्र मनुः क्षत्त्रियस्य परो धर्मः प्रजानां परिपालनमिति द्रुतविलंबितमेतद्वृत्तं तल्लक्षणं तु द्रुतविलंबितमाह नभौ भराविति १ अधिगतमिति अधिगतं प्राप्तं आत्मकुलोचितं स्वकुलयोग्यं

श्रीगणेशाय नमः पितुरनंतरमुत्तरकोसलान्समधिगम्य समाधिजितेंद्रियः दशरथः प्रशशास महारथो यमवतामवतां च धुरि स्थितः १ अधिगतं विधिवद्यदपालयत्प्रकृतिमंडलमात्मकुलोचितं अभवदस्य ततो गुणवत्तरं सनगरं नगरंध्रकरौजसः २ उभयमेव वदंति मनीषिणः समयवर्षितया कृतकर्मणो बलनिषूदनमर्थपतिं च तं श्रमनुदं मनुदंडधरान्वयम् ३

सनगरं प्रकृतिमंडलं नगरजनसहितं जानपदं मंडलं अत्र प्रकृतिशब्देन प्रजामात्रवाचिना नगरशब्दयोगाद्गोबलीवर्दन्यायेन जानपदमात्रमुच्य ते यद्यस्माद्विधिवद्यथाशास्त्रमपालयत् ततो हिनोरंध्रं करोतीति रंध्रकरः रंध्रहेतुरित्यर्थः कृञो हेतुताच्छील्यानुलोम्येष्विति कृञः ट प्रत्ययः नगस्य रं ध्रकरः नगरंध्रकरः कुमारः क्रौंचदारण इत्यमरः तद्वदोजसस्तत्तुल्यबलस्यास्य दशरथस्य गुणवत्तरमभवत् तस्योरजानपदमंडलं तस्मिन्नतीव सक्त मभूदित्यर्थः २ उभयमिति मनसः ईषिणो मनीषिणो विद्वांसः पृषोदरादित्वात्साधुः बलनिषूदनं इंद्रं दंडस्य धरो रराजा मनुरिति यो दंडधरः स एवा न्वयः कूटस्थो यस्य तमर्थपतिं दशरथं चेत्युभयमेव समये ऽवसरे जलं धनं च वर्षतीति समयवर्षितस्य भावेन समयवर्षितया हेतुना कृतकर्मणांस्वकर्म ८९

कारिणां नुदतीति नुदं इगुपधज्ञाप्रीकिरः कः इति कप्रत्ययः श्रमस्य नुदं श्रमनुदं क्लिबं तत्त्वेन पुल्लिंगेनोभयशब्देन समानाधिकरणं न स्यादिति वदंति आ
जनपदमिति अमरः ते शांतिपरे अमरतेजसि अजनंदने दशरथे पार्थिवे पृथिव्याः ईश्वरे सति तस्येश्वर इत्यण् प्रत्ययः जनपदे देशे गदो व्याधिः गदो व्याधिर्
दामयुधम् इत्यमरः पदं नाधीनावक्रामेत्यर्थः सपत्नजः शत्रुजन्यः अभिभवः कुत एव असंभावित एवेत्यर्थः क्षितिः फलवत्सभूत् ४ दशेति दश
दिगंतान् जितवानिति दशदिगंतजित् तेन रघुणा यथा श्रियं कांतिमपुष्यत् ततः परं रघोरनंतरं अजेन श्रियमपुष्यत् तथैवाहीनपराक्रमं न हीनः परा
क्रमो यस्य तं अहीनां सर्पाणामिनस्येव शेषस्येति पराक्रमो यस्येति वा इनः सूर्ये प्रभौ राज्ञि चेति विश्वः यद्वा अहीनेषु शूरेषु पराक्रमो यस्य यद्वा अः

जनपदे न गदः पदमादधावभिभवः कुत एव सपत्नजः क्षितिरभूत्फलवत्यजनंदने शमरतेऽमरतेजसि पार्थिवे ४ दशदिगंतजि
ता रघुणा यथा श्रियमपुष्यदजेन ततः परं तमधिगम्य तथैव पुनर्बभौ न न महीनमहीनपराक्रमं ५ समतया वसुवृष्टिविसर्ज
नैर्नियमनादसतां च नराधिपः अनुययौ यमपुण्यजनेश्वरौ सवरुणावरुणाग्रसरं रुचा ६ न मृगयाभिरतिर्न दुरोदरं न च श
शिप्रतिमाभरणं मधु ॥ १ गरुडः हिः सर्पस्तयोः स्वामी विष्णुस्तस्येव पराक्रमो यस्य तं अन्यूनपराक्रमं दशरथं इनं स्वामिनमधिगम्य पुनर्न
बभाविति नेत्यर्थः द्वौ नञौ प्रकृतार्थं गमयतः ५ समतयेति नराधिपः दशरथः समतया समवर्तित्वेन मध्यस्थत्वेनेत्यर्थः वसुवृष्टेर्धनवृष्टेः विस
र्जनैः असतां दुष्टानां नियमनान्निग्रहाच्च सवरुणौ वरुणसहितौ यमपुण्यजनेश्वरौ यमकुबेरवरुणान् यथासंख्यमनुययौ अनुचकार रुचा तेजसा
अरुणाग्रसरं अनूरुसारथिं सूर्यमनुययौ ६ तस्य व्यसनासक्तिर्नासीदित्याह नेति उदयाय यतमानमभ्युदयार्थं यतमानं दशरथं मृगयाभिर
तिराखेटकव्यसनं नापाहरत् नाचकर्ष आखेटकं मृगव्यं स्यादाखेटो मृगया स्त्रियामित्यमरः दुष्टमासमंताद्दरमस्येति दुरोदरं द्यूतं न चापाहरत् ॥

कूरोदरोद्यूतन्कारेपणोधूतेदुरोदरमित्यमरः शशिनः प्रतिमाप्रतिविंवं आभरणंयस्यतन्मधुनापाहरत् नेतिपदच्छेदः वाशब्दः समुच्चयेयेनवयौवन
नवंनूतनंयौवनंतारुण्यंयस्यास्तादृशीस्त्रीचनायाहरत् जातावेकवचनम् अत्रमनुः पानमक्षाः स्त्रियश्चेतिमृगयाचयथाक्रमं एतत्कष्टतमंवि
द्याच्चतुष्कंकामजेगण इति ७ नेति तेनराज्ञाप्रभवतिप्रभौसतिवासवेपिकृपणादीनावाक्नेरितानोक्तापरिहासकथास्वपिवितथानृतावाक्
नेरिता किंच अपरुषापरुषशून्येनतेनसपत्नजनेष्वपिपरुषाक्षरंनिष्ठुराक्षरंयथातथावाक्नेरितािकमुतान्यत्रेतिसर्वत्रापिशब्दार्थः किंत्वदी
नासत्यामधुरैववागुक्तेतिफलितोर्थः ८ उदयमिति वसुधाधिपाः राजानः उद्वहतिसुद्वहोनायकः पचाद्यच्रघूणामुद्वहोरघुनायकस्तस्माद्रघुना

तमुदयायनवानवयौवनाप्रियतमायतमानमपाहरत् ७ नकृपणाप्रभवत्यपिवासवेनवितथापरिहासकथास्वपिअ
पिसपत्नजनेष्वपितेनवागपरुषापरुषाक्षरमीरिता ८ उदयमस्तमयंचरघूद्वहादुभयमानशिरेवसुधाधिपाः सहिनि
देशमलंघयतामभूत्सुहृदयोहृदयः प्रतिगर्जतां ९ अजयदेकरथेनसमेदिनीमुदधिनेमिमधिज्यशरासनः जयमघो
षयदस्यहिकेवलंगजवतीजवतीव्रहयाचमूः १० अवनिमेकरथेनवरूथिनाजितवतः किलतस्यधनुर्भृतः॥ ॐ ॥

यकात् उदयंवृद्धिं अस्तमयंनाशंचोभयमानशिरेलेभिरेकुतःहियस्मात्सदशरथोनिदेशमाज्ञामलंघयतां शोभनंहृदयंयस्येतिसुहृन्मित्रमभूत्
सुहृद्दुर्हृदौमित्रामित्रयोरितिनिपातः प्रतिग र्जतांप्रतिस्पर्द्धिनामयदुर्वहृदयंयस्येति अयोहृदयः कठिनचित्तोभूत् स्वाज्ञाकारिणोरक्षतिअन्यान्मा
रयतीत्यर्थः ९ अजयदिति अधिज्यशरासनःसदशरथः उदधिनेमिंसमुद्रवेष्टनांमेदनीमेकरथेनाजयत् स्वयमेकएवाजैषीदित्यर्थः गजवतीगज
युक्ताजवेनतीव्राःजवाधिकाः हयाःयस्याः साचमूः अस्यनृपस्यकेवलंजयमघोषयत् अप्रथयत् स्वयमेकवीरस्यचमूरुपकरणमात्रमित्यर्थः १०।

अवनिमिति वरूथिनागुप्तिमता वरूथोरथगुप्तिः ९०

यांनिरोधत्तेरथस्थितामितिसज्जनः एकरथेनाद्वितीयरथेनाव। निर्जितनवतो धनुर्भृतो नरवाहनसंपदः कुवेरतुल्यश्रीकस्यतस्यदशरथस्यघनरवा
मेघसंघोषा अर्णवा विजयदुंदुभितां ययुः अर्णवांतविजयीत्यर्थः ११ शमितेति पुरंदर इंद्रः शतकोटिना शतास्त्रिणा कुलिशेन वज्रेण शिखरिणां प
र्वतानां शमितपक्षबलः विनाशितपक्षसारः नवतामरसाननः नवपंकजाननः पंकेरुहं तामरसमित्यमरः सदशरथः शरवृष्टिमुचा स्वनवता धनुषा
द्विषां शमितो नाशितः पक्षबलः सहायो येन सतथोक्तः पक्षः सहायेपीत्यमरः १२ चरणयोरिति शतशो नृपतयः अखंडितपौरुषं तं दशरथं मरुतो दे
वाः शतमखं यथा शतक्रतुमिव नखरागेण नखकांत्या समृद्धिभिः संपादितर्द्धिभिः मुकुटरत्नमरीचिभिः चरणयोरस्पृशन् प्रणेमुरित्यर्थः १३ नि

विजयदुंदुभितां ययुरर्णवा घनरवा नरवाहनसंपदः ११ शमितपक्षबलः शतकोटिना शिखरिणां कुलिशेन पुरंदरः सशर
वृष्टिमुचा धनुषा द्विषां स्वनवता नवतामरसाननः १२ चरणयोर्नखरागसमृद्धिभिर्मुकुटरत्नमरीचिभिरस्पृशन् नृपतयः शतशो
मरुतो यथा शतमखं तमखंडितपौरुषं १३ निववृते स महार्णवरोधसः सचिवकारितबालसुतांजलीन् समनुकंप्य सपत्नपरिग्र
हाननलकानलकानवमां पुरीम् १४ उपगतोपि च मंडलनाभितामनुदितान्यसितातपवारणः॥ १९ निववृत इति स दशरथः सचिवैः

संप्रयोज्यैः कारिता बालसुतांजलयो यैस्तान् स्वसम्मुखागतानित्यर्थः अनलकान् हतभर्तृकतया अलकसंस्कारशून्यान् सपत्नपरिग्रहान् शत्रु
पत्नीः पत्नीपरिजनादानमूलशापाः परिग्रहाः इत्यमरः समनुकंप्यानुगृह्य अलकानवमां अलकानगरात् अन्यूनां पुरीं अयोध्यां प्रति महार्णवानां
रोधसः सपर्यंतान्निववृते शरणागतवत्सल इतिभावः उपगतेति अनुदितं अनुत्थितं अन्यत्स्वच्छत्रातिरिक्तं सितातपवारणं श्वेतछत्रं यस्य सः अनल
सोमयोरग्निचंद्रयोः समद्युती तेजः कांतीयस्य सतथोक्तः श्रियं लक्ष्मीं रंध्रे अन्वायालस्यादिरूपे छलेन चलां चंचलामवेक्ष्यालोक्य श्रीर्हि केनचिन्निमिषेणापि

संरघुटी

Digitized by Sarayu Foundation Trust, Delhi and eGangotri

सदशरथोमंडलस्यनाभिर्नाद्वादशराजमंडलस्यप्रधानमहीपतित्वमुपगतोपिचक्रवर्तीसन्नपीत्यर्थः अंथनाभिस्तुतन्त्वंगेयस्यसंज्ञाप्रतारिकारथ्यचक्र
स्यमध्यस्थपिंडिकायांचनाभिःपुनः आद्यक्षत्रियभेदेतुमनोमुख्यमहीपतावितिकेशवः अजितंनृपास्पदमस्तीतिजेतव्यमरिमंडलमस्तीतिबुद्ध्याऽनलसो
ऽप्रमत्तोभूत् विजितनिखिलजेतव्योपिपुनर्जेतव्यान्तरवानिवजागरूकएवाभवदित्यर्थः द्वादशराजमंडलंतुकामंदकेनोक्तं अरिर्मित्रमरेर्मित्रंमित्रमित्र
मतःपरं तथारिमित्रमित्रंचविजिगीषोःपुरःसराःपार्ष्णिग्राहस्ततःपश्चादाक्रंदस्तदनंतरं आसारावनयोश्चैवविजिगीषोस्तुपृष्ठतःअरेश्चविजिगीषोश्च
मध्यमोभूम्यनंतरःअनुग्रहेसंहतयोःसमर्थोव्यस्तयोर्वधे मंडलाद्बहिरेतेषामुदासीनोबलाधिकःअनुग्रहेसंहतानांव्यस्तानांचवधेप्रभुरित्यरिमित्रा
दयःपंचविजिगीषोःपुरःसराःपार्ष्णिग्राहाक्रंदपार्ष्णिग्राहासाराक्रंदाक्रंदासाराश्चेतिषट् तश्चत्वारःमध्यमोदासीनौद्वौविजिगीषुरेकइत्येवं

श्रियमवेक्ष्यसरंध्रचलामभूदनलसोनलसोमसमद्युतिः १५ तमपहायककुत्स्थकुलोद्भवंपुरुषमात्मभवंचपतिव्रता नृ
पतिमन्यमसेवतदेवतासकमलाकमलाघवमर्थिषु १६ तमलभंतपतिंपतिदेवताःशिखरिणामिवसागरमापगाः ॥

द्वादशराजमंडलं तत्रोदासीनमध्यमोत्तरश्चक्रवर्तीदशरथश्चैतादृगितितात्पर्यार्थः १५ तमिति पत्योव्रतंयस्याःसापतिव्रतासकमलाकमलहस्ता
देवतालक्ष्मीरर्थिषुविषयेअलाघवेलघुत्वरहितंअपराङ्मुखमित्यर्थः ककुत्स्थकुलोद्भवंतंदशरथंआत्मभवंपुरुषंविष्णुंचापहायत्यक्त्वाअन्यं
कंनृपतिंअसेवत कमपिनासेवतेत्यर्थः विष्णाविवविष्णुतुल्येतस्मिन्नपिश्रीःस्थिराभूदित्यर्थः १६ तमिति पतिरेवदेवतायासांताःपतिदेवताः
पतिव्रताःमगधाश्चकोसलाश्चकेकयाश्चतान्जनपदान्शासतीतितच्छासिनःतेषांराज्ञांदुहितरःपुत्र्यःसुमित्राकौसल्याकैकेयी त्यर्थः अत्र ९१
क्रमोनविवक्षितःअहितरोपितमार्गणंशत्रुनिखातशरंकलम्बमार्गणशराःइत्यमरःतंदशरथंशिखरिणांक्ष्माभृतांदुहितरःआसमंतादापगा।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

च्छंतीति वा आपेन अपसंबंधिना वेगेन गच्छंतीति आपगा इति क्षीरस्वामी नद्यः सागरमिव पतिं भर्तारं अलभंत १७ प्रियतमाभिरिति अरीन् हंतीति अरिहा रि
पुघ्नः हंतेः क्विप् ब्रह्मभ्रूणवृत्रेषु क्विविति नियमस्य प्रायिकत्वात् यथाह न्यासकारः प्रायिकश्चायं नियमः क्वचिदन्यस्मिन्नप्युपपदे दृश्यते मधुहा प्रा
यिकत्वं च वक्ष्यमाणस्य बहुलग्रहणस्य पुरस्तादपकर्षाल्लभ्यत इति तेषु योगेषु उपायेषु विचक्षणः दक्षः योगः सन्नहनोपायध्यानसंगतियुक्तिषि
त्यमरः इंद्रेपि योज्यमेतत् असौ दशरथः तिसृभिः प्रियतमाभिः सह प्रजाः विनिनीषुर्विनेतुमिच्छुः तिसृभिः शक्तिभिः प्रभुमंत्रोत्साहशक्तिभिरेव
सह भुवमुपगतो हरिहय इन्द्र इव बभौ १९ स इति समदारथो दशरथः संयुगमूर्द्धि रणांगणे मघवतः इंद्रस्य सहायतां प्रतिपद्य प्राप्य शरैः स्वभु

क्ष २ मगधकोसलकेकयशासिनां दुहितरोऽहितरोपितमार्गणं १७ प्रियतमाभिरसौ तिसृभिर्बभौ तिसृभिरेव भुवं सह शक्तिभिः
उपगतो विनिनीषुरिव प्रजा हरिहयोऽरिहयोगविचक्षणः १८ स किल संयुगमूर्ध्नि सहायतां मघवतः प्रतिपद्य महारथः स्व
भुजवीर्यमगापयदुच्छ्रितं सुरवधूरवधूतभयाः शरैः १९ क्रतुषु तेन विसर्जितमौलिना भुजसमाहृतदिग्वसुना कृताः

तभयाः निवर्तितत्रासाः सुरवध्वः उच्छ्रितं स्वभुजवीर्यं अगापयत् किल खलु गायतेः शब्दकर्मकत्वाद्गतिबुद्धीत्यादिना सुरवधूनामपि कर्मत्व
म् २० क्रतुष्विति क्रतुष्वश्वमेधेषु विसर्जितमौलिनावरोपितकिरीटेन यावद्यज्ञमध्वर्युरेव राजा भवतीति राज्ञश्चिह्नत्यागविधिना इत्ययमभिप्रा
यः मौलिः किरीटे धम्मिल्ले इति विश्वः भुजसमाहृतदिग्वसुना भुजार्जितदिगंतसंपदा अनेन क्षत्रियस्य विजितमित्युक्तं नियमार्जितधनत्वं सद्भिर्नियो
गकारित्वं सूच्यते वितमसा तमोगुणरहितेन तेन दशरथेन तमसा च सरय्वा च तयोस्तटाः कनकयूपानां समुच्छ्रयेण समुन्नमनेन शोभिनः कृ
ताः कनकमयत्वं च यूपानां शोभार्थं विध्यभावात् ॥

र॰टी॰ हेमयूपस्तु शोभिक इतिपाठ्ः २० अजिनेति ईश्वरो भगवान् अष्टमूर्त्तिः सदाशिवः अजिनं कृष्णाजिनं दंडमौदुंबरं विभर्त्तीति अजिनदंडभृ
स॰ ९ तं कृष्णाजिनं दीक्षयति औदुंबरं दीक्षितं दंडं यजमानायप्रयच्छतीति वचनात् कुशमयीमेखला यस्यास्तां कुशमेखलां शरमयी मौंजी वा मेखला
९२ तया यजमानं दीक्षयतीति विधानात् प्रकृते कुशग्रहणं क्वचित्प्रतिनिधिदर्शनात् यतं यतगिरं नियमितवाचमवाचंयच्छतीति श्रुतेः मृगशृंगप
रिग्रहः कंडूयनसाधनं यस्यास्तां कृष्णविषाणया कंडूयते इति श्रुतेः अध्वरदीक्षितां संस्कारविशेषयुक्तां तनुं दाशरथीमधिवसन् अधितिष्ठन्
सन् असमाभासो दीप्तयो यस्मिन् कर्मणि तद्यथा तथाभासयत् भासयतिस्म २१ अवभृथेति अवभृथेन प्रयतो नियतेंद्रियः सुरसमाजसमा

कनकयूपसमुच्छ्रयशोभिनो वितमसा तमसासरयूतटाः २० अजिनदंडभृतं कुशमेखलां यतगिरं मृगशृंगपरिग्रहां अ
धिवसंस्तनुमध्वरदीक्षितामसमभासमभासयदीश्वरः २१ अवभृथप्रयतो विजितेंद्रियः सुरसमाजसमाक्रमणोचि
तः नमयतिस्मसकेवलमुन्नतं वनमुचे नमुचेररये शिरः २२ असकृदेकरथेन तरस्विना हरिहयाग्रसरेण धनुर्भृता दि
नकराभिमुखा रणरेणवो रुरुधिरे रुधिरेण सुरद्विषां २३ अथ समाववृते कुसुमैर्नवैस्तमिव सेवितुमेकनराधिपं ॥

क्रमणोचितः देवसमाधिष्ठानार्हः सदृशरथः उन्नतं शिरो वनमुचे जलवर्षिणे वनं नीरं वनं सत्वमिति धाश्वतः नमुचेररये केवलमिंद्रायैव नम
यतिस्म न कस्मैचिदन्यस्मै मानुषायेत्यर्थः २२ असकृदिति एकरथेन अद्वितीयरथेन तरस्विना बलवता हरिहयस्येंद्रस्याग्रसरेण धनुर्भृताऽस ९२
कृद्बहुशो दिनकरस्याभिमुखाः अभिमुखस्थिता इत्यर्थः रणरेणवः सुरद्विषां दैत्यानां रुधिरेण रुधिरे निवारिताः २३ अथेति अथ यमकुबे
रजलेश्वरवज्रिणां धर्मराजधनदवरुणामरेंद्राणां समधूर्भारो यस्य सः समधुरः माध्यस्थ्यवितरणसन्नियमनैश्वर्यैस्तुल्यकक्ष इत्यर्थः अक्रूरित्यादि

Digitized by Sarayu Foundation Trust, Delhi and eGangotri

तंसमधुरं अंचितविक्रमंपूजितपराक्रमं एकनराधिपंतंदशरथंसेवितुमिवमधुर्वसंतः अथपुष्परसेमधु दैत्येचैत्रेवसंतेचमधुरितिविश्वः नवैःकु
सुमैरुपलक्षितः सन्समाववृतेसमागतः रिक्तहस्तेननोपेयाद्राजानंदेवतांगुरुं इतिवचनात्पुष्पसमेतोराजानंसेवितुमागतइत्यर्थः २४ जिगमिषुरिति
धनदाध्युषितांकुबेराधिष्ठितांदिशंजिगमिषुःगंतुमिच्छुःरथयुजासारथिना अनूरुणापरिवर्तितवाहनो निवर्तिताश्वोरविः हिमस्यनिग्रहैर्निराकरणैर्दिन
मुखानिप्रभातानिविमलयन् विशदयन् मलयंनगंमलयाचलमत्यजत् दक्षिणांदिशमत्याक्षीदित्यर्थः २५ कुसुमेति आदौकुसुमजन्मततोनवपल्लवाः

यमकुबेरजलेश्वरवज्रिणांसमधुरंमधुरंचितविक्रमं २४ जिगमिषुर्धनदाध्युषितांदिशंरथयुजापरिवर्तितवाहनः दिन
मुखानिरविर्हिमनिग्रहैर्विमलयन्मलयंनगमत्यजत् २५ कुसुमजन्मततोनवपल्लवास्तदनुषट्पदकोकिलकूजितं इतिय
थाक्रमंमाविरभून्मधुर्द्रुमवतीमवतीर्यवनस्थलीं २६ हिमविवर्णितचन्दनपल्लवंविरहयन्मलयाद्रिमुदङ्मुखः विहगयोः
कृपयेवशनैर्ययौरविरहर्विरहध्रुवभेदयोः २७ नयगुणोपचितामिवभूपतेः सदुपकारफलांश्रियमर्थिनः॥ २८ तदनु अनुर्लक्षण

इतिकर्मप्रवचनीयत्वाद्द्वितीया यथासंख्यंतदुभयानंतरंषट्पदानांकोकिलानांचकूजितमित्येवंप्रकारेणयथाक्रमंक्रममनतिक्रम्य द्रुमव
तींद्रुमभूयिष्ठांवनस्थलीमवतीर्यमधुःवसंतः आविरभूत् केषांचित्द्रुमाणांफलप्राथम्यान्नोत्क्रमस्यदृष्टविरोधः २६ तुषारेणविगतवर्णीकृ
ताश्चन्दनानांपल्लवायत्रतंमलयाद्रिंविरहयन्त्यजन् अन्होविरहेनाशेध्रुवोनिश्चितोभेदोवियोगोययोःतयोः विहगयोःचक्रवाकयोः कृपयेव
उदङ्मुखः रविर्ययौ २७ नयगुणोपचितामितिनयोनीतिरेवगुणःतेनअथवानयेनगुणैःशौर्यादिभिश्चोपचितांसतांउपकारःफलंयस्यास्तांसदुप

कारंफलंभूपतेःदशरथस्यश्रियमर्थिनःखमधुनावसंतेनसंभृतांसम्यकुपुष्टांसरसःसंबंधिनींकमलिनींपद्मिनींअलिनीरपत्रिणःअलयोभृंगाःनीरपत
त्रिणोजलपतत्रिणोहंसादयश्चाभिययुः २७ कुसुममिति ऋतुरस्यप्राप्तआर्तवंऋतोरण्इत्यण्नवंप्रत्यग्रमशोकतरोःकेवलंकुसुममेवस्मरस्यदीपनं
उद्दीपनंनकिंतुविलासिनांमदयितामादकःदयिताश्रवणार्पितःकिसलयप्रसवोपिपल्लवसंतानोपिस्मरदीपनःकामोद्दीपनोभवत् २८ विरचितेति
मधुनावसंतेनोपवनश्रियांविरचिताःअभिनवाःपत्रविशेषकाःपत्ररचनाइवस्थिताःमधूनांमकरंदानांदानेविशारदाःचतुराःकुरवकाःतरवःमधु

अनुययुःसरसोमधुसंभृतांकमलिनींमलिनीरपतत्रिणः २७ कुसुममेवनकेवलमार्तवंनवमशोकतरोःस्मरदीपनम् कि
सलयप्रसवोपिविलासिनांमदयितादयिताश्रवणार्पितः २८ विरचितामधुनोपवनश्रियामभिनवाइवपत्रविशेषकाः मधु
लिहांमधुदानविशारदाःकुरवकारवकारणतांययुः २९ सुवदनावदनासवसंभृतस्तदनुवादिगुणःकुसुमोद्गमः मधुकरैरक
रोन्मधुलोलुपैर्वकुलमाकुलमायतपंक्तिभिः ३० उपहितंशिशिरापगमश्रियामुकुलजालमशोभतकिंशुके प्रणयिनीवनख
क्षतमंडनंप्रमदयामदयापितलज्जया ॥ ३१ ॥

९ लिहांमधुपानांरवकारणतांययुःभृंगाःकुरवकाणांमधूनिपीत्वाजगुरित्यर्थःदानशौं
डान् अर्थिजनाःस्तुवंतीतिभावः २९ सुवदनेति सुवदनानांवदनासवेनकांतामुखमद्येनसंभृतोजनितःतज्जस्यदोहदमितिप्रसिद्धिःतस्यासवस्या
नुवादीसदृशोगुणोयस्यतदनुवादिगुणःकुसुमोद्गमःकर्ताःमधुलोलुपैरायतपंक्तिभिःदीर्घपंक्तिभिःमधुकरैःकरणैःवकुलंआकुलमकरोत् ३० ९३
उपहितमिति शिशिरापगमश्रियावसंतलक्ष्म्याकिंशुकेपलाशेचस्तेपलाशेकिंशुकः पर्णइत्यमरः उपहितंदत्तंमुकुलजालंकुड्मलसंहतिःमदे
नयापितलज्जयाअपसारितत्रपयाप्रमदयाप्रणयिनिप्रियतमेउपहितंनखक्षतमेवमंडनंतदिवाशोभत ३१ ॥

व्रणेति व्रणैर्दंतक्षतैर्गुरुभिर्दुर्द्धरैः प्रमदानामधरोष्ठैः दुःसहं हिमस्य व्यथाकरत्वादसह्यं जघनेषु निर्विषयीकृता निरवकाशीकृता मेखला येन तत् शैत्यात्त्याजितमेखलमित्यर्थः एवंभूतं हिमं रविस्तावत्तदा वसंते अशेषं निःशेषं यथा तथा अपोहितुं निरसितुं नालं खलु न शक्तो हि किंतु विरलं कृतवान् तनुचकार ३१ अभिनयानिति अत्र चूतलता नर्तकीसमाधिरभिधीयते अभिनयानर्थव्यंजकान्व्यापारान् व्यंजकाभिनयौ समावित्यमरः परिचेतुमभ्यसितुं उद्यतेव स्थिता कुतः मलयमारुतेन कंपितपल्लवा पल्लवशब्देन हस्तो गम्यते सकलिका सकोरका कलिका कोरकः पुमानित्यमरः सहकारलता कलिः कलहो द्वेष उच्यते कलिः स्यात्कलहे शूरे कलिरंत्ययुगे युधीति विश्वः कामो रागस्तज्जितानामपि जितरागद्वेषाणामपीत्यर्थः मनोऽम

व्रणगुरुप्रमदाधरदुःसहं जघननिर्विषयीकृतमेखलं । न खलु तावदशेषमपोहितुं रविरलं विरलं कृतवान्हिमम् ३१॥
अभिनयान्परिचेतुमिवोद्यता मलयमारुतकंपितपल्लवा । अमदयत्सहकारलता मनः सकलिका कलिकामजितामपि ३२
प्रथममन्यभृताभिरुदीरिताः प्रविरला इव मुग्धवधूकथाः । सुरभिगंधिषु शुश्रुविरे गिरः कुसुमितासु मिता वनराजिषु ३३॥
श्रुतिसुखभ्रमरस्वनगीतयः कुसुमकोमलदंतरुचो बभुः । उपवनांतलताः पवनाहतैः किसलयैः सलयैरिव पाणिभिः ३४

दयत् ३२ प्रथममिति सुरभिर्गंधो यासां तासु सुरभिगंधिषु गंधस्येत्तीकारः कुसुमान्यासां संजातानि कुसुमिताः तासु वनराजिषु वनपंक्तिषु अन्यभृताभिः कोकिलाभिः प्रथमं प्रारंभे उदीरिताः उक्ताः अत एव मिताः गिरः आलापाः प्रविरलाः मौग्ध्यात्स्तोकोक्ताः मुग्धवधूनां कथाः वाच इव शुश्रुविरे श्रुताः ३३ श्रुतीति श्रुतिसुखाः कर्णमधुराः भ्रमरस्वना एव गीतयो यासां ताः कुसुमान्येव कोमला दंतरुचो दंतकांतयो यासां ताः अनेन सस्मितत्वं विवक्षितं उपवनांतलताः पवनेनाहतैः कंपितैः किसलयैः सलयैः साभिनयैः लयशब्देन लयाश्रितो ऽभिनयो लक्ष्यते उपवनांतेपवनाहतैरिति स

शि·टी·
स·६
८४

ललितेति अंगनाः ललितविभ्रमबंधविचक्षणं मधुरविलासघटनापटुतरं सुरभिणा मनोहरेण गंधेन पराजितकेसरं निर्जितबकुलपुष्पं अ
थ केसरो बकुल इत्यमरः स्मरस्य सखायं स्मरसखं स्मरोद्दीपकमित्यर्थः मधुं मद्यं अर्द्धर्चादित्वात्पुंसि चेति पुल्लिंगता उक्तं च मकरंदस्य मद्यस्य माक्षिकस्या
पि वाचकः अर्द्धर्चादिगणे पाठात्तु नपुंसकयोर्मधु इति पतिषु विषयेषु रसखंडनवर्जितं अनुरागभंगरहितं यथा तथा मधुं निर्विविशुः परस्परानुरा
ग पूर्वकं पतिभिः सह पपुरित्यर्थः ३६ शुशुभिरे इति विकचतामरसाः विकसितकमलाः मदेन कलाः अव्यक्तमधुरं ध्वनंतः उदके लोला विहंगमाः
जलप्रियपक्षिणो हंसादयो यासु ताः मदकलोलविहंगमाः गृहेषु दीर्घिका वाप्यः स्मितेन चारुतराणि आननानि यासां ताः श्लथाः शिंजिताः मुखराः

ललितविभ्रमबंधविचक्षणं सुरभिगंधपराजितकेसरम् । पतिषु निर्विविशुर्मधुमंगनाः स्मरसखं रसखंडनवर्जितम् ३६ शु
शुभिरे स्मितचारुतराननाः स्त्रिय इव श्लथशिंजितमेखलाः । विकचतामरसा गृहदीर्घिका मदकलोदकलोलविहंगमाः ३७ उ
पययौ तनुतां मधुखंडिता हिमकरोदयपांडुमुखच्छविः । सदृशमिष्टसमागमनिर्वृतिं वनितयानितया रजनीवधूः ३८ अप
तुषारतया विशदप्रभैः सुरतसंगपरिश्रमनोदिभिः ॥ ३९ मेखलाः यासां ताः शिंजितेति कर्तरि क्तः स्त्रिय इव शुशुभिरे ३७ उपययाविति म
धुना मधुसमयेन खंडिता ह्रासं गमिता क्षीयंते खलु उत्तरायणे रात्रयः खंडिताख्या या च नायिका ध्वन्यते हिमकरोदयेन चंद्रोदयेन पांडुर्मुखस्य प्र
दोषस्य वक्त्रस्य छविर्यस्याः सा रजनी एव वधूः इष्टसमागमनिर्वृतिं प्रियसंगमसुखं अनितया अप्राप्तया इण् गताविति धातोः कर्तरि क्तः वनितया सदृ
शं तुल्यं तनुतां कार्श्यं चोपययौ ३८ अपेति हिमकरश्चंद्रः अपतुषारतया अपनीहारतया विशदप्रभैर्निर्मलकांतिभिः सुरतसंगपरिश्रमनोदिभिः सु ८४
रतसंगखेदहारिभिः अंशुभिः किरणैः मकरोर्जितकेतनं मकरेणोर्जितं केतनं ध्वजो यस्य तं लब्धावकाशत्वादुच्छ्रितध्वजमित्यर्थः कुसुमचापं का

ममतेजयत् निजनिशानइतिधातोर्ण्यन्ताल्लङ् सहकारित्वाभावात्कामोपि तीक्ष्णोभूदित्यर्थः ३९ हुतेति हुतहुताशनदीप्तिआज्याद्दीप्तज्वलिताग्निप्रभंयत्कुसुमं
कर्णिकारमित्यर्थः वनश्रियः उपवनलक्ष्म्याः कनकाभरणस्यप्रतिनिधिरभूदितिशेषः दलेषुकेसरेषुचपेशलंसुकुमारपत्रंकिंजल्कमित्यर्थः आहितंप्रिये
रितिशेषः तत्कुसुमंयुवतयोऽलकेषुकुंतलेषुदधुः ४० अभिरिति अंजनविंदुमनोहरैः कज्जलकणसुंदरैः कुसुमपंक्तिषुनिपतंतियैतैः अलिभिरंकितः
चिन्हितः तिलकः श्रीमाल्लामहृक्षः तिलकः क्षुरकः श्रीमानित्यमरः वनस्थलींतिलकोविशेषकः तमालपत्रतिलकचित्रकाणिविशेषकम् द्वितीयं
चतुरीयंचनस्त्रियामित्यमरः प्रमदामिवनशोभयतिस्मेतिनापितुशोभयदेवेत्यर्थः लट्स्मेतिस्मशब्दयोगाभूतार्थेलट् ४१ अरुणेति विलसनशीलाःपु

कुसुमचापमतेजयदंशुभिर्हिमकरोमकरोर्जितकेतनम् ३९ हुतहुताशनदीप्तिवनश्रियः प्रतिनिधिः कनकाभरणस्ययत्
युवतयः कुसुमंदधुराहितंतदलके दलकेसरपेशलं ४० अलिभिरंजनविंदुमनोहरैः कुसुमपंक्तिनिपातिभिरंकितः नखलुशोभ
यतिस्मवनस्थलींनतिलकस्तिलकः प्रमदामिव ४१ अरुणरागनिषेधिभिरंशुकैः श्रवणलब्धपदैश्चयवांकुरैः परभृताविरुतैश्च
विलासिनः स्मरबलैरबलैकरसाः कृताः ४२ अमदयन्मधुगंधसनाथयाकिसलयाधरसंगतयामनः॥ ९९रुषाः विलासिनः वीकषलसे

त्यादिनाघिनुण्प्रत्ययः अरुणस्यानूरोः रागमारुण्यंनिषेधंतितिरस्कुर्वंतीति अरुणरागनिषेधीनीतितैः कुसुंभादिरंजनाजन्यदर्शनैरित्यर्थः ताच्छील्ये
णिनिः तमन्वेत्यनुवध्नातितच्छीलंतन्निषेधति तस्यवानुकरोतीतिशब्दाः सादृश्यवाचका इतिसादृश्यवाचकपर्यायेदंडी अंशुकैरंवरैः श्रवणेषु
कर्णेषुलब्धपदैर्निहितैरित्यर्थः यवांकुरैश्च परभृताविरुतैः कोकिलाकूजितैश्चैतैः स्मरबलैः कामसैन्यैरबलास्वेकस्मिन्नेवरसोरागोयेषांतेएकर
साः स्त्रीपरतंत्राः कृताइत्यर्थः ४२ अमदयेति तरुचारुविलासिनस्तरोः पुंसः चारुविलासिनी नवमाल्लिकासमलाख्यालता॥ ॥

Digitized by Sarayu Foundation Trust, Delhi and eGangotri

सप्तला नवमल्लिके स्मरः मधुनो मकरंदस्य मद्यस्य गंधेन सनाथया गंधप्रधानयेत्यर्थः किसलयमेवाधरस्तत्र संगतरागया प्रसक्तरागयेत्यर्थः कुसुमैः संभृतया संपादितया कुसुमरूपयेत्यर्थः स्मितरुचा हासकांत्या मनः पश्यतामिति शेषः अमदयत् ४३ उपचितेति शुचिभिः शुभ्रैः कलैः रजोभिः उपचितावयवा पुष्टावयवा अलिकदंबयोगं उपेयुषी प्राप्ता तिलकजा तिलकवृक्षोत्था मंजरी अलकेषु यज्जालकं आभरणं तन्मौक्तिकैः सदृशा कांतिः सती अलक्ष्यत भृंगसंगिनी तिलकमंजरी नीलालकसक्तं मुक्ताजालमिवालक्ष्यतेति वाक्यार्थः ४४ ध्वजेति अलिव्रजाः षट्पदनिवहाः धनुर्भृतो धानुष्कस्य मदनस्य ध्वजपटं पताकाभूतमृतुश्रियो वसंतलक्ष्म्याः छविकरं मुखचूर्णं मुखालंकारचूर्णभूतं सपवनोपवनोत्थितं पवनेन सहि

कुसुमसंभृतया नवमल्लिका स्मितरुचा तरुचारुविलासिनी ४३ उपचितावयवा शुचिभिः कणैरलिकदंबकयोगमुपेयुषी स
दृशकांतिरलक्ष्यत मंजरी तिलकजालकजालकमौक्तिकैः ४४ ध्वजपटं मदनस्य धनुर्भृतश्छविकरं मुखचूर्णमृतुश्रियः॥
कुसुमकेसररेणुमलिव्रजाः सपवनोपवनोत्थितमन्वयुः ४५ अनुभवन्नवदोलमृतूत्सवं पटुरपि प्रियकंठजिघृक्षया अन
यदासनरज्जुपरिग्रहे भुजलतां जलतामबलाजनः ४६ त्यजत मानमलं बत विग्रहैर्न पुनरेति गतं चतुरं वयः॥ ॥ ॥

तमुपवनं तस्मादुत्थितं पवनकंपितं पवनोद्धूतमित्यर्थः कुसुमानां केसरेषु किंजल्केषु ये रेणवस्तमन्वयुः अन्वगच्छन्यातेर्लङ् ४५ अनुभवन्निति नवदोलायै खा यस्मिन्तं नवदोलमृतूत्सवं अनुभवन्नबलाजनः पटुरपि निपुणोपि प्रियकंठस्य जिघृक्षया ग्रहीतुमालिंगितुमिच्छया आसनरज्जुपरिग्रहणे भुजलतां बाहुलतां जलतां शैथिल्यं डलयोरभेदः शिथिलतामनयत् दोलाक्रीडासु पतनभयनाटितकेन प्रियकंठमाश्लिष्यन्नित्यर्थः ४६ त्यजतेति वतेत्यामंत्रणे विस्मयामंत्रणेवतेत्यमरः वत अंगनाः मानं कोपं त्यजत स्त्रीणामीर्ष्याकृतः कोपो मानोऽन्यासंगिनि प्रियेइत्यमरः विग्रहैर्विरो

वैरस्यं विग्रहो न कार्य इत्यर्थः गतमतीतं चतुरम् उपभोगक्षमं वयो यौवनं पुनः नैति नागच्छतीत्येवं रूपे स्मरमते स्मराभिप्राये नपुंसके भावे क्तः परभृता
भिः कोकिलाभिः निवेदिते सति वधूजनो रमते स्मरेमे कोकिलाकूजितोद्दीपितस्मरः स्त्रीजनः कामशासनभयादिवोत्सृष्टखेलमखेलदित्यर्थः ४७ अथे
ति अथानन्तरं मधुं मध्नातीति मधुमत् विष्णुः क्विप् चेति क्विप् मधुर्वसन्तः मथ्नातीति मथः पचाद्यच् मनसो मथो मन्मथः तेषां सन्निभः सदृशः मधु
मन्मधुमन्मथसन्निभः स नृपो दशरथो विलासवतीसखः स्त्रीसहचरः सन् ऋतुः प्राप्तोस्यार्तवं तम् उत्सवं वसन्तोत्सवं यथासुखं समनुभूय मृगयारति
मृगयाविहारं चकमे आचकाङ्क्ष ४८ व्यसनासंगदोषं परिहरन्नाह परिचयमिति असौ मृगया चललक्ष्याणि मृगगवयादीनि तेषां निपातने परिचयं

परभृताभिरितीव निवेदिते स्मरमते रमते स्म वधूजनः ४७ अथ यथासुखमार्तवमुत्सवं समनुभूय विलासवतीसखः न
रपतिश्चकमे मृगयारतिं समधुमन्मधुमन्मथसन्निभः ४८ परिचयं चललक्ष्यनिपातने भयरुषोश्च तदिङ्गितबोधनं श्रमज
यात्प्रगुणां च करोत्यसौ तनुमतोनुमतः सचिवैर्ययौ ४९ मृगवनोपगमक्षमवेषभृद्विपुलकण्ठनिषक्तशरासनः॥ ॥

अभ्यासं करोति भयरुषोर्भयक्रोधयोः सतोः तदिङ्गितबोधनं तेषां चललक्ष्याणां इंगितस्य चेष्टितस्य भयादिलिंगभूतस्य बोधनं ज्ञानं च करोति त
नुं शरीरं श्रमस्य जयान्निरासात् प्रगुणां प्रकृष्टलाघवादिगुणवतीं च करोति अतो हेतोः सचिवैरनुमतः अनुमोदितः सन् ययौ सर्वं चैतद् युद्धोपयोगी
त्यर्थः तदपेक्षया मृगयाप्रवृत्तिर्न तु व्यसनतयेति भावः ४९ मृगवनेति मृगाणां वनं तस्योपगमः प्राप्तिः तस्य क्षमम् अर्हं वेषं बिभर्तीति स तथोक्तः
मृगयाविहारानुगुणवेषधारीत्यर्थः विपुलकण्ठे निषक्तशरासनो लग्नधन्वा नासवितेव नृसविता पुरुषश्रेष्ठः उपमितसमासः स राजा अश्वखुरोद्धु
तरेणुभिः गगनं वितानं तुच्छं असद्वाकरोत् गगनं नालक्ष्यतेत्यर्थः वितानं तुच्छमंदयोरिति विश्वः अथवा स वितानमित्येकं पदं ॥

Digitized by Sarayu Foundation Trust, Delhi and eGangotri

 सवितानमुल्लोचसहितमिवाकरोत् अस्त्री वितानमुल्लोच इत्यमरः ५० ग्रथितेति वनमालया वनपुष्पस्रजा ग्रथितमौलिः बद्धमौलिर्बद्ध
 धम्मिल्लः तरूणां पलाशैः पत्रैः सवर्णः समानः तनुच्छदो वर्म यस्य स तथोक्तः इदं च वर्मणः पलाशसावर्ण्याभिधानं मृगादीनां विश्वासार्थं तुरग
 स्यवल्गनेन गतिविशेषेण चंचलकुंडलो सौ दशरथो रुरुभिर्मृगविशेषैः चेष्टिताश्चरितायाः भूमयः तासु विरुरुचे विदिद्युते ५१ तर्विति तरुषु
लतासु वि निवेशितविग्रहाः संक्रमितात्मानः भ्रमरेषु संक्रमिता ईक्षणवृत्तयो दृग्व्यापारा याभिस्ताः वनदेवताः सुनयनं सुलोचनं नयेन नी
त्या नंदिताः कोसलाः येन तं दशरथं अध्वनि ददृशुः प्रसन्नपावनतया नं देवता अपि गूढवृत्या ददृशुरित्यर्थः ५२ श्वगणीति स दशरथः शुनां ग

गगनमश्वखुरोद्धुतरेणुभिर्नृसविता सवितानमिवाकरोत् ५० ग्रथितमौलिरसौ वनमालया तरुपलाशसवर्णतनुच्छदः
तुरगवल्गनचंचलकुंडलो विरुरुचे रुरुचेष्टितभूमिषु ५१ तरुलताविनिवेशितविग्रहा भ्रमरसंक्रमितेक्षणवृत्तयः ददृशु
रध्वनि तं वनदेवताः सुनयनं नयनंदितकोसलम् ५२ श्वगणिवागुरिकैः प्रथमास्थितं व्यपगतानलदस्यु विवेश सः स्थि
रतुरंगमभूमि निपानवन्मृगवयोगवयोपचितं वनं ५३॥ ९९ णः श्वगणः स एषामस्तीति श्वगणिनः श्वग्राहिणस्ते वागुरा मृगबंधरज्जुः

वागुरा मृगबंधनमित्यमरः तया चरंतीति वागुरिकाः चरतीति ठक् द्वौ वागुरिकजालिकावित्यमरः तैश्च प्रथमं आस्थितं अधिष्ठितं व्यपगताः अ
नलदावाग्नयोरस्य वस्तस्कराश्च यस्मात्तत्तथोक्तं दस्युतस्कर मोषका इत्यमरः कारयेद्दूरविशोधनमादौ मातुरंतिकमपि प्रविविक्षुः आतग्रा ९६
स्यनुगतः प्रविशेद्धासंकटे च गहने च न तिष्ठेदिति कामंदकः स्थिरा दृढा पंकादिरहिता तुरंगमयोग्या भूमिर्यस्य तत्तत् निपानवत् आहावयुक्तं
आहावस्तु निपानं स्यादुपकूपजलाशय इत्यमरः मृगैर्हरिणादिभिः वयोभिः पक्षिभिः गवयैः गोसदृशैः अरण्यपशुविशेषैश्चोपचितं समृद्धं वनं

Digitized by Sarayu Foundation Trust, Delhi and eGangotri

अथेति अनाधिर्मनोव्यथारहितः नरेषुवरः श्रेष्ठः रवेणधनुष्टंकारेणरोषिताकेसरिणःसिंहाःयेनसराजा कनकमिवपिंगःपिशंगोयस्तडिदेवगुणो
मौर्वीतेनसंयुतंसंयुक्तंत्रिदशायुधं इंद्रचापंनभस्योभाद्रपदमासइव स्युर्नभस्यःप्रौष्ठपदभाद्रभाद्रपदाःसमाइत्यमरः अधिज्यमधिकृतमौर्वी
कंधनुरादरेजग्राह ५४ तस्येति स्तनप्रणयिभिस्तनप्रार्थिभिरेणशावैःहरिणशिशुभिःपृथुकःशावकःशिशुरित्यमरःमुहुर्व्याहन्यमानंतद्गत्सल
तयातत्क्रमनानुसारेणमुहुर्मुहुःप्रतिषिध्यमानंहरिणीनांगमनंगतिर्यस्यतत्कुशागर्भेयेषांतानिमुखानियस्यतत्कुशगर्भमुखंतस्ययूथस्याग्रेस
रःगर्वितःदृप्तश्चकृष्णसारोयस्यतत् मृगाणांयूथंकुलं सजातीयैःकुलंयूथंतिरश्चांपुन्नपुंसकमित्यमरः तस्यदशरथस्यपुरस्तादग्रेआविर्बभूव॥

अथनभस्यइवत्रिदशायुधंकनकपिंगतडिद्गुणसंयुतं धनुरधिज्यमनाधिरुपाददेनरवरोरवरोषितकेसरी ५४ तस्यस्त
नप्रणयिभिर्मुहुरेणशावैर्व्याहन्यमानहरिणीगमनंपुरस्तात् आविर्बभूवकुशगर्भमुखंमृगाणांयूथंतदग्रसरगर्वितकृष्ण
सारं ५५ तत्प्रार्थितंजवनवाजिगतेनराज्ञातूणीमुखोद्धृतशरेणविशीर्णपंक्ति श्यामीचकारवनमाकुलदृष्टिपातैर्वातेरितोत्प
लदलप्रकरैरिवार्द्रैः ५६॥लक्ष्मीकृतस्यहरिणस्यहरिप्रभावःप्रेक्ष्यस्थितांसहचरींव्यवधायदेहं॥ ९ ५५ तदिति जवनोजवन

शीलःजुचंक्रम्यदंद्रम्यसृदिनायुच्प्रत्ययः तरस्वीत्वरितोवेगीप्रजवीजवनोजवइत्यमरः तंवाजिनमश्वंगतेनारूढेनतूणीइषुधिःबह्वादिभ्यश्चेतिङी
षांडीप् तस्याःमुखाद्विवरात् उद्धृतशरेणराज्ञाप्रार्थितमभियातंयाञ्चायामभियानेचप्रार्थनाकथ्यतेबुधैरितिकेशवः अतएवविशीर्णापंक्तिः
संधिभावोयस्यतत्मृगयूथंकर्तृ आर्द्रैर्भयादश्रुसिक्तैराकुलाभयचकितायेदृष्टिपातास्तैर्वातेरितैःपवनप्रेरितैःउत्पलदलप्रकरैःइंदीवरपत्रवृंदैरि
ववनंश्यामीचकार ५६ लक्ष्मीकृतस्येति हरिरिंद्रोविष्णुर्वातस्येवप्रभावोयस्यसःधन्वी न्सनृपोलक्ष्यीकृतस्यवेद्धुमिष्टस्यहरिणस्यस्व

र॰टी॰
स॰ ९
८१

प्रियसो देहं व्यवधाय अनुरागादंतर्धाय स्थितां सहचरतीति सहचरीं तां पचादिषु चरतेष्टि॰ स्त्रीकरणान्डीप् यथाह वामनः अनुचरीति चरेष्टित्वा शिति सहभूतां सहचरीं हरिणीं प्रेक्ष्य कामितया स्वयं कामुकत्वात् कृपामृदुमनाः करुणार्द्रचित्तः सन् आकर्णकृष्टमपि दुष्प्रतिसंहरमपीसर्थः बाणं प्रतिसंजहार निपुणत्वादिसर्थः नैपुण्यं धन्वीत्यनेन गम्यते ५७ तस्येति त्रासाद्भयादतिमात्रचटुलैः अत्यंतं चंचलैः सुनेत्रैः प्रौढप्रियानयन विभ्रमचेष्टितानि चतुरकांताविलोचनव्यापारान् स्मरतः अपरेष्वपि मृगेषु शरान् मुमुक्षोस्तस्य नपस्य निबिडो दृढोऽपि मुष्टिः कर्णांतं एत्य विभिदे स्वयमेव भिद्यते स्म भिदेः कर्मकर्तरि लिट् कामिनस्तस्य प्रियाविभ्रमस्मृतिजनितकृपातिरेकात् मुष्टिभेदो नत्वनैपुण्यादिति तात्पर्यार्थः ५८ उत्तस्थुष इति सनृपः

आकर्णकृष्टमपि कामितया स धन्वी बाणं कृपामृदुमनाः प्रतिसंजहार ५७ तस्यापरेष्वपि मृगेषु शरान्मुमुक्षोः कर्णांतमेत्य विभि
दे निबिडोऽपि मुष्टिः त्रासातिमात्रचटुलैः स्मरतः सुनेत्रैः प्रौढप्रियानयनविभ्रमचेष्टितानि ५८ उत्तस्थुषः सपदि पल्वलपंकमध्या
न्मुस्ताप्ररोहकवलावयवानुकीर्णं जग्राह स द्रुतवराहकुलस्य मार्गं सुव्यक्तमार्द्रपदपंक्तिभिरायताभिः ५९ तं वाहनादवनतोत्त
रकायमीषद्विध्यंतमुद्धतसटाः प्रतिहंतुमीषुः नात्मानमस्य विविदुः सहसा वराहा वृक्षेषु विद्धमिषुभिर्जघनाश्रयेषु

मुस्ताप्ररोहाणां मुस्तांकुराणां कवलाः ग्रासाः तेषामवयवैः अविदितमुखभ्रंशिभिः शकलैरनुकीर्णं व्याप्तं आयताभिर्दीर्घाभिरार्द्रपदपंक्तिभिः सुव्यक्तं सपदि पल्वलपंकमध्यादुत्तस्थुषः उत्थितस्य द्रुतवराहकुलस्य पलायितवराहयूथस्य मार्गं जग्राह अनुससार ५९ तमिति वराहा वाहनादश्वादीषदवनतोत्तरकायं किंचिदाननपूर्वकायं कायो देहः क्लीवपुंसोः स्त्रियां मूर्तिस्तनुस्तनूरित्यमरः विध्यंतं प्रहरंतं तं नृपं उद्धतसटा उद्धतकेसराः संतः सटा जटाकेसरयोरिति केशवः प्रतिहंतुमीषुः प्रतिहंतुमैच्छन् अस्येषुभिः सहसा जघनानामाश्रयेषु वृक्षेषु अवष्टंभेषु विद्धमात्मा

८१

तेनेति अभिघाते रभस औत्सुक्यं यस्य तस्य अभिहंतुमुद्यतस्येत्यर्थः वन्यस्य वने भवस्य महिषस्य नेत्रविवरे नेत्रमध्ये तेन नृपेण विकृष्य मुक्तः पत्री
शरः विग्रहं महिषदेहं निर्भिद्य विदार्य अशोणितलिप्तो न भवतीत्यशोणितलिप्तः पुंखो यस्य स तथोक्तः सन् तं महिषं प्रथमं पातयामास स्वयं पश्चात्प
पात कृञ्चानुप्रयुज्यते लिटीत्यत्रानुशब्दस्य व्यवहितविपर्ययस्त प्रयोगनिवृत्त्यर्थत्वात् पातयां प्रथममासेत्येष प्रयोगः इति पाणिनीयाः अथाहवार्तिक
कारः विपर्यासनिवृत्त्यर्थं वाव्यवहितनिवृत्त्यर्थं इति ६१ प्राय इति नृपतिर्निशितैः क्षुरप्रैः शरविशेषैः खड्गान् खड्गाख्यान्मृगान् गंडके खड्गखड्गिनौ
विसमरः प्रायो बाहुल्येन विषाणपरिमोक्षेण शृंगभंगेन लघूनि अगुरूणि उत्तमांगानि शिरांसि येषां तांश्चकार न तु अवधीदित्यर्थः कुतः दृप्तविनया

तेनाभिघातरभसस्य विकृष्य पत्री वन्यस्य नेत्रविवरे महिषस्य मुक्तः निर्भिद्य विग्रहमशोणितलिप्तपुंखस्तं पातयां प्रथममास
पपात पश्चात् ६१ प्रायो विषाणपरिमोक्षलघूत्तमांगान् खड्गांश्चकार नृपतिर्निशितैः क्षुरप्रैः शृंगं स दृप्तविनयाधिकृतः परेषा
मत्युच्छ्रितं न ममृषे न तु दीर्घमायुः ६२ व्याघ्रानभीरभिमुखोत्पतितान्गुहाभ्यः फुल्लासनाग्रविटपानिव वायुरुग्णान् शिक्षाविशे
षलघुहस्ततया निमेषात्तूणीचकार शरपूरितवक्त्ररंध्रान् ६३॥ धिकृतः दुष्टनिग्रहनियुक्तः स राजा परेषां प्रतिकूलानामत्युच्छ्रितं शृंगं वि
षाणं प्राधान्यं च शृंगं प्राधान्यसान्वोश्चेत्यमरः न ममृषे न सेहे दीर्घमायुर्जीवितकालं आयुर्जीवितकालो ना जीवातुर्जीवनौषधमित्यमरः न न ममृषे किंतु ममृष
एवेत्यर्थः ६२ व्याघ्रानिति अभीः निर्भीकः स धन्वी गुहाभ्योभिमुखं उत्पतितान् वायुना रुग्णान् भग्नान् फुल्लाः विकसिता ये आसनस्य सर्जवृक्षस्याग्रविटपा
निव स्थितानिषुधिभूतानित्यर्थः व्याघ्राणां विरूपत्वादुपमानं फुल्लविशेषणं अनुपसर्गात्फुल्लक्षीवकृशोल्लाघा इति निष्ठातकारस्य लत्वनिपातः सर्ज
कासनबंधूकपुष्पप्रियकजीवका इत्यमरः शरैः पूरितानि वक्त्ररंध्राणि येषां तान् व्याघ्रान् शिक्षाविशेषेण अभ्यासातिशयेन लघुहस्ततयाक्षिप्रहस्ततया नि
मेषे

Digitized by Sarayu Foundation Trust, Delhi and eGangotri

निर्घातेनेति ॥ कुंजेषु लीनान् निकुंजकुंजौ वा क्लीबे लतादिपिहितोदरे इत्यमरः सिंहान्जिघांसुर्हंतुमिच्छुः निर्घातो व्योमोत्थितः औत्पातिकः शब्दविशेषः तद्वदु ग्रैः ज्यानिर्घोषैः मौर्वीशब्दैः क्षोभयामास अत्रोत्प्रेक्ष्यते तेषां सिंहानां संबंधिनि वीर्यणोदग्रे उन्नते मृगेषु विषये राजशब्दे तस्मिन्नभ्यसूयापरोभूत् नूनं अन्यथा कथमेताननाथान्विहन्यादित्यर्थः मृगाणामिति पाठे समासे गुणीभूतत्वात् राजशब्देन संबंधो दुर्घटः शालिनीवृत्तमेतत् छंदः सूत्रं शालिनी म्तौ तौ गसमुद्रऋषयः ६४ तानिति काकुत्स्थो दशरथः गजकुलेषु बद्धतीव्रवैरं यैस्तान् कुटिलेषु नखाग्रेषु लग्नमुक्तान् लग्नाः मुक्ताः गजकुंभमौक्तिकानि येषां तान् सिंहान् हत्वा आत्मानं रणेषु कृतकर्मणां कृतोपकाराणां गजानामानृण्यं अनृणत्वं मार्गणैः शरैः मार्गणो याचके शरे इत्यमरः गतं प्राप्तवंतमिवामंस्त

निर्घातोग्रैः कुंजलीनान्जिघांसुर्ज्यानिर्घोषैः क्षोभयामास सिंहान् नूनं तेषामभ्यसूयापरोभूद्वीर्योदग्रे राजशब्दे मृगेषु ६४ तान् हत्वा गजकुलबद्धतीव्रवैरान्काकुत्स्थः कुटिलनखाग्रलग्नमुक्तान् आत्मानं रणकृतकर्मणां गजानामानृण्यं गतमिव मार्गणैरमंस्त ६५ चमरान्परितः प्रवर्तिताश्वः क्वचिदाकर्णविकृष्टभल्लवर्षी नृपतीनिव तान्वियोज्य सद्यः सितवालव्यजनैर्जगाम शांतिम् ६६ अपि तुरगसमीपादुत्पतंतं मयूरं न स रुचिरकलापं बाणलक्ष्यीचकार ॥ ९ मनं० प्रहर्षिणीवृत्तं म्नौ ज्रौ गस्त्रिदशयतिः प्रहर्षिणीयम् ६५ चमरानिति क्वचिच्चमरान्परितः अभितः परितः समयेत्यादिना द्वितीया प्रवर्तिताश्वः आकर्णं निकृष्टान्भल्लानिषुविशेषान्वर्षतीति स तथोक्तः स नृपतीनिव तांश्चमरान् सितवालव्यजनैः शुभ्रचामरैर्वियोज्य विरहय्य सद्यः शांतिं जगाम शूराणां परकीयमैश्वर्यमेवासह्यं न तु जीवितमिति भावः औपच्छंदसिकं वृत्तं ६६ अपीति स नृपस्तुरगसमीपादुत्पतंतमपि सुप्रहारमपीत्यर्थः रुचिरकलापं भासुरबर्हं मह्यां रौतीति मयूरो बर्ही पृषोदरादित्वात्साधुः चित्रेण माल्येनानुकीर्णे रत्नं विगलितबंधे प्रियायाः केशपाशे सपदि गतमनस्कः प्रवृत्तचित्तः उरःप्रभृतिभ्यः कविति कप्प्रत्ययः ॥ ॥ ॥ ९८

Digitized by Sarayu Foundation Trust, Delhi and eGangotri

नवाणलक्ष्यीचकारनप्रजहारेत्यर्थः मालिनीवृत्तम् ६७ तस्येति कर्कशविहारादतिव्यायामात्संभवोयस्यतमाननेविलग्नजालकंवद्धकदंवकंतस्यनृपस्यस्वे
दंसतुषारशीकरः शिशिरांवुकणसहितः भिन्नानिर्दलितानिःपल्लवानांपुटाः कोशायेनसः वनानिलः आचचामजहारेत्यर्थः रथोद्धतावृत्तम् ६८ इतीति इतिपू
र्वोक्तप्रकारेणात्मनोविस्मृतमन्यत्करणीयंकार्यंयेनतंविस्मृतात्मकार्यांतरमित्यर्थः सचिवैरवलंविताधृताधूर्यस्यतं ऋक्पूरब्धूःपथामानक्षे इतिसमा
सांतः अनुवंधसेवया परिवृद्धः रागोयस्यतंनराधिपंमृग्यंतेमृगा अस्यामितिमृगयापरिचर्यापरिसर्यामृगयाटड्यानामुपसंख्यानमितिशप्रत्ययांतोनि

सपदिगतमनस्कश्चित्रमाल्यानुकीर्णेरतिविगलितवंधेकेशपाशेप्रियायाः ६७ तस्यकर्कशविहारसंभवंस्वेदमाननविल
ग्नजालकं आचचामसतुषारशीकरोभिन्नपल्लवपुटोवनानिलः ६८ इतिविस्मृतान्यकरणीयमात्मनःसचिवावलंवितधु
रंनराधिपं परिवृद्धरागमनुवंधसेवयामृगयाजहारचतुरेवकामिनी ६९ सललितकुसुमप्रवालशय्यांज्वलितमहौषधिदीपि
कासनाथां नरपतिरतिवाहयांवभूवक्वचिदसमेतपरिच्छदस्त्रियामां ७० उषसिसगजयूथकर्णतालैःपटुपटहध्वनिभि
र्विनीतनिद्रः अरमतमधुरस्वराणिशृण्वन्विहगविकूजितवंदिमंगलानि ७१॥ ९. पात्तः चतुरामुग्धाकामिनीवजहार आचकर्षन

जातुकामः कामानामुपभोगेनशाम्यति हविषाकृष्णवर्त्मेवभूयएवाभिवर्द्धत इतिभावः सुमंगलीवृत्तं ६९ सइति सनरपतिः ललितानिकुसुमानिप्र
वालानिशय्यायस्यास्तांज्वलिताभिर्महौषधीभिरेवदीपिकाभिः सनाथांतत्प्रधानामित्यर्थः त्रियामांरात्रिंक्वचिदसमेतपरिच्छदः परिहृतपरिजनः
सन्नित्यर्थः अतिवाहयांवभूव गमयामास पुष्पिताग्रावृत्तं ७० उषसीति उषसिप्रातः पटूनांपटहानामिवध्वनिर्येषांतैर्गजयूथानांकर्णैरवतालै
र्वाद्यप्रभेदैर्विनीतनिद्रः सन्सनृपस्तत्रवनेमधुराणिविहंगानांविकूजितान्येववंदिनांमंगलानिमंगलगीतानिशृण्वन्नरमत ७१॥

र·टी· अथेति अथजातुकदाचित्‌रुरोर्मृगस्यगृहीतवर्त्मास्वीकृतरुरुमार्गोविपिनेवनेपार्श्वचरैरल[क्ष्य]माणः तुरगवेगादित्यर्थः श्रमेणफेनमुचासफेनेरिव
स·९ द्यतेसर्थः तुरंगमेणतपस्विभिर्गाढांअवगाढांसेवितांतमसांनामनदींप्राप ७२ कुंभेति तस्यास्तमसायाः अंभसिकुंभपूरणेनभवः उत्पन्नःपद्यद्यच
९८ पदुर्मधुरः उच्चैर्गंभीरः निनदोध्वनिरुच्चचार उदियाय तत्रनिनदेनृपः द्विरदबृंहितंशंकतेइतिद्विरदबृंहितशंकीसन्‌ शब्देनशब्दानुसारेणपततीति
शब्दपातिनमिषुंविससर्ज स्वागतावृत्तमेतत्‌ स्वागतानौलोग्‌इतिसूत्रं ७३ नृपतेरिति तत्कर्मनृपतेः क्षत्रियस्यप्रतिषिद्धमेवयदेतत्कर्मगजवधरूपं
पंक्तिरथोदशरथोविलंघ्यलक्ष्मीकामोयुद्धादन्यत्रकरिवधंनकुर्यादितिशास्त्रमुल्लंघ्यकृतवान्‌ ननुविदुषस्तस्यकथमीदृक्‌विचेष्टितमित्याशंक्य

अथजातुरुरोर्गृहीतवर्त्मा विपिनेपार्श्वचरैरलक्ष्यमाणः श्रमफेनमुचा तपस्विगाढांतमसांप्रापनदींतुरंगमेण ७२ कुं
भपूरणभवः पटुरुच्चैरुच्चचारनिनदोंभसितस्याः तत्रसद्विरदबृंहितशंकी शब्दपातिनमिषुंविससर्ज ७३ नृपतेःप्रति
षिद्धमेवतत्कृतवान्पंक्तिरथोविलंघ्ययत्‌ अपथेपदमर्पयंतिहिश्रुतवंतोपिरजोनिमीलिताः ७४ हातातेतिक्रंदितमा
कर्ण्यविषण्णस्तस्यान्विष्यन्वेतसगूढप्रभवंसः शल्यप्रोतंप्रेक्ष्यसकुंभंमुनिपुत्रंतापादंतःशल्यइवासीत्‌क्षितिपोपि ७५॥

क्वाह अपथइति श्रुतवंतोपिविद्वांसोपिरजोनिमीलितारजोगुणावृताःसंतः नपंथाइत्यपथं पथोविभाषेतिवासमासांतः अपथंनपुंसकं अपंथा
स्त्वपथंतुल्यमित्यमरः तस्मिन्नपथेअमार्गेपदं अर्पयंतिहिनिक्षिपंतिहि प्रवर्त्तन्तेइत्यर्थः वैतालीयंवृत्तं ७४ हातातेति हेत्यार्त्तौतातोजनकः हाविषा
दशुगतिषु तातस्तुजनकःपितेत्यमरः हातातेतिक्रंदितंक्रोशनमाकर्ण्यविषण्णःभग्नोत्साहःसन्‌ तस्यक्रंदितस्यवेतसेगूढंछन्नंप्रभवंयस्मादि
तिप्रभवःकारणंतमन्विष्यशल्येनशरेणप्रोतंस्यूतं शल्यंशंकौशरेदारेवंश इतिविश्वः सकुंभंमुनिपुत्रंप्रेक्ष्यक्षितिपोपितापात्दुःखादंतःशल्य ९८

Digitized by Sarayu Foundation Trust, Delhi and eGangotri

तेनेति प्रथितान्वयेन प्रख्यातवंशेन पापभीरुत्वं सूचितं तेन राज्ञा तुरगादवतीर्य पृष्टान्वयः ब्रह्महत्याशंकया पृष्टकुलः जलकुंभनिषण्णदेहः स मुनि
पुत्रः तस्मै राज्ञे स्खलद्भिरक्षरपदैः शक्तिवैकल्यादर्धोच्चारितैरित्यर्थः आत्मानं द्विजेतरश्चासौ तपस्विसुतश्च तं द्विजेतरतपस्विसुतं कथयांबभूव न तावत्त्रैवर्णि
क एवाहमस्मि किंतु करणः वैश्यात्तु करणः शूद्र्यामिति याज्ञवल्क्यः कुतो ब्रह्महत्येत्यर्थः तथा च रामायणे ब्रह्महत्याकृतं पापं हृदयादपनीयतां न द्वि
जातिरहं राजन्मा भूत्ते मनसो व्यथा शूद्रायामस्मि वैश्येन जातो जनपदाधिपेति ७६ तदिति तच्चोदितस्तेन पुत्रेण चोदितः पितृसमीपं प्रापयेत्युक्तः स
नृपतिः अनुद्धृतशल्यं अनुद्धृतशरमेव तं मुनिपुत्रं अवसन्नदृशोर्नष्टदृशोरंधयोरित्यर्थः पित्रोर्मातापित्रोः पिता मात्रेत्येकशेषः सकाशं समीपं निनाय

तेनावतीर्य तुरगात्प्रथितान्वयेन पृष्टान्वयः स जलकुंभनिषण्णदेहः तस्मै द्विजेतरतपस्विसुतं स्खलद्भिरात्मानमक्षरपदैः कथ
यांबभूव ७६ तच्चोदितश्च तमनुद्धृतशल्यमेव पित्रोः सकाशमवसन्नदृशोर्निनाय ताभ्यां तथागतमुपेत्य तमेकपुत्रमज्ञानतः स्व
चरितं नृपतिः शशंस ७७ तौ दंपती बहु विलप्य शिशोः प्रहर्त्रा शल्यं निखातमुदहारयतामुरस्तः सोऽभूत्परासुरथ भूमिपतिं शशा
प हस्तार्पितैर्नयनवारिभिरेव वृद्धः ७८॥ ९. प ३ इदं च रामायणविरुद्धं अथाहमेकस्तं देशं नीत्वा तौ भृशदुःखितौ अस्पर्शयमहं पुत्रं तं मुनिं सह

भार्ययेति तत्र नदीतीर एव मृतं पुत्रं प्रति पित्रोरानयनाभिधानात् तथागतं चेतसगूढं एकश्चासौ पुत्रश्च तमेकपुत्रं एकग्रहणं पित्रोरनन्यगतिकत्वसूच
नार्थं उपेत्य सन्निकृष्य अज्ञानतः करिभ्रांत्या स्वचरितं स्वकृतं ताभ्यां पितृभ्यां क्रियाग्रहणाच्चतुर्थी शशंस कथितवान् ७७ ताविति तौ जाया च पतिश्च दं
पती राजदंतादिषु जायाशब्दस्य दंभावो जंभावश्च विकल्पेन निपातितः दंपती जंपती जायापती भार्यापती च ताविति अमरः बहु विलप्य भूरि परिदेव्य वि
लापः परिदेवनमित्यमरः शिशोः उरस्तो वक्षसः पंचम्यास्तसिः निखातं शरशल्यं प्रहर्त्रा राज्ञा उदहारयतामुद्धारयामासतुः शिशुः परासुर्गतप्राणोऽभू

र०टी० अथ वृद्धो हस्ते अर्पितैर्नयनवारिभिरेव शापदानस्य जलपूर्वत्वात्तैरेव भूमिपतिं शशाप ७८ दिष्टान्तमिति हे राजन् भवानप्यन्ते वयसि अहमिव पुत्रशो
सर्ग ९ काद्दिष्टान्तं कालावसानं मरणमित्यर्थः दिष्टः काले च दैवे स्यादिति विश्वः आप्स्यसि प्राप्स्यसीत्युक्तवन्तं आक्रान्तः पादाहतः पूर्वं आक्रान्तपूर्वः
१०० सुप्सुपेति समासः तं प्रथममपकृतमित्यर्थः मुक्तविषमपकारिणं पश्चादुत्सृष्टविषं भुजंगमिव स्थितं तं वृद्धं प्रति प्रथमापराद्धः प्रथमापराधी कर्त्तरि क्तः इदं च
सहनेकारणमुक्तं शापदानात् पश्चाद् दशरथः तं मुनिं कोसलपतिः दशरथः प्रोवाच ७९ शाप इति अदृष्टातनयाननपद्मशोभा येन तस्मिन् पुत्रे मय्यपि भगवता पा
तितः वज्रप्रायत्वात्पातित इत्युक्तं अयं पुत्रशोकात् म्रियस्वेत्येवंरूपः शापोऽपि मे सानुग्रहः वृद्धकुमारीवरन्यायेनेष्टावाप्तिनान्तरीयकत्वात् सोपकार एव निग्र

दिष्टान्तमाप्स्यसि भवानपि पुत्रशोकादन्ते वयस्यहमिवेति तमुक्तवन्तं आक्रान्तपूर्वमिव मुक्तविषं भुजंगं प्रोवाच कोसलप
तिः प्रथमापराद्धः ७९ शापोऽप्यदृष्टतनयाननपद्मशोभे सानुग्रहो भगवता मयि पातितोऽयं कृष्यां दहन्नपि खलु क्षितिमि
न्धनेद्धो बीजप्ररोहजननीं ज्वलनः करोति ८० इत्थंगते गतघृणः किमयं विधत्तां वध्यस्तवेत्यभिहितो वसुधाधिपेन० ५॥

हस्याप्यनुग्राहकत्वं अर्थान्तरन्यासेनाह कृष्यामिति इन्धनैः काष्ठैरिद्धः प्रज्वलितोऽग्निः कृष्यां कर्षणार्हां क्षितिं दहन्नपि बीजप्ररोहाणां अङ्कु
राणां जननीमुत्पादनक्षमां करोति ८० इत्थमिति इत्थंगते प्रवृत्ते सति वसुधाधिपेन राज्ञा गतघृणः निष्करुणोऽहं त्वादृत एव तव वध्यो वधा
र्हः अयं जनः अयमिति राज्ञो निर्वेदादनादरेण स्वात्मनिर्देशः किं विधत्तामिति अभिहितः मया किं विधेयमिति विज्ञापित इत्यर्थः स मुनिः स
दारः सभार्यः परासुं गतासुं पुत्रमनुगन्तुं मनो यस्य सोऽनुगन्तुमनाः सन् तुंकाममनसोरपीति मकारलोपः हुताशनवतः साग्नीन् एधान् काष्ठा १००

एधान्हुताशनवतः स मुनिर्ययाचे पुत्रं परासुमनुगन्तुमनास्सदा
र:॥ ८१॥ वृ:॥ १॥

नियमाच्चेनचात्मघातदोषः अनुष्ठानासमर्थस्यवानप्रस्थस्यजीर्यतः भृग्वग्निजलसंपातैर्मरणंतुविधीयतइति ८१ प्राप्तेति प्राप्तानुगोराजा
सपद्यःस्यमुनेःशासनंकाष्ठसंभरणोद्युक्तंप्राग्गेकत्वादशाक्यमपिसंप्रतिप्राप्तानुचरत्वात्संपाद्यपातकेनमुनिवधरूपेणविलुप्तधृतिःनष्टोत्साहः
सन् अंतर्निविष्टपदंलब्धस्थानमात्मविनाशहेतुंशापंअंबुराशिरौर्वंज्वलनंवडवानलमिव और्वस्तुवाडवोवडवानलःइत्यमरः दधत् धृतवान्सन्
निरृत्तोनिवृत्तेवनादितिशेषः ८२ ॥ ॐ ॥ इतिश्रीरघुवंशेमहामहोपाध्यायकोलाचलमल्लिनाथसूरिविरचितायारघुवंशव्याख्यायांसंजीविनी
समाख्यायांनवमःसर्गः ९ ॥ ॐ ॥ श्रीगणेशायनमः ॥ आश्रंसेनित्यमानंदेरामनामकथामृतं सद्भिःसंश्रवणैर्नित्यंपेयंपापप्रणोदियत् १ ॥

प्राप्तानुगःसपदिशासनमस्यराजासंपाद्यपातकविलुप्तधृतिर्निवृत्तः अंतर्निविष्टपदमात्मविनाशहेतुंशापंदधज्ज्वलन
मौर्वमिवांबुराशिः ८२ ॥ ॐ ॥ इतिश्रीरघुवंशेमहाकाव्येकालिदासकृतौमृगयावर्णनंनामनवमःसर्गः ९ ॥ ॐ ॥
॥ श्रीगणेशायनमः ॥ पृथिवींशासतस्तस्यपाकशासनतेजसः किंचिदूनमनूनर्द्धेःशरदामयुतंययौ १ नचोपलेभेपू
र्वेषामृणनिर्मोक्षसाधनं सुताभिधानंसज्योतिःसद्यःशोकतमोपहं २ ॥ १ पृथिवीमिति पृथिवींशासतःपालयतःपाकशासन

तेजसइंद्रवर्चसः अनूनर्द्धेर्महासमृद्धेस्तस्यदशरथस्यकिंचिदूनंईषन्न्यूनंशरदांवत्सराणामयुतंदशसहस्रंययौ एकंदशशतसहस्राण्ययुतंनि
युतंतथाप्रयुतं कोट्यर्बुदंचपद्मंस्थानात्स्थानंदशगुणंस्यादित्यार्यभटः इदंचमुनिशापात्परवेदितव्यं नतुजननात् षष्टिवर्षसहस्राणिजातस्यम
मकौशिकदुःखेनोत्पादितश्चायंनरामंनेतुमर्हसीतिरामायणविरोधात् नाप्यभिषेकात्परं तस्यापिसम्यग्विनीतमथवर्महरंकुमारमादिश्यरक्ष
णविधौविधिवत्प्रजानामितिकौमारानुष्ठितत्वाभिधानात्सएवविरोधइति स्यात्वत्सरेशरदित्यमरः १ नचेति सदशरथःपूर्वेषांपितॄणांऋण

र०टी० अनृणीयः पुत्रीति श्रुतेः पितॄणामृणविमुक्तिकारणं सद्यः शोक एव तमः तदपहंतीति शोकतमोपहं अत्राभयंकर इतिवदुपपदे पि न दंतविधिमाश्रि
स०१० त्य अपे क्लेशतमसोरिति ड प्रत्ययः सुताभिधानं सुताख्यं ज्योतिर्नोपलेभे न प्राप च २ अतिष्ठदिति प्रत्ययं हेतुमपेक्षत इति प्रत्ययापेक्षा संततिर्यस्य स
१०१ तथोक्तः प्रत्ययाधीनः शपथज्ञानविश्वासहेतुष्वित्यमरः स नृपो मंथात्प्राक् मंथनात्पूर्वमनभिव्यक्ता अदृष्टा रत्नोत्पत्तिर्यस्य सो ऽर्णव इव चिरं अतिष्ठत्
साम अभावाद्धि लंबो न तु वंध्यत्वादिति भावः ३ ऋष्यशृंगेति ऋष्यशृंगादयः ऋष्यशृंगो नाम कश्चिदृषिः तदादयः ऋतुमृतौ वा यजंतीति ऋत्विजः या
ज्ञिकाः ऋत्विग्दधृगित्यादिना क्विन्प्रत्ययांतो निपातः जितात्मानो जितांतःकरणाः संतः संतानकांक्षिणः पुत्रार्थिनस्तस्य दशरथस्य पुत्रीयां पुत्रनि

अतिष्ठत्प्रत्ययापेक्षसंततिः स चिरं नृपः प्राङ्मंथादनभिव्यक्तरत्नोत्पत्तिरिवार्णवः ३ ऋष्यशृंगादयस्तस्य संतः संतानकांक्षि
णः आरेभिरे जितात्मानः पुत्रीयामिष्टिमृत्विजः ४ तस्मिन्नवसरे देवाः पौलस्त्योपप्लुता हरिं अभिजग्मुर्निदाघार्ताश्छायावृक्ष
मिवाध्वगाः ५ ते च प्रापुरुदन्वंतं बुबुधे चादिपूरुषः अव्याक्षेपो भविष्यंत्याः कार्यसिद्धेर्हि लक्षणम् ६॥ मित्तां पुत्रीयां छ इति छ प्र

त्ययः इष्टिं यागमारेभिरे प्रचक्रिरे ४ तस्मिन्निति तस्मिन्नवसरे पुत्रकामेष्टिप्रवृत्तिसमये देवाः पुलस्त्यस्य गोत्रापत्यं पुमान् पौलस्त्यः रावणः ते
नोपप्लुताः पीडिताः संतो निदाघार्ताः घर्मातुराः अध्वानं गच्छंतीत्यध्वगाः पांथाः अंतात्यंताध्वदूरपारसर्वानंतेषु ड इति ड प्रत्ययः छायाप्रधानो
वृक्षमिव शाकपार्थिवादित्वात्समासः हरिं विष्णुमभिजग्मुः ५ त इति ते देवाश्चोदन्वंतं समुद्रं उदन्वानुदधौ चेति निपातः प्रापुः आदिपूरुषो १०१
विष्णुश्च बुबुधे योगनिद्रां जहावित्यर्थः गमनप्रतिबोधयोरविलंबार्थौ चकारौ तथाहि अव्याक्षेपो गम्यस्याव्यासंगः अविलंब इति यावत् भ
विष्यंत्याः कार्यसिद्धेर्लक्षणं लिंगं हि उक्तं च अनन्यपरता चास्य कार्यसिद्धेस्तु लक्षणमिति ६॥

Digitized by Sarayu Foundation Trust, Delhi and eGangotri

भोगीति द्यौरोको येषां ते दिवौकसो देवाः पृषोदरादित्वात्साधुः यद्वा दिवशब्दोऽदंतोऽप्यस्ति तथा च बुद्धचरिते नशोभते तेन हि नो विना पुरं मरुत्वता स्वर्ग इव
धेयया दिवमिति तत्र दिवु क्रीडायां धातोरिगुपधेति कः दिवमोको येषामिति विग्रहे हलंतेन विग्रहे ओकारमध्योपि भोगिनः शेषस्य भोगः शरीरं
भोगः सुखेस्त्र्यादिभृतावहेश्च फणकाययोरित्यमरः स एवासनं सिंहासनं तत्रासीनमुपविष्टं आसेः शानच् ईदास इतीकारादेशः तस्य भोगिनः फणमंड
ले ये उदर्चिषः उत् ऊर्ध्वं अर्चिषो रश्मयो येषां ते उदर्चिषः उदर्चिषश्च ते मणयश्च तैर्द्योतितं विग्रहः तं विभुं ददृशुः ७ श्रियइति कीदृशं विभुं पद्मनि
षण्णायाः उपविष्टायाः श्रियः क्षौमांतरिता दुकूलव्यवहिता मेखला यस्य तस्मिन् आस्तीर्णौ करपल्लवौ पाणिपल्लवौ यस्मिंस्तस्मिन् विशेषणद्वयेन

भोगिभोगासनासीनं ददृशुस्तं दिवौकसः तत्फणामंडलोदर्चिर्मणिद्योतितविग्रहम् ७ आदिकुलम् श्रियः पद्मनिषण्णायाः
क्षौमांतरितमेखले अंके निक्षिप्तचरणमास्तीर्णकरपल्लवे ८ प्रबुद्धपुंडरीकाक्षं बालातपनिभांशुकम् दिवसं शारदमिव
प्रारंभसुखदर्शनम् ९ प्रभानुलिप्तश्रीवत्सं लक्ष्मीविभ्रमदर्पणम् कौस्तुभाख्यमपां सारं बिभ्रतं बृहतोरसा १० बाहुभिर्विटपा

चरणयोः सौकुमार्यात्कटिमेखलास्पर्शासहत्वं सूच्यते तस्मिन्नंके निक्षिप्तौ चरणौ येन तं ८ प्रबुद्धेति पुनः कीदृशं प्रबुद्धं विकसितं पुंडरीकं तद्वदक्षिणी यस्य तं दिवसे तु पुंडरीकमेवाक्षि यस्येति विग्रहः बालातपनिभं बालातपसदृशमंशुकं यस्य तं पीना
वरधरमित्यर्थः अन्यत्र बालातपव्याजांशुकमित्यर्थः निभो व्याजसदृशयोरिति विश्वः प्रारंभः प्रकृष्टो योगो येषां ते योगिनः तेषां सुखदर्शनं अन्य
त्र प्रारंभे आदौ सुखदर्शनं शारदं शरत्संबंधिनं दिवसमिव स्थितम् ९ प्रभेति पुनः किंविधं प्रभया अनुलिप्तम् अनुरंजितं श्रीवत्सं नाम लांछनं येन तं
लक्ष्म्याः विभ्रमदर्पणं कौस्तुभं इति आख्या यस्य तं अपां समुद्राणां सारं स्थिरांशं मणिमित्यर्थः बृहता उरसा बिभ्राणम् १० बाहुभिरिति विटपाकारैः

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust, Delhi and eGangotri

र॰टी॰ पूर्णस्वाकारैः दिव्याभरणभूषितैः बाहुभिरुपलक्षितं अत एवायांसैं घवानां मध्ये आविर्भूतमपरं हितीयं पारिजातमिवस्थितं ११ दैत्येति दैत्यस्त्रीगंड
स॰२० लेखानां असुरांगनागंडस्थलीनां यो मदरागः तं विलुपंति हरंतीति मदरागविलोपिनः तैश्चेतनावद्भिः सजीवैर्हेतिभिः सुदर्शनादिभिः शस्त्रैः हेतिः शस्त्र
१०२ चिरस्त्रयोरिति विश्वः उदीरितजयस्वनं जयशब्दमुद्घोषयंतीभिः मूर्तिमतीभिः अस्त्रदेवताभिरुपास्यमानमित्यर्थः १२ मुक्तेति मुक्तो भगवत्सन्निधाना
त्यक्तः शेषेण सह विरोधः सहजमपि वैरं येन तेन कुलिशव्रणा अमृताहरणकाले इंद्रयुद्धे वज्रमहारास्त एव लक्ष्माणि यस्य स तेन प्रवद्धः अंजलिर्ये
न तेन प्रांजलिना प्रवद्धांजलिनेत्यर्थः विनीतेनानुद्धतेन गरुत्मता उपस्थितमुपासितं पुरा किल तेन विष्णुना प्रांजलिप्रार्थितेन दुहितृगुणकेश्याः

आविर्भूतमपां मध्ये पारिजातमिवापरम् ११ दैत्यस्त्रीगंडलेखानां मदरागविलोपिभिः आयुधैश्चेतनावद्भिरुदीरितजय
स्वनम् १२ मुक्तशेषविरोधेन कुलिशव्रणलक्ष्मणा उपस्थितं प्रांजलिना विनीतेन गरुत्मता १३ योगनिद्रांतविशदैः पावनै
रवलोकनैः भृग्वादीननुगृह्णंतं सौखशायनिकान्मुनीन् १४ प्रणिपत्य सुरास्तस्मै शमयित्रे सुरद्विषां अथैनं तु
ष्टुवुः स्तुत्यमवाङ्मनसगोचरम् १५॥

पत्युः कस्यचित्सर्पस्य गरुडाद्भयदाने कृते स्वपक्षरक्षणक्षुभितं पक्षिराजं त्वद्दोढाहं त्वत्तो बलाढ्य इति
गर्वितं स्ववामतर्जनीभारेणैव भक्त्या भगवान्विनिनायेति महाभारतीयां कथां सूचयतीति नेनेत्यनेन १३ योगेति योगी मनसो विषयांतरव्यावृत्तिसामान्यो
निद्रा तस्यांतेऽवसाने विशदैः प्रसन्नैः पावनैः शोधनैः अवलोकनैः सुखशयनं पृच्छंतीति सौखशायनिकाः तान् पृच्छतौ सुस्नातादिभ्य इत्युपसंख्यानाट्ठ
कुप्रत्ययः भृग्वादीनृषीननुगृह्णंतं १४ प्रणिपत्येति अथ दर्शनानंतरं सुराः सुरद्विषामसुराणां शमयित्रे विनाशकाय तस्मै विष्णवे प्रणिपत्य स्तुत्यं स्तो
त्रार्हं एतिस्तुशास्वृदृजुषः क्यबिति क्यप्प्रत्ययः वाक् च मनश्च वाङ्मनसे अचतुरेत्यच्प्रत्ययांतो निपातः तयोर्गोचरो विषयो न भवतीत्यवाङ्मनसगोचरं स्वं एतं १०२

Digitized by Sarayu Foundation Trust, Delhi and eGangotri

नम इति पूर्वमादौ विश्वसृजे विश्वस्रष्ट्रे तदनु सर्गानन्तरं विश्वं बिभ्रते अथ विश्वस्य संहर्त्रे एवं त्रेधा सृष्टिस्थितिसंहारकर्तृत्वेन स्थित आत्मा स्वरूपं यस्य तस्मै ब्रह्मविष्णुहरात्मने तुभ्यं नमः १६ ननु कूटस्थस्य कथं त्रैरूप्यमित्याशंक्यौपाधिकमित्याह रसांतराणीति एकरसं मधुरैकरसं दिवि भवं दिव्यं पयो वर्षोदकं देशे ऊषरादिदेशेऽन्यान् रसान् रसांतराणि लवणादीनि यथाऽश्नुते प्राप्नोति एवमविक्रियो निर्विकारः एकरूप इत्यर्थः त्वं गुणेषु सत्त्वादिषु अवस्थाः स्रष्टृत्वादिरूपा अश्नुषे १७ एक इति एकः एकरूपस्त्वं कारणत उपाधितः तां तामवस्थां ब्रह्मविष्णुरुद्रलक्षणां मत्स्यकूर्मादिकां वा प्रतिपद्यसे तत्तेन नानात्वं रूपनेनेति रागो द्रव्यं जपाकुसुमादि तस्य संयोगात्स्फटिकस्येव प्रसिद्धमेतद्दृष्टांतार्थं च १८ अमेय इति हे देव त्वममेयो लोकैरियन्मानपरिच्छेद्यः मितलो

नमो विश्वसृजे पूर्वं विश्वं तदनु बिभ्रते अथ विश्वस्य संहर्त्रे तुभ्यं त्रेधास्थितात्मने १६ रसांतराण्येकरसं यथा दिव्यं पयोऽश्नुते दे
शे देशे गुणेष्वेवमवस्थास्त्वमविक्रियः १७ एकः कारणतस्तांस्तान्नामवस्थां प्रतिपद्यसे नानात्वं रागसंयोगात्स्फटिकस्येव ते
स्मृतं १८ अमेयो मितलोकस्त्वमनर्थी प्रार्थनावहः अजितो जिष्णुरत्यंतमव्यक्तो व्यक्तकारणम् १९ हृदयस्थमनासन्नम
कामं त्वां तपस्विनं॥ ९

कः परिच्छिन्नलोकः अनर्थी निस्पृहः आवहतीत्यावहः पचाद्यच् प्रार्थनानामावहः कामदः अजितः अन्यैर्न जितः जिष्णुर्जयनशीलः अत्यंतमव्यक्तः सूक्ष्मरूपः व्यक्तस्य स्थूलस्य कारणम् १९ हृदयेति हे देव त्वां हृदयस्थं सर्वांतर्यामिणं तथापि तपस्विनं प्रशस्ततपोयुक्तं यो निष्कामः स कथं तपः कुरुत इति विरोधः परिहारस्तु कृपारूपेण दुस्तरं तपस्तप्यते दयालुं परदुःखप्रहाणपरं तथाप्यनघस्पृष्टं निरानंदस्वरूपत्वाददुःखिनं विदुः अघं दुरितदुःखयोरिति विश्वः दयालुरदुःखी चेति विरोधः ईर्ष्युर्घृणीत्वसंतुष्टः क्रोधनो नित्यशंकितः परभाग्योपजीवी च षडेते नित्यदुःखिता इति महाभारते पुराणमनादिमजरं निर्विकारत्वादक्षरं विदुः चिरंतनं न जीर्यत इति विरोधालंकारः उक्तं च आभासत्वे विरोधस्य विरोधालंकृतिर्मतेति विरोधेन॥

Digitized by Sarayu Foundation Trust, Delhi and eGangotri

स्तो॰टी॰ वालौकिकमहिमत्वं व्यज्यते २० सर्वज्ञ इति त्वं सर्वं जानासीति सर्वज्ञः इगुपधेति कप्रत्ययः अविज्ञातो न केनापीत्यर्थः त्वं सर्वस्य योनिः कारणं त्वमात्मन
स॰४० एव भवतीत्यात्मभूः न ते किंचित्कारणमस्तीत्यर्थः त्वं सर्वस्य प्रभुः त्वमनीशः त्वमेकः सर्वरूपभाक् त्वमेक एव सर्वात्मना वर्तसे २१ सप्तेति हे देव त्वां सप्तभिः
१०३ सामभिः रथंतरादिभिरुपगीतं तद्धितार्थेत्युत्तरपदसमासः सप्तानामर्णवानां जलं सप्तार्णवजलं पूर्ववत्समासः तत्र शेते यः तं सप्तार्णवजले शयं शय
शयवासिवासेष्वकालादिति अलुक् सप्तार्चिर्मुखं यस्य तं अग्निमुखा वै देवा इति श्रुतेः सप्तानां लोकानां भूर्भुवः स्वरादीनां एकं संश्रयं एवंभूतमाचख्युः २२ चतुरिति चतु
र्णां धर्मार्थकाममोक्षाणां वर्गः चतुर्वर्गः त्रिवर्गो धर्मकामार्थैश्चतुर्वर्गः समोक्षकैरित्यमरः तत्फलकं यत् ज्ञानं च त्वारि युगानि कृतत्रेतादीनि यासु ताः चतुर्यु

दयालुमनघस्पृष्टं पुराणमजरं विदुः २० सर्वज्ञस्त्वमविज्ञातः सर्वयोनिस्त्वमात्मभूः सर्वप्रभुरनीशस्त्वमेकस्त्वं सर्वरूपभाक् २१॥
सप्तसामोपगीतं त्वां सप्तार्णवजलेशयम् सप्तार्चिर्मुखमाचख्युः सप्तलोकैकसंश्रयम् २२ चतुर्वर्गफलं ज्ञानं कालावस्थाश्चतुर्यु
गाः चतुर्वर्णमयो लोकस्त्वत्तः सर्वं चतुर्मुखात् २३ अभ्यासनिगृहीतेन मनसा हृदयाश्रयम् ज्योतिर्मयं विचिन्वंति योगिनस्त्वां विमुक्त
ये २४ अजस्य गृह्णतो जन्म निरीहस्य हतद्विषः॥ युगाः कालावस्थाः कालपरिमाणं चत्वारो वर्णा ब्राह्मणादयः यस्मिन्निति चतुर्वर्णमयः चातुर्वर्ण्यं प्र

चुरइत्यर्थः तत्प्रकृतवचने मयट् तद्धितार्थेति तद्धितार्थविषये तत्पुरुषः स लोक इत्येवरूपं सर्वं चतुर्मुखात् चतुर्मुखरूपिणः त्वत्तः जातमिति शेषः इदं सर्वमसृ
जत यदिदं किंचिदिति श्रुतेः २३ अभ्यासेति अभ्यासेन निगृहीतं विषयांतरेभ्यो निवर्तितं तेन मनसा योगिनो हृदयाश्रयं हृत्पद्मस्थं ज्योतिर्मयं त्वां विमुक्त १०३
ये मोक्षार्थं विचिन्वंति अन्विष्यंति ध्यायंतीत्यर्थः २४ अजस्येति न जायत इत्यजः अन्येष्वपि दृश्यत इति डप्रत्ययः तस्याजस्य जन्मशून्यस्यापि जन्म गृह्णतः
मत्स्यादिरूपेण जायमानस्य निरीहस्य चेष्टारहितस्यापि हतद्विषः शत्रुघातिनः जागरूकस्य सर्वसाक्षिकत्तया नित्यप्रबुद्धस्यापि स्वपतो योगनिद्रामनुभ

द्रस्यं विरुद्धचेष्टस्य तव याथार्थ्यं को वेद को वेत्ति। विरोधदोषेति गणार्थः २५ शब्दादीनिति शब्दादीन्विषयान्भोक्तुं नरनारायणादिरूपेण दुश्चरं तपश्चरि
तुं तथा दैत्यमर्दनेन प्रजाः पातुं औदासीन्येन तटस्थेन वर्तितुं च पर्याप्तः समर्थोसि भोगतपसोः पालनौदासीन्ययोश्च परस्परविरुद्धयोः आचरणे त्वदन्यः कः
समर्थ इत्यर्थः २६ बहुधेति आगमैस्त्रयीसांख्यादिभिः दर्शनैर्भिन्ना अपि सिद्धिहेतवः पुरुषार्थसाधकाः पंथान उपायाः जान्हव्या इमे जान्हवीयाः गांगाः
वृद्धाच्छ इति छप्रत्ययः ओघाः प्रवाहा इव तेष्यागमैः आगतिभिर्बहुधा भिन्नाः सिद्धिहेतवश्चार्णव इव त्वय्येव निपतन्ति प्रविशन्ति येन केनापि रूपेण त्वामे
वापयान्तीत्यर्थः यथाहुराचार्याः किं बहुना कारवोपि विश्वकर्मन्नुपासते २७ त्वयीति त्वय्यावेशितं निवेशितं निहितं चित्तं येषां तेषां तुभ्यं समर्पितानि क

स्वपतो जागरूकस्त्वयथार्थ्यं वेद कस्तव २५ शब्दादीन्विषयान्भोक्तुं चरितुं दुश्चरं तपः पर्याप्तोऽसि प्रजाः पातुमौदासीन्येन वर्तितुम् २६ ब
हुधाप्यागमैर्भिन्नाः पंथानः सिद्धिहेतवः त्वय्येव निपतन्त्योघा जान्हवीया इवार्णवे २७ त्वय्यावेशितचित्तानां त्वत्समर्पितकर्मणां गति
स्त्वं वीतरागाणामभूयः सन्निवृत्तये २८ प्रत्यक्षोऽप्यपरिच्छेद्यो मह्यादिर्महिमा नव आप्तवागनुमानाभ्यां साध्यं त्वां प्रति का कथा २९
॥ केवलं स्मरणेनापि पुनासि पुरुषं यदा ॥

र्माणि येस्तेषां मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु मामेवैष्यसि कौन्तेय प्रतिजाने प्रियोसि मे इति
भगवद्वचनात् वीतरागाणां विरक्तानां अभूयः सन्निवृत्तये पुनरावृत्तये मोक्षायेत्यर्थः त्वमेव गतिः साधनं त्वमेव विद्वानमृत इह भवति नान्यः पंथा विद्यते
ऽयनायेति श्रुतेरित्यर्थः २८ प्रत्यक्ष इति प्रमाणगम्यः तव मह्यादिः पृथिव्यादिर्महिमा ऐश्वर्यं चापरिच्छेद्यः इयत्तया नावधार्यः आप्तवाग्वेदः यतो
वाङ्मानीति श्रुतेः अनुमानं क्षित्यादिकं सकर्तृकं कार्यत्वाद्घटवदित्यादि ताभ्यां साध्यं गम्यं त्वां प्रति का कथा प्रत्यक्षमपि त्वत्कृतं जगदपरिच्छेद्यं तत्कारण
मप्रत्यक्षस्त्वं अपरिच्छेद्य इति किमुत वक्तव्यमित्यर्थः २९ केवलमिति स्मरणेन केवलं कृत्स्नं केवलः कृत्स्न एकश्चेति शाश्वतः पुरुषं स्मर्तारं जनं पुनासि

Digitized by Sarayu Foundation Trust, Delhi and eGangotri

र०टी० यत्नोदित्यर्थः अनेनैवस्मृतिकार्यस्तोवत्वयितह्निषयेयाः शेषाः अवशिष्टाः एतयोर्दर्शनस्पर्शनादयोव्यापारास्तानिवेदितफलाः ज्ञापितकार्यास्तवस्मरणस्यैवफ
स०१० लंदर्शनस्पर्शनादीनांतुकिंयदित्यवधारयामः इत्यर्थः ३० उदधेरिति उदधे रत्नानीवविवस्वतस्तेजांसीवदूराणि अवाङ्मनसगोचराणितेचरितानिस्तुतिभ्यो
१०४ व्यतिरिच्यंतेनिःशेषंस्तोतुंनशक्यन्तइत्यर्थः ३१ अनवाप्तइति अनवाप्तमप्राप्तं अवाप्तव्यंतेतवकिंचनकिंचिदपिनविद्यतेनित्यपरिपूर्णत्वादितिभावः तर्हि
किंनिबंधनेजन्मकर्मणीतत्राह लोकेति एकोलोकानुग्रहएवतेजन्मकर्मणोर्हेतुः परमकारुणिकस्यतेपरार्थैवप्रवृत्तिर्नस्वार्थैवेत्यर्थः ३२ महिमानमि
ति तवमहिमानमुत्कीर्त्यवचःसंह्रियतेइतिनतद्वचःसंहरणंश्रमेणवाग्व्यापारश्रांत्याऽशक्त्यावाकात्स्न्येनवक्तुमशक्यत्वाद्वागुणानामियत्तयाएता

अनेनं हत्वयः शेषानिवेदितफलास्त्वयि ३० उदधेरिवरत्नानितेजांसीवविवस्वतः स्तुतिभ्योव्यतिरिच्यंतेदूराणिचरितानिते ३१
अनवाप्तमवाप्तव्यंनतेकिंचनविद्यते लोकानुग्रहएवैकोहेतुस्तेजन्मकर्मणोः ३२ महिमानंयदुत्कीर्त्यतवसंह्रियतेवचः श्रमे
णतदशक्त्यावानगुणानामियत्तया ३३ इतिप्रसादयामासुस्तेसुरास्तमधोक्षजं भूतार्थव्याहृतिःसाहिनस्तुतिःपरमेष्ठिनः ३४
तस्मैकुशलसंप्रश्नव्यंजितप्रीतयेसुराः प्रयमप्रलयाहेलादाचख्युर्नैर्ऋतोदधेः ३५॥१ वन्मात्रतयानतेषामानंत्यादितिभावः ३३ इ
तितेसुराः तमधोक्षजमिंद्रियजंज्ञानंयस्मिंस्तमधोक्षजंविष्णुंप्रसादयामासुः प्रसन्नंचक्रुःहियस्मात्परमेष्ठिनःसर्वोत्तमस्यतस्यदेवस्यसादैवैः
कृताभूतार्थव्याहृतिः भूतस्यसत्यस्यार्थस्यव्याहृतिस्तुतिः युक्तेक्ष्मादावृतेभूतमित्यमरः नस्तुतिर्नप्रशंसामात्रंमहांतोहियथाकथंचनसुलभाइति १०८
भावः परमेस्थानेतिष्ठतीतिपरमेष्ठीस्थः किंदित्युणादिसूत्रेणतिष्ठतेरिनिः तत्पुरुषेकृतिबहुलमितिसप्तम्या अलुक्स्थास्थिन्स्पृणामितिवक्तव्यात्षत्व
म् ३४ तस्मादिति सुराः देवाः कुशलस्यसंप्रश्नेनव्यंजिताप्रकटीकृताप्रीतिर्येस्यलक्षितप्रसादायेत्यर्थः अन्यथाअनवसरवित्तप्तिर्मुखराणामिवनिष्फ

लास्यादिति भावः तस्मै विप्लवेः प्रलये प्रलयाभावेपु हेलाद् उन्मर्यादानैर्ऋतोरा क्षसएवोदधिस्तस्माद्भयमाचख्युः कथितवंतः ३५ अथेति अथ वेलायां अब्धिकूले समासन्नानां सन्निकृष्टानां शैलानां रंध्रेषु गह्वरेषु अनुवादिना प्रतिध्वनिमता स्वरेण परिभूतार्णवध्वनिः तिरस्कृतसमुद्रघोषः भगवानुवाच ३६ पुराणस्येति पुराणस्य चिरंतनस्य कवेस्तस्य भगवतो वर्णस्थानेषूरः कंठादिषु समीरिता सम्यगुच्चारिता ः तएव कृतः संपादितः संस्कारः साधुत्वं स्पष्टतात्वादिप्रयत्नो यस्याः सा भारती वाणी चरितार्था कृतार्था च बभूवेव एवकारस्त्वसंभावनाविपरीतभावनाव्युदासार्थः ३७ बभाविति विभोर्विष्णोर्वदनादुद्गता निःसृता सदशनज्योत्स्ना दंतकांतिसहिता इदं च विशेषणं धावल्यातिशयार्थम् अतएव सा भारती चरणादंघ्रेर्निर्याता चासौ शेषा च निर्यातशेषा निःसृतावशिष्टेत्यर्थः स्त्रियाः पुंवदित्यनुवर्त्यपुंवत्कर्मधारयेति पुंवद्भावः निर्यातशब्दस्य या निर्याता सा वशेषा सा गंगेवेति सामानाधिकरण्यनिर्वाहः निर्याताशे

अथ वेलासमासन्नशैलरंध्रानुवादिना॥ स्वरेणोवाच भगवान्परिभूतार्णवध्वनिः ३६ पुराणस्य कवेस्तस्य वर्णस्थानसमीरिता बभूव कृतसंस्कारा चरितार्थैव भारती ३७ बभौ सदशनज्योत्स्ना सा विभोर्वदनोद्गता निर्यातशेषा चरणाद्गंगेवोर्ध्वप्रवर्तिनी ३८ जाने वो रक्षसाक्रांतावनुभावपराक्रमौ अंगिनां तमसेवोभौ गुणौ प्रथममध्यमौ ३९ विदितं तप्यमानं च तेन मे भुवनत्रयम् अकामोपनतेनेव साधोर्हृदयमेनसा ४०॥

षेति विग्रहे पुंवद्भावो दुर्घट एव ऊर्ध्वप्रवर्तिनी ऊर्ध्वप्रवाहिनी गंगेव बभावित्युत्प्रेक्षा ३८ यदाह भगवान् तदाह जानइति हे देवाः वो युष्माकं अनुभावपराक्रमौ महिमापुरुषकारौ रक्षसा रावणेन अंगिनां शरीरिणां प्रथममध्यमौ उभौ गुणौ सत्त्वरजसी तमसेव तमोगुणेनेवाक्रांतौ जाने वाक्यार्थः कर्म ३९॥ विदितमिति किंच अकामेन अनिच्छया उपनतेन प्रमादादागतेन एनसा पापेन साधोः सज्जनस्य हृदयमिव तेन रक्षसा तप्यमानं संतप्यमानं तपेः भौवादिकात्कर्मणि शानच् भुवनत्रयं च मे विदितं मया ज्ञायत इत्यर्थः मतिबुद्धीत्यादिना वर्तमाने क्तः क्तस्य च वर्तमान इति षष्ठी ४० ॥ ॥

र॰टी॰ कार्येष्विति किंच॰ एककार्यत्वाद्द्वयोः एककार्यहेतोः कार्येषु कर्तव्यार्थेषु विषयेषु वज्रिणेंद्रेणाभ्यर्थ्य इदं कुर्विति प्रार्थनीयो नास्मि तथाहि वातःस
स॰१० यामेवाग्नेः सारथ्यं सहायभावं प्रतिपद्यते प्राप्नोति न तु वह्निप्रार्थनया इत्येवकारार्थः येषा वातः स्वार्थेषु स्वत एव प्रवृत्तिः न तु परप्रार्थनया स्वार्थेश्चायमि
१०५ दमित्यर्थः ४१ स्वेति पुरा किल त्रिपुरारिप्रीणनाय स्वशिरांसि छिंदता दशकंधरेण यद्दशमं शिरोऽवशेषितं तन्मच्चक्रार्थमित्याह स्वासिधारया स्वखड्ग
धारया परिहृतो ऽवच्छिन्न इत्यर्थः दशमो मूर्धा मे चक्रस्य कामं पर्याप्तो लभ्यांशः प्राप्तव्यभाग इव तेन रक्षसा स्थापितः सर्वथा तमहं हनिष्यामीत्यर्थः ४२
तर्हि किं प्रागुपेक्षितः अत आह स्रष्टुरिति किंतु स्रष्टुर्ब्रह्मणो वरातिसर्गात् वरदानाद्धेतोः मया तस्य दुरात्मनो रिपो रावणस्यात्यारूढमत्यारोहणम्

कार्येषु चैककार्यत्वादभ्यर्थ्योऽस्मि न वज्रिणा स्वयमेव हि वातोऽग्नेः सारथ्यं प्रतिपद्यते ४१ स्वासिधाराऽपरिहृतः कामं चक्रस्य
तेन मे स्थापितो दशमो मूर्धा लभ्यांश इव रक्षसा ४२ स्रष्टुर्वरातिसर्गात्तु मया तस्य दुरात्मनः अत्यारूढं रिपोः सह्यं चंदनेनेव भोगि
नः ४३ धातारं तपसा प्रीतं ययाचे स हि राक्षसः दैवात्सर्गादवध्यत्वं मर्त्येष्वास्थापराङ्मुखः ४४ सोऽहं दाशरथिर्भूत्वा रणभूमे
र्बलिक्षमं करिष्यामि शरैस्तीक्ष्णैस्तच्छिरःकमलोच्चयं ४५॥ ९९ निर्वृद्धिरित्यर्थः नपुंसके भावे क्तः भोगिनः सर्पस्यात्यारूढं चंदनेनेव वसोढं

चंदनस्यापि स्रष्टुर्नियतेरिति द्रष्टव्यं ४३ संप्रति वरस्वरूपमाह धातारमिति स राक्षसस्तपसा प्रीतं संतुष्टं धातारं ब्रह्माणं मर्त्येषु विषये आस्थापराङ्मुखः सन्नम
र्त्यान्नाद्रियत इत्यर्थः दैवात् देवसंबंधिनो दृष्टविधात्सर्गात् देवसृष्टेरवध्यत्वं ययाचे हि ४४ तर्हि का गतिरित्याशंक्य मनुष्यावतारेण हनिष्यामीत्याह सोऽहमिति १५
सोऽहं दशरथस्यापत्यं पुमान् दाशरथिः अत इञ् इतीञ् प्रत्ययः रामो भूत्वा तीक्ष्णैः शरैः तस्य रावणस्य शिरांस्येव कमलानि तेषामुच्चयं राशिं रणभूमेर्बलिक्ष
मं पूजार्हं करिष्यामि पुष्पविशदा हि पूजेति भावः ४५॥

अचिरादिति हे देवाः यज्वभिर्याज्ञिकैः विधिवत्कल्पितमुपहृतं भागं हविर्भागं मायाविभिः मायावद्भिः अस्मायामेधास्रजो विनिरिति विनिमय यः नि
शाचरैरसौ भिरनालीढमनाक्रांतं यथा तथा अचिरात्पुनराददास्यध्वे ग्रहीष्यध्वे ५६ वैमानिका इति मरुतां देवानां पथि व्योम्नि वैमानिकाः विमानेश्च
रंतीति चरतीति ठक्प्रत्ययः मेघावरणतत्पराः रावणभयान्मेघेष्वंतर्हितनतत्पराः पुण्यकृतः सुकृतिनः पुष्पकालोकेन यदृच्छया रावणविमानद
र्शनेन यः संक्षोभः तं त्यजंतु ५७ मोक्षध्वे इति हे देवाः यूयं शापेन नलकूबरशापेन यंत्रितः प्रतिबद्धा पौलस्त्यस्य रावणस्य बलात्कारेण ये केशग्रहाः
केशाकर्षाः तैरदूषितान् अनुपहतान् स्वर्गवंदीनां हृतस्वर्गांगनानां वेणीवंधान्मोक्षध्वे पुरा किल नलकूबरेणात्मानमभिसरंत्याः रंभायाः बलात्कारेण संभो

अचिराद्यज्वभिर्भागं कल्पितं विधिवत्पुनः मायाविभिरनालीढमादास्यध्वे निशाचरैः ५६ वैमानिकाः पुण्यकृतस्त्यजं
तु मरुतां पथि पुष्पकालोकसंक्षोभं मेघावरणतत्पराः ५७ मोक्ष्यध्वे स्वर्गवंदीनां वेणीवंधानदूषितान् शापयंत्रितपौलस्त्यब
लात्कारकचग्रहैः ५८ रावणावग्रहक्लांतमिति वागमृतेन सः अभिवृष्य मरुत्सस्यं कृष्णमेघस्तिरोदधे ५९ पुरुहूतप्रभृ
तयः सुरकार्योद्यतं सुराः अंशैरनुययुर्विष्णुं पुष्पैर्वायुमिव द्रुमाः ६०॥ १० गाक्कुइेन दुरात्मा रावणः शापः स्त्रीणां बलाद्ग्रहणे मूर्द्धा ते शतधा भ
विष्यतीति भारतीया कथानुसंधेया ५८ रावणेति सकृष्णो विष्णुः स एव मेघः नीलमेघश्च विश्रवसोपत्यं पुमान् रावण इति विग्रहः विश्रवः शब्दात् शि
वादित्वादण् विश्रवसो विश्रवण रवणावित्यंतर्गणसूत्रेण विश्रवः शब्दस्य वृत्तिविषये रवणादेशो रावण इति सिद्धं स एवावग्रहो वर्षप्रतिबंधः तेन क्लां
तं म्लानं मरुतो देवा एव सस्यमिति वं रूपेण वागमृतेन वाक्सलिलेन अमृतं यत् पीयूषसलिलः मृतमिति विश्वः अभिवृष्याभिषिच्य तिरोदधे तर्द्धे ५९
पुरुहूतेति पुरुहूतप्रभृतयः इंद्राद्याः सुराः सुरकार्ये रावणवधरूपे उद्यतं विष्णुं अंशैर्मात्राभिः द्रुमाः पुष्पैः स्वांशैर्वायुमिवानुययुः सुग्रीवादिरूपेणवानरयोनिषु

[illegible] ५०॥

र॰टी॰ अथेति अथतस्यविशांपत्युः दशरथस्यसंबंधिनः काम्यस्यकर्मणः पुत्रकामेष्टेरंते ऽवसाने ऽग्नेः पावकात् कश्चिद्दिव्यः पुमानिति ऋत्विजां विस्मयेन
स॰१॰ सह प्रबभूव प्रादुर्बभूव तदाविर्भावात्तेषामपिविस्मयो भूदित्यर्थः ५१ तमेवपुरुषंविशिनष्टि हेमपात्रेति आद्यस्यपुंसो विष्णोरनुप्रवेशाद्धिष्ठा
९६ नाद्धेतोः तेनापिदिव्यपुरुषेणापिदुर्वहं चतुर्दशभुवनोदरस्य भगवतो हरेरतिगरीयस्त्वाद्वोढुमशक्यं हेमपात्रगतं पयसिपक्वं चरुं पायसान्नं दोर्भ्या
मादधानो वहन् अनवस्राव्यन्निरूष्मपक्व ओदनश्चरुरिति याज्ञिकाः ५२ प्राजापत्येति प्राजापत्येन प्रजापतिसंबंधिना पुरुषेणोपनीतं न तु वसि
ष्ठेन प्राजापत्यं नरं विद्धि मामिहाभ्यागतं नृपेति रामायणात् तदन्नं पायसान्नमुदन्वतोऽब्धिना विष्कृतं प्रकाशितं पयसां सारममृतं वृषा वासव इव

अथ तस्य विशांपत्युरंते काम्यस्य कर्मणः पुरुषः प्रबभूवाग्नेर्विस्मयेन सहर्त्विजां ५१ हेमपात्रगतं दोर्भ्यामादधानः प
यश्चरुं अनुप्रवेशादाद्यस्य पुंसस्तेनापि दुर्वहम् ५२ युग्मम् प्राजापत्योपनीतं तदन्नं प्रत्यग्रहीन्नृपः वृषेव पयसां सारमा
विष्कृतमुदन्वता ५३ अनेन कथिता राज्ञो गुणास्तस्यान्यदुर्लभाः प्रसूतिं चकमे तस्मिंस्त्रैलोक्यप्रभवोऽपि यत् ५४ स तेजो वैष्ण

वासवो वृत्रहा वृष इत्यमरः प्रत्यग्रहीत्स्वीचकार ५३ अनेनेति तस्य राज्ञो दशरथस्यान्यैर्दुर्लभाः असाधारणा गुणाः १ वं पत्न्योर्विभेजे चरुसंज्ञितं
अनेन कथिता व्याख्याताः यद्यस्मात् त्रयो लोकास्त्रैलोक्यं चातुर्वर्ण्यादित्वात्स्वार्थे ष्यञ् तस्य प्रभवः कारणं विष्णुरपि तस्मिन् राज्ञि प्रसूतिं चकमे कामितवान्
त्रिभुवनकारणस्यापि कारणमिति परमावधिर्गुणसमुदाय इत्यर्थः ५४ स इति स नृपः चरुसंज्ञास्य संजाता चरुसंज्ञितं वैष्णवं तेजः पत्न्योः कौशल्या ९६
कैकेय्योः द्यौश्च पृथिवी च द्यावापृथिव्यौ दिवसश्च पृथिव्यामिति चकाराद्दिवशब्दस्य द्यावादेशः तयोर्द्यावापृथिव्योः अह्नः पतिरहर्पतिः अहरादीनां पत्या
दिषु वा रेफः इत्युपसंख्यानाद्वैकल्पिको रेफस्य रेफादेशो विसर्गापवादः ॥

प्रत्यग्रमातपं बालातपमिव विभजे विभज्य ददावित्यर्थः ५५ पत्नीत्रये सति द्वयोरेव विभागे कारणमाह अर्चितेति तस्य राज्ञः कोसलस्यापत्यं स्त्री कौशल्याः वृद्धेत् कोसलाजादाञ्ज्यङितिञ्यङः यङः श्चावितिचाप् अत एव सूत्रनिर्देशात्कोसलशब्दो दंत्यसकारमध्यमः कौ पृथिव्यां सलति गच्छतिसलगतौ पचाद्यच् कुश वस्य पृषोदरादित्वात्सगुणः अर्चिता ज्येष्ठमान्या केकयवंशजा कैकेयीति प्रियाऽस्ति अतो हेतोरीश्वरो भर्त्ता नृपः सुमित्रां ताभ्यां कौसल्याकैकयीभ्यां संभावितां भागदानेन मानितामैच्छदिच्छतिस्म एवं च सामान्यं तिसृणांच भागप्रापणमिति राज्ञि उचितज्ञता कौशल्यं च लभ्यते ५६ ते इति बहुज्ञस्य सर्वज्ञस्य उचितज्ञस्ये त्यर्थः पत्युर्महीक्षितः क्षितीश्वरस्य विशेषणत्रयेण राज्ञो अनुसरणतामाह चित्तज्ञे अभिप्रायज्ञे ते कौशल्याकैकेय्यौ चरोर्यावर्द्धभागौ समभागौ तयोर्याव

द्यावापृथिव्योः प्रत्यग्रमहर्पतिरिवातपम् ५५ अर्चिता तस्य कौशल्या प्रिया केकयवंशजा अतः संभाविता ताभ्यां सुमित्रा मैच्छदीश्वरः ५६ ते बहुज्ञस्य चित्तज्ञे पत्न्यौ पत्युर्महीक्षितः चरोरर्द्धार्द्धभागाभ्यां तामयोजयतामुभे ५७ सा हि प्रणयवत्यासीत्स पत्न्योरुभयोरपि भ्रमरी वारणस्येव मदनिष्यन्दलेखयोः ५८ ताभिर्गर्भः प्रजाभूत्यै दध्रे देवांशसंभवः॥

र्द्धौ चतुर्थौ भागौ चरुएकदेशौ ताभ्यामर्द्धार्द्धभागाभ्यां पुंस्यर्द्धोऽर्द्धं समेंऽशके इत्यमरः तां सुमित्रामयोजयतां युक्तां चक्रतुः अयं च विभागो न रामायणसंवादी तत्र चरोरर्द्धं कौसल्यायै अवशिष्टार्द्धं कैकेय्यै शिष्टं पुनः सुमित्राया इत्यभिधानात् किंतु पुराणांतरसंवादो द्रष्टव्यः उक्तं च नारसिंहे ते पिंडप्राशने काले सुमित्रायै महीप तेः पिंडाभ्यामल्पमल्पं तु स्वभागिन्यै प्रयच्छत इति एवमन्यत्रापीति सति विरोधे पुराणांतरात्समाधातव्यम् ५७ न चैवं सत्यपीर्ष्यास्यादित्याह सा हीति सा सुमित्रा ह्युभयोरपि समानएकः पतिर्ययोः सपत्न्योः नित्यं सपत्न्यादिषु इति ङीप् नकारादेशश्च भ्रमरी भृंगांगना वारणस्य गजस्य मदनिष्यन्दरेख योरिव गंडद्वयगतयोरिति भावः प्रणयवती प्रेमवती आसीत् सपत्न्योरित्यत्र समासांतर्गतस्य पत्युरुपमानं वारणस्येति ५८ ताभिरिति ताभिः कौ

र॰टी॰ प्रजानां भूत्यै अभ्युदयाय देवस्य विष्णोरंशः संभवः कारणं यस्य स गर्भः सूर्यस्येमाः सौर्यः ताभिः सौरीभिः सूर्यतिष्येत्युपधायकारस्य लोपः अमृता इत्याख्या यासां
स॰९॰ ताभिर्जलप्रवाहनसाम्यात् नाडीभिरिव नाडीभिः वृष्टिविसर्जनीभिः दीधितीभिः अपां विकारो अम्मयः जलमयो गर्भ इव दधे धृतः जातावेकवचनं गर्भा दध्रिरे इत्यर्थः
१०७ अत्रयादवः तासां शतानि चत्वारिंशद्रश्मीनां वृष्टिसर्जने शतत्रयं हिमोत्सर्गे तावद्गर्भस्य सर्जने आनंदाश्च हिमेध्याश्च नूतनाः पूतना इति चतुःशतं वृष्टिवाहास्ताः सर्वा
अमृता स्त्रिय इति ५८ सममिति युगपदापन्नाः गृहीताः सत्वाः याभिस्ताः आपन्नसत्वाः गर्भिण्यः आपन्नसत्वा स्याद्गुर्विण्यंतर्वत्नी च गर्भिणीत्यमरः अत एव पां
डुरत्विषः पांडुरवर्णाः राजपत्न्यः अंतर्गताः फलारंभाः फलप्रादुर्भावाः यासां ताः सस्यानां संपद इव रेजुः बभुः ६० संप्रति तासां स्वप्नदर्शनान्याह गुप्तमिति सर्वाः

सौरीभिरिव नाडीभिरमृताख्याभिरम्मयः ५८ सममापन्नसत्वास्ता रेजुरापांडुरत्विषः अंतर्गतफलारंभाः सस्यानामिव संप
दः ६० गुप्तं ददृशुरात्मानं सर्वाः स्वप्नेषु वामनैः असिशंखगदाशार्ङ्गचक्रलांछितमूर्तिभिः ६१ हेमपक्षप्रभाजालं गगने च वितन्व
ता उह्यंते स्म सुपर्णेन वेगाकृष्टपयोमुचा ६२ बिभ्रत्या कौस्तुभन्यासं स्तनांतरविलंबिनं पर्युपास्यंत लक्ष्म्या च पद्मव्यजन
हस्तया ६३ कृताभिषेकैर्दिव्यायां त्रिस्रोतसि च सप्तभिः ब्रह्मर्षिभिः परं ब्रह्म गृणद्भिरुपतस्थिरे ६४ ॥ ॥

स्ताः स्वप्नेषु जलजः शंखः जलजासिगदाशार्ङ्गचक्रैः लांछिता मूर्तयो येषां तैर्वामनैर्ह्रस्वैः पुरुषैः गुप्तं रक्षितं आत्मानं स्वरूपं ददृशुः ६१ हेमेति
किं चेति चार्थः हेम्नः सुवर्णस्य पक्षाणां प्रभाजालं कांतिपुंजं वितन्वता विस्तारयता वेगेनाकृष्टाः पयोमुचो मेघाः येन सुपर्णेन गरुत्मता गगने ताः उह्यंते स्म
उढाः ६२ बिभ्रत्येति किं च स्तनयोरंतरे मध्ये विलंबमानं न्यस्यत इति न्यासः सपत्न्या न्यस्तं कौस्तुभमित्यर्थः बिभ्रत्या पद्ममेव व्यजनं हस्ते यस्याः तया ल
क्ष्म्या पर्युपास्यंत उपासिताः ६३ कृतेति दिविभवायां दिव्यायां त्रिस्रोतसि आकाशगंगायां कृताभिषेकैः कृतावगाहैः परं ब्रह्म वेदरहस्यं गृणद्भिः

ताभ्यइति पार्थिवोदशरथस्ताभ्यः पत्नीभ्यः आख्यातोपयोगइत्ययादानात्संचमीतथाविधानुक्तप्रकारान्स्वप्नान् श्रुत्वाप्रीतःआत्मानंजगद्गुरोर्विष्णो
रपिगुरुत्वेनहेतुनापरार्द्ध्यसर्वोत्कृष्टंमेनेहि ६५ विभक्तेतिएकःएकरूपोविष्णुः तासांराजपत्नीनांकुक्षिषुगर्भेषुप्रसन्नानांनिर्मलानामपांकुक्षिषुप्र
तिमाचंद्रःप्रतिबिंबइवअनेकधाविभक्तात्मासनउवास ६६ अथेति अथराज्ञोदशरथस्यसतीपतिव्रता अग्र्यंचासौमहिषीचाग्रमहषीकौसल्याप्रसू
तिसमयेप्रसूतिकाले औषधिर्नक्तंरात्रिसमयेतमोपहंनीतितमोपहं अपेल्केशानमसोरितिउप्रत्ययःज्योतिरिवतथातमोपहंतमोनाशकरंपुत्रंले

ताभ्यस्तथाविधान्स्वप्नान्श्रुत्वाप्रीतोहिपार्थिवः मेनेपरार्द्ध्यमात्मानंगुरुत्वेनजगद्गुरोः ६५ विभक्तात्माविभुस्तासामेकःकु
क्षिष्वनेकधा उवासप्रतिमाचंद्रःप्रसन्नानामपामिव ६६ अथाग्रमहिषीराज्ञःप्रसूतिसमयेसती पुत्रंतमोपहंलेभेनक्तंज्यो
तिरिवौषधिः ६७ रामइत्यभिरामेणवपुषातस्यनोदितः नामधेयंगुरुश्चक्रेजगत्प्रथममंगलम् ६८ रघुवंशप्रदीपेनतेनाप्रति
मतेजसा रक्षागृहगतादीपाःप्रत्यादिष्टाइवाभवन् ६९ शय्यागतेनरामेणमाताशातोदरीबभौ सैकताम्भोजबलिनाजान्हवी
मेवाप १० ॥ (वंशरत्नकृष्णा ७०॥

भेप्राप ६७ रामइति अभिरमतेऽस्मिन्निति अभिरामंमनोहरं अधिकरणार्थेघञ् तेनवपुषानोदितः प्रेरितोगुरुः पिताःद
शरथःतस्यपुत्रस्यजगतांप्रथमंमंगलसुलक्षणंरामइतिनामधेयंचक्रे अभिरामत्वमेवरामशब्दप्रवृत्तिनिमित्तमित्यर्थः ६८ रघ्विति रघुवंशस्य
प्रदीपेनप्रकाशेनाप्रतिमेनतेजसातेनरामेणरक्षागृहगताः सूतिकागृहगतादीपाःप्रत्यादिष्टाप्रतिबद्धाइवाभवत् महादीपसमीपेनाल्पादीपाःस्फु
रंतीतिभावः ६९ शय्येति शातोदरीगर्भमोचनात्कृशोदरीमाता शय्यागतेनरामेणसैकतेपुलिनेयाम्भोजबलिःपद्मोपहारस्तेनशरदिकृशाजान्ह

Digitized by Sarayu Foundation Trust, Delhi and eGangotri

कैकय्याइति केकयस्य राज्ञोऽपत्यं स्त्री कैकेयी तस्यापत्यमित्यण् लिङ्गेन केकयमित्रयुमहलयानां यादेरियइतीयादेशः तस्याः भरतो नाम शीलवान् तनयोज
ज्ञे जातः यस्तनयः प्रश्रयो विनयः श्रियमिव जनयित्रीं मातरमलंचक्रे ७१ सुताविति सुमित्रा लक्ष्मणशत्रुघ्नौ नाम यमौ युग्मजातौ सुतौ यमोद्वन्द्व धरे ध्याङ्के
संयमे यमजे पि चेति विश्वः सुता वात्मजौ पुत्रौ वितमरः सम्यगाराधिता स्वभ्यस्ता विद्याप्रबोध विनयौ तत्त्वज्ञानेन्द्रियजयाविव सुषुवे ७२ निर्दोषमिति सं
र्वं जगद्भूलोको निर्दोषं दुर्भिक्षादिदोषरहितमाविष्कृतगुणे प्रकटीकृतारोग्यादिगुणं चाभवत् अत्रोपमेक्ष्यते गां भुवं गतमवतीर्णं पुरुषोत्तमं विष्णुं स्वर्गो यन्व

कैकेय्यास्तनयो जज्ञे भरतो नाम शीलवान् जनयित्रीमलंचक्रे यः प्रश्रय इव श्रियम् ७१ सुतौ लक्ष्मणशत्रुघ्नौ सुमित्रा सुषु
वे यमौ सम्यगाराधिता विद्या प्रबोधविनयाविव ७२ निर्दोषमभवत्सर्वमाविष्कृतगुणं जगत् अन्वगादिव हि स्वर्गो गां गतं पुरुषो
त्तमम् ७३ तस्योदये चतुर्मूर्तेः पौलस्त्यचकितेश्वराः विरजस्कैर्नभस्वद्भिर्दिश उच्छ्वसिता इव ७४ कृशानुरपधूमत्वात्प्रसन्नत्वात्प्रभा
करः रक्षोविप्रकृतावास्तामपविद्धशुचाविव ७५ दशाननकिरीटेभ्यस्तत्क्षणं राक्षसश्रियः मणिव्याजेन पर्यस्ताः पृथिव्यामश्रुबिं दवः ॥७६॥

गादिव स्वर्गो हि गुणवान्निर्दोषश्चेत्यागमः तेन तुल्यमभूदित्यर्थः ७३ तस्येति चतुर्मूर्तेः रामादिरूपेण चतूरूपस्य समः तस्य हरेरुदये सति पौलस्त्याद्रावणाच्चकि
ताः भीताः ईश्वराः नाथाः इन्द्रादयो यासां ता दिशश्च तस्य विरजस्कैरपधूलिभिः नभस्वद्भिः वायुभिः मिषेणोच्छ्वसिता इव सुखेन श्वसिता श्वसेः कर्तरि क्तः स्वनाथशरण
लाभसंतुष्टानां दिशामुच्छ्वासवाता इव ता बभुरित्यर्थः चतुर्दिगीश्वरस्य लोकश्चतुर्भिः चतुष्टयं प्रयोजनमिति भावः ७४ कृशानुरिति रक्षसा रावणेन वि
प्रकृतौ पीडितौ विसर्पौ कृशानुरग्निः भास्करः सूर्यश्च यथासंख्यमपधूमत्वात्प्रसन्नत्वाच्चापविद्धशुचौ निरस्तदुःखाविवास्तामभवतां ७५ दशानने
ति तत्क्षणं तस्मिन्क्षणे रामोत्पत्तिसमये राक्षसश्रियः अश्रुबिंदवः दशाननकिरीटेभ्यः मणीनां व्याजेन मिषेण पृथिव्यां पर्यस्ताः पतिता रामोद

येसतितद्धयस्य रावणस्य किरीटमणिभ्रंशः लक्षणं दुर्निमित्तमभूदित्यर्थः ७६॥ १०८

पुत्रेति पुत्रिणो जातपुत्रस्य तस्य दशरथस्य पुत्रस्य जन्मनि प्रवेश्यानां प्रवेशयितव्यानां वादनीयानामित्यर्थः तूर्याणां वाद्यानां आरंभमुपक्रमं प्रथमं दिवि दे-
वदुंदुभयः चक्रुः साक्षात्पितुरीश्वरस्यादपि देवा अधिकं प्रहृष्टा इत्यर्थः ७७ संतानकेति अस्य राज्ञो भवने संतानकानां कल्पवृक्षकुसुमानां विकारः सं-
तानकमयी वृष्टिश्च पेतुषी पपात क्वसुश्चेति क्वसुप्रत्ययः उगितश्चेति ङीप् सा वृष्टिरेव सतः पुत्रजन्मन्यावश्यकाय मंगलोपचारास्तेषामादिरच-
ना प्रथमक्रियाभवत् ७८ कुमारा इति कृताः संस्कारा जातकर्मादयो येषां ते धात्रीणां उपमातॄणां स्तन्यानि पयांसि पिबंतीति तथोक्तास्ते
कुमाराः अग्रजेन ज्येष्ठेनावस्थितेन पितुरानंदेन समं ववृधिरे कुमारवृद्ध्या पिता महानानंदमवापेत्यर्थः कुमारजन्मनः प्रागेव जातत्वादग्रज-

पुत्रजन्मप्रवेश्यानां तूर्याणां तस्य पुत्रिणः आरंभं प्रथमं चक्रुर्देवदुंदुभयो दिवि ७७ संतानकमयी वृष्टिर्भवने तस्य पेतुषी स-
न्मंगलोपचाराणां सैवादिरचनाभवत् ७८ कुमाराः कृतसंस्कारास्ते धात्रीस्तन्यपायिनः आनंदेनाग्रजेनेव समं ववृधिरे पितुः ७९
स्वाभाविकं विनीतत्वं तेषां विनयकर्मणा मुमूर्छ सहजं तेजो हविषेव हविर्भुजाम् ८० परस्पराविरुद्धास्ते तद्रघोरनघं कुलम् अल-
मुद्योतयामासुर्देवारण्यमिवर्तवः ८१ ॥ ९ त्वोक्तिरानंदस्य ७८ स्वाभाविकमिति तेषां कुमाराणां संबंधि स्वाभाविकं सहजं विनीतत्वं विनयकर्म-
णा शिक्षया हविर्भुजामग्नीनां सहजं तेजो हविषा आज्यादिकेनेव मुमूर्छ वृद्धे निसर्गसंस्काराभ्यां विनीता इत्यर्थः ८० परस्परेति परस्परमविरुद्धाः अविद्विष्टाः सौ-
भ्रात्रगुणवंत इत्यर्थः ते कुमाराः तत्प्रसिद्धं अनघं निष्पापं रघोः कुलं ऋतवो वसंतादयो देवारण्यं नंदनमिव सहजविरोधिनामपि सत्त्वानां सहावस्थानसंभावनार्थं
देवविशेषणं अलमत्यंतमुद्योतयामासुः सौभ्रात्रवंतः कुलभूषणवंत इति भावः ८१

र॰टी॰ समानइति शोभनाःस्निग्धाःभ्रातरोयेषांतेसुभ्रातरः नद्युतश्चेतिकपु नभवति-वंदितेभ्रातुरितिनिषेधात् तेषांभावःसौभ्रात्रंयुवादित्वादण्-तस्मिन्समा
स॰१० नेचतुर्णांतुल्येपियथोभौरामलक्ष्मणौप्रीत्याद्वंद्वंद्वौद्वौसाहचर्येणाभिव्यक्तौ द्वंद्वेरहस्यमर्यादेतिनिपातः केचित्कस्यचित्स्नेहेनातिरिच्यतइतिभावः ८२
१०८ तेषामिति तेषांचतुर्णांमध्येद्वयोःरामलक्ष्मणयोर्भरतशत्रुघ्नयोश्चेत्यर्थः वायुविभावस्वोर्वन्हिवातयोरिवचंद्रसमुद्रयोरिवऐक्यमैकमत्यंकदाचनन
विभिदे एककार्यत्वंसमानसुखदुःखत्वंचक्रमाद्उपमाद्वयाल्लभ्य तेसहजःसहकारीहिवन्हेर्वायुःचंद्रवृद्धौवर्द्धतेसिंधुःतत्क्षयेक्षीयतइति ८३ तइति
प्रजानाथास्तेकुमाराःतेजसाप्रभावेनप्रश्रयेणविनयेनचनिदाघांतेग्रीष्मांतेश्यामान्यभ्राणियेषांतेश्यामाभ्राः नातिशीतोष्णाइत्यर्थःदिवसाइवप्रजा

समानेपिहिसौभ्रात्रेयथोभौरामलक्ष्मणौ तथाभरतशत्रुघ्नौप्रीत्याद्वंद्वंबभूवतुः ८२ तेषांद्वयोर्द्वयोरैक्यंविभिदेनकदाचन य
थावायुविभावस्वोर्यथाचंद्रसमुद्रयोः ८३ तेप्रजानांप्रजानाथास्तेजसाप्रश्रयेणच मनोजह्रुर्निदाघांतेश्यामाभ्रादिवसाइव ८४
सचतुर्धाबभौव्यस्तःप्रसवःपृथिवीपतेः धर्मार्थकाममोक्षाणामवतारइवांगवान् ८५ गुणैराराधयामासुस्तेगुरुंगुरुवत्सलाः त
मेवचतुरंतेशंरत्नैरिवमहार्णवाः ८६ सुरगजइवदंतैर्भग्नदैत्यासिधारैर्नयइवपणबंधव्यक्तयोगैरुपायैः॥ ॥ ॥

नांमनोजह्रुः ८४ सइति चतुर्धासंख्यायाविधार्थइत्यनेनधाप्रत्ययः व्यस्तोविभक्तःपृथिवीपतेःदशरथस्यप्रसवःसंतानः चतुर्धाअंगवान्मूर्तिमान्
धर्मार्थकाममोक्षाणामवतारइवाबभौ ८५ गुणैरिति गुरुवत्सलाःपितृभक्ताःतेकुमाराःगुणैर्विनयादिभिस्तंगुरुंपितरंचतुरंतानांदिगंतानामीशंचरं १०८
तेशं-तद्धितार्थेत्यादिनाउत्तरपदसमासः तंदशरथमेवमहार्णवाश्चत्वारोरत्नैरिवाराधयामासुः ८६ सुरगजइति भग्नादैत्यानामसिधारायैस्तैश्चतुर्भि
र्दंतैःसुरगजऐरावतइवपणबंधेनफलसिद्ध्याव्यक्तयोगैरनुमितप्रयोगैरुपायैश्चतुर्भिःसामादिभिः नयोनीतिरिवयुगइवदीर्घास्तैर्युगदीर्घैश्चतुर्भि

भुजैर्हरिर्विष्णुरिवतद्दीपैर्हरिसंबंधिभिरंशभूतैश्चतुर्भिस्तैः पुत्रैः अवनिपतीनांपतिः राजराजोदशरथश्चकासेविदिद्युते ८७॥ ॥ इतिश्रीपदवाक्य
प्रमाणपारावारीणश्रीमहामहोपाध्यायकोलाचलमल्लिनाथ सूरिविरचितायांरघुवंशदीपिकायांसंजीविनीसमाख्यायांदशमःसर्गः १०॥ ॥
श्रीगणेशायनमः रामचंद्रचरणारविंदयोरंतरंगचरभृं गलीलया तत्रसंतिहिरसाश्चतुर्विधास्तान्यथारुचिसदैवनिर्विशन् १ कौशिकेनेतिकौशि
केनकुशिकापत्येनविश्वामित्रेणएत्यसः क्षितीश्वरोदशरथः अध्वरविघातशांतयेयज्ञविघ्नध्वंसायकाकपक्षधरंबालकोचितशिखाधरं बाला

हरिरिवयुगदीर्घैर्दोर्भिरंशैस्तदीयैः पतिरवनिपतीनांतैश्चकासेचतुर्भिः ८७॥ इतिश्रीरघुवंशेमहाकाव्येकालिदास
कृतौरामावतारवर्णनंनामदशमःसर्गः १०॥ ॥ श्रीगणेशायनमः कौशिकेनसकिलक्षितीश्वरोराममध्वरविघा
तशान्तये काकपक्षधरमेत्ययाचिततेजसांहिनवयः समीक्ष्यते १ कृच्छ्रलब्धमपिमेदिनीपतिस्तंदिदेशमुनयेसल
क्ष्मणम् अप्यसुप्रणयिनांरघोः कुलेनव्यहन्यतकदाचिदर्थिता २॥ १९ नांतुशिखाप्रोक्ताकाकपक्षंशिखंडकइतिहलायुधः

तंरामंयाचितः प्रार्थितःखलु याचेर्हिकर्मकत्वादप्रधानेक्तः अप्रधानेदुहादीनामितिवचनात् नायंबालाधिकारइत्याशंक्याह तेजसांतेजस्विनांवयो
बाल्या नसमीक्ष्यतेहि अप्रयोजकमित्यर्थः अत्रसर्गेरथोद्धतावृत्तं उक्तंच रान्नराविहरथोद्धतालगाविति १ कृच्छ्रलब्धमिति सराजाकृच्छ्रलब्ध
मपिसलक्ष्मणंराममुनयेदिदेश अतिसृष्टवान् तथाहि असुप्रणयिनामपिप्राणार्थिनामपि अर्थितायाच्ञा रघोः कुलेकदाचिदपिनव्यहन्यत
नविहतानविफलीकृतेत्यर्थः येरर्थिभ्यः प्राणा अपिसमर्प्यन्तेतेषांपुत्रादित्यागोनविस्मयावहइतिभावः २॥ ॥

यावदिति पार्थिवः पृथिवीश्वरः तयोः रामलक्ष्मणयोः निष्क्रमाय निर्गमाय पुरमार्गसत्क्रियां धूलीसंमार्जनं गंधोदकसेचन पुष्पोपहारसंस्कारं यावदादिशति आज्ञापयति तावन्मरुत्सखैर्वायुसखैः अनेन धूलीसंमार्जनं गम्यते सांद्रपुष्पजलवर्षिभिः पुष्पसहितजलवर्षिभिर्घनैः मार्गसत्क्रियां आश्रुविदधे विहिताः एतेन देवकार्यप्रवृत्तयोः देवानुकूल्यं सूचितं विज्ञेयं ३ ताविति· निदेशकरणोद्यतौ पित्राज्ञाकरणोद्युक्तौ धन्विनौ धनुष्मंतौ तौ कुमारौ पितुश्चरणयोर्निपततुः प्रणताविसर्थः भूपतेरपि वाष्पविंदवः प्रवत्स्यतोः प्रवासं करिष्यतोः अत एव नम्रयोः प्रणतयोः तमिकं पीतिरप्रत्ययः तयोरुपरि

यावदादिशति पार्थिवस्तयोर्निर्गमाय पुरमार्गसत्क्रियाम् तावदाश्रुविदधे मरुत्सखैः सांद्रपुष्पजलवर्षिभिर्घनैः ३ तौ निदेशकरणोद्यतौ पितुर्धन्विनौ चरणयोर्निपेततुः भूपतेरपि तयोः प्रवत्स्यतोर्नम्रयोरुपरि वाष्पविंदवः ४ तौ पितुर्नयनजेन वारिणा किंचिदुक्षितशिखंडकावुभौ धन्विनौ तमृषिमन्वगच्छतां पौरदृष्टिकृतमार्गतोरणौ ५ लक्ष्मणानुचरमेव राघवं नेतुमैच्छदृषिरित्यसौ नृपः आशिषं प्रयुयुजे न वाहिनीं सा हि रक्षणविधौ तयोः क्षमा ६ मातृवर्गचरणस्पृशौ मुनेस्तौ प्रपद्य पदवीं महौजसः॥ ९ निपेततुः पतितौ ४ ताविति· पितुर्नयनजेन वारिणा किंचिदुक्षितशिखंडकौ ईषत्सिक्तचूडौ· शिखा चूडा शिखंडः स्यादित्यमरः शेषाद्विभाषेति कप्रत्ययः धन्विनौ तावुभौ पौरदृष्टिभिः कृतानि मार्गतोरणानि कुवलयानि संपाद्यानि ययोस्तौ तथोक्तौ संघशो निरीक्ष्यमाणावित्यर्थः तमृषिमन्वगच्छताम् ५ लक्ष्मणेति· ऋषिर्लक्ष्मणानुचरमेव लक्ष्मणमात्रानुचरं तं राघवं नेतुमैच्छदिति हेतोः असौ नृपः आशिषं प्रयुयुजे प्रयुक्तवान् वाहिनीं सेनां न प्रयुयुजे न प्रेषितवान्· हि यस्मात्सा आशीरेव तयोः कुमारयोः रक्षणविधौ क्षमा शक्ता ६ मातृवर्गेति· मातृवर्गस्य चरणान्स्पृशत इति मातृवर्गचरणस्पृशौ कृतमातृवर्गनमस्कारावित्यर्थः स्पृशोनुदके क्विन्निति क्विन्प्रत्ययः तौ महौजसो मुनेः

पदवीं प्रपद्य महौजसौ भास्करस्य गतिवशान्मेषादिराशिसंक्रान्त्यनुसारात्प्रवर्तिनौ मधुमाधवाविव चैत्रवैशाखाविव रेजतुः फलंच समानानामिति वै
कल्पिकावेतावभ्यासलोपौ · स्याच्चैत्रे चैत्रिको मधुः वैशाखे माधवो राधः इति चामरः ७ वीचीति वीचिलोलभुजयोः चंचलतरंगवाहोः इदं विशेष
णं नदोपमानसिद्ध्यर्थं वेदितव्यं तयोश्च चलं चपलमपि गतं गतिः शैशवाद्धेतोरशोभत · किमिव · तोयदागमे वर्षासमये उज्झत्सुदकमिश्रुद्धः भि
नत्ति कूलमिति भिद्यः भिद्योद्ध्यौ नद इति क्यबन्तौ निपातौ उह्यभिद्ययोर्नदविशेषयोर्नामधेयसदृशं नामानुरूपं विचेष्टितमिव उदकोज्झनकूलभेद
नरूपव्यापार इव समयोत्पन्नं चापलमप्यशोभत इति भावः ८ ताविति · मणिकुट्टिमोचितौ मणिबद्धभूमिसंचारोचितौ मुनिप्रदिष्टयोः कौशिकेनोपदि

रेजतुर्गतिवशात्प्रवर्तिनौ भास्करस्य मधुमाधवाविव ७ वीचिलोलभुजयोस्तयोर्गतं शैशवाच्चपलमप्यशोभत तोयदाग
म इवोह्यभिद्ययोर्नामधेयसदृशं विचेष्टितम् ८ तौ बलातिबलयोः प्रभावतो विद्ययोः पथि मुनिप्रदिष्टयोः मम्लतुर्न मणि
कुट्टिमोचितौ मातृपार्श्वपरिवर्तिनाविव ९ पूर्ववृत्तकथितैः पुराविदः सानुजः पितृसखस्य राघवः उह्यमान इव वाहनोचितः
पादचारमपि न व्यभावयत् १० तौ सरांसि रसवद्भिरम्बुभिः कूजितैः श्रुतिसुखैः पतत्रिणः ॥ ९ योः बलातिबलयोः विद्ययोर्मन्त्रयोः प्रभा

वतः सामर्थ्यान्मातृपार्श्ववर्तिनौ मातृसमीपप्रवर्तिनाविव पथि न मम्लतुः न म्लानावित्यर्थः अत्र रामायणश्लोकः क्षुत्पिपासा न ते राम भविष्येते नरोत्तम
बलामतिबलां चैव पठतः पथि राघव ९ पूर्वेति · वाहनोचितः सानुजो राघवः पुराविदः पूर्ववृत्ताभिज्ञस्य पितृसखस्य मुनेः पूर्ववृत्तकथितैः पुरावृत्तक
थाभिरुह्यमान इव वाहनप्राप्यमाण इव · वहेर्धातोः कर्मणि शानच् · पादचारमपि न व्यभावयत् न ज्ञातवान् · उह्यमान इत्यत्र दीर्घादिरपपाठः
दीर्घप्राप्त्यभावात् १० ताविति · तौ राघवौ कर्मभूतौ सरांसि कर्तॄणि रसवद्भिर्मधुरैरम्बुभिः सिषेविरे · पतत्रिणः पक्षिणः सुखयन्तीति सुखानि पचाद्य

श्रुतीनांसुखानितैः कूजितैः वायवः सुरभिपुष्परेणुभिर्जलदाः छायया च सिषेविरे इतिसर्वत्रसंबध्यते ११ नेति तप एषामस्तीतितपस्विनः तपः सह
स्राभ्यां विनिरिति विनिश्चयः लघुना इष्टेनः त्रिष्विष्टेल्पेलघुरित्यमरः तयोरुभयोः कर्मभूतयोर्दर्शनेन यथा प्रीतिं आपुः तथा कमलशोभिनामंभसां
दर्शनेन चापुः परिश्रमच्छिदां फलभृतां शाखिनां दर्शनेन च नापुः १२ स्थाण्विति॰ स आत्तकार्मुकः दशरथस्यापत्यं पुमान् दाशरथी रामः स्थाणुर्हरः स्थाणुः
कीले हरे स्थिरे इति विश्वः तेन दग्धवपुषो मदनस्य तपोवनं प्राप्य चारुणा विग्रहेण कायेन विग्रहः समरे काये इति विश्वः प्रतिनिधिः प्रकृतिसदृशः अभवत्
कर्मणा न पुनर्देहेन मदनः सुन्दर इति भावः १३ ताविति॰ अत्र रामायणवचनं अगस्त्यः परमः क्रुद्धस्ताडकामभिशप्तवान् पुरुषादी महायक्षी विकृता

वायवः सुरभिपुष्परेणुभिश्छायया च जलदाः सिषेविरे ११ नांभसां कमलशोभिनां तथा शाखिनां न च परिश्रमच्छि
दां दर्शनेन लघुना यथा तयोः प्रीतिमापुरुभयोस्तपस्विनः १२ स्थाणुदग्धवपुषस्तपोवनं प्राप्य दाशरथिरात्तकार्मुकः वि
ग्रहेण मदनस्य चारुणा सोऽभवत्प्रतिनिधिर्न कर्मणा १३ तौ सुकेतुसुतया खिलीकृते कौशिकाद्विदितशापया पथि निन्यतुः स्थ
लनिवेशिताटनी लीलयैव धनुषी अधिज्यताम् १४ ज्यानिनादमभिगृह्णती तयोः प्रादुरास बहुलक्षपाछविः ॥ ॥

ताविति ताननी॰ इदं रूपमपहाय दारुणं रूपमस्तुते इति नंदेतदाह॰ विदितशापयेति॰ कौशिकादाख्यातुः आख्यातोपयोग इत्यपादानात्पंचमी॰ वि
दितशापया सुकेतुसुतया ताडकया खिलीकृते पथि॰ खिलमप्रहतस्थानं इति हलायुधः तौ रामलक्ष्मणौ स्थले निवेशिते अटनी धनुष्कोटी याभ्यां
तौ तथोक्तौ॰ कोटिरस्याटनिरित्यमरः लीलयैव धनुषी अधिकृते ज्ये मौर्व्यौ ययोस्ते अधिज्ये॰ ज्या मौर्वी मातृभूमिषु इति विश्वः तयोर्भावस्तत्तामधिज्यतां नि १११
न्यतुः नीतवंतौ॰ नयतिर्द्विकर्मा १४ ज्येति॰ अथ तयोर्ज्यानिनादं अभिगृह्णती जानती शृण्वतीत्यर्थः बहुलक्षपाछविः कृष्णपक्षरात्रिवर्णा बहुलाकृष्ण॰

पक्षे चपलीति च बहुलागवीति विश्वः चले कपाले एव कुंडले यस्याः सा तथोक्ता: ताडका निविडा सांद्रा वलाकिनी बलाकावती वलाका बकपंक्तिः व्रीह्यादि
भ्यश्चेतीनिः कालिकेव घनावलीव कालिकायोनिर्नीभेदे कार्ष्ण्ये गौर्यां घनावलाविति विश्वः प्रादुरास प्रादुर्बभूव आसेतितिङ्‌ तं प्रतिमार्गवृक्षाः यथासास्य
कमव्ययम् १५ तीव्रेति तीव्रवेगेन धूताः कंपिताः तथोक्ता प्रेतचीवराणि वसा प्रेतचीवरवसाः तया प्रेतचीवरवसा वसनेराच्छादनार्थात् क्विप् स्वनेन सिंहनादे
न उग्रया तया ताडकया पितृकानने श्मशाने उत्था उत्पन्ना आतश्चोपसर्ग इति उन्पूर्वात् तिष्ठतेः कर्तरि कप्रत्ययः तया वात्ययेव वातसमूहेनेव पाशादिभ्यो य
इति भरताग्रजो रामोऽभ्यभावि अभिभूतः कर्मणि लुङ् तीव्रवेगेत्यादि विशेषणानि वात्यायामपि योज्यानि १६ उद्यतेति उद्यता उन्नमिता एका भुज एव यष्टि

ताडका चलकपालकुंडला कालिकेव निविडा बलाकिनी १५ तीव्रवेगधुतमार्गवृक्षया प्रेतचीवरवसा स्वनोग्रया अभ्यभा
वि भरताग्रजस्तया वात्ययेव पितृकाननोत्थया १६ उद्यतैकभुजयष्टिमायतीं श्रोणिलंबिपुरुषांत्रमेखलाम् तां विलोक्य व
नितावधे घृणां पत्रिणा सह मुमोच राघवः १७ यच्चकार विवरं शिलाघने ताडकोरसि स रामसायकः अप्रविष्टविषयस्य र
क्षसां द्वारतामगमदंतकस्य तत् १८॥

र्यस्यास्तां आयतीं आयतीति इणो धातोः शतरि उगितश्चेति ङीप् श्रोणिलंबिनी पुरुषाणामंत्राण्येव मेख
ला यस्या स्तां इति विशेषणद्वयेनापि आततायित्वं सूचितं अत एव तां विलोक्य राघवो वनितावधे घृणां जुगुप्सां करुणां वा जुगुप्साकरुणा घृणे इत्यमरः
पत्रिणा इषुणा सह पत्री रोप इषुर्द्वयोरित्यमरः मुमोच मुक्तवान् आततायिवधे मनुः आततायिनमायांतं हन्यादेवाविचारयन् नाततायिवधे दोषो हं
तुर्भवति कश्चनेति १७ यदिति स रामसायकः शिलाइव घनं सान्द्रं तस्मिन् शिलाघने ताडकोरसि यद्विवरं रंध्रं चकार तद्विवरं रक्षसां अप्रविष्टविषय
स्य अप्रविष्टरक्षोदेशस्येत्यर्थः सापेक्षत्वेपि गमकत्वात्समासः विषयः स्यादिंद्रियार्थे देशे जनपदेऽपि चेति विश्वः अंतकस्य यमस्य द्वारतां अगमत् इयं प्रथ
मा रक्षोमृतिरिति भावः १८॥

र॰टी॰ वाणेति॰ बाणभिन्नहृदयानिपेतुषीनिपतिनासती॰ क्वसुश्चेतिक्वसुप्रत्ययः उगितश्चेतिङीप्॰ साकेवलमेकांकेवलमितित्रिलिंगेत्येकक्तत्स्वयो
स॰११ रित्यमरःस्वकाननभुवंनव्यकंपयत्किंतुविष्टपत्रयस्यलोकत्रयस्यपराजयेनस्थिरांरावणश्रियमपिव्यकंपयत्ताडकावधश्रवणेनरावणस्यापिभ
११२ यमुत्पन्नमितिभावः १९ अत्रताडकायाः अभिसारिकायाः समाधिरभिधीयते रामेति॰ सानिशासुचरतीतिनिशाचरीराक्षसी अभिसारिका
चदुःसहेनसोढुमशक्येनरामएवमन्मथः अन्यत्राभिरामोमन्मथस्तस्यशरेणहृदयेउरसिमनसिच हृदयंमनउरसोरितिविश्वः ताडिताविद्धा
गंधवत्दुर्गंधियद्रुधिरं असृक्तदेवचंदनंतेनोक्षितालिप्ता अपरत्रगंधवतीसुगंधिनीयेरुधिरचन्दनेकुंकुमचन्दनेताभ्यामुक्षिता रुधिरंकुं

बाणभिन्नहृदयानिपेतुषीसास्वकाननभुवंनकेवलं विष्टपत्रयपराजयस्थिरांरावणश्रियमपिव्यकंपयत् १९ राममन्मथशरेणताडितादुःसहेनहृदयेनिशाचरीगंधवद्रुधिरचन्दनोक्षिताजीवितेशवसतिंजगामसा २० नैर्ऋतघ्नमथमंत्रवन्मुनेःप्रापदस्त्रमवदानतोषितात् ज्योतिरिंधननिपातिभास्करात्सूर्यकांतइवताडकान्तकः २१ वामनाश्रमपदंततःपरंपावनंश्रुतमृषेरुपेयिवान् उन्मनाः प्रथमजन्मचेष्टितान्यस्मरन्नपिबभूवराघवः २२॥ ९कुमाऌजोरित्युभयत्रापिवि

श्वः जीवितेशस्यांतकस्यप्राणेश्वरस्यवसतिंजगाम २० नैर्ऋतेति॰ अथानंतरंताडकांतकोरामःअवदानंपराक्रमः पराक्रमोऽवदानेस्यादितिभा
गुरिः तेनतोषितान्मुनेर्नैर्ऋतान्राक्षसान्हंतीतिनैर्ऋतघ्नं अमनुष्यकर्तृकेचेतिठक्॰ मंत्रवन्मंत्रयुक्तं अस्त्रंसूर्यकांतोमणिविशेषःभास्करादीन्धना ११२
निनिपातयतीतिइंधननिपातिकाष्ठदाहिज्योतिरिवप्रापत्॰ प्राप्तवान् २१ वामनेति॰ ततःपरंराघवःऋषेःकौशिकादाख्यातःश्रुतंपावनंशोधनं
वामनस्यस्वपूर्वावतारविशेषस्यआश्रमपदमुपेयिवान्उपगतःसन् उपेयिवाननाश्वाननूचानश्चेतिनिपातः प्रथमजन्मचेष्टितानिरामवामनयो

श्रीगणेशायनमः ॥ वन्दामहे महोद्दंडदोर्दंडौ रघुनंदनौ तेजोगलितमार्तंडमंडलौ लोकमंडलौ १ निर्विष्टेति स्नेहयंति प्रीणयंति पुरुषमिति स्नेहाः पचाद्यच् स्निह्यंति पुरुषा येषु इति स्नेहाः अधिकरणार्थे घञ् विषयाः शब्दादयः त एव स्नेहा निर्विष्टाः भुक्ताः विषयाः स्नेहाः येन स तथोक्तः निर्वेशो भृतिभोगयोरिति विश्वः दशा जीवनावस्था तस्या अंतं बाधकमुपेयिवान् स दशरथः उषसि प्रदीपार्चिरिव दीपज्वालेव आसन्नं निर्वाणं मोक्षो यस्य स तथोक्तः आसीत् अर्चिष्यक्षे तु विषयो देशः आश्रयो भाजनमिति यावत् विषयः स्यादिंद्रियार्थे देशे जनपदेपि चेति विश्वः स्नेह स तैलादिः स्नेह स तैलादिको रस द्रवे स्यात् सौहृदेपि चेति विश्वः दशा वर्त्यावस्थायामिति विश्वः निर्वाणं विनाशं निर्वाणं निर्वृतौ मोक्षे विनाशे गजमज्जने इति यादवः १ तमि

श्रीगणेशायनमः निर्विष्टविषयस्नेहः स दशांतमुपेयिवान् आसीदासन्ननिर्वाणः प्रदीपार्चिरिवोषसि १ तं कर्णमूलमागत्य रामे श्रीर्न्यस्यतामिति कैकेयीशंकयेवाह पलितच्छद्मना जरा २ सा पौरान्पौरकांतस्य रामस्याभ्युदयश्रुतिः प्रत्येकं ल्हादयांचक्रे कुल्येवोद्यानपादपान् ३ तस्याभिषेकसंभारं कल्पितं क्रूरनिश्चया दूषयामास कैकेयी शोकोष्णैः पार्थिवाश्रुभिः ४ सा किलाश्वासिता चंडी भर्त्रा तत्संश्रुतौ वरौ ॥ १ तमिति जरा कैकेयीशंकयेव पलितस्य केशादिशौक्ल्यस्य छद्मना मिषेण पलितं जरसा शौक्ल्यं केशादौ इत्यमरः कर्णमूलं कर्णोपकंठमागत्य रामे श्रीः राजलक्ष्मीर्न्यस्यतां निधीयतामिति तं आह वृद्धोहमिति विचार्य रामस्य यौवराज्याभिषेकं चिकीर्षितुं चकांक्षेत्यर्थः २ सेति सा पौरकांतस्य रामस्याभ्युदयश्रुतिः अभिषेकवार्त्ता कुल्येव अल्पजलनदी इव कृत्रिमा नदी वकुल्या कुल्याकृत्रिमा सरिदित्यमरः उद्यानपादपानिव पौरान्प्रत्येकं ल्हादयांचक्रे ३ तस्येति क्रूरनिश्चया कैकेयी तस्य रामस्य कल्पितं संभृतं अभिषेकस्य संभारं उपकरणं शोकोष्णैः पार्थिवाश्रुभिर्दूषयामास स्वयं दुःखमूलेन राजशोकेन ववंधेत्यर्थः ४ सेति चंडी अतिकोपना चंडस्त्वत्यंतकोपनः इत्यमरः

र॰टी॰ सरणस्ययोरितिविश्वः अम्बरे गृध्रपक्षपवनेनेरिताः कंपिताध्वजा यस्य तं ध्वजः रक्षसां दुर्निमित्तसूचनमेतत् तदुक्तं शकुनार्णवे: आसन्नमृत्योर्निकटे चरंति
स॰११ गृध्रादयो मूर्ध्नि गृहोर्ध्वभागे इति· रक्षसां बलं सेनाम् अपश्यत् २६ तत्रेति· स रामः तत्र रक्षसां बले यौ मखद्विषाम् अधिपती तौ सुबाहुमारीचौ शरव्यं लक्ष्यम् अकरोत्·
११३ विध्यं लक्ष्यं शरव्यं चेति हलायुधः इतरान् नाकरोत् तथा हि महोरगविसर्पिविक्रमो गरुत्मान् राजिलेषु जलव्यालेषु प्रवर्तते किं न प्रवर्तत इत्यर्थः अलगर्दो जल
लव्यालः समौ राजिलडुंडुभौ इत्यमरः २७ स इति· अस्त्रकोविदो ऽस्त्रज्ञो रामः उग्रजवं उग्रः क्षत्रियतः शूद्रायां सूनावुक्त इति रुद्रयोः उग्रावचाच्छिके कयोरिति वि
श्वः उत्कटजवं वायुदेवतं वायुर्देवता ऽस्य तद्वायव्यम् अस्त्रं धनुषि संदधे संहितवान्· कर्तरि लिट्· तेनास्त्रेण शैल इव गुरुः तमपि ताडकासुतं मारीचं पांडुपत्रमि

रक्षसां बलमपश्यदंबरे गृध्रपक्षपवनेरितध्वजम् २६ तत्र यावधिपती मखद्विषां तौ शरव्यमकरोत्स नेतरान् किं महोरगविसर्पि
विक्रमो राजिलेषु गरुडः प्रवर्तते २७ सो ऽस्त्रमुग्रजवमस्त्रकोविदः संदधे धनुषि वायुदैवतं तेन शैलगुरुमप्यपातयत् पांडुपत्रमि
व ताडकासुतम् २८ यः सुबाहुरिति राक्षसो ऽपरस्तत्र तत्र विससर्प मायया तं क्षुरप्रशकलीकृतं कृती पत्त्रिणां व्यभजदाश्रमाद्ब
हिः २९ इत्यपास्तमखविघ्नयोस्तयोः सांयुगीनमभिनंद्य विक्रमं ऋत्विजः कुलपतेर्यथाक्रमं वाग्यतस्य निरवर्तयन् क्रियाः ३०

वपरिणतपर्णमिवेत्यर्थः अपातयत् पातितवान् २८ य इति· सुबाहुः यो ऽपरो राक्षसः तत्र तत्र मायया शांबरविद्यया विससर्प संचचार क्षुरप्रैः शकलीकृतं
खंडीकृतं तं सुबाहुं कृती कुशलो रामः कृती च कुशलः समा विति अमरः आश्रमाद्बहिः पत्त्रिणां पक्षिणां· पत्त्रिणौ शरपक्षिणौ इत्यमरः व्यभजत् विभज्य
दत्तवानित्यर्थः २९ इति· इति अपास्तमखविघ्नयो राघवयोः संयुगे साधुः सांयुगीनः प्रतिजनादिभ्यः खञ् इति खञ् प्रत्ययः सांयुगीनो रणे साधुरित्यमरः ११३
तं विक्रमम् अभिनंद्य ऋत्विजो याज्ञिकाः वाचि यतो वाग्यतो मौनी तस्य कुलपतेः मुनिकुलेश्वरस्य क्रतुक्रिया यथाक्रमं निरवर्तयन् निष्पादितवंतः ३० ॥

ताविति। अवभृथे दीक्षांते आप्लुतः स्नातो मुनिः दीक्षांतो ऽवभृथो यज्ञ इत्यमरः प्रणामेन चलकाकपक्षकौ चंचलचूडौ तौ भ्रातरौ आशिषामनुपदं अन्व
क् दर्भपाटिततलेन कुशाग्रक्षतांतः प्रदेशेन पवित्रेणेत्यर्थः पाणिना समस्पृशत् संस्पृष्टवान् संतोषादिति भावः ३१ तमिति संभृतक्रतुः संकल्पितसंभ
रः मिथिलायां भवो मैथिलो जनकः तं विश्वामित्रं न्यमंत्रयत आहूतवान् वशी स मुनिः मिथिलां जनकनगरीं व्रजन् तस्य जनकस्य यद्धनुः तच्छ्रवणजं कु
तूहलं बिभ्रतौ राघवावपि निनाय नीतवान् ३२ तैरिति गताध्वभिस्तैस्त्रिभिः सायं शिवेषु रम्येषु आश्रमतरुषु वसतिः स्थानमगृह्यत कीदृशेष्वाश्रम
तरुषु दीर्घतपसो गौतमस्य परिग्रहः पत्नी पत्नीपरिजनादानमूलशापाः परिग्रहा इत्यमरः अहल्येति यावत् वासवस्येंद्रस्य क्षणकलत्रतां ययौ

तौ प्रणामचलकाकपक्षकौ भ्रातरावभृथाप्लुतो मुनिः आशिषामनुपदं समस्पृशद्दर्भपाटिततलेन पाणिना ३१ तंन्य
मंत्रयत संभृतक्रतुर्मैथिलः स मिथिलां व्रजन्मुनिः राघवावपि निनाय बिभ्रतौ तद्धनुः श्रवणजं कुतूहलं ३२ तैः शिवेषु व
सतिर्गताध्वभिः सायमाश्रमतरुष्वगृह्यत येषु दीर्घतपसः परिग्रहो वासवक्षणकलत्रतां ययौ ३३ प्रत्यपद्यत चिराय यत्पु
नश्चारु गौतमवधूः शिलामयी स्वं वपुः स किल किल्बिषच्छिदां रामपादरजसामनुग्रहः ३४ राघवान्वितमुपस्थितं मुनिं तं

३३ प्रत्येति। शिलामयी भर्तृशापात् शिलात्वं प्राप्ता गौतमवधूरहल्या चारु स्वं वपुश्चिराय पुनः प्रत्यपद्यत प्राप ॥ निशम्य जनको जनेश्वरः
वतीयत स किल्बिषच्छिदां पापहारिणां पापं किल्बिषकल्मषमित्यमरः रामपादरजसामनुग्रहः किल प्रसादः किल श्रूयते ३४ राघवेति राघ
वाभ्यामन्वितं उपस्थितं आगतं मुनिं जनको जनेश्वरः निशम्य अर्थकामाभ्यां सहितं देहवद्धं बद्धदेहं मूर्तिमंतमित्यर्थः वाहिताभ्यादिलात्साधुः

धर्ममिवसपर्ययाऽभ्यगात्प्रत्युद्गतवान् ३५ ताविति· तौ दिवः सुरवर्त्मनः आकाशात्· द्यौः स्वर्गसुरवर्त्मनोरिति विश्वः· गां भुवं गतौ स्वर्गेषु पशुवाग्वज्रदिङ्ने त्रघृणिभूजलेलक्ष्य दृष्ट्याम्त्रियांपुंसि गौरित्यमरः पुनर्वसू इव तन्नामकनक्षत्राधिदेवते इव स्थितौ राघवौ विलोचनैः पिबतां अत्यास्थया पश्यतां इत्यर्थः विदेहनगरीमिथिलातन्निवासिनां मनः पक्ष्मपातमपि निमेषमपि तद्दर्शनप्रतिबंधकत्वाद्वंचनां प्रमादं मन्यते स्म मेने· लट् स्मइतिभूतार्थेलट् ३६ यूपेति· यूपवतिक्रियाविधौ कर्मानुष्ठाने कृताविसर्थः अवसिते समाप्ते सति कालविदवसरज्ञः कुशिकवंशवर्द्धनः समु निः रामं अस्यतेऽनेनेत्यसनः इष्वसनं चापं तस्य दर्शनोत्सुकं मैथिलाय कथयांबभूव कथितवान् ३७ तस्येति पार्थिवो जनकः प्रथितवंशजन्म

अर्थकामसहितं सपर्यया देहबद्धमिव धर्ममभ्यगात् ३५ तौ विदेहनगरीनिवासिनां गां गताविव दिवः पुनर्वसू मन्यते स्म पि
वतां विलोचनैः पक्ष्मपातमपि वंचनां मनः ३६ यूपवत्यवसिते क्रियाविधौ कालवित्कुशिकवंशवर्द्धनः राममिष्वसनदर्श
नोत्सुकं मैथिलाय कथयांबभूव सः ३७ तस्य वीक्ष्य ललितं वपुः शिशोः पार्थिवः प्रथितवंशजन्मनः स्वं विचिंत्य च धनुर्दुरानमं
पीडितो दुहितृशुल्कसंस्थया ३८ अब्रवीच्च भगवन्मतंगजैर्यद्बृहद्भिरपि कर्म दुष्करं तत्र नाहमनुमंतुमुत्सहे मोघवृत्ति कलभ

पस्यतयोक्तस्सः एतेन वरसंपत्तिरुक्ता शिशोस्तस्य रामस्य ललितं कोमलं वपुः वीक्ष्य स्वं स्वकीयं दुरानमममानमयितुमशक्यं· नमेर्ण्यंतात्खल्। धनुः विचिंत्य दुहितृशुल्कं कन्यामूलं जामातृदेयं· शुल्कं घट्टादिदेये स्याज्जा· मातृबंधकेपि चेति विश्वः तस्य धनुर्भंग रूपस्य संस्थया स्थित्या· सं स्थास्थितौ शरेनाशे इति विश्वः पीडितो बाधितः शिशुना रामेण दुःखित इतिभावः ३८ अब्रवीदिति· अब्रवीच्च मुनिमिति शेषः किमिति· हे भगवन्मुने बृहद्भिर्मतंगजैरपि दुष्करं यत्कर्म तत्र कर्मणि कलभस्य बालगजस्य कलभः करिशावक इत्यमरः मोघवृत्ति व्यर्थं व्यापारं साहसमनुमंतुमहं नोत्सहे ३९

ह्रेपिता इति· हे तात तेन धनुषा बहवो धनुर्भृतो नरेश्वराः ह्रेपिताः ह्रियं प्रापिताः जिह्रेतेर्ण्यन्तात्कर्मणि क्तः अर्तिह्रीत्यादिना पुगागमः तेन नरेश्वराः ज्यानिघाते· कठिनत्वचः स्वान्भुजान्धिगिति विधूयावमत्य प्रतस्थिरे प्रस्थिताः ४० प्रतीति ऋषिस्तं प्रत्युवाच· किमिति· अयं रामः सारतो बलेन निशम्यतां श्रूयतां अथवा गिरा सारतो वर्णनया कृतं अलं गीर्न वक्तव्येत्यर्थः युगपर्याप्तयोः कृतमित्यमरः अव्ययं चैतत्कृतमिति निवारणनिषेधयोरिति गणव्याख्याने· गिरेति करणे तृतीया निषेधक्रियां प्रति करणत्वादिति· किं तु अशनिर्वज्रो गिराविव चापे धनुष्येव भवतस्तव व्यक्तशक्तिः दृष्टसारो भविष्यति ४१ एवमिति· एवमाप्तस्य मुनेर्वचनात्स जनकः काकपक्षकधरेऽपि बालेऽपि राघवे पुरुषस्य कर्म पौरुषं पराक्रमं· हायनान्तयुवादिभ्योऽणिति युवादित्वादण्· पौरुषं पुरुषस्योक्तं भावे कर्मणि तेजसीति विश्वः त्रिदशगोप इन्द्रगोपः कीटः प्रमाणमस्य त्रिदशगोपमात्रः प्रमाणे द्वयसजित्यादिना मात्रच्प्रत्ययः ततः स्वार्थे कः तन्मात्रके कृष्णवर्त्मनि वह्नौ दाहशक्तिमिव श्रद्दधे विश्वस्तवान् ४२ व्यादिदेशेति· अथ मैथिलः पार्श्वगान्पुरुषान्कार्मुकाभिहरणाय कार्मुकमानेतुं तुमर्थाच्चेति चतुर्थी· सहस्रलोचन इन्द्रः तैजसस्य तेजोमयस्य धनुषः प्रवृत्तये आविर्भावाय तोयदान्मेघानिव गणान् गणशः संख्यैकवचनाच्च वीप्सायामिति शस्प्रत्ययः व्यादिदेश प्रनिजिघाय ४३॥

ह्रेपिता हि बहवो नरेश्वरास्तात तेन धनुषा धनुर्भृतः ज्यानिघातकठिनत्वचो भुजान्स्वान्विधूय धिगिति प्रतस्थिरे ४०
प्रत्युवाच तमृषिर्निशम्यतां सारतोऽयमथवा कृतं गिरा चाप एव भवतो भविष्यति व्यक्तशक्तिरशनिर्गिराविव ४१ एवमा
प्तवचनात्स पौरुषं काकपक्षकधरेऽपि राघवे श्रद्दधे त्रिदशगोपमात्रके दाहशक्तिमिव कृष्णवर्त्मनि ४२ व्यादिदेश गण
शोऽथ पार्श्वगान्कार्मुकाभिहरणाय मैथिलः तैजसस्य धनुषः प्रवृत्तये तोयदानिव सहस्रलोचनः ४३॥ ॥

तदिति दाशरथी रामः प्रसुप्तभुजगेंद्र इव भीषणं भयंकरं तद्धनुर्वीक्ष्य आददे जग्राह वृषो ध्वजं चिन्हं यस्य स शिवो येन धनुषा क्रतुरेव मृगः विद्धं तं प
लायितं क्रतुमृगमनुसरति ताच्छील्ये णिनिः तं क्रतुविद्धं क्रतुमृगानुसारिणं बाणमसृजत् मुमोच ४४ आततेति स रामः संसदा सभया विस्मयेन स्ति
मिते नेत्रे यथा स्यात्तथा वीक्षितः सन् शैलस्येव सारो यस्य तच्छैलसारमपि तद्धनुः स्मरः पेशलं मृदुलं पुष्पचापमिव नातियत्नतः नातियत्नात् न
ञर्थस्य नशब्दस्य सह सुप्सुपेति समासः आततज्यमधिज्यमकरोत् ४५ भज्यमानमिति तेन रामेणातिमात्रकर्षणात् भज्यमानमत एव वज्रपरु

तत्प्रसुप्तभुजगेंद्रभीषणं वीक्ष्य दाशरथिराददे धनुः विद्धमन्क्रतुमृगानुसारिणं येन बाणमसृजद्वृषध्वजः ४४ आतत
ज्यमकरोत्स संसदा विस्मयस्तिमितनेत्रवीक्षितः शैलसारमपि नातियत्नतः पुष्पचापमिव कोमलं स्मरः ४५ भज्यमानम
तिमात्रकर्षणात्तेन वज्रपरुषस्वनं धनुः भार्गवाय दृढमन्यवे पुनः क्षत्रमुद्यतमिव न्यवेदयत् ४६ दृष्टसारमथ रुद्रकार्मुके
वीर्यशुल्कमभिनंद्य मैथिलः राघवाय तनयामयोनिजां रूपिणीं श्रियमिवार्पयत्सुतां सद्य एव वितरन्नमरद्युतिः ४७ मैथिलः सपदि सत्यसंगरो राघ
वाय तनयामयोनिजाम् सन्निधौ द्युतिमतस्तपोनिधेरग्निसाक्षिक इवातिसृष्टवान् ४८॥ १ वज्रवदिव परुषः स्वनो यस्य तद्धनुः

दृढमन्यवे दृढक्रोधाय मन्युः क्रोधे क्रतौ दैन्ये इति विश्वः भार्गवाय क्षत्रं क्षत्रकुलं पुनरुद्यतमिति न्यवेदयद्विज्ञापयामासेव ४६ दृष्टेति अथामरद्यु
तिरमरतेजाः मैथिलः पार्थिवो रुद्रकार्मुके दृष्टः सारः सारांशो यस्य तत् दृष्टसारं सारो बले स्थिरांशे चेति विश्वः वीर्यमेव शुल्कं धनुर्भंगरूपं अभिनंद्य
राघवाय रामाय अयोनिजां देवयजनसंभवां तनयां सीतां श्रियमिव साक्षाल्लक्ष्मीमिव न्यवेदयत् अर्पितवान् वाचेति शेषः ४७ उक्तमेवार्थं सो
पस्कारमाह मैथिल इति सपदि सत्यसंगरः सत्यप्रतिज्ञः अथ प्रतिज्ञाजिज्ञासासंपदापत्सु संगर इत्यमरः मैथिलो राघवाय अयोनिजां तनयां द्युति ११५

मतस्तेजस्विनः तपोनिधेः कौशिकस्य सन्निधौ अग्निः साक्षी यस्य सः अग्निसाक्षिकः शेषाद्विभाषेति कप्रत्ययः सदृवातिसृष्टवान् दत्तवान् ४८ प्रा
हिणोदिति· महाद्युतिर्जनको महितं पूजितं पुरोधसं कोसलाधिपतये दशरथाय प्राहिणोत् प्रहितवान्· किमिति· निमिर्नाम जनकानां पूर्वजः कश्चित्त
स्य इदं निमेः कुलं दुहितुः सीतायाः परिग्रहात् स्नुषात्वेन स्वीकारात् हेतोः भृत्यस्य भावो भृत्यत्वं सोऽस्यास्तीति भृत्यभावि दिश्यतां चानुमन्यतामिति ४९ अन्वि
येषेति सदशरथः श्रेसं दृशीमनुरूपां स्नुषामन्वियेष रामविवाहमाचकांक्षेत्यर्थः अनुकूलवाक्सुषासि द्विरूपानुकूलार्थवादी द्विजो जनकपुरोधा
श्चैनं दशरथं प्रापत प्राहि· कल्पवृक्षफलस्येयो धर्मः सद्यः पाकरूपः सोऽस्यास्तीति कल्पवृक्षफलधर्मि अतः सुकृतां पुण्यकारिणां कांक्षितं मनोरथः सद्यः

प्राहिणोच्च महितं महाद्युतिः कोशलाधिपतये पुरोधसं भृत्यभाविदुहितुः परिग्रहाद्दिश्यतां कुलमिदं निमेरिति ४९ अन्वि
येषसदृशीं च स स्नुषां प्राप चैनमनुकूलवाग्द्विजः सद्य एव सुकृतां हि पच्यते कल्पवृक्षफलधर्मि कांक्षितम् ५० तस्य कल्पितपु
रस्क्रियाविधेः शुश्रुवान्वचनमग्रजन्मनः उच्चचाल वलभित्सखो वशी सैन्यरेणुमुषितार्कदीधितिः ५१ आससाद मिथि
लां स वेष्टयन्पीडितोपवनपादपां बलैः प्रीतिरोधमसहिष्ट सा पुरी स्त्रीव कांतपरिभोगमायतम् ५२॥ पच्यते हि कर्म कर्तरि लट्
स्वयमेव पक्वं भवतीत्यर्थः कर्मणा तुल्यक्रिय इति कर्मवद्भावाद्भावकर्मणोरिति तङ् ५० तस्येति· तस्य वलभित्सखः इंद्रसहचरः वशी स्वाधीनवान्
वशा आयत्ता चेति विश्वः कल्पितपुरस्क्रियाविधेः कृतपूजाविधेस्तस्याग्रजन्मनो द्विजस्य वचनं जनकेन संदिष्टं शुश्रुवान् श्रुतवान्· शृणोतेः क्व
सुः सैन्यरेणुमुषितार्कदीधितिः स उच्चचाल प्रतस्थे ५१ आससादेति· स दशरथो बलैः सेनाभिः पीडितोपवनपादपां मिथिलां संवेष्टयन् परिधीकु
र्वन् आससाद· सा पुरी स्त्रीव युवतिरायतं अतिप्रसक्तं कांतपरिभोगं प्रियसंभोगमिव प्रीत्या रोधमसहिष्ट सोढवती द्वेषरोधं तु न सहत इति भावः ५२ ॥

र॰टी॰ ताविति॰ समये स्थितौ आचारस्थितौ समयाः शपथाचारकालसिद्धान्तसंविदः इत्यमरः वरुणवासवौ उपमा उपमानं ययोस्तौ तथोक्तौ भूपती जनकदशरथौ स
स॰११ मेत्य मिलित्वा स्वप्रभावसदृशीं आत्ममहिमानुरूपां कन्यकानां सीतादीनां तनयानां रामादीनां कौतुकक्रियां विवाहोत्सवं वितेनतुर्विस्तृतवन्तौ॰ ततो तेर्लि
१३६ ट् ५३ पार्थिवीमिति॰ उद्वहतीत्युद्वहः पचाद्यच् रघूणामुद्वहो रघूद्वहो रामः पृथिव्या अपत्यं स्त्री पार्थिवी॰ तस्यापत्यमित्यणि टिड्ढेति ङीप्॰ तां सीता
मुदवहत् परिणीतवान्॰ अथ लक्ष्मणस्तस्याः सीतायाः अनुजां जनकस्यौरसीं ऊर्मिलां उदवहत् यौ वरौजसौ तयोः रामलक्ष्मणयोरवरजौ अनु
जातौ भरतशत्रुघ्नौ तौ सुमध्यमे कुशध्वजस्य जनकानुजस्य सुते कन्यके मांडवीं श्रुतकीर्तिमुद्वहतां नात्र व्युत्क्रमविवाहदोषः भिन्नोदरत्वात् तदुक्तं॰

तौ समेत्य समये स्थितावुभौ भूपती वरुणवासवोपमौ कन्यकातनयकौतुकक्रियां स्वप्रभावसदृशीं वितेनतुः ५३ पार्थि
वीमुदवहद्रघूद्वहो लक्ष्मणस्तदनुजामथोर्मिलां यौ तयोरवरजौ वरौजसौ तौ कुशध्वजसुते सुमध्यमे ५४ ते चतुर्थसहिता
स्त्रयो बभुः सूनवो नववधूपरिग्रहात् सामदानविधिभेदनिग्रहाः सिद्धिमन्त इव तस्य भूपतेः ५५ ता नराधिपसुता नृपात्मजै
स्ते च ताभिरगमन् कृतार्थतां सोऽभवद्वरवधूसमागमः प्रत्ययप्रकृतियोगसन्निभः ५६॥ १ पितृव्यपुत्रे सापत्न्ये परनारीसुतेषु च

विवाहदानयज्ञादौ परिवित्त्यादि दूषणमिति ५४ त इति॰ ते चतुर्थसहितास्त्रयश्चत्वार इत्यर्थः वृत्तानुसारादेवमुक्तं सूनवो नववधूपरिग्रहात् सिद्धिमन्तः फ
लसिद्धियुक्ताः तस्य भूपतेर्दशरथस्य सामदानविधिभेदनिग्रहा इव चत्वार उपाया इव बभुः विधीयते विधिः निग्रहो दंडः सूनूनामुपायैः वधूनां सिद्धि
भिश्चौपम्यमित्यनुसंधेयम् ५५ ता इति॰ ता नराधिपसुताः जनककन्यकाः नृपात्मजैर्दशरथपुत्रैः कृतार्थतां कुलशीलवयोरूपादिसाफल्यमगमन्॰
ते च ताभिस्तथा किं च स वराणां वधूनां च समागमः प्रत्ययानां प्रकृतीनां च योग इव सन्निभातीति सन्निभोऽभवत् आतश्चोपसर्गे इति कः प्रत्ययाः सना

रयोपाभ्योविधीयंतेताः प्रकृतयः यथाप्रकृतिप्रत्यययोःसहैकार्थसाधकत्वंतद्वत्प्रापीतिभावः ५६ एवमिति· एवमात्तरतिरनुरागवान्सदशरथःतांश्च
तुरोप्यात्मसंभवान्पुत्रान् तत्रमिथिलायांनिवेश्यविवाह्यनिवेशःशिबिरोद्वाहविन्यासेष्वप्रकीर्तितइतिविश्वःत्रिषुध्वसुप्रयाणेषुसत्सुविसृष्टमैथिलःस्वां
पुरींन्यवर्तत उद्देशक्रियापेक्षयाकर्मत्वंपुर्याः ५७ तस्येति· जातुकदाचित्तस्यराज्ञोवर्त्मसुध्वजाएवतरवस्तान्प्रमथ्नंतियेप्रतीपगाः प्रतिकूलगामिनो
मरुतः उत्तटानदीरयाःस्थलींअकृत्रिमभूमिमिव जानपदेत्यादिनाङीप् तस्यवरूथिनींसेनांभृशंतयाभृशंचिक्लिशुःक्लिष्टवंतिस्म ५८ लक्ष्यतइति
तदनंतरं प्रतीपपवनानंतरंवृहद्भीमंपरिवेषस्यपरिधेर्मंडलंयस्यसःपरिवेषस्तुपरिधिरुपसूर्यकमंडले इत्यमरः रविः वैनतेयशमितस्यगरुडहतस्यभो

एवमात्तरतिरात्मसंभवांस्तान्निवेश्यचतुरोऽपितत्रसः अध्वसुत्रिषुविसृष्टमैथिलःस्वांपुरींदशरथोन्यवर्त्तत ५७ तस्य
जातुमरुतःप्रतीपगावर्त्मसुध्वजतरुप्रमाथिनः चिक्लिशुर्भृशतयावरूथिनीमुत्तटाइवनदीरयाःस्थलीं ५८ लक्ष्यते
स्मतदनंतरंरविर्बद्धभीमपरिवेषमंडलः वैनतेयशमितस्यभोगिनोभोगवेष्टितइवच्युतोमणिः ५९ श्येनपक्षपरिधूस
रालकाःसान्ध्यमेघरुधिरार्द्रवाससः अंगनाइवरजस्वलादिशोनोवभूवुरवलोकनक्षमाः ६०॥ एगेनकायेन भोगःसुखेस्त्र्यादिभृ

तावहेश्चफणकाययोरित्यमरः वेष्टितश्च्युतः शिरोभ्रष्टोमणिरिवलक्ष्यतेस्म ५९ श्येनेति· श्येनपक्षाएवपरिधूसराअलकायासांताः सांद्रमेघाइवरुधिरा
द्राणिवासांसियासांतास्तथोक्ताः रजोधूलिरासांअस्तीतिरजस्वलारजःकृष्यासुतिपरिषदोवलजितिवलच्प्रत्ययः दिशोरजस्वलाऋतुमत्योंगनाइवस्याज्ज
पुष्पमार्तवमित्यमरः अवलोकनक्षमाः दर्शनार्हानोवभूवुः एकत्रदृष्टदोषात्परत्रशास्त्रदोषादितिविज्ञेयं· अत्ररजोवृष्टिःउत्पातउक्तः ६० ॥

भास्कर इति॰ भास्करो यां दिशमध्युवास यस्यां दिश्युषितः उपान्वध्याङ्॰ वस इति कर्मत्वम्॰ तां दिशं श्रिताः शिवाः गोमायवः स्त्रियां शिवा भूरिमायुगोमायु मृगधूर्त्तका इत्यमरः क्षत्रशोणितपितृक्रियापितृतर्पणं तत्रोचितं परिचितं भार्गवं नोदयं सरुव प्रतिभयं भयंकरं ववाशिरे रुरुदुः वाशृ शब्दे इति धातोर्लिट् तिरश्चां वाशितं रुतमित्यमरः ६१ तदिति॰ तत्प्रतीपपवनादि वैकृतं दुर्निमित्तं प्रेक्ष्य कृत्यवित्कार्यज्ञः क्षितेरीश्वरः शान्तिमनर्थनिवृत्तिमधिकृत्य उद्दिश्य गुरुं वसिष्ठमन्वयुक्त अपृच्छत् प्रश्नोऽनुयोगः पृच्छा चेत्यमरः सगुरुः स्वं तच्छुभोदर्कं भावीति तस्य राज्ञो व्यथामलघयत्लघूकृतवान् ६२ तेज इति॰ अपदि उत्थितस्तेजसो राशिर्वाहिनीमुखे सेनाग्रे प्रादुरास किल खलु पुरः सैनिकैर्नयनानि प्रमृज्य चिरात् लक्षणीया भावनीया पुरुषाकृतिर्यस्य

भास्करश्च दिशमध्युवास यां तां श्रिताः प्रतिभयं ववाशिरे क्षत्रशोणितपितृक्रियोचितं नोदयं सरुव भार्गवं शिवाः ६१॥
तत्प्रतीपपवनादिवैकृतं प्रेक्ष्य शान्तिमधिकृत्य कृत्यवित् अन्वयुङ्क्त गुरुमीश्वरः क्षितेः स्वन्तमित्यलघयत्स तद्व्यथाम् ६२॥
तेजसः सपदि राशिरुत्थितः प्रादुरास किल वाहिनीमुखे यः प्रमृज्य नयनानि सैनिकैर्लक्षणीयपुरुषाकृतिश्चिरात् ६३॥
पित्र्यमंशमुपवीतलक्षणं मातृकं च धनुरूर्जितं दधत् यः ससोम इव घर्मदीधितिः सद्विजिह्व इव चंदनद्रुमः ६४ येन रोषपरुषात्मनः पितुः शासने स्थितिभिदोऽपि तस्थुषा वेपमानजननीशिरश्छिदा प्रागजीयत घृणा ततो मही ६५ ॥

सत्यश्लोकः अभूदिति शेषः ६३ पित्र्यमिति॰ उपवीतं लक्षणं चिन्हं यस्य तं पिता देवतास्येति पित्र्यः वाय्वृतुपित्रुषसो यदिति यत्प्रत्ययः तं वंशं धनुषा उ जितं मातुरागतः मातृकः ऋतष्ठञ् इति ठञ्प्रत्ययः तं वंशं दधत् यो भार्गवः ससोमश्चंद्रयुक्तो घर्मदीधितिः सूर्य इव सद्विजिह्वः ससर्पः चंदनद्रुम इव स्थितः ६४। ११७
येनेति रोषपरुष आत्मा बुद्धिर्यस्य सः आत्मा जीवो धृतिर्बुद्धिरित्यमरः तस्य स्थितिभिदो मर्यादालंघिनोऽपि पितुः शासने तस्थुषा स्थितेन वेपमानजननीशिरश्छिदा येन प्राक् घृणा जुगुप्सा ऽजीयत ततोऽनंतरं मही अजीयत॰ मातृहंतुः क्षत्रवधात् कुतो जुगुप्सेति भावः ६५ ॥

यः प्रमृज्य नयनानि सैनिकैर्लक्षणीयपुरुषाकृतिश्चिरात ६३॥
पित्र्यमंशमुपवीतलक्षणं मातृकं च धनुरूर्जितं दधत॥ त्रुटिः ॥२॥

अक्षेति· यो भार्गव· दक्षिणश्रवणसंस्थितेनाक्षबीजवलयेन अक्षमालया क्षत्रियांतकरणानां क्षत्रियवधानां एकविंशतेरेकविंशतिसंख्यायाः
व्याजोऽक्षमालारूपः पूर्वं यस्यास्तां गणनामुद्वहन्निव निर्बभौ ६६ तमिति पितुर्जमदग्नेर्वधेन क्षत्रियकर्तृकवधोद्भवेन मन्युना कोपेन राजवंशानां निध
नाय नाशार्थं निधनं स्यात्कुलेनाशे इति विश्वः दीक्षितं प्रवृत्तमित्यर्थः तं भार्गवं स्वां दशां चावलोक्य बालाः सूनवो यस्य स पार्थिवो विषसाद· स्वस्या
ति दौर्बल्यात् कृत्नोः श्वातिकौर्यात्कां दशामेकोऽभवदित्यर्थः ६७ रामेति आत्मजे पुत्रे दारुणे घोरेऽहिते शत्रौ च तुल्यमप्यविशेषेण वर्त्तमानं राम इति

अक्षबीजवलयेन निर्बभौ दक्षिणश्रवणसंस्थितेन यः क्षत्रियांतकरणैकविंशतिव्याजपूर्वगणनामिवोद्वहन् ६६ तं पि
तुर्वधभवेन मन्युना राजवंशनिधनाय दीक्षितम् बालसूनुरवलोक्य भार्गवं स्वां दशां च विषसाद पार्थिवः ६७ राम नाम इ
ति तुल्यमात्मजे वर्तमानमहिते च दारुणे हृद्यमस्य भयदायि चाभवद्रत्नजातमिव हारसर्पयोः ६८ अर्घ्यमर्घ्यमिति वा
दिनं नृपं सोऽनवेक्ष्य भरताग्रजो यतः क्षत्रकोपदहनार्चिषं ततः संदधे दृशमुदग्रतारकाम् ६९ तेन कार्मुकनिषिक्तमु
ष्टिना राघवो विगतभीः पुरोगतः अंगुलीविवरचारिणं शरं कुर्वता निजगदे युयुत्सुना ७०॥ १ नाम· हारसर्पयोर्वर्त्तमानर

त्नजातमिवास्य दशरथस्य तद्धृद्यं हृदयंगमं भयदायि भयंकरं चाभवत् ६८ अर्घ्यमिति· स भार्गवोऽर्घ्यमर्घ्यमिति वादिनं नृपमनवेक्ष्य यतो य
त्र भरताग्रजः ततस्तत्र· इतराभ्योऽपि दृश्यंत इति सार्वविभक्तिकस्तसिः क्षत्रे क्षत्रकुलविषये यः कोपदहनो रोषाग्निस्तस्यार्चिषं ज्वालामिव स्थितां· ज्वा
लाभासो न पुंस्यर्चिरित्यमरः उदग्रा तारका कनीनिका यस्यास्तां तारकाक्ष्णः कनीनिके त्यमरः दृशं संदधे ६९ तेनेति कार्मुकनिषिक्तमुष्टिना शर
मंगुलीविवरचारिणं कुर्वता योद्धुमिच्छता युयुत्सुना तेन भार्गवेण विगतभीः निर्भीकः सन् पुरोगतोऽग्रगतः सन् राघवो निजगदे उक्तः कर्मणि लिट् ७०

र॰टी॰ क्षात्रेति॰ क्षत्त्रजातं क्षत्त्रजातिः अपकारेण पितृवधरूपेण वैरिहैषि तत् क्षत्त्रजातं बहुशः एकविंशतिवारान्निहत्य शमं गतोऽस्मि॰ तथापि सुप्तसर्पः दं
स॰११ डघट्टनादिव तव विक्रमस्य श्रवणात् कर्णनात् रोषितो रोषं प्रापितोऽस्मि ७१ मैथिलस्येति॰ अन्यैः पार्थिवैः अनमितपूर्वं पूर्वमनमितं सहसुप्सु
११८ पतिसमासः अस्य मैथिलस्य धनुस्त्वमक्षिणोः क्षतवान् किलेति वार्तायां वार्तासंभावयोः किलेत्यमरः तद्धनुर्भंगं निशम्याकर्ण्य भवता आ
त्मनो मम वीर्यमेव शृंगं भग्नमिव समर्थये मन्ये ७२ अन्यदेति॰ अन्यदा अन्यस्मिन्काले जगति॰ रामइत्ययं शब्दः॰ उच्चरितः सन्मामेवागात् सं

क्षात्त्रजातमपकारवैरि मे तन्निहत्य बहुशः शमं गतः सुप्तसर्प इव दंडघट्टनादुत्थितोऽस्मि तव विक्रमश्रवात् ७१ मैथिलस्य ध
नुरन्यपार्थिवैस्त्वं किलानमितपूर्वमक्षिणोः तन्निशम्य भवता समर्थये वीर्यशृंगमिव भग्नमात्मनः ७२ अन्यदा जगति राम
इत्ययं शब्द उच्चरित एव मामगात् व्रीडमावहति मे स संप्रति व्यस्तवृत्तिरुदयोन्मुखे त्वयि ७३ बिभ्रतोऽस्त्रमचलेऽप्यकुंठितं द्वौ म
तौ मम रिपू समागसौ धेनुवत्सहरणाच्च हैहयस्त्वं च कीर्तिमपहर्तुमुद्यतः ७४ क्षत्त्रियांतकरणोऽपि विक्रमस्तेन मामवति ना
जिते त्वयि पावकस्य महिमा सगण्यते कक्षवज्ज्वलति सागरेऽपि यः ७५॥ ॥ मतित्वयि उदयोन्मुखे सति व्यस्त इति विपरीत इतिः अन्य

गामीति यत्स शब्दो मे व्रीडमावहति लज्जां करोति॰ ७३ बिभ्रत इति अचलेऽक्रौंचाद्रावपि अकुंठितं अस्त्रं बिभ्रतो मम द्वौ समागसौ तुल्यापराधौ रिपू म
तौ धेनोः पितृहोमधेनोः वत्सस्य हरणाद्धेतोः हैहयः कार्त्तवीर्यश्च कीर्तिमपहर्तुमुद्यत उद्युक्तस्त्वं च वत्सहरणे भारत श्लोकः प्रमत्तश्चाश्रमात्तस्य हो ११९
मधेन्वास्ततो बलात् जहार वत्सं क्रोशंत्या बभंज च महाद्रुमानिति ७४ क्षत्त्रियेति॰ तेन कारणेन क्रियते येनासौ करणः क्षत्त्रियांतकरणोऽपि विक्रमः त्व
य्यजिते मां नावति न प्रीणाति॰ तथाहि॰ पावकस्याग्नेर्महिमा सगण्यते यः कक्षवत् कक्षइव॰ तत्र तस्येवेति सप्तम्यर्थे वतिः सागरेपि ज्वलति ७५

विद्धीति किंच· ऐश्वरं धनुर्हरेर्विष्णोरोजसा बलेनात्तबलं हृतसारं च विद्धि· यद्वत्त्वयाऽभाजि अभंजि भंजेश्च चिणीति विभाषा नलोपः तथाहि नदी
रयैः खातमूलं अवदारितपादं तटद्रुमं मृदुरप्यनिलः पातयति· ततः शिशुरपि रौद्रं धनुः आनमयेदिति मा गर्वीरिति भावः ७६ तदिति· तत्तस्मा
न्मदीयमिदमायुधं कार्मुकं ज्यया संगमय्य संयोज्य ल्यपि लघुपूर्वादिति णेरयादेशः सशरं यथा तथा विकृष्यतां प्रधनं रणः स्त्रियां तु प्रधनं धार
णे रणे इति विश्वः एवमपि मद्धनुः कर्षणेऽपि अहं तुल्यबाहुतरसा समबाहुबलेन तरसी बलरंहसी इत्यमरः त्वया जितः ७७ कातर इति· यदि

विद्धि चात्तबलमोजसा हरेरैश्वरं धनुरभाजि यत्त्वया खातमूलमनिलो नदीरयैः पातयत्यपि मृदुस्तटद्रुमं ७६ तन्मदीय
मिदमायुधं ज्यया संगमय्य सशरं विकृष्यतां तिष्ठतु प्रधनमेवमप्यहं तुल्यबाहुतरसा त्वया जितः ७७ कातरोसि यदि वोद्गता
र्चिषा तर्जितः परशुधारया ममम ज्यानिघातकठिनांगुलिर्वृथा बध्यतामभययाचनांजलिः ७८ एवमुक्तवति भीमदर्श
ने भार्गवे स्मितविकंपिताधरः तद्धनुर्ग्रहणमेव राघवः प्रत्यपद्यत समर्थमुत्तरम् ७९ पूर्वजन्मधनुषा समागतः सोति
मात्रलघुदर्शनोभवत् केवलोपि सुभगो नवांबुदः किं पुनस्त्रिदशचापलांछितः ८० ॥ वा उद्गतार्चिषा उद्गतत्विषा मम पर

शुधारया तर्जितः कातरोऽसि भीतश्चेत् वृथा ज्यानिघातकठिना अंगुलयो यस्य स तथोक्तः अभययाचनांजलिः बध्यतां तौ युतावंजलिः पुमानित्यम
रः ७८ एवमिति भीमदर्शने भार्गवे एवमुक्तवति सति राघवः स्मितेन हासेन विकंपिताधरः सन् तद्धनुर्ग्रहणं समर्थमुचितं उत्तरं प्रत्यपद्यत अंगीचक
कार ७९ पूर्वेति· पूर्वजन्मनि नारायणावतारे यद्धनुस्तेन समागतः संगतः स रामोऽतिमात्रमत्यंतं लघुदर्शनः प्रियदर्शनोऽभवत् तथाहि· नवांबुदः
केवलः रिक्तोऽपि सुभगस्त्रिदशचापेनेंद्रधनुषा लांछितश्चिन्हितः किं पुनः सुभग एवेति भावः ८०

र॰टी॰ तेनेति॰ बलिना तेन रामेण भूमिनिहिता एका कोटिर्यस्य तत् कर्मणे प्रभवतीति कार्मुकं धनुः कर्मण उकञित्युकञ्प्रत्ययः अधिरोपितं भूभृतां रिपुर्भा
स॰११ र्गवश्च धूमशेषो धूमकेतनः अग्निरिव निष्प्रभो निस्तेजस्कश्चास बभूव॰ आसेति तिङन्तप्रतिरूपकमव्ययम् ८१ ताविति॰ परस्परस्थितौ चान्योन्या
११८ भियुक्तौ वर्द्धमानं परिहीनं चेति द्वंद्वः वर्द्धमानपरिहीने तेजसी ययोस्तौ तावुभौ राघवभार्गवौ दिनात्ययेसायंकाले पर्वणि भवौ पार्वणौ शशिदिवाकराविव
जनता जनसमूहः ग्रामजनबंधुभ्यस्तलिति तल्प्रत्ययः पश्यतिस्म अपश्यत्॰ अत्र राघवस्य शशिना भार्गवस्य भानुना औपम्यं द्रष्टव्यं ८२ तमिति

तेन भूमिनिहितैककोटि तत्कार्मुकं च बलिनाधिरोपितं निष्प्रभश्च रिपुरास भूभृतां धूमशेष इव धूमकेतनः ८१ तावुभा
वपि परस्परस्थितौ वर्द्धमानपरिहीनतेजसौ पश्यतिस्म जनता दिनात्यये पार्वणौ शशिदिवाकराविव ८२ तं कृपामृदुरवे
क्ष्य भार्गवं राघवः स्खलितवीर्यमात्मनि स्वं च संहितममोघमाशुगं व्याजहार हरसूनुसन्निभः ८३ न प्रहर्तुमलमस्मि नि
र्दयं विप्र इत्यभिभवत्यपि त्वयि शंस किं गतिमनेन पत्रिणा हन्मि लोकमथ ते मखार्जितं ८४ प्रत्युवाच तमृषिर्न तत्त्वतस्त्वां
न वेद्मि पुरुषं पुरातनं गां गतस्य तव धाम वैष्णवं कोपितो ह्यसि मया दिदृक्षुणा ८५॥ ॥ हरसूनुसन्निभः स्कंदसमः कृपामृदू राघ
वः आत्मनि विषये स्खलितवीर्यं कुंठितशक्तिं भार्गवं स्वस्वकीयसंहितं अमोघमाशुगं बाणं चावेक्ष्य व्याजहार बभाषे ८३ अभिभवत्यपि त्वयि विप्रहे
तोः निर्दयं प्रहर्तुं अलं शक्तो नास्मि॰ किंतु अनेन पत्रिणा शरेण गतिं गमनं हन्मि॰ उत मखार्जितं लोकं स्वर्गं हन्मि शंस ब्रूहि ८४ प्रतीति॰ इति ऋषिर्भा ११८
र्गवस्तं रामं प्रत्युवाच॰ किमिति॰ तत्त्वतः स्वरूपतस्त्वां पुरातनं पुरुषं न वेद्मि इति न किंतु वेद्म्येवेत्यर्थः किंतु गां गतस्य भुवमवतीर्णस्य तव वैष्णवं धाम
तेजो दिदृक्षुणा द्रष्टुमिच्छता मया कोपितश्चासि ८५

भस्मसादिति· पितृद्विषः पितृवैरिणो भस्मसात्कृतवतः कोपेन भस्मीकुर्वतः विभाषा साति कार्त्स्न्ये इति साति प्रत्ययः ससागरां वसुधां च पात्रसात्पात्रा
धीनं च देयं कृतवतः देये त्रा चेति चकारात्साति· कृतकृत्यस्य मे परमेष्ठिना परमपुरुषेण त्वया आहितः कृतः जयविपर्ययः पराजयोपि श्लाघ्यः आघ्र
स्य एव ८६ तदिति तत्तस्मात्कारणात्· हे मतिमतां वर पुण्यतीर्थगमनाय आप्तुमिष्टामीप्सितां मे गतिं रक्ष पालय किंतु खिलीकृता दुर्गमीकृतापि स्वर्गप
द्धतिरभोगलोलुपं भोगनिस्पृहं मां न पीडयिष्यति· अतस्तामेवजहीत्यर्थः ८७ प्रत्यपद्येति राघवः तथेति प्रत्यपद्यत अंगीकृतवान् प्राङ्मुखः इंद्र

भस्मसात्कृतवतः पितृद्विषो विप्रसाच्च वसुधां ससागरां आहितो जयविपर्ययोपि मे श्लाघ्य एव परमेष्ठिना त्वया ८६ त
द्गतिं मतिमतां वरेप्सितां पुण्यतीर्थगमनाय रक्ष मे पीडयिष्यति न मां खिलीकृता स्वर्गपद्धतिरभोगलोलुपं ८७ प्रत्यप
द्यत तथेति राघवः प्राङ्मुखश्च विससर्ज सायकं भार्गवस्य सुकृतोपि सोभवत्स्वर्गमार्गपरिघो दुरत्ययः ८८ राघवोपि
चरणौ तपोनिधेः क्षम्यतामिति वदन्समस्पृशत् निर्जितेषु तरसा तरस्विनां शत्रुषु प्रणतिरेव कीर्तये ८९ राजसत्वमवधू
य मातृकं पित्र्यमस्मि गमितः शमं यतः नन्वनिंदितफलो मम त्वया निग्रहोप्ययमनुग्रहीकृतः ९० ॥ ॥ ॐ ॥

दिङ्मुखः सायकं विससर्ज च स सायकः सुकृतोपि साधुकारिणोपि· करोतेः क्विप् भार्गवस्य दुरत्ययो दुरतिक्रमः स्वर्गमार्गस्य परिघः प्रतिबंधोऽभ
वत् ८८ राघव इति राघवोपि क्षम्यतामिति वदन् तपोनिधेर्भार्गवस्य चरणौ समस्पृशत्· प्रणनाम तथा हि· तरस्विनां बलवतां तरसा बलेन नि
र्जितेषु शत्रुषु प्रणतिरेव कीर्तये भवतीति शेषः ८९ राजसत्वमिति यदा मातुरागतं मातृकं राजसत्वं रजोगुणः प्रधानमवधूय पितुरागतं पित्र्यं
शमं यदा गमितोऽस्मि तदा त्वया मम अपेक्षितत्वात् अनिंदितं अगर्हितं फलं स्वर्गहानिलक्षणं यस्य सोयं निग्रहोपकारोप्यनुग्रहीकृतः उपकारीकृ

रघु० ११

Digitized by Sarayu Foundation Trust, Delhi and eGangotri

साधुयामीति॰ अहं साधुयामि गच्छामि देवकार्यमुपपादयिष्यतः संपादयिष्यतस्ते विघ्नमस्तु विघ्नाभावोस्तु अव्ययं विभक्तीत्यादिनाऽर्थाभावेऽव्ययीभा
वः सह लक्ष्मणेन सलक्ष्मणः तं तेन सहेति तुल्ययोग इति बहुव्रीहिः लक्ष्मणाग्रजं रामं इति वचऊचिवान् ब्रूञः क्वसुः ऋषिस्तिरोदधे अंतर्दधौ ८१
तस्मिन्निर्गतस्मिन्मार्गवे गते सति विजयिनं रामं पिता स्नेहात्परिरभ्य आलिंग्य पुनः जातमेवामन्यत क्षणं शुकयस्येति विग्रहः क्षणशुचस्तस्य परि
तोषलाभः संतोषप्राप्तिः कक्षः शुष्कः काननवीरुधोरितिविश्वः अतः कक्षाग्निना दावानलेन लंघितस्याभिहतस्य तरोर्वृष्टिपात इवाभवत् ८२ अथेति॰ अ

साधयाम्यहमविघ्नमस्तु ते देवकार्यमुपपादयिष्यतः ऊचिवानिति वचः सलक्ष्मणं लक्ष्मणाग्रजमृषिस्तिरोदधे ८१ त
स्मिन्गते विजयिनं परिरभ्य राममस्नेहाद्दमन्यत पिता पुनरेव जातं तस्याभवत्क्षणशुचः परितोषलाभः कक्षाग्निलंघिततरोरिव वृष्टिपातः ८२ अथ पथि गमयित्वा क्लृप्तरम्योपकार्ये कतिचिदवनिपालः शर्वरीः शर्वकल्पः पुरमविशदयोध्यां
मैथिलीदर्शिनीनां कुवलयितगवाक्षां लोचनैरंगनानाम् ८३ इति श्रीरघुवंशे सीतापरिणयनो नामैकादशः सर्गः ११।

यईश्वरसमानः शर्वः शर्वकल्पः ईषदसमाप्तावितिकल्पप्प्रत्ययः अवनिपालः क्लृप्तारम्याः नवाः उपकार्या यस्मिन्सः तस्मिन्पथि कतिचिच्छ
र्वरीः रात्रीर्गमयित्वा मैथिलीदर्शिनीनामंगनानां लोचनैः कुवलयानि येषां संजातानि कुवलयिताः तदस्य संजातं तारकादिभ्य इतजिति इतच्प्रत्य
यः कुवलयिताः गवाक्षाः यस्यास्तां पुरीमयोध्यामविशत्प्रविष्टवान् ८३ ॥ ॐ ॥ इति श्रीमल्लिनाथसूरिविरचितायां रघुवंशव्या १२०
॥ ॐ ॥ राम॰ ॥ ॥ ख्यायां संजीविनीसमाख्यायामेकादशः सर्गः ११॥ ॐ ॥ रामः ॥ ॐ ॥

CC-0. In Public Domain, UP State Museum, Hazratganj. Lucknow

श्रीगणेशायनमः ॥ वन्दामहे महो द्वंद्वदोर्दंडौ रघुनंदनौ तेजोगलितमार्तंडमंडलौ लोकमंडलौ १ निर्विष्टेति स्नेहयंति प्रीणयंति पुरुषमिति स्नेहाः पचाद्यच् स्निह्यंति पुरुषा येष्विति स्नेहाः अधिकरणेर्थे घञ् विषयाः शब्दादयः त एव स्नेहा निर्विष्टाः भुक्ताः विषयाः स्नेहाः येन स तथोक्तः निर्वेशो भृतिभोगयोरिति विश्वः दशा जीवनावस्था तस्या अंतं बाधकमुपेयिवान् स दशरथः उषसि प्रदीपार्चिरिव दीपज्वालेव आसन्नं निर्वाणं मोक्षो यस्य स तथोक्तः आसीत् अर्चिष्यक्षे तु विषयो देश आश्रयो भाजनमिति यादवः विषयः स्यादिंद्रियार्थे देशे जनपदेपि चेति विश्वः स्नेहस्तैलादिः स्नेहस्तैलादि केरसद्रवे स्यात्सौहृदेपि चेति विश्वः दशा वर्त्तावस्थायामिति विश्वः निर्वाणं विनाशं निर्वाणं निर्वृतौ मोक्षे विनाशे गजमज्जने इति यादवः १ तमि॰

श्रीगणेशायनमः निर्विष्टविषयस्नेहः स दशांतमुपेयिवान् आसीदासन्ननिर्वाणः प्रदीपार्चिरिवोषसि १ तं कर्णमूलमागत्य रामे श्रीर्न्यस्यतामिति कैकेयीशंकयेवाह पलितच्छद्मना जरा २ सा पौरान्पौरकांतस्य रामस्याभ्युदयश्रुतिः प्रत्येकं ह्लादयांचक्रे कुल्येवोद्यानपादपान् ३ तस्याभिषेकसंभारं कल्पितं क्रूरनिश्चया दूषयामास कैकेयी शोकोष्णैः पार्थिवाश्रुभिः ४ सा किलाश्वासिता चंडी भर्त्रा तत्संश्रुतौ वरौ ॥

१ तेति जरा कैकेयीशंकयेव पलितस्य केशादिशौक्ल्यस्य छद्मना मिषेण पलितं जरसा शौक्ल्यं केशादाविति अमरः कर्णमूलं कर्णोपकंठमागत्य रामे श्रीः राजलक्ष्मीर्न्यस्यतां निधीयतामिति तं आह वृद्धोहमिति विचार्य रामस्य यौवराज्याभिषेकं चिकीर्षितुं च कांक्षेत्यर्थः २ सेति सा पौरकांतस्य रामस्याभ्युदयश्रुतिः अभिषेकवार्ता कुल्येव अल्पजलनदीव कृत्रिमा नदीव कुल्या स्यात्कृत्रिमा सरिदित्यमरः उद्यानपादपानिव पौरान्प्रत्येकं ह्लादयांचक्रे ३ तस्येति क्रूरनिश्चया कैकेयी तस्य रामस्य कल्पितं संभृतं अभिषेकस्य संभारं उपकरणं शोकोष्णैः पार्थिवाश्रुभिर्दूषयामास स्वयं दुःखमूलेन राजशोकेन नववंधेनेत्यर्थः ४ सेति चंडी अतिकोपना चंडस्त्वत्यंतकोपन इत्यमरः

र॰ टी॰
स॰ १२
१२१

॥८८॥

सामर्जा आश्वासिताअनुनीतातेनभर्त्रासंश्रुतौप्रतिज्ञातौवरौइन्द्रेणसिक्ताअभिवृष्टाभूर्बिलेववल्मीकादौमग्नावुरगाविवउद्ववामउज्जगार ५ तयोरिति·
सातयोर्वरयोर्मध्येएकेनवरेणरामंचतुर्दशसमाः संवत्सरान् अत्यंतसंयोगेद्वितीया प्राव्राजयत् द्वितीयेनवरेणसुतस्यभरतस्यवैधव्यैकफ
लांवैधव्यमात्रफलांश्रियमैच्छत् इयेषनतुउपभोगफलामितिभावः ६ पित्रेतिरामः प्राक्पित्रादत्तांमहींरुदन्प्रत्यपद्यत अंगीचकारस्तत्यागदुः
खादितिभावः पश्चाद्वनायगच्छेतिएवंरूपांतदाज्ञांपित्राज्ञां मुदितोऽग्रहीत्पित्राज्ञाकरणलाभादितिभावः ७ दधतइति· मंगलक्षौमेदधतो

उद्ववामेंद्रसिक्ताभूर्बिलमग्नाविवोरगौ ५ तयोश्चतुर्दशैकेनरामंप्राव्राजयत्समाः द्वितीयेनसुतस्यैच्छद्वैधव्यैकफलांश्रि
यं ६ पित्रादत्तांरुदन्रामःप्राङ्महींप्रत्यपद्यत पश्चाद्वनायगच्छेतितदाज्ञांमुदितोऽग्रहीत् ७ दधतोमंगलक्षौमेवसानस्यचवल्क
ले ददृशुर्विस्मितास्तस्यमुखरागंसमंजनाः ८ ससीतालक्ष्मणसखःसत्याद्गुरुमलोपयन् विवेशदंडकारण्यंप्रत्येकंचसतांमनः
९ राजापितद्वियोगार्त्तःशापंस्मृत्वास्वकर्मजम् शरीरत्यागमात्रेणशुद्धिलाभममन्यत १० विप्रोषितकुमारंतद्राज्यमस्तमिते
श्वरे रंध्रान्वेषणदक्षाणांद्विषामामिषतांययौ ११॥ ८ वल्कलेवसानस्यआच्छादयतश्चतस्यरामस्यसममेकविधंमुखरागंमुखवर्णं

जनाःविस्मितादद्दशुः सुखदुःखयोरविकृतइतिभावः ८ सइति· सरामःगुरुंपितरंसत्याद्दत्तदानरूपाद्लोपयन्नभ्रंशयन् सीतालक्ष्मणयोःसखेतिवि
ग्रहः ताभ्यांसहितःसन्दंडकारण्यंविवेश सतांमनश्चप्रत्येकंविवेश पितृभक्त्यासर्वेसंतःसंतुष्टाइतिभावः ९ राजेति· तद्वियोगार्त्तःपुत्रवियोगदुः १२१
खितःराजास्वकर्मणामुनिपुत्रवधरूपेणजातःस्वकर्मजःशापःतंपुत्रशोकजंमरणात्मकंस्मृत्वाशरीरत्यागमात्रेणशुद्धिलाभंप्रायश्चित्तममन्य
तमृतइत्यर्थः १० विप्रोषितेति· विप्रोषिताःकुमारायस्मिंस्तत्तथोक्तं अस्तमितईश्वरोराजायस्यतत्तथोक्तं तद्राज्यंरंध्रान्वेषणदक्षाणांद्विषामामिषतां

भोग्यवस्तुनांययौ आमिषंभोग्यवस्तुनीतिकेचित्

अथेति· अथानाथाः प्रकृतयोऽमात्याः प्रकृतिः सहजे योनावमात्ये परमात्मनीति विश्वः मातृवंशनिवासिनं भरतं संभिन्नाश्रुभिः पितृमरणागुप्त्यर्थ
मिति भावः मौलैः सचिवैरानाययामासुः आगमयांचक्रुः १२ श्रुत्वेति कैकेयीतनयो भरतः पितुस्तथाविधं स्वमातृमूलं मृत्युं मरणं श्रुत्वा स्वस्याः स्वमा
तुः केवलं पराङ्मुखो न किंतु श्रियोपि पराङ्मुख आसीत् १३ ससैन्य इति ससैन्यो भरतः राममन्वगच्छत् किं कुर्वन् आश्रमालयैर्वनवासिभिर्द
र्शितान् एते रामनिवासा इति कथितान् ससौमित्रेर्लक्ष्मणसहितस्य रामस्य वसतिद्रुमान् निवासवृक्षान् उदश्रुः रुदन्पश्यन् १४ चित्रेति·

अथानाथाः प्रकृतयो मातृवंशनिवासिनं मौलैरानाययामासुर्भरतं संभिन्नाश्रुभिः १२ श्रुत्वा तथाविधं मृत्युं कैकेयीतनयः
पितुः मातुर्न केवलं स्वस्याः श्रियोप्यासीत्पराङ्मुखः १३ ससैन्यश्चान्वगाद्रामं कथितानाश्रमालयैः तस्य पश्यन्ससौमित्रेरुदश्रु
र्वसतिद्रुमान् १४ चित्रकूटवनस्थं च कथितस्वर्गतिर्गुरोः लक्ष्म्या निमंत्रयांचक्रे तमनुच्छिष्टसंपदा १५ स हि प्रथमजे तस्मि
न्नकृतश्रीपरिग्रहे परिवेत्तारमात्मानं मेने स्वीकरणाद्भुवः १६ तमशक्यमपाक्रष्टुं निदेशात्स्वर्गिणः पितुः ययाचे पादुके पश्चा
त्कर्तुं राज्याधिदेवते १७ स विसृष्टस्तथेत्युक्त्वा भ्रात्रा नैवाविशत्पुरीम॥ १९ चिः चित्रकूटवनस्थं तं रामं गुरोः पितुः कथितस्वर्गतिः कथित
पितृमरणः सन् लिप्सार्थः अनुच्छिष्टाननुभूतशिष्टा संपद्गुणोत्कर्षो यस्याः सा संपद्भूती गुणोत्कर्षे इति केशवः तया लक्ष्म्या करणेन निमंत्रयांचक्रे आ
हूतवान् १५ स इति स हि भरतः प्रथमजेऽग्रजे रामेऽकृतश्रीपरिग्रहे सति स्वयं भुवः स्वीकरणादात्मानं परिवेत्तारं मेने परिवेत्तानुजोऽनूढे ज्येष्ठे दारप
रिग्रहादिति अमरः भूपरिग्रहोपि दारपरिग्रहसम इति भावः १६ तमिति· स्वर्गिणः पितुः निदेशादपाक्रष्टुं निवर्तयितुमशक्यं तं रामं पश्चाद्राज्या
धिदेवते स्वामिन्यौ कर्तुं पादुके ययाचे १७ स इति· भरतो भ्रात्रा रामेण तथेत्युक्त्वा विसृष्टः सन् पुरीमयोध्यां नाविशदेव किंतु नंदिग्राममगतः सन·

Digitized by Sarayu Foundation Trust, Delhi and eGangotri

तस्यरामस्यराज्यंन्यासमिवनिक्षेपमिवाभुनक् अपालयत् न तूपभुक्तवानित्यर्थः अन्यथाभुजोऽनवन इत्यात्मनेपदप्रसंगात् भुजेर्लङ् १८ दृढेति
ज्येष्ठे दृढभक्तिः राज्यतृष्णापराङ्मुखो भरत इति पूर्वोक्तानुष्ठानेन मातुः पापस्य प्रायश्चित्तं तदपनोदकं कर्माकरोदिवेत्युत्प्रेक्षा दृढभक्तिरित्य
त्र भक्तिशब्दस्य स्त्रियाः पुंवदित्यादिना पुंवद्भावो दुर्घटः अप्रियादिष्विति निषेधात् भक्तिशब्दस्य प्रियादिपाठात् अतो दृढं भक्तिरस्येति नपुंसक
पूर्वपदो बहुव्रीहिः इति गणव्याख्याने दृढभक्तिरित्येवमादिषु पूर्वपदस्य नपुंसकत्वस्य विवक्षितत्वात् सिद्धमिति समाधेयं वृत्तिकारस्त्वदीर्घेति
इति मात्रपरं दृढभक्तिशब्दो लिंगविशेषस्यानुपकारत्वात् स्त्रीत्वमविवक्षितमेव तस्मादस्त्रीलिंगत्वं दृढभक्तिशब्दस्यायं प्रयोग इत्यभिप्रायः न्या

नंदिग्राममगतस्तस्य राज्यं न्यासमिवाभुनक् १८ दृढभक्तिरिति ज्येष्ठे राज्यतृष्णापराङ्मुखः मातुः पापस्य भरतः प्रायश्चित्त
मिवाकरोत् १९ रामोऽपि सह वैदेह्या वने वन्येन वर्तयन् चचार सानुजः शान्तो वृद्धेक्ष्वाकुव्रतं युवा २० प्रभावस्तंभितच्छा
यमाश्रितः स वनस्पतिं कदाचिदंके सीतायाः शिश्ये किंचिदिव श्रमात् २१ ऐंद्रिः किल नखैस्तस्या विददार स्तनौ द्विजः प्रियोप

सकारोऽप्येवं भोजराजस्तु कर्मसाधनस्यैव भक्तिशब्दस्य प्रियादिपाठात् भवानीभक्तिरित्यादौ पुंवत् ऽभोगचिन्हेषु पौरोभाग्यमिवाच
भावप्रतिषेधः दृढभक्तिरित्यादौ भावसाधनत्वात् पुंवद्भावसिद्धिः पूर्वपदमेवेत्याह भक्तौ पूर्वसाधना यः अस्य सूत्रे यद्वा सामान्येन नपुं
सके दृढशब्दे विग्रह इति द्रष्टव्यम् १९ राम इति सानुजः शान्तो रामो वैदेह्या सह वने वन्येन वनभवेन कंदमूलादिना वर्तयन् वृत्तिं कुर्वन् जीवन् इ १२२
क्ष्वाकूणां व्रतं वनवासात्मकं युवा यौवनस्थ एव चचार २० प्रभावेति स रामः कदाचित् प्रभावेन स्वमहिम्ना स्तंभिता स्थिरीकृता छाया यस्य तं वनस्पति
माश्रितः सन् किंचिदीषच्छ्रमादिव सीताया अंके शिश्ये सुष्वाप २१ ऐंद्रिरिति ऐंद्रिरिन्द्रस्य पुत्रो द्विजः पक्षी काकः तस्याः सीतायाः स्तनौ प्रियस्य राम

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

स्वोपभोगचिह्नेषु तत्क्षतनखक्षतेषु इत्यर्थः पुरोभागिनो दोषैकदर्शिनः कर्म पौरोभाग्यं दोषे कदृक् पुरोभागी स्मरः दुःश्लिष्टदोषघातमाचरन् कुर्व
न्निव नखैर्विददार विलिलेख २२ तस्मिन्निति· रामया सीतयावबोधितो रामस्तस्मिन्काले इषीकास्त्रं काशास्त्रं इषीका काशमुच्यत इति हलायुधः
तदास्यत् अस्यतिस्म असु क्षेपणे इति धातोर्लुङ् अस्यतिवक्तिख्यातिभ्योऽङ् इति च्लेः अङ् प्रत्ययः अस्यतेस्थुक् इति थुगागमः स काकः भ्रान्तः सन्
एकनेत्रस्य व्ययेन दानेन तस्माद्रामान्मुमुचे मुक्तवान् मुचेः कर्मकर्त्तरि लिट् धेनुर्मुमुचे इतिवत् २३ राम इति· रामस्त्वासन्नदेशत्वाद्धेतोः पुनर्भर
तागमनमाशंक्य उत्सुकसारंगा उत्कंठितहरिणां चित्रकूटस्थलीं जहौ तत्याज आसन्नश्चासौ देशश्चेति विग्रहः २४ प्रययाविति· स रामोऽतिथि

तस्मिन्नास्थदिषीकास्त्रं रामो रामावबोधितः भ्रान्तः सन्मुमुचे तस्मादेकनेत्रव्ययेन सः २३ रामस्त्वासन्नदेशत्वाद्भरतागमनं पुनः आशंक्योत्सुकसारंगां चित्रकूटस्थलीं जहौ २४ प्रययावातिथेयेषु वसन्नृषिकुलेषु सः दक्षिणां दिशमृक्षेषु वार्षिकेष्विव भास्करः २५ बभौ तमनुगच्छंती विदेहाधिपतेः सुता प्रतिषिद्धापि कैकेय्या लक्ष्मीरिव गुणोन्मुखी २६ अनुसूयातिसृष्टेन पुण्यगंधेन काननम् सा चकाराङ्गरागेण पुष्पोच्चलितषट्पदं २७॥

९.षु साधून्यातिथेयानि पथ्यतिथिवसतिस्व
पतेर्ढञ् इति ढञ् प्रत्ययः तेषु ऋषिकुलेषु ऋष्याश्रमेषु कुलं कुल्ये गणे देहे गेहे जनपदेऽन्वये इति हैमः वर्षासु भवानि वार्षिकाणि वर्षाभ्यष्ठक् इति
ढक् प्रत्ययः तेषु ऋक्षेषु नक्षत्रेषु भास्कर इव वसन् दक्षिणां दिशं प्रतियियौ २५ बभाविति· तं रामं अनुगच्छंती विदेहाधिपतेः सुता सीता कैकेय्या
प्रतिषिद्धा निवारितापि गुणोन्मुखी गुणोत्सुका लक्ष्मी राज्यलक्ष्मीरिव बभौ २६ अनुसूयेति· सा सीता अनुसूयया अत्रिभार्यया अतिसृष्टेन दत्ते
न पुण्यगंधेन अंगरागेण काननं वनं पुष्पेभ्य उच्चलिताः निर्गताः षट्पदा यस्मिंस्तत्तथाभूतं चकार २७॥

Digitized by Sarayu Foundation Trust, Delhi and eGangotri

र॰टी॰ संध्येति॰ संध्याभ्रकपिशो विराधो नाम राक्षसो ग्रहो राहुरिवेंदोः तस्य रामस्य मार्गमावृत्यावरुध्यातिष्ठत् २८ सइति॰ लोकस्य शोषणः शोषकः दूषकः
स॰१२ स राक्षसः रामलक्ष्मणयोर्मध्ये मैथिलीं नभोनभस्ययोः श्रावणभाद्रपदयोरंतरे मध्ये वृष्टिमवग्रहो वर्षप्रतिबंध इव जहार अवग्रहो वृष्टिप्रतिबंध इ
१२३ त्यर्थः वृष्टिर्वर्षं तद्विघाते ऽवग्राहावग्रहौ समाविति अमरः २९ तमिति॰ ककुत्स्थस्य गोत्रापत्ये पुमांसौ काकुत्स्थौ रामलक्ष्मणौ तं विराधं विनिष्पिष्य
हत्वा शुचिना पवित्रेण गंधेन स्थलीमाश्रमभुवं पुरा दूषयंतीति हेतोः यावत्पुरानिपातयोर्लडिति भविष्यदर्थे लट् वसुधायां निचख्नतुः भूमौ निक्षि
प्तवंतौ च ३० पंचवट्यामिति ततो रामः कुंभजन्मनो ऽगस्त्यस्य शासनात् पंचानां वटानां समाहारः पंचवटी तद्धितार्थेति तत्पुरुषः संख्यापूर्वो द्विगुरि

संध्याभ्रकपिशस्तस्य विराधो नाम राक्षसः अतिष्ठन्मार्गमावृत्य रामस्येंदोरिव ग्रहः २८ स जहार तयोर्मध्ये मैथिलीं लोकशो
नी॰२ षणः नभोनभस्ययोर्वृष्टिमवग्रह इवांतरे २९ तं विनिष्पिष्य काकुत्स्थौ पुरा दूषयति स्थलीं गंधेनाशुचिना चेति वसुधायां निचख्न
तुः ३० पंचवट्यां ततो रामः शासनात्कुंभजन्मनः अनपोढस्थितिस्तस्थौ विंध्याद्रिः प्रकृताविव ३१ रावणावरजा तत्र राघ
वं मदनातुरा अभिपेदे निदाघार्ता व्यालीव मलयद्रुमं ३२ सा सीतासन्निधावेव तं वव्रे कथितान्वया अत्यारूढो हि नारीणा
मकालज्ञो मनोभवः ३३

ति द्विगुसंज्ञायां द्विगोरिति ङीप् द्विगुरेकवचनमिति एकवचनं तस्यां पंचवट्यां विंध्याद्रिः प्रकृतौ वृद्धेः पूर्वावस्थायामि
वानपोढस्थितिरनतिक्रांतमर्यादस्तस्थौ ३१ रावणावरजेति॰ तत्र पंचवट्यां मदनातुरा रावणावरजा शूर्पणखा पूर्वपदात्संज्ञायामग इति णत्वं रा १२३
घवं निदाघार्ता घर्मव्याप्ता व्याकुला व्याली भुजंगी मलयद्रुममिवाभिपेदे प्राप ३२ सेति॰ सा शूर्पणखा सीतासन्निधावेव कथितान्वया कथितवं
शा सती तं रामं वव्रे वृतवती तथाहि आत्यारूढो ऽति प्रसिद्धो नारीणां मनोभवः कामः कालज्ञो न भवतीति अकालज्ञो हि ३३ ॥

कलत्रवानिति वृषः सप्तानः वृषः स्याद्वासवे धर्मे सौरभेये च शुक्रजे पुंराशिभेदयोः शृंग्यां मूषिकश्रेष्ठयोरपीति विश्वः वृषं पुरुषं आत्मार्थमिच्छतीति
ति वृषस्यंती च कामुकी स्यमरः सुप आत्मनः क्यजिति क्यच्प्रत्ययः अश्वक्षीरवृषलवणानामात्मप्रीतौ क्यचीति सुडागमः तत्र लटः शत्रादेशः उगि
त श्चेति ङीप् अक्षरार्थस्तु वृषस्कंधो रामः वृषस्यंतीं तां राक्षसीं हे बाले ऽहं कलत्रवान् मे कनीयांसं कनिष्ठं भजस्वेति शशास आज्ञापितवान् ३४ ज्येष्ठा
भिगमनादिति पूर्वं ज्येष्ठाभिगमनात्तेन लक्ष्मणेनापि अनभिनंदिना नांगीकृता भूयो रामाश्रया सा राक्षसी उभे कूले भजतीत्युभयकूलभाक् नदी
वाभूत् साह्रियातान्यां पर्यायेण कूलद्वयगामिनी नदीसदृश्यभूदित्यर्थः ३५ संरंभमिति मैथिली हासः क्षणं सौम्यां सौम्याकारां तां राक्षसीं नि

कलत्रवानहं बाले कनीयांसं भजस्व मे इति रामो वृषस्यंतीं वृषस्कंधः शशास ताम् ३४ ज्येष्ठाभिगमनात्पूर्वं तेनाप्यनभिनंदि
ता साऽभूद्रामाश्रया भूयो नदीवोभयकूलभाक् ३५ संरंभं मैथिलीहासः क्षणसौम्यां निनाय तां निवातस्तिमितां वेलां चंद्रोदय इवो
दधेः ३६ फलमस्योपहासस्य सद्यः प्राप्स्यसि पश्य मां मृग्याः परिभवो व्याघ्र्यामित्यवेहि त्वया कृतः ३७ इत्युक्त्वा मैथिलीं भर्तुरंके
निर्विशतीं भयात् रूपं शूर्पणखा नाम्नः सदृशं प्रत्यपद्यत ३८ युग्मं लक्ष्मणः प्रथमं श्रुत्वा कोकिलामंजुवादिनीं

वातेन स्तिमितां निश्चलामुदधेर्वेलां अंबुविकृतिं अंबुपूरमित्यर्थः अब्ध्यंबुविकृतौ वेलेत्यमरः चंद्रोदय इव संरंभं क्षोभं निनाय ३६ फलमिति श्लोक
द्वयेनान्वयः तस्योपहासस्य फलं सद्यः संप्रत्येव प्राप्स्यसि मां पश्य त्वया कर्त्र्या कृतं उपहासरूपं कारणं व्याघ्र्यां विषये मृग्याः कर्त्र्याः परिभवो मृत्यवे हि ३७
इतीति भयाद्भर्तुरंके निर्विशंतीं आलिंगंतीं मैथिलीं इत्युक्त्वा शूर्पणखा कर्त्री नाम्नः स्वनाम्ना नखसदृशं शूर्पाकारनखयुक्तमित्यर्थः रूपमाकारं प्रत्यपद्य
त स्वीचकार अदर्शयदित्यर्थः ३८ लक्ष्मण इति लक्ष्मणः प्रथमं कोकिलावन्मंजुवादिनीं पश्चाच्छिवावद्घोरस्वनां भीमस्वनां तां श्रुत्वा तस्याः ॥

Digitized by Sarayu Foundation Trust, Delhi and eGangotri

र॰ टी॰ खनं श्रुत्वेत्यर्थः मुखमार्गेरवः श्रूयत इति वत्सयोगः विकृतामायादिनीति बुबुधे बुद्धवान् कर्तरि लिट् ३९ पर्णशालामिति· अथ लक्ष्मणो विकृष्टासिकोशोद्धृतखड्गः सन् क्षिप्रं पर्णशालां प्रविश्य भीषयतीति भीषणां तां नंद्यादित्वाल्ल्युः कर्तरि एतेन भीषणव्याख्यानात्ताराक्षसीं वैरूप्यस्य पौनरुक्त्यहेतुग्रुणं

स॰ १२ लक्षणं यातेनायोजयत् योजितवान् स्वभावत एव विकृतां कर्णादिच्छेदेन पुनरतिविकृतामकरोदित्यर्थः ४० सेति· सा वक्रनखं धारयतीति वक्रनखधा

१२४ रिणी तया वेणुरिव कर्कशपर्वया न एवांकुशाकार इवाकारो यस्याः सा तया अंगुल्या तौ राघवावंबरे स्थिता व्योम्नि स्थिता सती तर्जयत् अभर्त्सयत्तद्यपि

तर्जभर्त्सन इति धातोश्चौरादिकादनुदात्तेत्वादात्मनेपदेन भाव्यं तथापि चक्षिङो ङित्करणं ज्ञापकादनुदात्तेत्वनिमित्तस्यात्मनेपदस्यानित्यत्वा

शिवाघोरस्वनां पश्चाद्बुबुधे विकृतेति ताम् ३९ पर्णशालामथ क्षिप्रं विकृष्टासिः प्रविश्य सः वैरूप्यपौनरुक्त्येन भीषणां तामयो

जयत् ४० सा वक्रनखधारिण्या वेणुकर्कशपर्वया अंकुशाकारयांगुल्या तावतर्जयदंबरे ४१ प्राप्य चाशु जनस्थानं खरादि

भ्यस्तथाविधं रामोपक्रममाचख्यौ रक्षःपरिभवं नवं ४२ मुखावयवलूनां तां नैर्ऋता यत्पुरोदधुः रामाभियायिनां तेषां तदेवा

भूदमंगलं ४३ उदायुधानापततस्तान्दृप्तान्प्रेक्ष्य राघवः निदधे विजयाशंसां चापे सीतां च लक्ष्मणे ४४॥ एतत्सर्वं पदमूह मित्युक्तं

आख्यातचंद्रिकायां तर्जयते भर्त्सयते तर्जयती सापि च दृश्यते कविष्विति ४१ प्राप्येति सा आशु जनस्थानं प्राप्य खरादिभ्यो राक्षसेभ्यस्तथाविधं स्वांग

छेदात्मकं उपक्रम्यत इत्युपक्रमः प्रारंभः कर्मणि घञ् अस्य पः रामस्य कर्तुरुपक्रमः रामोपक्रमं रामेणादावुपक्रांतमिति उपज्ञोपक्रमं तदाद्याचि १२५

ख्यासायामिति क्लीबत्वं तन्नवं रक्षसां कर्मभूतानां परिभवमाचख्यौ च ४२ मुखेति नैर्ऋता यातुधानाः नैर्ऋतो यातुरक्षसी समरः मुखावयवेषु कर्णा

दिषु लूनां छिन्नां तां पुरो दधुः अग्रे चक्रुरिति यत् तदेव रामाभियायिनां रामाभिसरतां तेषाममंगलमभूदित्यर्थः ४३ उदिति उदायुधान् उद्यतायु

धान आपतत आगच्छतो दृष्ट्वा तान्खरादीन्प्रेक्ष्य राघवश्चापे विजयस्याशंसां आशां लक्ष्मणं सीतां निरुध्य सीतारक्षार्थो लक्ष्मणं नियुज्य स्वयं युद्धाय स
न्नद्ध इति भावः ४४ एक इति· दाशरथी रामः एकोऽद्वितीयः यातुधानाः कामं सहस्रशः संतीति शेषः ते तु स राम आजौ यावन्तो यातुधानाः यावत्संख्या
तावद्धा ददृशे ४५ असदिति· अथ अशुभाचारो खलो असाधुचारी सद्वृत्तश्च स काकुत्स्थो सज्जनेन रक्षोजनेन च प्रयुक्तं प्रेषितं उच्चारितं दूषणं दूषणा
ख्यं राक्षसं आत्मनो दूषणं दोषमिव न चक्षमे न सेहे प्रतिकर्तुं प्रवृत्त इत्यर्थः ४६ तमिति· स रामस्तं दूषणं खरं त्रिशिरसं च शरैः प्रतिजग्राह प्रतिजघा
रेत्यर्थः क्रमशः यथाक्रमं प्रयुक्ता अपीति शेषः तस्य ते शराः पुनश्चापात्समं युगपदेवोद्ययुः अतिलघुहस्त इति भावः ४७ तैरिति· देहमतीत्य भित्वा

एको दाशरथिः कामं यातुधानाः सहस्रशः ते तु यावंत एवाऽजौ तावद्धा ददृशे स तैः ४५ असज्जनेन काकुत्स्थः प्रयुक्तमथ दूष
णम् न चक्षमे शुभाचारः स दूषणमिवात्मनः ४६ तं शरैः प्रतिजग्राह खरत्रिशिरसौ च सः क्रमशस्ते पुनस्तस्य चापात्सममिवोद्ययुः
४७ तैस्त्रयाणां शितैर्बाणैर्यथापूर्वविशुद्धिभिः आयुर्देहातिगैः पीतं रुधिरं तु पतत्रिभिः ४८ तस्मिन्रामशरोत्कृत्ते बले महति रक्ष
सां उत्थितं ददृशेऽन्यच्च कबंधेभ्यो न किंचन ४९ सा बाणवर्षिणं रामं योधयित्वा सुरद्विषां ॥ (गच्छंतीति देहातिगाः तैर्यथास्थिता

पूर्वविशुद्धिर्येषां तैः रतिवेगत्वेन देहभेदात्प्रागवत् रुधिरलेपरहितैरित्यर्थः शितैस्तीक्ष्णैर्बाणैः त्रयाणां खरादीनां आयुः पीतं रुधिरं तु पतत्रिभिः पीतम् ४८
तस्मिन्निति तस्मिन् रामशरैरुत्कृत्ते छिन्ने महति रक्षसां बले उत्थानक्रियाविशिष्टं प्राणिकबंधेभ्यः शिरोहीनशरीरेभ्यः कबंधोऽस्त्री क्रियायुक्तमपवि
द्धि कलेवरमित्यमरः अत्रान्यत्किंचन न ददृशे कबंधेभ्य इत्यत्रान्यारादिति पंचमी निःशेषं हतमित्यर्थः ४९ सेति· सा असुरद्विषां वरूथिनी बाणवर्षिणं
रामं योधयित्वा युद्धं कारयित्वा गृध्राणां छाया इति गृध्रच्छायं छाया बाहुल्ये इति क्लीवत्वं तस्मिन्न प्रबोधाय पुनर्बोधाय सुप्ता प्रममारेत्यर्थः ॥

अत्रसुरत श्रांतकांतासमाधिर्ध्वन्यते ५० राघवेति॰ एकाशूर्पवन्नखानियस्याः साशूर्पणखा पूर्वपदात्संज्ञायामगइतिणत्वं नखमुखात्संज्ञायामितिङीपप्र
तिषेधः सैवरावणंप्रतिराघवाभ्यां विदीर्णानां हतानांतेषांरक्षसांखरादीनां दुःखहेतुर्दुर्वार्तानां हर्तृनिवेदयतीति दुष्प्रवृत्तिहराभवत् हरतेरनुद्यमनेऽजिसच प्र
त्ययः ५१ निग्रहादितिस्वसुः शूर्पणखायानिग्रहादंगच्छेदात्दाशानांवधूनांवधाच्चकारणाद्धनदानुजोरावणोरामेणदशसु मूर्द्धसु पदंपादंनिहितंमेने ५२
रक्षसेतिसरावणः मृगरूपेणरक्षसामारीचेनराघवौवंचयित्वाप्रतार्यपक्षीद्रुस्यजटायुषः प्रयासेनयुद्धरूपेणक्षणंविघ्नितः संजातविघ्नः सीतांजहार ५३॥
ताविति॰ सीतान्वेषिणौतौराघवौलूनपक्षंरावणेनच्छिन्नपक्षंकंठवर्तिभिः प्राणैर्दशरथप्रीतेः दशरथसख्यस्यानृणंऋणैर्विमुक्तंगृध्रंजटायुषमपश्य

अप्रबोधायसुष्वापगृध्रच्छायेवरुष्थिनी ५० राघवाभ्यांविदीर्णानांरावणंप्रतिरक्षसां तेषांशूर्पणखैवैकादुष्प्रवृत्तिहराऽभ
वत् ५१ निग्रहात्स्वसुराप्तानांवधाच्चधनदानुजः रामेणनिहितंमेनेपदंदशसुमूर्द्धसु ५२ रक्षसामृगरूपेणवंचयित्वासरा
घवौ जहारसीतांपक्षीन्द्रप्रयासक्षणविघ्नितः ५३ तौसीतान्वेषिणौगृध्रंलूनपक्षमपश्यतां प्राणैर्दशरथप्रीतेरनृणंकंठ
वर्तिभिः ५४ सरावणहृतांताभ्यांवचसाचष्टमैथिलीं आत्मनः सुमहत्कर्मव्रणैरावेद्यसंस्थितः ५५ तयोस्तस्मिन्नवीभूत

तांदृष्टवंतौदृशेर्लङि रूपम् ५४ इतिसजटायुः रावणहृतांमैथिलींताभ्यांरामलक्ष्मणाभ्यांक्रियाग्रहणमपिकर्त्तव्यं॥ पितृव्यापत्तिशोक
मितिसंप्रदानाच्चतुर्थीवचसावाग्व्यापृत्याआचष्टआत्मनः सुमहत्कर्मयुद्धरूपंव्रणैरावेद्यसंस्थितोमृतः ५५ तयोरिति॰ पितृव्यापत्तिः पितृम १२५
रणंनवीभूतापितृव्यापत्तिर्मरणजशोकोययोस्तौतयोः राघवयोस्तस्मिन्गृध्रेपितरिइवाग्निसंस्कारादग्निसंस्कारमारभ्य पराउत्तराः ॥

क्रियावद्वृत्तिरेअवर्त्तत तस्यपितृवदौर्ध्वदेहिकं वक्ततुरित्यर्थः ५६ वधेति वधेनरामकर्तृकेननिर्हृतशापस्यशापादेवमुवंगतस्यरक्षोविशेषस्यक
वंधस्यउपदेशतोरामस्यसमानव्यसनेसमानापद्दिसख्यमपीत्यर्थः हरीकपौसुग्रीवेशुकाहिकपिभेकेषुहरिर्नाकपिलेत्रिष्वित्यमरः सख्यंमुमूर्छ्वद्वृधे
५७ सइति वीरः सरामोवालिनंसुग्रीवाग्रजंहत्वाचिरकांक्षितेतत्पदेवालिस्थानेधातोःस्थानेआदेशमिवादिष्टभूधात्वंतरमित्यर्थः सुग्रीवंसंन्यवेशयत
स्थापितवान्यथास्तेर्भूरिति अस्तिधातोःस्थानेआदेशोभूस्तिकार्यमशेषंसलंभितः तद्वदितिभावः आदेशोनामशब्दांतरस्यस्थानेविधीयमानंश
ब्दांतरमभिधीयते ५८ इतस्ततश्चेति वैदेहीमन्वेष्टुंमार्जितुंभर्त्रासुग्रीवेणचोदिताःप्रयुक्ताः कपयोहनुमत्प्रमुखाःआर्त्तस्यचिरहातुरस्यरामस्य

पितरीवाग्निसंस्कारात्परावद्वृत्तिरेक्रियाः ५६ वधनिर्हृतशापस्यकवंधस्योपदेशतः मुमूर्छसख्यंरामस्यसमानव्यसनेहरौ ५७
सहत्वावालिनंवीरस्तत्पदेचिरकांक्षितेधातोः स्थानइवादेशंसुग्रीवंसंन्यवेशयत् ५८ इतस्ततश्चवैदेहीमन्वेष्टुंभर्तृचोदिताः क
पयश्चेरुरार्तस्यरामस्येवमनोरथाः ५९ प्रवृत्तावुपलब्धायांतस्याःसंपातिदर्शनात् मारुतिःसागरंतीर्णःसंसारमिवनिर्ममः ६०
दृष्ट्वाविचिन्वतातेनलंकायांराक्षसीवृतांजानकीविषवल्लीभिःपरीतेवमहोषधिः ६१॥ ९ मनोरथाःकामाइवइतस्ततश्चेरुः।
११
नानादेशेषुवभ्रमुः ५९ प्रवृत्ताविति संपातिर्नामजटायुषोज्यायान्भ्राता तस्यदर्शनात्तन्मुखादितिभावः तस्याःसीतायाःप्रवृत्तौवार्त्तायांवार्ताप्र
वृत्तिर्वृत्तांतमित्यमरः उपलब्धायांज्ञातायांमारुतस्यापत्यंपुमान्मारुतिः हनुमान् अतउर्जितोऽप्यसयःससागरंममेत्येतदव्ययं ममतातद्रहितोनिर्म
मःनिस्पृहःसंसारमविद्यावन्धनमिवतीर्णस्तत्तारःतरतेःकर्त्तरिक्तः ६० दृष्ट्वेति लंकायांरावणराजधान्यांविचिन्वतांमृगयमाणेनमारुतिनाराक्ष
सीभिर्वृताजानकीविषवल्लीभिःपरीतापरिवृत्तामहोषधिःसंजीविनीलतेवदृष्टा ६१॥

तस्या इति· कपिर्हनुमान् भर्तुः रामस्य संबंधि अभिज्ञानं प्रत्यभिज्ञानसाधकं अंगुलीयकं ऊर्मिकं अंगुलीयकमूर्मिकमित्यमरः जिह्वामूलांगुले च्छ इति छ प्रत्ययः तत्तस्यै जानक्यै ददौ अनुष्णैः शीतलैः तस्या आनंदाश्रुबिंदुभिः प्रत्युद्गतमिव स्थितं अत्र अभिज्ञानदर्शनानंदबाष्पो जात इत्यर्थः ६२ निर्वाप्येति सकपिः प्रियस्य रामस्य संदेशैर्वाचकैः सीतां निर्वाप्य सुखयित्वा अक्षस्य रावणकुमारस्य वधेनोद्धतो दृप्तः सन् क्षणं सोढुः अरेरिंद्रजितः कर्तुर्निग्रहो बंधो येन सः स्वाख्यं ध रूपो येन स तथोक्तः सन् लंकां पुरीं ददाह भस्मीचकार ६३ प्रत्यभीति· कृती कृतकृत्यः कपिः स्वयमायातं मूर्तिमद्वैदेह्याः हृदयमिव स्थितं तस्या एव प्रत्यभिज्ञानरत्नं च रामाय दर्शयन् ६४ सेति· हृदये वक्षसि न्यस्तस्य मणेरभिज्ञानरत्नस्य स्पर्शेन निमीलितो मोहितः स रामः अविद्यमानः पयोधरसंसर्गः प

तस्यै भर्तुरभिज्ञानमंगुलीयं ददौ हरिः प्रत्युद्गतमिवानुष्णैस्तदानंदाश्रुबिंदुभिः ६२ निर्वाप्य प्रियसंदेशैः सीतामक्षवधोद्धतः सददा
ह पुरीं लंकां क्षणसोढारिनिग्रहः ६३ प्रत्यभिज्ञानरत्नं च रामायादर्शयत्कृती हृदयं स्वयमायातं वैदेह्या इव मूर्तिमत् ६४ स प्रापत्
दयन्यस्तमणिस्पर्शनिमीलितः अपयोधरसंसर्गां प्रियालिंगननिर्वृतिं ६५ श्रुत्वा रामः प्रियोदंतं मेने तत्संगमोत्सुकः महार्ण
वपरिक्षेपं लंकायाः परिखालघुं ६६ स प्रतस्थेऽरिनाशाय हरिसैन्यैरनुद्रुतः न केवलं भुवः पृष्ठे व्योम्नि संबाधवर्त्मभिः ६७ निर्विष्टमु

स्यास्तां तथोक्तां तथाभूतां प्रियाया आलिंगनेन या निर्वृतिरानंदस्तां प्राप ६५ श्रुत्वेति· प्रियायाः उदंतं वार्त्तां उदंतः साधुवार्त्तयोरिति विश्वः श्रुत्वा तस्याः सीतायाः संगमे उत्सुको रामो लंकायाः संबंधी यो महार्णवपरिक्षेपः परिवेषस्तं परिखालघुं दुर्गवेष्टनवत्सुतरं मेने ६६ स इति· केवलमेकं भुवः पृष्ठे भूतले न किंतु व्योम्नि च संबाधवर्त्मभिः संकटगामिभिः हरिसैन्यैः कपिबलैरनुद्रुतोऽन्वितः सन् स रामोऽरिनाशाय प्रतस्थे चचाल ६७ निर्विष्टमिति उदधेः कूले निर्विष्टं तं रामं विभीषणोऽभीपयते विभीषणो रावणानुजो राक्षसः दंत्यादिरयं लक्ष्म्या १२६

बुद्धिं ज्ञानं आविश्य चोदितः प्रणीत इत्यप्रतिपेदे ६८ तस्मै इति राघवस्तस्मै विभीषणाय प्रत्याङ्भ्यां श्रुवः पूर्वस्य कर्त्ता इति संप्रदानत्वाच्चतुर्थी नि
शाचरैश्वर्यं निशाचराधिपत्यं प्रतिजज्ञे प्रतिज्ञातवान् कालेऽवसरे समारब्धाः प्रक्रांताः नीतयः फलं बध्नंति गृह्णंति जनयंतीत्यर्थः खलु ६९ स इति स
रामः लवणांभसि क्षारं अंभो यस्यासौ लवणांभास्तस्मिन् लवणांभसि प्लवगैः प्रयोज्यैः शार्ङ्गिणो विष्णोः स्वप्नाय शयनाय रसातलात्पातालादुन्मग्नमुद्गतं शेषमिव
स्थितं सेतुं बंधयामास ७० तेनेति रामः तेन पथा सेतुमार्गेणोत्तीर्य सागरमिति शेषः पिंगलैः सुवर्णवर्णैः अत एव द्वितीयं हेमप्राकारं कुर्वद्भिरिव स्थितैः वा
नरैः लंकां रोधयामास ७१ रण इति तत्र लंकायां प्लवगानां रक्षसां च भीमो भयंकरः दिग्विजृंभितकाकुत्स्थपौलस्त्ययोः रामरावणयोर्जयघोषणो जयशब्दो

स्नेहाद्राक्षसलक्ष्म्येव बुद्धिमाविश्य चोदितः ६८ तस्मै निशाचरैश्वर्यं प्रतिशुश्राव राघवः काले खलु समारब्धाः फलं बध्नंति नीतयः ६९॥
स सेतुं बंधयामास प्लवगैर्लवणांभसि रसातलादिवोन्मग्नं शेषं स्वप्नाय शार्ङ्गिणः ७० तेनोत्तीर्य पथा लंकां रोधयामास पिंगलैः द्वितीयं
हेमप्राकारं कुर्वद्भिरिव वानरैः ७१ रणः प्रववृते तत्र भीमः प्लवगरक्षसां दिग्विजृंभितकाकुत्स्थपौलस्त्यजयघोषणः ७२ पादपाविद्ध
परिघः शिलानिष्पिष्टमुद्गरः अतिशस्त्रनखन्यासः शैलरुग्णमतंगजः ७३ अथ रामशिरश्छेददर्शनोद्भ्रांतचेतसां॥ ॥ नाम ८

यस्मिन्स तथोक्तो रणः प्रववृते प्रवृत्तः अस्त्रियां समराभीकरणाः कलहविग्रहौ विसमरः ७२ पादपेति किंविधो रणः पादपैर्वृक्षैराविद्धाः भग्नाः परिघा लोहब
द्धकाष्ठानि यस्मिन्स तथोक्तः परिघः परिघातनमित्यमरः शिलाभिर्निष्पिष्टाः चूर्णिताः मुद्गरा अयोघनाः यस्मिन्स तथोक्तः द्रुघणो मुद्गरघनावित्यमरः ।
अतिशस्त्राः शस्त्राण्यतिक्रांताः नखन्यासाः यस्मिन्स तथोक्तः शैलैः रुग्णाः भग्नाः मतंगजा यस्मिन्स तथोक्तः ७३ अथेति अथानंतरं छिद्यते इति च्छे
दः खंडः शिरसः छेद इति विग्रहः रामशिरश्छेदस्य विद्युज्जिह्वाख्यराक्षसमायानिर्मितस्य दर्शनेनोद्भ्रांत

Digitized by Sarayu Foundation Trust, Delhi and eGangotri

चेतनां गतसंज्ञां सीतां त्रिजटा नाम काचित्सीतापक्षपातिनी राक्षसी मायाकल्पितं न त्वेतत्सत्यमिति शंसंती ब्रुवाणा शापूर्वापनोर्निस्वमिति नित्यनुमागमः समजी
वयत् ७४ काममिति॰ सा सीता मे नाथः जीवतीति हेतोः शुचं शोकं कामं विजहौ किंतु प्राक्पूर्वमस्य नाथस्यांतं नाशं सत्यं यथार्थं मत्वा जीविता कर्तरि क्तः जीवि
तवत्यस्मीति हेतोर्लज्जिता लज्जावती कर्तरि क्तः दुःखादपि दुःसहो लज्जाभर इति भावः ७५ गरुडेति गरुडस्य तार्क्ष्यः तस्यापातेनागमनेन विश्लिष्टं शिथिलं मेघ
नादस्य इंद्रजितो अस्त्रेण नागपाशेन बंधनं यस्मिन्स तथोक्तः क्षणक्लेशः दाशरथ्योः रामलक्ष्मणयोः स्वप्नवृत्त इव स्वप्नावस्थानुभूत इवाभवत् ७६ तत इ
ति॰ ततः पौलस्त्यो रावणः शक्त्या कासूनामकेनायुधेन कासूसामर्थ्ययोः शक्तिरित्यमरः लक्ष्मणं वक्षसि विभेद विदारयामास एवं रामस्त्वनाहतोपि अप्रत्ह

सीतां मायेति शंसंती त्रिजटा समजीवयत् ७४ कामं जीवति मे नाथ इति सा विजहौ शुचं प्राङ्मत्वा सत्यमस्यांतं जीवितास्मीति लज्जि
ता ७५ गरुडापातविश्लिष्टमेघनादास्त्रबंधनः दाशरथ्योः क्षणक्लेशः स्वप्नवृत्त इवाभवत् ७६ ततो बिभेद पौलस्त्यः शक्त्या व
क्षसि लक्ष्मणं रामस्त्वनाहतोप्यासीद्धृदि दीर्णहृदयः शुचा ७७ स मारुतिसमानीतमहौषधिहतव्यथः लंकास्त्रीणां पुनश्चक्रे
विलापाचार्यकं शरैः ७८ स नादं मेघनादस्य धनुश्चेंद्रायुधप्रभं मेघस्येव शरत्कालो न किंचित्पर्यशेषयत् ७९ कुंभकर्णः कपीं

तोपि शुचा शोकेन विदीर्णहृदय आसीत् ७७ स इति॰ स लक्ष्मणो मारुतिना मरुत्सुतेन हनुमता आनीतया महौषध्या संजीविन्या (द्रेण तुल्यावस्थः
हृतव्यथः सन् पुनः शरैः लंकास्त्रीणां विलापे परिदेवने विलापः परिदेवनमित्यमरः आचार्यकं आचार्यकर्म योपधाद्गुरूपोत्तमाद्वुञ् इति वुञ् चक्रे पुनर
पि राक्षसान्जघानेति व्यज्यते ७८ स नादमिति स लक्ष्मणः शरत्कालो मेघस्येव मेघनादस्येंद्रजितो नादं वान्यत्र गर्जितं चेंद्रायुधप्रभं शक्रधनुष्प्रभं धनु
श्च किंचिदल्पमपि न पर्यशेषयन्नवशेषितवान्नवधीदित्यर्थः ७९ कुंभकर्ण इति॰ कपींद्रेण सुग्रीवेण स्वसुः शूर्पणखायाः तुल्यावस्थो नासाकर्णच्छेदेन

Digitized by Sarayu Foundation Trust, Delhi and eGangotri

सदृशः कृतः कुंभकर्णः टंकेन शिलाभेदकशस्त्रेण छिन्नामनःशिलारक्तवर्णधातुविशेषो यस्य स तथोक्तः टंकः पाषाणभेदनः धातुर्मनःशिलाद्यद्रेरिति चाम
रः शृंगी शिखरीव रामं रुरोध ८० अकाल इति प्रियस्वप्नः दृष्टनिद्रोऽनुजः भवान् वृथा भ्रात्रा रावणेनाकाले बोधितः तीवासौ कुंभकर्णः रामेषुभिर्दीर्घनिद्रां मरणं प्रवे
शितो गमितः यथा लोकेषु दृष्टवस्तुविनाशाद्दुःखितस्य न तोपि भूयिष्ठमुपपद्यते न तद्वदिति भावः ८१ इतराणीति इतराणि रक्षांस्यपि वानरकोटिषु समरो
त्थानि रजांसि तेषां रक्षसां शोणितनदीषु रक्तप्रवाहेषु इव पेतुः निपत्य मृतानीत्यर्थः ८२ निर्ययाविति अथ पौलस्त्यो रावणोऽद्य जगत् अरावणं रावण
भूयं अरामं रामभूयं च भवेदिति निश्चितवान् कर्त्तरि क्तः विजयमरणयोरन्यतरं निश्चितवान् पुनर्युद्धाय मंदिरान्निर्ययौ जगाम ८३ राममिति पादाभ्या

रुरोध रामं शृंगीव टंकच्छिन्नमनःशिलः ८० अकाले बोधितो भ्रात्रा प्रियस्वप्नो वृथा भवान् रामेषुभिरितीवासौ दीर्घनिद्रां प्रवे
शितः ८१ इतराण्यपि रक्षांसि पेतुर्वानरकोटिषु रजांसि समरोत्थानि तच्छोणितनदीष्विव ८२ निर्ययावथ पौलस्त्यः पुनर्युद्धा
य मंदिरात् अरावणमरामं वा जगदद्येति निश्चितः ८३ रामं पदातिमालोक्य लंकेशं च वरूथिनं हरियुग्मं रथं तस्मै प्रजिघाय पु
रंदरः ८४ तमाधूतध्वजपटं व्योमगंगोर्मिवायुभिः देवसूतभुजालंबी जैत्रमध्यास्त राघवः ८५॥ ९ मतनीतिपदातिः तं पादचारिणं

रामं वरूथो रथगुप्तिः रथगुप्तिर्वरूथो नेत्यमरः अत्र वरूथशब्देन रथो लक्ष्यते वरूथिनं रथिनं लंकेशं चालोक्य पुरंदरः इंद्रः युग्मं वहंतीति युग्याः
रथ्याश्वः तद्वहति रथयुगप्रासंगमिति यत्प्रत्ययः हरियुग्यं कपिलवर्णाश्वं हरिर्नाकपिले त्रिषु इत्यमरः रथं तस्मै रामाय प्रजिघाय प्रहितवान् ८४
तमिति राघवो व्योमगंगोर्मिवायुभिराधूतध्वजपटं मार्गवशादिति भावः जेतैव जैत्रो जयनशीलः स जैत्रं जेतृशब्दात् तृन्नंतात् प्रज्ञादिभ्यश्चेति
स्वार्थेऽण्प्रत्ययः तं रथं देवसूतभुजालंबी मातलिहस्तावलंबी सन् अध्यास्त अधिष्ठितवान् आसेर्लङ् ८५ ॥ ८५ ॥

मातलिरिति॰ मातलिरिंद्रसारथिः माहेंद्रं तनुःछाद्यते ऽनेनेति तनुच्छदो वर्मपुंसि संज्ञायां घः प्रायेणेति घः तं तस्य रामस्यामुमोचासंजयामास यत्र
तनुच्छदे सुरद्विषामस्त्राणि उत्पलदलानां क्लैव्यं नपुंसकत्वं तदापुः ८६ अन्योन्येति॰ चिरादन्योन्यदर्शनेन प्राप्तविक्रमावसरं रामरावणयोः वैरं
युद्धं योधनं चरितार्थं सफलमभवदिति चप्राक्पराक्रमावसरदौर्बल्याद्धि फलस्यास्य तल्लाभात्सा फल्यमुत्प्रेक्ष्यते रामरावणयोर्युद्धं रामरावणयोरि
विति रामायणस्मरणात् ८७ भुजेति यथाभूतःपूर्वं यथापूर्वः सहसुप्सुपेति समासः यथापूर्वो न भवतीत्ययथापूर्वः निहतबंधुत्वाद्ध्रस्वःपरिवार शू
न्य इत्यर्थः अतएवैकोपि सन्धनदानुजो रावणः भुजाश्च मूर्द्धानश्चोरश्च पादाश्च भुजमूर्द्धोरुपादास्तैरुत्कृष्टगत्वाद्द्वहैकवद्भावः तस्य बाहुल्याद्बहुत्वाद्धेतोः

मातलिस्तस्य माहेंद्रममुमोचतनुच्छदं यत्रोत्पलदलक्लैव्यमस्त्राण्यापुःसुरद्विषाम् ८६ अन्योन्यदर्शनप्राप्तविक्रमावस
रं चिरात् रामरावणयोर्वैरं चरितार्थमिवाभवत् ८७ भुजमूर्द्धोरुबाहुल्यादेकोपि धनदानुजः ददृशेऽयथापूर्वो मातृवंश इ
वस्थितः ८८ जेतारं लोकपालानां स्वमुखैरर्चितेश्वरं राममुत्तुलितकैलासमरातिं बहुमन्यत ८९ तस्य स्फुरति पौलस्त्यःसीतासं
गमशंसिनि निचखानाधिकक्रोधः शरं सव्ये

नद्बहुत्वे यादवः दशास्यो विंशतिभुजश्च तुल्यान्मातृमंदिरे इति मातृवंशो मातुःसंबंधिनि
वंशा वर्गे स्थित इव ददृशे दृष्टः हि वंशो वेणौ कुले वर्गे इति विश्वः अत्र रावणमातुः केशिन्याः रक्षोजातित्वात्तद्वर्गे रक्षोवर्ग इति लभ्यते अतश्चैको
पि अनेकरक्षःपरिवृत इवालक्ष्यत इत्यर्थः ८८ जेतारमिति॰ लोकपालानामिंद्रादीनां जेतारं कर्तृकर्मणोः कृतीति कर्मणि षष्ठी स्वमुखैःशिरोभि
रर्चितेश्वरं तुलितकैलासं उत्क्षिप्तरुद्राद्रिं तमेवं शौर्यधैर्यसत्वसंपन्नं महावीर्यमरातिं शत्रुं रामो गुणग्राहित्वाज्जेतव्योत्कर्षस्य जेतुःस्वोत्कर्षहे १२८
तुत्वाच्च बहुमन्यत साधुमहद्विक्रमस्थायं पर्याप्तो विषय इति बहुमानमकरोदित्यर्थः बह्विति क्रियाविशेषणं ८९ तस्येति॰ अधिकक्रोधः पौलस्त्यःस्फुर

तिसंरमानेः तदेव सीतासंगमशंसि नितस्य रामस्य सव्य इतरो यस्मात् सव्येतरे दक्षिणेन बहुव्रीहाविति इतरशब्दस्य सर्वनामसंज्ञाप्रतिषेधः भु
जे शरं निचखान निखातवान् ९० रावणस्येति रामेणास्तः क्षिप्तः आशुगो बाणः विश्रवसोऽपत्यं पुमान् रावणः विश्रवःशब्दादपत्येऽर्थेऽण् प्रत्यये
सति विश्रवसो विश्रवणरवणौ विति रवणादेशः तस्य रावणस्यापि हृदयं वक्षो भित्त्वा उरगेभ्यः पातालवासिभ्यः प्रियमाख्यातुमिव भुवं विवेश ९१
वचसेति वाक्यं वचसैवास्त्रं अस्त्रेण निघ्नतोः प्रतिकुर्वतोः तयोः रामरावणयोः वादिनोः कथकयोरिवान्योन्यविषये जयसंरंभो ववृधे ९२ विक्र
मेति जयश्रीर्विक्रमस्य व्यतिहारेण पर्यायकरणेन तयोर्द्वयोरप्यंतरा अव्ययमेतत् वेदिर्वेद्याकारा भित्तिः मत्तवारणयोरिव सामान्या साधार

रावणस्यापि रामास्तो भित्त्वा हृदयमाशुगः विवेश भुवमाख्यातुमुरगेभ्य इव प्रियम् ९१ वचसैव तयोर्वाक्यमस्त्रमस्त्रेण नि
घ्नतोः अन्योन्यजयसंरंभो ववृधे वादिनोरिव ९२ विक्रमव्यतिहारेण सामान्याऽभूद्द्वयोरपि जयश्रीरंतरा वेदिर्मत्तवारण
योरिव ९३ कृतप्रतिकृतप्रीतैस्तयोर्मुक्तां सुरासुरैः परस्परशरव्राताः पुष्पवृष्टिं न सेहिरे ९४ अयःशंकुचितां रक्षः शतघ्नीमथ
शत्रवे हृतां वैवस्वतस्येव कूटशाल्मलिमक्षिपत् ९५॥ ११ णी अभूत् नत्वन्यतरनियतेत्यर्थः अत्र मत्तवारणयोरित्यत्र अंतरांतरे

णयुक्त इति द्वितीया न भवतीति अंतराशब्दस्योक्तरीत्याऽन्यत्रान्वयात् मध्ये कामपि भित्तिं कृत्वा गजाः योधयंतीति प्रसिद्धिः ९३ कृतेति स्वय
मस्त्रप्रयोगः कृतं प्रतिकृतं परकृतप्रतीकारः ताभ्यां प्रीतैः सुरासुरैर्यथासंख्यं तयोः रामरावणयोर्मुक्तां पुष्पवृष्टिं द्वयीमिति शेषः परस्परं शरव्रा
ताः न सेहिरे अहमेवालं किं त्वयेति चांतराल एव इतरेतरवाय्यवृष्टिरितरेतरपुष्पवृष्टिमवारयन्नित्यर्थः ९४ अयइति रक्षो रावणः अयसः शंकु
भिः कीलैः चितां कीर्णां शतघ्नीं शतघ्नी चतुस्ताला लोहकंटकसंचिता यष्टिरिति केशवः हृतां विजयलक्ष्मीं वैवस्वतस्यांतकस्य कूटशाल्मलिरिति भृत्य

Digitized by Sarayu Foundation Trust, Delhi and eGangotri

र·टी· स्यावैवस्वतगदायाः गोणीसंज्ञाकूटशाल्मलिर्नाममूलप्रकृतिः कंटकीरक्षविशेषः रोचनः कूटशाल्मलिरित्यमरः तस्या दृश्यंगदायाः अयः संकुचितेस
स·१२ नुसंधेयं ९५ राघवइति· राघवोरथमप्राप्तांताशातघ्नींसुरद्विषांरक्षसांआशांविजयतृष्णांच आशातृष्णादिशोः प्रोक्तेतिविश्वः अर्द्धचंद्रस्वमु
१२९ खंयेषांतैर्बाणैः कदलीवत्सुखंयथातथाचिच्छेद अथवा कदल्यामिवसुखंअक्लेशोयस्मिंकर्मणितदितिविग्रहः ९६ अमोघमिति· एकोद्वितीयः
धनुर्द्धरोरामः प्रियायाः शोकएवशल्यंतस्यनिष्कर्षणं उद्धारकंयदौषधंतदमोघंब्राह्मंब्रह्मदेवताकं अस्त्रमभिमंत्रितंबाणं अस्मैरावणायतद्वधार्थ
मित्यर्थः धनुषिसंदधे ९७ तदिति· व्योम्निशतधाभिन्नंप्रसृतंदीप्तिमंतिमुखानियस्यतद्ब्रह्मास्त्रंकरालंभीषणंवाफणामंडलंयस्यततथोक्तं करा

राघवोरथमप्राप्तांतामाशांचसुरद्विषां अर्द्धचंद्रमुखैर्बाणैश्चिच्छेदकदलीसुखं ९६ अमोघंसंदधेचास्मैधनुष्येकधनुर्द्धरः ब्रा
ह्ममस्त्रंप्रियाशोकशल्यनिष्कर्षणौषधं ९७ तद्व्योम्निशतधाभिन्नंददृशेदीप्तिमन्मुखं वपुर्महोरगस्येवकरालफणमंडलं ९८।
तेनमंत्रप्रयुक्तेननिमेषार्द्धादपातयत् सरावणशिरःपंक्तिमज्ञातव्रणवेदनां ९९ बालार्कप्रतिमेवाप्सुवीचिभिन्नापतिष्यतः ररा
जरक्षःकायस्यकंठच्छेदपरंपरा १०० मरुतांपश्यतांतस्यशिरांसिपतितान्यपि मनोनातिविशश्वासपुनस्संधानशंकिनां १०१

लोदंतुरंतुंगंकरालोभीषणोपिचेतिविश्वः महोरगस्यशेषस्यवपुरिवददृशेदृष्टं ९८ तेनेति सरामोमंत्रप्रयुक्तेनतेनास्त्रेणाज्ञातव्रणवेदनांअतिशैघ्या
दननुभूतव्रण दुःखांरावणशिरःपंक्तिनिमेषार्द्धादपातयत् पातयामास ९९ बालेति· पतिष्यतः आसन्नपातस्यरक्षःकायस्यरावणकलेवरस्य
छिद्यतेइतिच्छेदाः खंडाः कंठानांछेदाः तेषांपरंपरापंक्तिर्वीचिभिर्भिन्नानानाकृता अप्सुबालार्कस्यप्रतिबिंबमिवरराज अर्कस्यबालविशेषणमा
रुण्यार्थमित्यर्थः १०० मरुतामिति· पतितानितस्यरावणस्यशिरांसिपश्यतामपिपुनःसंधानशंकिनांपूर्वंतथादर्शनादितिभावः मरुताममराणांमरुतो

अथेति· अथमदेन गजगंडसंचारसंक्रांतेन गुरुपक्षैः भारायमाणपक्षैरलिवृंदैर्लोकपालद्विपानां ऐरावतादीनां गगनवर्त्तिनां गंडभित्तीर्विहायानुगतं
सुरभिगंधि सुरभिश्च पंके स्वर्गजातीफलवसंतयोः गंधोपलेसौरभेय्यां सल्लकीमातृभेदयोः सुगंधौ च मनोज्ञे च वाच्यवत्सुरभिस्मृतमिति विश्वः सुरविमु-
क्तं पुष्पवर्षं उपनत आसन्नोमणिबंधोराज्याभिषेकसमयोभावीयस्य तस्मिन् पौलस्त्यशत्रोः रामस्य मूर्द्धि पपात इदमेव राज्याभिषेकसूचकमिति भावः
१०२ यंतेति· हरेरिंद्रस्य यंता मातलिः सपदि संहृतकार्मुकज्यमनुष्ठितदेवकार्यं रावणवधरूपं येन तं राघवं आपृच्छ्य साधुयामीत्यामंत्र्य नामांकैर्नामाक्षरचिन्हैः
रावणशरैरंकिता चिह्निता केतुयष्टिर्ध्वजदंडो यस्य तं हरीणां वाजिनां सहस्रेण युज्यत इति हरिसहस्रयुक् यमानिलेंद्रचंद्रार्कविष्णुसिंहांशुवाजिषु हरिरिस्त्रि

अथ मदगुरुपक्षैर्लोकपालद्विपानामनुगतमलिवृंदैर्गंडभित्तीर्विहाय उपनतमणिबंधे मूर्द्धि पौलस्त्यशत्रोः सुरभि सुरविमुक्तं पुष्प-
वर्षं पपात १०२ यंता हरेः सपदि संहृतकार्मुकज्यमापृच्छ्य राघवमनुष्ठितदेवकार्यं नामांकरावणशरांकितकेतुयष्टिमूर्द्ध्वं रथं हरिस-
हस्रयुजं निनाय १०३ रघुपतिरपि जातवेदोविशुद्धां प्रगृह्य प्रियां प्रियसुहृदि विभीषणे संक्रमय्य श्रियं वैरिणः रविसुतसहितेन ते-
नानुयातः ससौमित्रिर्भुजविजितविमानरत्नाधिरूढः प्रतस्थे पुरीं १०४॥ ९ मयन्त्राप्यमरः रथमूर्द्ध्वं निनाय नीतवान् १०३ रघुपतिरिति·
रघुपतिरपि जातवेदसाग्निना विशुद्धां ज्ञातशुद्धिं प्रियां सीतां प्रगृह्य स्वीकृत्य प्रियसुहृदि विभीषणे वैरिणो रावणस्य श्रियं राज्यलक्ष्मीं संक्रमय्य सं-
गतां कृत्वा गमेर्ण्यंतात् ल्यप् मितां ह्रस्वः इति ह्रस्वः ल्यपि लघुपूर्वादिति णेरयादेशः रविसुतसहितेन सुग्रीवयुक्तेन ससौमित्रिणा सलक्ष्मणेन तेन वि-
भीषणेनानुयातोऽनुगतः सन् विमानेरत्नमिव विमानरत्नमित्यर्थः उपमितमित्युपमितसमासः भुजविजितं यद्विमानरत्नं पुष्पकं तदारूढः सन् पुरीं
मयोध्यां प्रतस्थे समवप्रविभ्यः स्थ इत्यात्मनेपदं अत्र प्रस्थानक्रियाया अकर्मकत्वेपि तदंगभूतोद्देश्यक्रियापेक्षया सकर्मकत्वं अस्ति च धातुनां क्रियां

Digitized by Sarayu Foundation Trust, Delhi and eGangotri

मिधायकत्वं यथा कुसूलान्मचनीयाद्वा वा दानक्रियागर्भः पाको विधीयते इति १०४ इति श्रीमल्लिनाथविरचितायां संजीविनीसमाख्यायां द्वादशसर्गः १२
श्रीगणेशाय नमः त्रैलोक्यशल्योद्धरणाय सिंधोश्चकारवंधंकरणं रिपूणां पुष्पप्रणामं भुवनाभिरामं रामं विरामं विपदामुपासे १ अथेति अथ ज्ञस्थानानां
तरंजानातीति ज्ञः इगुपधेत्यादिना कः प्रत्ययः गुणानां ज्ञः गुणज्ञः रत्नाकरादिवर्ण्यगुणाभिज्ञः इत्यर्थः सरामाभिधानो हरिः विष्णुः शब्दः गुणो यस्य तच्छब्द
गुणं आत्मनः स्वस्य पदं विष्णुपदमाकाशमित्यर्थः वियद्विष्णुपदमित्यमरः शब्दगुणमाकाशमिति तार्किकाः विमानेन पुष्पकाख्येन विगाहते विगाहिष्य
ते सौ विगाहमानः प्रविशमानः सन् रत्नानां माणिक्यमुक्तानां आकरं खनिं रत्नाकरं समुद्रं वीक्ष्य विलोक्य मिथो रहसि मिथोन्योन्यं रहसीत्यमरः जायां पत्नीं सी

इति श्रीरघुवंशे महाकाव्ये कालिदासकृतौ रावणवधो नाम द्वादशः सर्गः १२ ॥ श्रीगणेशाय नमः अथात्मनः शब्दगुणं गुणज्ञः
पदं विमानेन विगाहमानः रत्नाकरं वीक्ष्य मिथः स जायां रामाभिधानो हरिरित्युवाच १ वैदेहि पश्याऽऽमलयाद्विभक्तं मत्सेतुना फेनि
लमंबुराशिं छायापथेनेव शरत्प्रसन्नमाकाशमाविष्कृतचारुतारं २ गुरोर्यियक्षोः कपिलेन मेध्ये रसातलं संक्रमिते तुरंगे ॥

तामिति वक्ष्यमाणप्रकारेणोवाच उक्तवान् रामस्य हरिरित्यभिधानं निरंकुशमहिमद्योतनार्थं मिथो ग्रहणं गोष्ठीविश्रंभसूचनार्थं इत्यनुक्तं प्राक् १
वैदेहीति हे वैदेहि हे सीते आमलयात् मलयनामकपर्वतपर्यंतमित्यर्थः पंचम्यपाङ्परिभिरिति सूत्रेण पंचमी पदद्वयं चैतत् मत्सेतुना विभक्तं मम
सेतुना द्विधाकृतं अत्यायतसेतुना इत्यर्थः हर्षातिरेकाच्च मद्ग्रहणमिति भावः फेनिलं फेनवंतं फेनादिलच्चेति इलच् प्रत्ययः क्षिप्रकारी चाहमिति भावः
अंबुराशिं समुद्रं छायापथेन स्वातीपथेन विभक्तं शरत्प्रसन्नं आविष्कृतचारुतरं आकाशमिव पश्य मम महान् प्रयत्नः प्रयासः सफल इत्यर्थः इति हृदयं
छायापथो नाम ज्योतिश्चक्रमध्यवर्ती कश्चित्तिरश्चीनो वकाशः २ गुरोरिति यियक्षोः यष्टुमिच्छोः यजेः सन्नंतादुप्रत्ययः गुरोः सगरस्य मेध्ये अश्व

मेधार्हे तुरंगे कपिलेन मुनिना रसातलं पातालं संक्रमिते सति तदर्थमुर्वीमवदारयद्भिः नः अस्माकं पूर्वैः वृद्धैः सगरसुतैः पूर्वैः पूर्वजैः अयं अंबुधिः समुद्रः परिवर्द्धितः किल सैतिह्ये अतो नः पूज्यः इति भावः यद्यपि तुरंगहारी शतक्रतुस्तथापि तस्य कपिलसमीपे दर्शनात्स एवेति तेषां भ्रांतिः तन्मत्यैव कविना कपिलेनेति निर्दिष्टं ३ गर्भमिति· अर्कमरीचयोऽस्मात्ध्येरणादानाद्गर्भं मर्म्मयं दधति वृष्ट्यर्थमित्यर्थः अयमर्थो दशमसर्गे ताभिर्गर्भमित्यत्र स्पष्टीकृतः अयं लोकोपकारीति भावः अत्राप्यब्धौ वसूनि धनानि धने रत्ने वसु स्मृतमिति विश्वः विवृद्धिमश्नुवते प्राप्नुवंतीति संपन्नत्वनिरित्यर्थः असौ आपः इंधनं दाह्यं यस्य तदाहकं वह्निं बिभर्ति अपकारेप्याश्रितं न त्यजतीति भावः अनेन प्रल्हादनं ज्योतिश्चंद्रो जनि जनितं जने एयेतात्कर्मणि

तदर्थमुर्वीमवदारयद्भिः पूर्वैः किलायं परिवर्द्धितो नः ३ गर्भं दधत्यर्कमरीचयोऽस्माद्विवृद्धिमत्राश्नुवते वसूनि अ
विंधनं वह्निमसौ बिभर्ति प्रल्हादनं ज्योतिरजन्यनेन ४ तां तामवस्थां प्रतिपद्यमानं स्थितं दश व्याप्य दिशो महिम्ना विष्णो
रिवास्यानवधारणीयमीदृक्तया रूपमियत्तया वा ५ नाभिप्ररूढांबुरुहासनेन संस्तूयमानः प्रथमेन धात्रा अमुं युगांतो
चितयोगनिद्रः संहृत्य लोकान्पुरुषोधिशेते ६ ॥

९ लुङ् सौम्यइति भावः ४ तां तामिति तां तामनेकां नित्यवीप्सयोरिति वीप्सायां द्विरुक्तिः अवस्थामसौ भाग्यवस्थां विष्णुपक्षे सत्वाद्यवस्थां प्रतिपद्यमानं भजमानं महिम्ना दश दिशो व्याप्य स्थितं तिष्ठंतं विष्णोरिवास्य रत्नाकरस्य रूपं स्वरूपं उक्तरीत्या बहुप्रकारत्वाद्व्यापकत्वाच्च ईदृक्तया इयत्तया वा प्रकारतः परिमाणतश्च अनवधारणीयं दुर्निरूपम् ५ नाभीति· युगांते कल्पांते उचिता परिचिता योगः स्वात्मनिष्ठैव निद्रा वनिद्रा यस्य स पुरुषो विष्णुर्लोकान्संहृत्य नाभ्यां प्ररूढं यदंबुरुहं तदासनेन तन्नाभिकमलाश्रयेण प्रथमेन धात्रा ब्रह्मादीनामपि स्रष्ट्रा पित्रा महेन संस्तूयमानः सन् अमुमधिशेते अमुष्मिन् शेते इत्यर्थः कल्पांतेप्यसीतीति भावः ६ ॥ ॥ ॥ ॥

पक्षेति॰ पक्षच्छिदा गोत्रभिदा इंद्रेण उभयत्र सत्सु द्विषेत्यादिना क्विप् आत्तगंधाः हृतगर्वाः अभिभूता इत्यर्थः गंधो गंधक आमोदे लेशे संबंधगर्वयोरिति वि
श्वः आत्तगंधोऽभिभूतः स्यादित्यमरः महीं धारयंतीति महीध्राः पर्वताः मूलविभुजादित्वात्कः प्रत्ययः शतशः शरण्यं रक्षणसमर्थमेनं समुद्रं परेभ्यः शत्रुभ्यः
उपप्लविनो भयवंतो नृपाः धर्मोत्तरं धर्मप्रधानं मध्यमं मध्यमभूपालमिव आश्रयंते अरेश्च विजिगीषोश्च मध्यमो भूम्यनंतर इति कामंदकः आर्त्तवं धुरिति
भावः ७ रसातलादिति॰ आदिभवेन पुंसा आदिवराहेण रसातलात् प्रयुक्तो हृहनक्रियायाः कृतोद्धरणक्रियायाः विवाहक्रिया च व्यज्यते भुवो भूदेवतायाः
प्रलयरुद्धमस्याब्धेः अच्छं अंभः मुहूर्त्तं वक्त्राभरणं लज्जारक्षणार्थं मुखावगूहनं वभूव तदुक्तं उद्धृतासि वराहेण कृष्णेन शतबाहुना इति ८ मुखार्पणेति

पक्षच्छिदा गोत्रभिदात्तगंधाः शरण्यमेनं शतशो महीध्राः नृपा इवोपप्लविनः परेभ्यो धर्मोत्तरं मध्यममाश्रयंते ७ रसातलादादि
भवेन पुंसा भुवः प्रयुक्तोद्वहनक्रियायाः अस्याच्छमंभः प्रलयप्रवृद्धं मुहूर्त्तवक्त्राभरणं बभूव ८ मुखार्पणेषु प्रकृतिप्रगल्भाः स्वयं तरं
गाधरदानदक्षः अनन्यसामान्यकलत्रवृत्तिः पिबत्यसौ पाययते च सिंधूः ९ ससत्वमादाय नदीमुखांभः संमीलयंतो विवृताननत्वात् अ
मी शिरोभिस्तिमयः सरंध्रैरूर्ध्वं वितन्वंति जलप्रवाहान् १०॥ ९ अन्येषां पुंसां सामान्या साधारणा न भवतीत्यनन्यसामान्या कलत्रे प्रवृत्तिर्भो
गो यस्य स तथोक्तः इममेवार्थं प्रतिपादयति तरंगा एवाधरास्तस्य दाने समर्पणे दक्ष असौ समुद्रो मुखार्पणेषु प्रकृत्या सख्यादिप्रेषणं विना प्रगल्भाः
धृष्टाः सिंधूः नदीः सिंधुः समुद्रे नद्यां वेति विश्वः स्वयं पिबति पाययते च तरंगाधरमिति शेषः नयादृश्यादृश्येत्यादिना पिबतेर्ण्यंतान्निसंपरस्मैपदनिषे
धः गतिबुद्धीत्यादिना सिंधूनां हि कर्मकत्वं दंपत्योर्युगपत्परस्पराधरपानमस्य अनन्यसाधारणमिति भावः ९ ससत्वमिति॰ अमी तिमयो मत्स्यविशे
षाः तदुक्तं मनुना अस्ति मत्स्यस्तिमिर्नाम शतयोजनमायत इति विवृताननत्वाद्व्यात्तमुखत्वाद्धेतोराननानि विवृत्तानीत्यर्थः ससत्वं मत्स्यादिप्राणि॰

सहितं नदीमुखांभः आदाय संमीलयंतः चंचुपुटानि घटयंतः सरंध्रैः शिरोभिः जलप्रवाहान् ऊर्द्ध्वं वितन्वंति जलयंत्रक्रीडासमाधिर्व्यज्यते १० मा
तंगेति· सहसोत्पतद्भिर्मातंगनक्रैः मातंगाकारैर्ग्राहैः द्विधा भिन्नान् समुद्रफेनान् पश्य ये फेना एषां जलमातंगनक्राणां कपोलेषु संसर्पितया संसर्प
णेन हेतुना कर्णेषु क्षणं व्याप्य चामरतां व्रजन्ति गच्छंति ११ वेलेति· वेलानिलाय वेलानिलं पातुमित्यर्थः क्रियार्थोपपदेत्यादिना चतुर्थी प्रसृतानि
र्गतामहोर्मीणां विस्फूर्जथुः उद्रेकः द्विनोः थुजित्यथुच्प्रत्ययः तस्मात् निर्विशेषाद्विग्रहभेदाः एते भुजंगाः सूर्यांशुसंपर्कसमृद्धरागैः प्रवृद्धकांति

मातंगनक्रैः सहसोत्पतद्भिर्भिन्नान् द्विधा पश्य समुद्रफेनान् कपोलसंसर्पितया य एषां व्रजंति कर्णक्षणचामरत्वं ११ वे
लानिलाय प्रसृता भुजंगा महोर्मिविस्फूर्जथुनिर्विशेषाः सूर्यांशुसंपर्कसमृद्धरागैर्व्यज्यंत एते मणिभिः फणस्थैः १२ नवो
धरस्पर्द्धिषु विद्रुमेषु पर्यस्तमेतत्सहसोर्मिवेगात् ऊर्द्ध्वांकुरप्रोतमुखं कथंचित् क्लेशादपक्रामति शंखयूथं १३ प्रवृत्तमात्रेण
पयांसि पातुमावर्त्तवेगाद्भ्रमता घनेन आभाति भूयिष्ठमयं समुद्रः प्रमथ्यमानो गिरिणेव भूयः १४ दूरादयश्चक्रनिभस्य तन
न्वी तमालतालीवनराजिनीला ॥ १ भिः फणस्थैर्मणिभिर्व्यज्यंते उन्नीयंते १२ नवेति· नवाधरस्पर्द्धिषु अधरसदृशेषु इत्यर्थः विद्रुमे
षु प्रवालेषु सहसोर्मिवेगात् पर्यस्तं प्रक्षिप्तं ऊर्द्ध्वांकुरैः विद्रुमप्रवालप्ररोहैः प्रोतमुखं स्यूतवदनमेतत् शंखानां यूथं वृंदं कथंचित् क्लेशादपक्राम
ति विलंबादपसरतीत्यर्थः १३ प्रवृत्तेति पयांसि पातुं प्रवृत्त एव प्रवृत्तमात्रः न तु पीतवान् तेन आवर्त्तवेगात् स्यादावर्त्तोंभसां भ्रमः इत्यमरः भ्रम
ता घनेनायं समुद्रो भूयः पुनरपि गिरिणा मंदरेण प्रमथ्यमान इव भूयिष्ठं अत्यंतमाभाति १४ दूरादिति· अयश्चक्रनिभस्य लवणांबुराशेः
दूरात्तन्वी अणुत्वेनावभासमाना तमालतालीवनराजिभिर्नीला वेला तीरभूमिर्द्धाराणि वद्धा चक्राश्रिताकलंकलेखेव मालिन्यलेखेव ।

Digitized by Sarayu Foundation Trust, Delhi and eGangotri

मालिन्यरेखातुकलंकलंकमाहुरितिरंडिमते १५ वेलानिल इति· हे आयताक्षि वेला स्यात्तीरनीरयोरिति विश्वः वेलानिलः केतकरेणुभिस्ते आ
ननं संभावयतिकि मर्थमित्यपेक्षायामुत्प्रेक्ष्यते बिंबाधरे बद्धतृष्णं मां मंडनेनाभरणक्रियया कालहानिर्विलंबस्तस्या अक्षममसहमानं कर्मणि ष
ष्ठी कालहानेः अक्षममसहमानं वेत्तीव किंनो चेत्कथं संभावयेदित्यर्थः १६ एत इति एते वयं सैकते भिन्नाभिः शुक्तिभिः पर्यस्तानि परितः क्षिप्तानि
मुक्तानां पटलानि यस्मिन् तत्तथोक्तं फलैरावर्जिताः आनमिताः पूगमाला यस्मिन् तत्पयोधेः कूलं विमानवेगात् मुहूर्तेन प्राप्ताः १७ कुरुष्वेति· म

आभाति वेला लवणांबुराशेर्धारानिबद्धेव कलंकलेखा १५ वेलानिलः केतकरेणुभिस्ते संभावयत्याननमायताक्षि मामक्षमं
मंडनकालहानेर्वेत्तीव बिंबाधरबद्धतृष्णं १६ एते वयं सैकतभिन्नशुक्तिपर्यस्तमुक्तापटलं पयोधेः प्राप्ता मुहूर्तेन विमानवे
गात्कूलं फलावर्जितपूगमालम् १७ कुरुष्व तावत्करभोरु पश्चान्मार्गे मृगप्रेक्षिणि दृष्टिपातं एषा विदूरीभवतः समुद्रा
त्सकानना निष्पततीव भूमिः १८ क्वचित्पथा संचरते सुराणां क्वचिद्घनानां मरुतां क्वचिच्च यथाविधो मे मनसोऽभिलाषः प्र
वर्तते पश्य तथा विमानं १९ असौ महेंद्रद्विपदानगंधिस्त्रिमार्गगावीचिविमर्दशीतः॥ मणिबंधादाकनिष्ठं करस्य करभो बहिरित्यमरः

करभ इव ऊरू यस्याः सा करभोरूः ऊरूत्तरपदादौपम्ये इत्यूङ्प्रत्ययः तस्याः संबोधनं हे करभोरु मृग इव प्रेक्षत इति विग्रहः हे मृगप्रेक्षिणि तावत्पश्चा
न्मार्गे लंघिताध्वनि दृष्टिपातं कुरुष्व एषा सकानना भूमिः विदूरीभवतः समुद्रात् निष्पततीति निष्क्रामतीव विदूरशब्दाद्धि शेष्यनिघ्नात् च्विप्रत्ययः १८ क्व १३३
चिदिति हे देवि इदं विमानं पुष्पकं मे मम मनसोऽभिलाषो यथाविधः तथा प्रवर्तते पश्य क्वचित्सुराणां यथा संचरते क्वचित् घनानां क्वचित् पतत्रिणां च य
था संचरते समस्तृतीयायुक्तादिति संपूर्वाच्चरतेरात्मनेपदं १९ असाविति· महेंद्रद्विपदानगंधिः ऐरावतमदगंधिः त्रिभिर्मार्गैर्गच्छतीति त्रिमार्गगा

रंगात्तद्धितार्थेत्यादिना उत्तरपदसमासः तस्या वीचीनां विमर्देन संपर्केण शीतः असौ आकाशवायुर्दिनयौवनोत्थान् मध्याह्नसंभवानते मुखे स्वेदलवान्
आचामति हरति अनेन सुरपथसंचारो दर्शितः २० करेणेति· हे चंडि कोपनेवह्वादिभ्यश्चेति ङीष् चंडस्त्वत्यंतकोपन इत्यमरः कुतूहलिन्या विनोदार्थि
न्यात्वया कस्यांचिद्वातायनेगवाक्षे लंबितेनावस्रंसितेन करेण स्पृष्ट उद्भिन्नविद्युद्वलयो घनस्ते द्वितीयमाभरणं वलयमामुंचतीव अर्पयतीव चंडीत्वनेन
कोपशीलत्वात् भीतः क्षिप्रं त्वामुपचरतीति मेघ इति व्यज्यते २१ अमीति· अमी चीरभृतः तापसाः जनस्थानमपोढविघ्नं विगतविघ्नं मत्वाज्ञात्वा समारब्धा
नवोटजाः पर्णशाला येषु तानि पर्णशालोटजोऽस्त्रियामित्यमरः चिरोज्झितानि राक्षसभयादित्यर्थः आश्रममंडलानि आश्रमविभागान् यथास्वं

आकाशवायुर्दिनयौवनोत्थानाचामति स्वेदलवान्मुखे ते २० करेण वातायनलंबितेन स्पृष्टस्त्वया चंडि कुतूहलिन्या आमुंचतीवा
भरणं द्वितीयमुद्भिन्नविद्युद्वलयो घनस्ते २१ अमी जनस्थानमपोढविघ्नं मत्वा समारब्धनवोटजानि अध्यासते चीरभृतो य
थास्वं चिरोज्झितान्याश्रममंडलानि २२ सैषा स्थली यत्र विचिन्वता त्वां भ्रष्टं मया नूपुरमेकमुर्व्यां अदृश्यत त्वच्चरणारविंदवि
श्लेषदुःखादिव बद्धमौनं २३ त्वं रक्षसा भीरु यतोपनीता तं मार्गमेताः कृपया लता मे॥ २१ स्वमनतिक्रम्याध्यासते अधितिष्ठंति २२ सैषे
ति· सा पूर्वानुभूता स्थली एषा दृश्यत इत्यर्थः यत्र स्थल्यां विचिन्वता अन्विष्यता मया त्वच्चरणारविंदेन यो विश्लेषो वियोगस्तेन यद्दुःखं तस्मात् बद्धमौनमिव निःशब्दमु
र्व्यां भ्रष्टमेकं नूपुरं मंजीरं मंजीरो नूपुरोऽस्त्रियामित्यमरः अदृश्यत दृष्टं हे तन्वि सा २३ त्वमिति· हे भीरु भयशीले ऊङुतः इत्यूङ् नदीसंबुद्धिः त्वं रक्षसा रावणेन यतो येन
मार्गेण सार्वविभक्तिकस्तसिः अपनीता अपहृता तं मार्गं वागिंद्रियाभावात् वक्तुमशक्नुवंत्यः एताः लताः वीरुधः आवर्जिताः नमिताः पल्लवा पाणिस्थानी
याः याभिः शाखाभिः स्वाऽवयवभूताभिः कृपया मे दर्शयन् हस्तचेष्टया दर्शयन्नित्यर्थः शाखा वृक्षांतरे भुज इति विश्वः लतादीनामपि ज्ञानमस्त्येव तदुक्तं मनुना

स॰टी॰ संज्ञाभवंसेतेसुखद्ः खसमन्विताइति २४ मृग्यश्चेति दर्भांकुरेषुभक्ष्येषुनिर्व्यपेक्षाः निस्पृहामृग्योमृगानामंगनाश्चउत्तस्मराजीनिविलोचनानिदक्षिण
स॰१९ स्यांदिशिव्यापारयंत्यः सत्यंतवागतिज्ञंगत्यनभिज्ञंमांसमवोधयन् दृष्टिचेष्टयात्वद्गतिमवावोधयन्नित्यर्थः २५ एतदिति मात्यवतोनामगिरेर्वरलेखि
१३३ अभ्रंकषंशृंगमेतत्पुरस्तादग्रे आविर्भवति यत्रशृंगेघनैर्मेघैर्नवंपयोमयात्वद्विप्रयोगेणयदश्रुत्तच्चसमंयुगपद्विसृष्टं मेघदर्शनाद्धर्षत्तुल्यमश्रुमुक्तमितिभा
वः २६ गंधेति यस्मिन्शृंगेधाराभिर्वर्षधाराभिराहतानांपल्वलानांगंधश्च अर्द्धोद्गतकेसरंकादंवं नीपकुसुमंचस्निग्धामधुराः शिखिनां —— शिखिनो

अदर्शयन्वकुमेशाक्कुर्वंत्यः शाखाभिर्यावर्जितपल्लवाभिः २४ मृग्यश्चदर्भांकुरनिर्व्यपेक्षास्तवागतिज्ञंसमवोधयन्मां व्यापारयंत्य
न्योदिशिदक्षिणस्यामुत्पक्ष्मराजीनिविलोचनानि २५ एतद्गिरेर्माल्यवतः पुरस्तादाविर्भवत्यंवरलेखिशृंगं नवंपयोयत्रघनै
र्मयाचत्वद्विः प्रयोगाश्रुसमंविमुक्तं २६ गंधश्चधाराहतपल्वलानांकादंवमर्द्धोद्गतकेसरंच स्निग्धाश्चकेकाः शिखिनांत्वयामे
यस्मिन्विनैतान्यसहान्यभूवन् २७ पूर्वानुभूतंस्मरतांचरात्रौकंपोत्तरंभीरुतवोपगूढं गुहाविसारीण्यतिवाहितानिमयाक
थंचिद्घनगर्जितानि २८ आसारसिक्तक्षितिवाष्पयोगान्मामक्षिणोयत्रविभिन्नकोशैः विडंवमानानवकंदलैस्तेविवाहधूमा

वान्विहितेणेरुस्मर: केकाःत्वयाविनामेअसहानिअसह्यानिवभूवुः नपुंसकमनपुंसकेनेत्यादिनानपुंसकेकशेषः २७ पूर्वेति किंचहेरंभोरुयत्रशृंगे
पूर्वानुभूतंकंपप्रधानंतवोपगूढमुपगूहनंस्मरतामयागुहाविसारीणिघनगर्जितानिकथंचिदतिवाहितानिस्मारकत्वेनोद्दीपकत्वात्क्लेशेनगमितानी १३३
त्यर्थः २८ आसारेति यत्रशृंगेविभिन्नकोशैर्विकसितकुड्मलैः नवकंदलैः कदलीपुष्पैररुणवर्णैः आसारेणधारासंपातेनसिक्तायाः धारासंपातआसा
रइत्यमरः क्षितेर्वाष्पस्यधूमवर्णस्ययोगाद्धेतोर्विडंवमानाअनुक्रियमाणातेविवाहधूमेनारुणलोचनश्री सादृश्यात्स्मर्यमाणेतिशेषः मामक्षिणोत

उपांतेति· उपांतवेतनीरवनोपगूढानिपार्श्वेवंजुलवनच्छन्नानि आलक्ष्य ईषत्पारिप्लवाश्चंचलाः सारसाः येषुतानि अमूनिपंपासलिलानिपंपासरोजलानि दूरादवतीर्णादृष्टिरतएवखेदात्पिवतीवनविहातुमुत्सहतइत्यर्थः ३० अत्रेति· अत्रपंपासरसिअन्योन्यस्मैदत्तोत्पलकेसराणि अवियुक्तानिरथांगनाम्नां द्वंद्वानि चक्रवाकमिथुनानि स्त्रीपुंसौमिथुनंद्वंद्वमित्यमरः तेनवदूरान्तरवर्तिनादूरदेशवर्तिनामयाहेप्रियेसस्पृहंसाभिलाषमीक्षितानितदानींत्वामसाक्षमित्यर्थः ३१ इमामिति· किंचस्तनवदभिरामाभ्यांस्तवकाभ्यां

अभिनम्रांतन्वीमिमांतटाशोकस्यलतांशाखां अतस्त्वन्याश्चितुं

उपांतवानीरवनोपगूढान्यालक्ष्यपारिप्लवसारसानि दूरावतीर्णापिवतीवखेदादमूनिपंपासलिलानिदृष्टिः ३० अत्रोपियु क्तानिरथांगनाम्नामन्योन्यदत्तोत्पलकेसराणि द्वंद्वानिदूरान्तरवर्तिनातेमयाप्रियेसस्पृहमीक्षितानि ३१ इमांतटाशोकलतां चतन्वींस्तनाभिरामस्तवकाऽवनम्रां त्वत्प्राप्तिबुध्यापरिरब्धुकामः सौमित्रिणासाश्रुरहंनिषिद्धः ३२ अमूर्विमानांतरलंबि नीनांश्रुत्वास्वनंकांचनकिंकिणीनां प्रत्युद्व्रजंतीवखमुत्पतंत्योगोदावरीसारसपंक्तयस्त्वाम् ३३ एषात्वयापेशलमध्ययाऽपि घटांबुसंवर्धितबालचूता आल्हादयत्युन्मुखकुम्भसाराद्दृष्टाचिरात्पंचवटीमनोमे ३४॥ ९ त्प्राचत्वमेवप्राप्तेतिभ्रांत्यापरिरब्धुमा

लिंगितुंकामोयस्यसोहंसौमित्रिणालक्ष्मणेनवह्लादिभ्यश्चेतिइत्प्रत्ययः साश्रुः अस्रमश्रुतेनविश्वः निषिद्धः नेयंसीतेतिनिवारितः परिरब्धुकामइत्य त्रतुकाममनसोरपीतिवचनान्मकारलोपः ३२ अमूरिति· विमानस्यांतरेष्ववकाशेषुलंबंतेपात्तासांकांचनकिंकिणीनांस्वनंश्रुत्वास्वयूथशब्दभ्रमात् खमाकाशमुत्पतंत्योऽमूःगोदावरीसारसपंक्तयस्त्वांप्रत्युद्व्रजंतीव ३३ एषेति· पेशलमध्ययापिचारुमध्ययापिचारौदक्षेचपेशलइत्यमरः भारासमया पीत्यर्थः त्वयाघटांबुभिः संवर्द्धिताः बालचूतायस्याः साउन्मुखाः अस्मदभिमुखाः कुम्भसाराः यस्याः साचिरात्दृष्टाएषापंचवटीममनः आल्हादयतिआनं

Digitized by Sarayu Foundation Trust, Delhi and eGangotri

अत्रेति॰ अत्र पंचवट्यां गोदावरी तस्याः समीपे अनुगोदं अनुर्यत्समयेत्यव्ययीभावः मृगयायाः निवृत्तस्तरंगवातेन विनीतखेदः रहो रहसि अत्यंतसंयोगं हित्वा यात्वदुत्संगनिषण्णमूर्द्धा सन् अहं वानीरगृहेषु सुप्तः स्मरामि वाक्यार्थः कर्म सुप्त इति यत्तत्स्मरामीत्यर्थः ३५ भ्रूभेदेति॰ यो मुनिर्भ्रूभेदमात्रेण भ्रूभंगमात्रेणैव नहुषं राजानं मघोनः पदादिंद्रत्वात् प्रभ्रंशयांचकार प्रभ्रंशयति स्म आविलांभः परिशुद्धिहेतोः कलुषजलप्रसादहेतोस्तस्य मुनेरगस्त्यस्यायं शरदि जलप्रसीदतीत्युक्तं प्राक् भूमौ भवो भौमः स्थानपरिग्रह आश्रमोयं दृश्यत इति शेषः भौम इत्यनेन दिव्योप्यस्तीत्युक्तं परिगृह्यत इति परिग्रहः स्थानमेव परिग्रह इति विग्रहः ३६ त्रेतेति॰ अनिंद्यकीर्तेरगस्त्यस्याक्रांतविमानमार्गं हविषः गंधो स्यास्तीति हविर्गंधि त्रेताग्नित्रयं अग्नित्रयमिदं त्रेतेत्यमरः त्रीणि रत्नानि त्रेताः एषो दराहिलादेत्वं त्रेतेत्यग्नयस्त्रेताग्नयः तेषां धूमाग्रमिदं घ्रात्वा आघ्राय रजसो गुणाद्विमुक्तो मे आत्मांतःकरणं लघिमानं लघुत्वं गुणं समश्नुते प्राप्नोति ३७ एतदिति हे मानिनि शातकर्णेः मुनेः संबंधि पंचाप्सर इति प्रसिद्धं पंचाप्सरसो यस्मिन् इति विग्रहः पर्यंते भुवनानि यस्य तत्पर्यन्तवनमेतत् विहारवारि क्रीडासरो विदूरात् मेघांतरालक्ष्यं मेघानां अंतरे मध्ये आलक्ष्यमीषद्दृश्यं आङीषदर्थे अभिव्याप्तौ इत्यमरः इंदुबिंबमिवाभाति ३८ पुरेति॰ पुरा पूर्वस्मिन्काले दर्भांकुरमात्रवृत्तिस्तन्मात्राहारी मृगैः सार्द्धं सहचरन् सन्नृषिः समाधेस्तपसः भीतेन मघोनाइंद्रेण पंचा॥

अत्रानुगोदं मृगयानिवृत्तस्तरंगवातेन विनीतखेदः रहस्त्वदुत्संगनिषण्णमूर्द्धा स्मरामि वानीरगृहेषु सुप्तः ३५ भ्रूभेदमात्रेण पदान्मघोनः प्रभ्रंशयां यो नहुषं चकार तस्याविलांभः परिशुद्धिहेतोर्भौमो मुनेः स्थानपरिग्रहोयं ३६ त्रेताग्निधूमाग्रमनिंद्यकीर्तेस्तस्येदमाक्रांतविमानमार्गं घ्रात्वा हविर्गंधि रजोविमुक्तः समश्नुते मे लघिमानमात्मा ३७ एतन्मुनेर्मानिनि शातकर्णेः पंचाप्सरो नाम विहारवारि आभाति पर्यंतवनं विदूरान्मेघांतरालक्ष्यमिवेंदुबिंबं ३८ पुरा स दर्भांकुरमात्रवृत्तिश्चरन्मृगैः सार्द्धमृषि १३४

Digitized by Sarayu Foundation Trust, Delhi and eGangotri

नामप्सरसां यौवनं तद्धितार्थेत्यादिना उत्तरपदसमासः तदेव कूटबंधं कपटयंत्रमुपनीतः उन्मादः कूटयंत्रंस्यादित्यमरः किलेत्यैतिह्ये मृगसाहचर्यान्मृग
वदेव बद्ध इति भावः ३९ तस्येति· अंतर्हितसौधभाजः जलांतरगतप्रासादगतस्य तस्य शातकर्णेः अयं प्रसक्तः संततः संगीतमृदंगघोषो वियद्गतः सन् पु
ष्पकस्य चंद्रशालाः शिरोगृहाणि चंद्रशाला शिरोगृहमिति हलायुधः क्षणं प्रतिश्रुद्भिः प्रतिध्वानैः मुखराः ध्वनंतीः करोति स्त्री प्रतिश्रुत् प्रतिध्वाने इत्य
मरः ४० हविरिति· नाम्ना सुतीक्ष्णः सुतीक्ष्णनामा चरितेन दांतः सौम्यः असौ अपरस्तपस्वी एधवतां इंधनवतां काष्ठं दावि धनं त्वेध इत्यमरः चतुर्णां ह
विर्भुजामग्नीनां मध्ये ललाटंतपति इति ललाटंतपः सूर्यः असूर्यललाटयोर्दृशितपोः इति खश्प्रत्ययः अरुर्द्विषेत्यादिना मुमागमः ललाटंतपः सप्तस

समाधिभीतेन किलोपनीतः पंचाप्सरोयौवनकूटबन्धं ३९ तस्यायमंतर्हितसौधभाजः प्रसक्तसंगीतमृदंगघोषः वियद्गतः
पुष्पकचंद्रशालाः क्षणं प्रतिश्रुन्मुखराः करोति ४० हविर्भुजामेधवतां चतुर्णां मध्ये ललाटंतपसप्तसप्तिः असौ तपस्यत्यपरस्त
पस्वी नाम्ना सुतीक्ष्णश्चरितेन दांतः ४१ अमुं सहासप्रहितेक्षणानि व्याजार्धसंदर्शितमेखलानि नालं विकर्तुं जनितेंद्रशंकं सु
रांगनाविभ्रमचेष्टितानि ४२ एषोक्षमालावलयं मृगाणां कंडूयितारं कुशसूचिलावं॥ ४० र्चिः सप्ताश्वः सूर्यो यस्य सततयोक्तः सन् तप
स्यति तपश्चरति कर्मणो रोमंथतपोभ्यां वर्तिचरोरिति क्यङ् तपसः परस्मैपदं वक्तव्यं ४१ अमुमिति· जनितेंद्रशंकं तपसेति शेषः अमुं सुतीक्ष्णं सह
संप्रहितानि ईक्षणानि दृष्टयो येषु तानि व्याजेन केनचिन्मिषेण पुंस्यर्धोर्द्धं समेंशक इत्यमरः अर्द्धमीषत्संदर्शिता मेखला येषु तानि सुरांगनानामिंद्रप्रेषिता
नां विभ्रमाः विलासाः एव चेष्टितानि विकर्तुं चालयितुं अलं समर्थानि न भवंतीति शेषः ४२ एष इति· ऊर्ध्वबाहुरेष सुतीक्ष्णः अक्षमालैव वलयो यस्य तं मृगा
णां कंडूयितारं कंडूयमानं कुशा एव सूचकाः ताः लुनातीति कुशसूचिलावः तं कर्मण्यण् इत्यण् एभिर्विशेषणैर्जयशीलत्वं भूतदयाकर्म हामत्वं च द्योत्यते

Digitized by Sarayu Foundation Trust, Delhi and eGangotri

सव्यादितरं दक्षिणं भुजं मेममसभाजने संमाननिमित्ते निमित्तात्कर्मयोगे सप्तमी इतः मयि प्राध्वं प्रह्वतानुकूलं प्रवंधं प्रयुंक्ते आनुकूल्यार्थे प्राध्वमित्यमरः
अव्ययं चैतत् ४३ वाचंयमत्वादिति· एषः मुनी ख्याः वाचंयच्छतीति वाचंयमो मौनव्रती वाचि यमो व्रत इति खच् प्रत्ययः वाचंयमपुरंदरौ चेति निपातः तस्य
भावस्तस्मान्मम प्रणतिं किंचिन्मूर्द्धः कंपेन प्रतिगृह्य विमानेन व्यवधानं तिरोधानं तस्मान्मुक्तां अपेता ऽपोढमुक्तपतितेत्यादिना पंचमी समासः दृष्टिं पुनः स
हस्रार्चिषि सूर्ये सन्निधत्ते सम्यक् निधत्त इत्यर्थः अन्यथा ऽकर्मकत्वप्रसंगात् ४४ अद इति· शरणे रक्षणे साधुः शरण्यं पावयतीति पावनमदो दृश्यमा
नं तपोवनं आहिताग्नेः शरभंगनाम्नो मुनेः संबंधि यः शरभंगश्चिराय चिरमग्निं चिराय चिररात्राय चिरस्याद्याश्चिरार्थका इत्यमरः समिद्भिः संतर्प्य तर्पयि

सभाजने मे भुजम् ईवार्हः सव्येतरं प्राध्वमितः प्रयुंक्ते ४३ वाचंयमत्वात्प्रणतिं ममैष कंपेन किंचित्प्रतिगृह्य मूर्द्धः दृष्टिं विमान
व्यवधानमुक्तां पुनः सहस्रार्चिषि सन्निधत्ते ४४ अदः शरण्यं शरभंगनाम्नस्तपोवनं पावनमाहिताग्नेः चिराय संतर्प्य समिद्भि
रग्निं यो मंत्रपूतां तनुमप्यहौषीत् ४५ छायाविनीताध्वपरिश्रमेषु भूयिष्ठसंभाव्यफलेष्वमीषु तस्यातिथीनामधुना सपर्या स्थि
तासुपुत्रेष्विव पादपेषु ४६ धारास्वनोद्गारिदरीमुखो ऽसौ शृंगाग्रलग्नांबुदवप्रपंकः बध्नाति मे बंधुरगात्रि चक्षुर्दृप्तः ककुद्मानि

त्वा ततो मंत्रैः पूतां शुद्धां तनुमप्यहौषीत् हुतवान् जुहोतेर्लुङ् ४५ छायेति· अधुनास्मिन्काले तस्य शरभंगस्य संबंधिनां अतिथीनां सपर्या अतिथि
पूजा पूजा नमस्यापचितिः सपर्यार्चार्हणाः समा इत्यमरः छायाभिर्विनीतोपनीतः अध्वपरिश्रमो यैस्तेषु भूयिष्ठानि बहुतमानि संभाव्यानि श्लाघ्या
नि फलानि येषां तेषु अमीषु पादपेषु आश्रमवृक्षेषु सुपुत्रेष्विव स्थिता सुपुत्रैरिव पादपैरनुष्ठीयत इत्यर्थः ४६ धारेति· धारा निर्झराः यद्वा धारया १३५
सांतत्येन स्वनोद्गारि दर्येव मुखं यस्य सः शृंगं शिखरं विषाणं च तस्याग्रे लग्नांबुद एव वप्रपंको वप्रक्रीडासक्तः पंको यस्य सः असौ चित्रकूटः

हेवंधुरगात्रि उन्नतांगि वंधुरं तून्नतानतमित्यमरः दृप्तः ककुद्मान् वृषभ इव मे चक्षुः वध्नाति नान्यासक्तं करोति ४७ एषेति· प्रसन्ना निर्मला स्तिमितो निस्पं
दः प्रवाहो यस्याः सा विदूरस्यांतरस्य मध्यवर्त्यवकाशाभावेन तन्वी दूरदेशवर्त्तित्वात् तनुत्वेन भासमाना मंदाकिनी नाम काचित् चित्रकूटसन्निकटगा ए
षा सरित् नगोपकंठे भूमेः कंठगता मुक्तावलीव भाति अत्र नगस्य शिरसहद्दुपकंठस्य कंठत्वं च गम्यते ४८ अयमिति· गिरेः समीपं अनुगिरं गिरेश्च सेन
कस्येति समासांतष्टच् प्रत्ययः सुजातः तमालोयं दृश्यते शोभनो गंधो यस्य तत्सुगंधं गंधस्येत्वादिना समासान्त इकारादेशः यस्य तमालस्य प्रवालं पल्ल

एषां प्रसन्नस्तिमितप्रवाहा सरिद्विदूरान्तरभावतन्वी मंदाकिनी भाति नगोपकंठे मुक्तावली कंठगतेव भूमेः ४८ अयं सुजातोऽनु
गिरं तमालः प्रवालमादाय सुगंधि यस्य यवांकुरापांडुकपोलशोभी मयाऽवतंसः परिकल्पितस्ते ४९ अनिग्रहत्रासविनीतसत्त्वम
पुष्पलिंगात्फलबंधिवृक्षं वनं तपःसाधनमेतदत्रेराविष्कृतोदग्रतरप्रभावं ५० अत्राभिषेकाय तपोधनानां सप्तर्षिहस्तोद्धृतहेम
पद्मां प्रवर्तयामास किलानुसूया त्रिस्रोतसं त्र्यंबकमौलिमालाम् ५१ वीरासनैर्ध्यानजुषामृषीणाममी समाध्यासितवेदिमध्याः

वमादाय मया ते यवांकुरवदापांडुरे कपोले शोभते यः सोऽवतंसः कर्णावतंसः परिकल्पितः ४९ अनिग्रहेति· अनिग्रहत्रासाः दंडभयरहिताः विनीताः सत्वाः
जंतवो यस्मिन् तत् अपुष्पलिंगात् पुष्पनिमित्तं विनैव फलबंधिनः फलग्राहिणः वृक्षाः यस्मिन् तत् अत एवाविष्कृतोदग्रतरप्रभावमत्रेर्मुनेस्तपसः साधनं वन
मेतत् ५० अत्रेति· अत्र वनेऽनुसूयाऽत्रिपत्नी सप्त च ते ऋषयश्च सप्तर्षयः दिक्संख्ये संज्ञायामिति तत्पुरुषः तेषां हस्तैः उद्धृतानि हेमपद्मानि यस्यास्तां त्र्यंवक
मौलिमालां हरशिरःस्रजं त्रिस्रोतसं भागीरथीं तपोधनानामृषीणां अभिषेकाय स्नानाय प्रवर्त्तयामास प्रवाहयामास किलेत्यैतिह्ये ५१ वीरेति· वीरास
नैः जपसाधनैः ध्यानं जुषंते सेवंते इति ध्यानजुषः तेषां तैरुपविश्य ध्यायतां ऋषीणां संवंधिनः समाध्यासितवेदिमध्याः ॥ ॥

र॰टी॰ इदं वीरासनस्थानीयं अमी शाखिनोपि निर्वातनिष्कंपतया योगाधिरूढा इव ध्यानभाज इव विभांति ध्यायंतो निश्चलांगा भवंति वीरासने वसिष्ठः एकपाद
स॰१३ मथैकस्मिन् विन्यस्योरुणि संस्थितं इतरस्मिंस्तथा चान्यं वीरासनमुदाहृतं ५२ त्वयेति॰ त्वया पः पुरस्तात् पूर्वमुपयाचितः प्रार्थितः तथा रामायणे न्यग्रोधं तमुप
१३६ स्थाय वैदेही वाक्यमब्रवीत् नमस्तेस्तु महावृक्ष पारये न्मे व्रतं पतिं श्यामइति प्रतीतः स वटोयं फलितः सन् ख्यातः ख्याते हृष्टे प्रतीत इत्यमरः सपद्मरागो गा
रुडानां राशिरिव विभाति ५३ क्वचिदित्यादिभिश्चतुर्भिः श्लोकैः प्रयागे गंगायमुनासंगमं वर्णयति हे अनवद्यांगि यमुनातरंगैर्भिन्नप्रवाहा मिश्रौघा गं
गा जान्हवी विभातीति त्वं पश्य क्वे व क्वचित् प्रदेशे प्रभया लिंपंति संदिहंत इति प्रभालेपिभिरिंद्रनीलैरनुविद्धा सह गुंफिता मुक्तामयी यष्टिर्हारावलीव

निर्वातनिष्कंपतया विभांति योगाधिरूढा इव शाखिनोपि ५२ त्वया पुरस्तादुपयाचितो यः सोयं वटः श्याम इति प्रतीतः राशिर्म
णीनामिव गारुडानां सपद्मरागः फलितो विभाति ५३ चतुर्भिः कुलकं क्वचित्प्रभालेपिभिरिंद्रनीलैर्मुक्तामयी यष्टिरिवाऽनुवि
द्धा अन्यत्र माला सितपंकजानामिंदीवरैरुत्खचितांतरेव ५४ क्वचित्खगानां प्रियमानसानां कादंबसंसर्गवतीव पंक्तिः अन्यत्र का
लागुरुदत्तपत्रा भक्तिर्भुवश्चंदनकल्पितेव ५५ क्वचित्प्रभा चांद्रमसी तमोभिश्छायाविलीनैः शबलीकृतेव अन्यत्र शुभ्रा शरदभ्र
लेखा रंध्रेष्विवालक्ष्यनभः प्रदेशा ५६॥ ९ विभाति अन्यत्र प्रदेशे इंदीवरैर्नीलोत्पलैरुत्खचितांतरा सह ग्रंथिता सितपंकजानां पुंडरीकाणां
मालेव विभातीति सर्वत्र संबंधः ५४ क्वचिदिति॰ क्वचित्कादंबसंसर्गवती नीलहंससंसृष्टवती प्रियं मानसं नाम सरो येषां ते वां खगानां राजहंसानां पंक्ति १३६
रिव राजहंसास्तु ते चंचुचरणैर्लोहितैः सिता इत्यमरः अन्यत्र कालागुरुणा दत्तपत्रा रचितमकरिका भुवश्चंदनकल्पिता भक्तिरिव ५५ क्वचिच्छायाभ
सु विलीनैः स्थितैस्तमोभिः शबलीकृता चांद्रमसी प्रभा चंद्रिकेव अन्यत्र रंध्रेषु आलक्ष्यनभः प्रदेशा शुभ्रा शरदभ्रलेखा शरन्मेघपंक्तिरिव ५६ ॥

क्ष्मा१